Digitized by Madhuban Trust, Delhi

चतुर्थं कुसुमम्

॥सामप्रातिशाख्यम्॥

(गणेशपण्डितकृतम् ऊहरहस्यसामलक्षणग्रन्थस्य पुष्पसूत्रस्य व्याख्यारूपम्)

फुल्लपोतम्

A Commentary on Puspasutra of Ganesh Pandit

Phullapotam

Edited by
Dr. Girijaprasad Shadangi (M.A., Ph.D.)
Assistant Professor of Samaveda
Sri Venkateswara Vedic University
Tirupati

Published by
Ranayaneeyasamashodhanapratisthanam
TIRUPATI

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

2013

zed by Madhuban Trust,

फुल्लपोतम्

Phullapotam

Kumar Col. Deoband. In

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थं कुसुमम्

।।सामप्रातिशाख्यम्।।

(गणेशपण्डितकृतम् ऊहरहस्यसामलक्षणग्रन्थस्य पुष्पसूत्रस्य व्याख्यारूपम)

फुल्लपोतम्

A Commentary on Puspasutra of Ganesh Pandit

Phullapotam

Edited
By

Dr. Girijaprasad Shadangi, M.A, Ph.D
Assistant Professor of Samaveda
Sri Venkateswara Vedic University
Tirupati

Published by
Ranayaneeyasamshodhanapratisthanam
TIRUPATI
2013

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Published by
Ranayaneeyasamshodhanapratisthanam
18.01.26/5 B, 1st Cross, Dwraka Nagar, K.T.Road
Tirupati, Andhrapradesh -517507
Email - gpshadangi@rediffmail.com
Mo- 9951051209

First Edition- 2013

Pages-392 + 11 + 49 = 452

Copies- 500

Price Rs- 300.00

(c)All right reserved by the publishers

ISBN-978-93-5087-601-5

Printed by
Printech International
Delhi-95

Books are sold by
Dr Girijaprasad Shadangi
Dept of Samaveda
Sri Venkateswara Vedic University
Alipiri Chandragiri by Pass-Road
TIRUPATI-517502, A.P
Mo- 9951051209, Email-gpshadangi@rediffmail.com

Vidwan Shree Prakash S. Bhat
At- Kolgi, Po- Shiralgi
Siddapur (N.K)-581355, Karnataka
Phone -08389-231172, 7760602377
Email-shreematakolgi@gmail.com

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विषयसूची (CONTENTS)

प्रकाशकीयं वाणी	
पुरोभाषणम्	
ग्रन्थसूची (Bibliography)	
सङ्केताक्षरसूची	
भूमिका (Introduction)	1-49
उहगानम् (Uhaganam)	1-263
दशरात्रपर्व	1-75
संवत्सरपर्व	76-108
एकाहपर्व	109-150
अहीनपर्व	151-189
सत्रपर्व	190-219
प्रायश्चित्तपर्व	220-232
क्षुद्रपर्व	233-263
रहस्यगानम् (Rahasyaganam)	264-327
दशरात्रपर्व	264-274
संवत्सरपर्व	275-285
एकाहपर्व	286-291
अहीनपर्व	292-301
सत्रपर्व	302-304
प्रायश्चित्तपर्व	305-310
क्षुद्रपर्व	311-327
पुष्पसूत्रस्थसूत्राणां सूची	328-392

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रकाशकीयं वाणी

सामवेदसम्बन्धिविषये संशोधनार्थं विशेषतः राणायनीय शाखायाः विषये संशोधनार्थमिदं प्रतिष्ठानं नन्दन संवत्सरस्य आश्वीन शुक्ल दशमी बुधवासरे (24/10/2012 तमे क्रिस्ताब्दे) तिरुपतौ प्रादुरभूत् । राणायनीयशाखाभिमानिभिः स्वयं प्रेरणया सङ्घटितमिदं प्रतिष्ठानमनतिकाले एव कानिचन अपूर्वपुस्तकानि लोकार्पणमकरोत् । तत्रादिमं कुसुमं **गौतमीयापरसूत्रप्रकाशः** नामकं ग्रन्थं गत डिसेम्बर् मासे मध्यप्रदेशस्य उज्जयिन्यां प्रवृत्त अन्ताराष्ट्रीय वैदिकसम्मेलने (04/12/2012) लोकार्पणमकरोदिदं प्रतिष्ठानम् । ग्रन्थोऽयमद्यावधि देवनागरिलिप्या कदापि केनापि मुद्रितन्नासीत् । अस्य ग्रन्थस्य सङ्ग्रहकर्ता प्रतिष्ठानस्य कार्यकर्तृषु अन्यतमः विद्वान् प्रकाश सुब्राय भट्ट महोदयः । तथा धनसहायं देहलीस्थ संस्कृतभारती संस्थायाः पदाधिकारी श्री च.मू.कृष्णशास्त्री महोदयः कृत्वा मुद्रणदायित्वमपि स्वीकृत्य स्वकीये वागर्थ मुद्रणालये मुद्राप्य दत्तवन्तः।

द्वितीयं कुसुमं सामवेदराणायनीयं **वर्गपरिभाषाधारितं वेयगानम्-प्रथमो भागः**, नन्दन संवत्सरस्य पुष्य शुक्ल प्रतिपत् शनिवासरे (12/01/2013) महाराष्ट्रस्य नान्देड प्रान्तस्य श्री दुर्गापाठशालायाः रौप्यमहोत्सवस्य शुभावसरे लोकार्पणमकरोत् । महाराष्ट्र नान्देड प्रान्तस्थ श्री समर्थ सेवा प्रतिष्ठानम् अस्य मुद्रणदायित्वं स्वीकृत्य सकाले मुद्राप्य अदात् । अस्यापि सम्पादनं राणायनीय संशोधना प्रतिष्ठानस्य कार्यकर्तार एवाकुर्वन् ।

तृतीयं कुसुमं सामवेदराणायनीयं **वर्गपरिभाषाधारितं वेयगानम्-द्वितीयो भागः** नन्दन संवत्सरस्य फाल्गुन कृष्ण षष्ठी सोमवासरे (01/04/2013) राणायनीयशाखायाः मूलस्थाने नाम

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होन्नावर मण्डलस्थ हारुरि नामकग्रामे लोकार्पणमकारि । अस्यापि मुद्रणकार्ये धनसहायं देहलीस्थ संस्कृतभारती संस्थाया पदाधिकारी श्री च.मू.कृष्णशास्त्री महोदयः कृत्वा मुद्रणदायित्वमपि स्वीकृत्य स्वकीये वागर्थ मुद्रणालये मुद्राप्य अल्पावधावेव अददत् । अस्य कुसुमस्य सम्पादकाः प्रतिष्ठानस्य कार्यकर्तार एव ।

इदानीं चतुर्थं कुसुमं **फुल्लपोत**नामकं सामवेदस्य ऊहोह्यगानानां लक्षणग्रन्थस्य पुष्पसूत्रस्य व्याख्यात्मकं पुस्तकम्। अस्य ग्रन्थस्य सम्पादकः अस्य प्रतिष्ठानस्य कार्यकर्तृष्वन्यतमः श्री गिरिजाप्रसाद षडङ्गी महोदयः। बहु परिश्रमेणैनं ग्रन्थं सम्पादयामास । अस्य ग्रन्थस्य मुद्रणार्थं धनसहायं देहलीस्थ संस्कृतभारती संस्थायाः पदाधिकारी श्री च.मू.कृष्णशास्त्री महोदयः कृत्वा मुद्रणदायित्वमपि स्वीकृत्य स्वकीये वागर्थ मुद्रणालये मुद्राप्य दत्तवान्।

एवमनतिकाले चत्वारि ग्रन्थकुसुमानि लोकार्पितानि सन्ति राणायनीयसंशोधनाप्रतिष्ठानेन । पञ्चमं कुसुममपि **सामवेदाष्टब्राह्मणानि** नामकं संग्रहणात्मकं पुस्तकं मुद्रणार्थं सिद्धमस्ति । शुद्धप्रतिनिर्माणमस्माकं लक्ष्यम्, तदर्थं महान् श्रमः अनुभूयतेऽस्माभिः । प्रतिष्ठानस्योद्देशस्य सफलतायै प्रयत्नं कृतवद्भ्यः ग्रन्थानां सम्पादकेभ्यः, सम्पादित ग्रन्थानां परिशोधकेभ्यः, तथा ग्रन्थानां मुद्रणे धनसहायं कृतवद्भ्यः सर्वेभ्यः, मुद्रणालयस्थ समस्तकर्मकर्तृभ्यः, प्रतिष्ठानस्यास्य कार्यस्य प्रोत्साहकेभ्यः समस्तसामशाखाभिमानिभ्यः प्रीत्यादरेण कृतज्ञतां समर्पयति राणायनीयसंशोधनाप्रतिष्ठानम् ।

30/08/2013 राणायनीयसंशोधनाप्रतिष्ठानम्
शुक्रवासरः तिरुपति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुरोभाषणम्

अथेदानीं सामवेदोहरहस्यसाम्नां लक्षणनिरूपणार्थं पुष्पसूत्र सामतन्त्रशिक्षाग्रन्थाणामाधारेण गणेशपण्डितकृतं **पुल्लपोत**-नामानमिमं लक्षणग्रन्थं सम्पाद्य संशोध्य च प्राकाश्यमानीयते। इतः पूर्वम् ऊहरहस्यसाम्नां लक्षणनिर्णयार्थम् अजातशत्रुकृतभाष्यं रामकृष्णदीक्षितकृतं फुल्लदीपनाम व्याख्याग्रन्थश्चासीत्।

एवं पुष्पसूत्राणां भाष्यद्वये विद्यमाने सति किं पुनः गणेशपण्डितस्य कृतिरियमिति प्रश्न उदेति। तत्र पूर्वोक्तभाष्यद्वयं सूत्राणां साम्नाञ्च मिथस्समन्वयं भागशः करोति। किन्तु अयं ग्रन्थः एकस्य साम्नः लक्षणनिर्णयार्थम् आवश्यकानि सर्वाण्यपि सूत्राणि एकत्र संयोज्य विवृणोतीति विशेषः। अनयैव रीत्या सर्वेषामूहरहस्यसाम्नां लक्षणनिर्णयः अत्र कृतो वर्तते। अपि च प्राचीनशैल्या प्रतिपादितानां पारिभाषिकशब्दसहितानां पुष्पसूत्र-सामतन्त्रादीनां लक्षणग्रन्थानां पुल्लपोतनामानमिमं ग्रन्थमन्तरेण अवबोधोऽपि दुष्करो भवतीत्यस्य ग्रन्थस्य अन्यत् प्रयोजनम्। ग्रन्थस्यास्य अध्ययनेन अध्येतारः स्वल्पेन प्रयत्नेन सामलक्षणं सम्यगवगन्तुं शक्नुवन्ति।

इतः पूर्वं ग्रन्थोऽयं प्राकाश्यं न नीतः। मूलमातृका तु बरोडास्थ प्राच्यग्रन्थसंरक्षणालये ग्रन्थलिप्यां तालपत्ररूपेणासीत्। अन्यापि मैसूरप्राच्यसंशोधनालये ग्रन्थलिप्यां तालपत्ररूपेण (A-395) आसीदिदानीं नोपलभ्यते। तथैव बेङ्गलूरुस्थानां स्वर्गतानां ब्रह्मश्री नागप्प श्रौती महोदयानां समीपे देवनागरीलिप्यां लिखिता हस्तप्रतिकृतिरेका अवर्तत। एवं दुर्लभप्राये अस्मिन् पुल्लपोतग्रन्थे समग्रतया ऊहरहस्यसाम्नां यद्यपि विवेचनं कृतं तथापि मूलमातृकाग्रन्थः कीटभक्षिततत्वात् खण्डिततत्वाच्च कुत्रचित् स्थलेषु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सम्यङ्नावगम्यत । तथापि एतेषां सर्वेषां ग्रन्थानामाधारेण दुर्लभप्रायभूतोऽयं ग्रन्थः यथामति संशोध्य प्रकाशिता वर्तते। ग्रन्थस्यास्य समग्रावबोधाय भूमिकायां स्वराणां परिचयः, लक्षणग्रन्थानां परिचयः, शोधविषयकज्ञातव्यविषयाः, पुष्पसूत्राणां सूची इतीमे विषयाः विवृताः सन्ति।

आदर्शग्रन्थाः-

1. बरोडास्थ ओरियण्टाल् इन्स्टिट्यूट्- महाराज सय्याजीराव युनिर्वसिटी आफ् बरोडा, प्राच्यमातृकासंरक्षणालयस्य ACC No - 9795 पुल्लपोतम् तालपत्रयुक्तं सम्पूर्णम्।

2. ब्रह्मश्री नागप्प श्रौती महोदयेभ्यः प्राप्ता देवनागरीलिपियुता 1950 क्रिस्ताब्दे लिखिता हस्तप्रतिकृतिः समग्रा ।[1]

बडोदराप्राच्यसंशोधनालयस्य निदेशकेन ग्रन्थस्यास्य मूलप्रतिकृतेः प्रतिकृतिं कारयित्वा सम्प्रेष्य च मम महदुपकारः कृतः । अतः तेभ्यः मम कार्तज्ञ्यं निवेदयामि। मुख्यतया एतत्कार्ये मां नियोज्य धनव्ययेन बडोदरा प्राच्यसंशोधनालयात् तथा ब्रह्मश्री नागप्पश्रौतीमहोदयेभ्यः सकाशात् मातृकाग्रन्थानां प्रतिकृतिमानाय्य महानुत्साहं प्रदत्तेभ्यः श्रीमद्भ्यः रामस्वामी महोदयेभ्यः, एवं त्यागराज महोदयेभ्यश्च हृदयपूर्वकं नमस्कारान् कृतज्ञतां च विनिवेदयामि। एवं अस्मिन्कार्ये साहाय्यं कृत्वा ममोत्साहं प्रवर्धितवद्भ्यः ब्र.श्री वि. गणेशन् श्रौती महोदयेभ्यः, ब्र.श्री रवि श्रौतिभ्यः, डि.जगन्नाथशर्मभ्यः च कृतज्ञताञ्जलीः समर्पयामि। एवं मत्पार्श्वे एव भूत्वा सहकृतवते आयुष्मते सुदर्शनकुलकर्णी महोदयाय तथा मदन्तेवासिभ्यश्च श्रेयांसि वितरामि।

1. इतोपि अस्य ग्रन्थस्य निर्माणे उपयुक्तानि ग्रन्थान्तराणि परामर्शनग्रन्थसूच्यां सूचितानि वर्तन्ते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्य ग्रन्थस्य मुद्रणाय धनसहायं कृतवद्भ्यः श्री च.मू.कृष्णशास्त्री महोदयेभ्यः कृतज्ञतां निवेदयामि। तेषां वेदमाताप्रसादेन आयुरारोग्यैश्वर्यवृद्धिं भवत्विति कामये। ग्रन्थस्यास्य प्रकाशने सश्रद्धं सोत्साहं च मुद्रापितवद्भ्यः देहलिस्थ मुद्रणालय अध्यक्षेभ्यः कार्यकतृभ्यश्च कृतज्ञतां निवेदयामि।

ग्रन्थस्यास्य पुस्तकरूपं कृतवतां सर्वदा मम श्रेयोभिलाषिणां गुरूणां श्री प्रकाश सुब्राय भट्ट महोदयानां पादारविन्दयोः सविनयं प्रणतीः समर्पयामि। सन्दर्भेऽस्मिन् स्वर्गतान् श्री विश्वेश्वरभट्ट महोदयान् परमगुरुवर्यान् अवश्यं स्मरामि। ग्रन्थमिमं पुत्रवत् स्नेहेन विद्यया च माम् वर्द्धितवद्भ्यः स्वर्गतेभ्यः वेदब्रह्मश्री सुब्राय सत्यनारायण भट्ट महोदयेभ्यः, वेदब्रह्मश्री नागप्पश्रौती महोदयेभ्यश्च समर्पयामि। ग्रन्थस्यास्य प्रकाशनरूपः ममायं प्रयत्नः गुरुपरम्परया प्राप्तस्य विद्यासम्प्रदायक्रमस्य रक्षणार्थं च भवतीति भावयामि।

ग्रन्थस्यास्य सङ्कलनं यद्यपि जागरूकतया कृतं तथापि ममाज्ञानवशात् भ्रमवशाच्च दोषाः स्युः। दोषज्ञैः गुणैकपक्षपातिभिः विद्वद्भिः दोषान् परिष्कृत्य अधीतं चेत् अहमनुगृहीतो भवेयमिति भावये।

तिरुपति
30.08.2013

सुधीजनवशंवदः
गिरिजाप्रसाद षडङ्गी

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्रन्थसूची (Bibliography)

1-अक्षरतन्त्रम्- सम्पादकः-म. रामनाथ दीक्षित, मद्रास,1984

2-आर्षेयब्राह्मणम्- सम्पादकः डा. वि आर् शर्मा, केन्द्रिय संस्कृत विद्यापीठम्,1984

3-ऋक्तन्त्रम्- सम्पादकः - डा.सूर्यकान्तः, मेहरचान्द लक्ष्मणदास, दिल्ली - 1970

4- ऋग्वेद प्रातिशाख्यम्- सम्पादकः- डॉ वीरेन्द्र कुमार शर्मा, चौखम्बा प्रतिष्ठानम्, दिल्ली - 1999

5-द्राह्यायणश्रौतसूत्रम्- सम्पादकः -रामनाथ दीक्षितः, मद्रास, 1982

6-नारदीयशिक्षा- आचार्य कौण्डिन्यायनः, चौखम्बा विद्याभवन , वाराणसी,2008

7-निदानसूत्रम्- के. एन. भट्नागर,मेहरचान्द लक्ष्मणदास, दिल्ली-1971

8-पञ्चविधसूत्र एवं मात्रालक्षणम्- सम्पादकः- वि. आर्. शर्मा, राष्ट्रिय संस्कृत विद्यापीठम्, तिरुपति, 1970

9-पुष्पसूत्रम् प्रथमोभागः- सम्पादकः- डा वि. आर् शर्मा, स्तुट्टागर्त, नेपाल- 1985

10-पुष्पसूत्रम् द्वितीयोभागः- सम्पादकः- डा वि. आर् शर्मा, स्तुट्टागर्त, नेपाल- 1985

11- पुष्पसूत्रम्- म. रामनाथदीश्रितः, मद्रासः, 1989

12-पुष्पसूत्रं प्रथमोभागः- जि, हेच्. तरलेकर, इ.गा.रा.क. के.के.मू.शा, नईदिल्ली -2001

13-पुष्पसूत्रं द्वितीयोभागः- जि, हेच्. तरलेकर, इ.गा.रा.क. के.के.मू.शा, नईदिल्ली -2001

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

14-पुल्लपोतः - तालपत्रम्, वरोडा लाइब्रेरी, गुजरात्

15-पुल्लपोतम्- नागप्प श्रौती, हस्तप्रतिकृतिम्, वैङ्गलूर, 1950

16-वाजसनेयीप्रातिशाख्यम्- डा वीरेन्द्रकुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली-1987

17-प्रतिहारसूत्रम्- सम्पादकः- डा. वि. आर्. शर्मा, राष्ट्रियसंस्कृत विद्यापीठम्, तिरुपति-1973

18-सामतन्त्रम्- सम्पादकः- रामनाथ दीक्षितः, बनारसहिन्दू विश्वविद्यालयः, 1961

19- सामधारणलक्षणम्- टि. एन् मकरभूषणम्, वेदरक्षणनिधिट्रष्ट, चेन्नई, 1998

20- सामवेद ऊहरहस्यगानम्-सम्पादकः- मायूरम् एम्. रामनाथ दीक्षितः, मद्रासः,1987

21- सामसारसर्वस्वम्- सम्पादकः,म. रामनाथदीक्षितः, मद्रास, 1972

22- सामवेदार्षेयदीपः- वि. आर्. शर्मा, केन्द्रियसंस्कृतविद्यापीठम्, तिरुपति,1967

23- सामवेदपरिचयः- द्राह्यायणप्रतिष्ठानम्, वैङ्गलूर.1994

24- सामवेदीयः उत्तरार्चिकः पदपाठश्च (ऋक्तन्त्रम्) - म. रामनाथ दीक्षितः, मद्रासः, 1982

25. सामवेद संहिता - सम्पादकः-पं. श्रीपाद दामोदर सातवळेकर, स्वाध्यायमण्डल, पारडी, गुजरात, 1956

26. त्रयी परिचयः - सत्यव्रतसामश्रमी, कलकत्ता, 1918

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सङ्केताक्षरसूची
ABBREVIATIONS

अ.त	=	अक्षरतन्त्रम्
ऋ. प्रा	=	ऋग्वेदप्रातिशाख्यम्
ऋ.त	=	ऋक्तन्त्रम्
ग्रा.गे.गा	=	ग्रामगेयगानम्
द्रा. श्रौ. सू	=	द्राह्यायणश्रौतसूत्रम्
ना. शि	=	नारदीयशिक्षा
नि.सू	=	निदानसूत्रम्
पा.व्या	=	पाणिनीयव्याकरणम्
पु. सू .म	=	पुष्पसूत्रम् मद्रासप्रति
पु. सू.	=	पुष्पसूत्रम्
ल.ऋ.त.सं	=	लघुऋक्तन्त्रसंग्रहः
वा. प्रा	=	वाजसनेयी प्रातिशाख्यम्
सा. त	=	सामतन्त्रम्
सा.त.भू	=	सामतन्त्रभूमिका
सा. वे. ऊ. र.गा	=	सामवेद ऊह रहस्यगानम्
सा. सं	=	सामवेदसंहिता
सा. सा. स	=	सामसारसर्वस्वम्
सा.वे.प	=	सामवेदपरिचयः
मा.ल	=	मात्रालक्षणम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूमिका

वेदवेदार्थयोस्तत्वमशेषं येन बोधितम्।
सर्वज्ञमीश्वरं वन्दे विश्वात्मानं सदाशिवम्।।

विदिततरमेव चतुर्षु वेदेषु सामवेदः अन्यतमः इति, सम्प्रति कौथुमराणायनीजैमिनी शाखाभिः अलङ्कृतस्सन् बोभवीतीति च। वेदशाखानां रक्षणाय विविधानां वेदाङ्गानां नाना शास्त्राणां च रचना प्राचीनकालादेव प्रचलति। कालस्य कुटिलगत्या बहुषु ग्रन्थेषु नष्टेषु सत्सु इदानीं केचन मूर्धन्यग्रन्था एव विद्यन्ते । तत्र सामवेदमन्त्राणां साम्नां च लक्षणनिरूपणार्थं बहवो ग्रन्थाः प्रणीताः । तेषु पुष्पसूत्रमन्यतमम्। ग्रन्थोऽयं वररुचिना विरचित इति प्रसिद्धिः । अस्य पुल्लदीपादयः नैके व्याख्याः सन्ति, तेष्वन्यतमा पुल्लपोतव्याख्या । गणेशपण्डितेन विरचितेऽस्मिन् व्याख्याग्रन्थे 'आमहीयव'मारभ्य ऊहरहस्यस्थानां सर्वेषां साम्नां प्रत्येकं विषयमधिकृत्य एकैकस्मिन् साम्नि यावन्ति सूत्राणि प्रवर्तन्ते तावतां समन्वयः क्रियते ।

पुष्पसूत्रम् -

ग्रन्थस्यास्य कर्ता महामुनिः "वररुचिः" । इदं च सूत्रं ऊहरहस्ययोः लक्षणात्मकं ग्रन्थम्। वररुचिकृतमिति प्राचीन ग्रन्थेषु दृश्यते। औदव्रजिकृतिरिति च केचनाभिप्रयन्ति। पुष्पर्षि इत्यन्ये। अस्याजातशत्रु भट्टोपाध्याय व्याख्याता। व्याख्यानं चातिगम्भीर-मर्थपूर्णयुतं च वर्तते। रामकृष्ण दीक्षितः नानाभाइ इति नाम्ना विस्तृततया व्याख्यां कृतवान्। तत्र सूत्राणां प्रत्येकमुदाहरण प्रत्युदाहरणानि विशदतया विद्यन्ते। उत्तरदेशीयः शिवराम इति कश्चन व्याख्याकारः अस्य विद्यते इति श्रूयते।

अजातशत्रुकृतभाष्यं, श्रीलक्ष्मणशास्त्रिमहाभागाः सरस्वती-भवनस्थमादर्शग्रन्थमवलम्ब्य सम्पादयामासुः। इममेव ग्रन्थं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रोमन्लिप्यां जर्मनीभाषानुवादेन साकं 1908 तमे क्रिष्ताब्दे रिचर्ड. साइमन् (Richard Simon) महाभागः सम्पादयामास।

अस्मिन् पुष्पसूत्रे दशप्रपाठकाः, एकैकस्मिन् प्रपाठके प्रायशः दशखण्डाश्च सन्ति। एकोनत्रिंशदुत्तरशतं खण्डा विलसन्त्यत्र। 3404 सूत्राणि विद्यन्ते। प्रथमे द्वितीये च प्रपाठके ऊहरहस्ययोः साम्नां क्रमेण आर्चिकं, नामधेयं च व्यनक्ति। उच्चामहीपुनारवजये प्रत्वौशनं कयादेव्यमित्यादिना। तृतीये चतुर्थे च प्रपाठके तालव्याक्षराणि यदा वर्धन्ते तदा आयिभावं प्राप्नुवन्ति। यदि न वर्धन्ते तदा प्रकृतिभावः। एवमुत्सर्गविधिं दर्शयित्वाऽनन्तरं अपवादान् बहुविधान् व्यनक्ति। यथा तालव्यमायियद्वृद्धम् अवृद्धं प्रकृति ए इ ऐ ई इत्येतानि-आयिप्राप्तमोयि भवति हि शब्द एवाहिसौभरामहीयवयोः इत्यादिना। तदनन्तरं षड्भिः प्रपाठकैः षोडशभावान्दर्शयति। आहत्य पुष्पसूत्रे अष्टादशभावाः प्रकीर्त्यन्ते। ते यथा -

1.आयिभावः -तालव्यामायियद्वृद्धम्- उच्चाताऽ3इजातमन्धसाः।

2.प्रकृतिभावः- अवृद्धं प्रकृति -यौधादेवस्तावे, देऽ3वो ।

3.वृद्धभावः- सौभराभीवर्ततजयानां वृद्धं तुरीयम् - सौभरे, वया ऽ3मूऽ3त्वामपूर्वियोवा ।

4.अवृद्धभावः- अपीयूवा जेतींषि..प्रत्ना ऽ31म्। पीऽ3यू ।

5.स्तोभगतागतम्- अगतिः स्तोभस्य स्वरे प्रत्यये सन्धौ - औहोअ ग्नेविवस्वदुषसाऽ3ए (बृहत्साम)। गतिर्विरते - अस्यप्रत्नाऽ3म्। हौ ऽ3होऽ31इ (धुरासाकमश्वम्)।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2 0 1 20 10 2 1
6.उच्चनीचम्- वादौमन्ते नीचैः पुनाप्रत्नं ...पुनानस्सोमधारया

1 0 2 0
(समन्तम्) अनिन्द्रन्तवाऽत्वारं पर्यां प्रान्त्ययोः इन्द्रँविश्वाअवी वृधन् (आष्टादंष्ट्रम्)।

7.सन्धिवद्गानम्- मदश्शब्दः प्रथमस्वरः पवस्वशङ्कुद्वितीयायां -

1 2 10 1
म हि द्यु क्षा। एऽ2। तमाः। मदो।

3 2 4 5
8.पदवद्गानम्- अःकारोवृद्धः पदगीतः- पुरोऽ3हाइताः।

9.अत्वम्- आकारोऽत्वम्। पाशब्दः प्रकाव्यायां पार्थवाराहकुत्स

2 1 2 3 4 5
रथीयादिषु। शुचिब। धुःपवकाः।

10.आर्भावः- वृद्धमृवर्णसर्वमार्भवति षकार स्पर्शयोः प्रत्यययोः

1
घ्नन्ताः काऽ23ष्र्णाम्।

11.विश्लेषः- ऋचि प्रश्लिष्टाः स्वरसन्धयः पादमध्ये साम्नि विवृताये तान्वक्ष्यामः। मह्वेऽवस इमाउवायां वारदेव्यरथबृहत्सु।

1 0 0 0 0 2
अयँवामह्वेअवसेशचीवा 34 । वारवन्तीयम्।

2 1 0 2 10 20 1 0 2 0 1 2 1
12.प्रश्लेषः-श्रुध्येत प्रश्लेषः-अयँवामह्वेवसेशचीवसूविशँविशँहि, श्रुध्यम्।

13.सङ्कृष्टम्- यस्संयोगोयवान्तः क्वचित्संकृष्टः क्वचिद्विकृष्टः

30 2
तत्र सङ्कृष्टग्रहणम्। न्यर्यस्साहीयपर्णवर्णमित्रविलम्वेषु। एना34 ।

0 0
विश्वान्यर्यआ -सत्रासाहीयम्।

20 0 0 2
14.विकृष्टम्- नैडे-एनाविश्वानिअर्याऽ3आ।

15.लोपः- आइः कारस्य भे स्वरे प्रत्यये ग्रहणैः विसर्गलोपः।

0 10
स्थाभिर्यस्ते सुरूपे। व्यञ्जनमपराङ्गं विरामे लुप्यते। सूपस्थाभाऽइ,

1 2 0 1 2 1
मा। हिष्ठोमात्सोदन्ध, व्यञ्जनलोपः -वामदेव्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

16.अतिहारः- अवृद्धादिपदान्तात्स्वरे परे यकारो व्यवधीयते । उपदान्ताच्चवकारोविकर्षे सर्वत्र। तत्र चालोपसन्धौ विरते लोपः।

अबोधिया- त्रिवरुथँसुवस्तयाइ।

17.आभावः- वृद्धमन्तः पदे तालव्यमा भवति हादौ स्तोभे प्रत्यये।

प्रतिभागं - नदाऽ3हाऽ3इ।

18.विकारः- विकारा हि प्रत्यक्षपरोक्षादयः। दीर्घकर्षणस्य वृद्धिः।

पप्रीऽ2म्वयम्ममृतम्, प्रतिभागन्नदीऽ2धिमः।

अन्तिमखण्डद्वयं प्रस्तावभक्तिप्रतिपादकम्। अथोहगीतीनां प्रस्तावोद्देशः इत्यारभ्य प्रस्ताव्येवासन्तनिनः इति पूर्यते। प्रस्तावभक्तिः कुत्रचित् पादशः कुत्रचिदक्षरशः। वान्ता जारान्ता च कुत्रचित् हाउकारान्ता कुत्रचित् । कुत्रचित्साम्नि प्रस्तावद्वयं । कुत्रचित्प्रस्ताव एव नास्ति इत्यादि विषयाः प्रतिपादिताः।[1]

पुल्लपोतम्

पुल्लपोतग्रन्थस्य कर्ता "गणेशपण्डितः"। अत्र आमहीयवमारभ्य ऊहरहस्यास्थानां सर्वेषां साम्नां प्रत्येकं विषयीकृत्य एकैकस्मिन् साम्नि यावन्ति सूत्राणि प्रवर्तन्ते तावतां समन्वयः क्रियते। इदं व्युत्पत्सूनां महते उपकाराय भवति। ग्रन्थस्यास्यारम्भः-

"वन्दे वररुचिं नित्यमूहाब्धेः पारदृश्वनम्।
पोतो विनिर्मितो येन फुल्लसूत्रशतैरलम्।।
नमोऽस्तु नीलग्रीवाय नमो रामानुजाय च।
नमो नन्दकुमाराय नमो गोविन्दयज्वने।।
निमज्जतामूहमहाम्बुराशौ उत्तारहेतोः कृपया गणेशः।
आदाय फुल्लान्यपवादसूत्राण्याख्यादिभावेषु करोति पोतम्।।"

सा.सा.स पृ-131-135

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथोहरहस्ययोः क्रत्वर्थमधीतानां पञ्चचत्वारिंशदुत्तराधिक-सहस्रसंख्याकानां आमहीयवरथन्तरादीनां साम्नां ऊहगाने योनिवत्स्वरा स्तोभाभ्यासविरामाश्च योनिवदुत्तरयोर्गीतिर्यद्योन्यां गायति तदुत्तरयोर्गायेदित्यादि सूत्रे योनिवत् स्तोभाभ्यासविरामै-रूहाध्ययने प्राप्ते प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनेषु पञ्चभक्तिषु वररुचेः फुल्लसूत्रे आइभावाद्यष्टादशभावेषु यानि सूत्राण्यपवादत्वे-नाधीतानि तानि यथामतिश्रुतं मुहुर्मुहुः विमृश्य सामगानां सम्यगवबोधनार्थमस्माभिः प्रतिस्तोत्रं गृह्यते।।

"फुल्लपङ्कजबाधतेक्षणं वासवाद्यखिलदेवपूजितम्।
अन्तरायतिमिरप्रभाकरं हस्तिराजमुखमाश्रये निशम्।।"
श्री गणेशपण्डितकृतं फुल्लपोतं समाप्तम्।।
इति ग्रन्थस्यास्य समापनं दृश्यते।

संज्ञा-अर्थः

[1]वर्णोत्पत्यनन्तरं मूर्ध्नि प्रतिघातान्निवृत्ते प्राणे जायन्त इति बाह्या उच्यन्ते।

विवारः- वायुना कण्ठे अभिहन्यमाने गलविलस्य विकासाद् विवारः।

संवारः-तत्सङ्कोचात् संवारः।

नादः- संवृते गलबिलेऽव्यक्तः शब्दो नादः।

श्वासः- विवृते श्वासः।

घोषो- घण्टानिह्नादवत् स्थानाभिघातगे ध्वनौ नादोऽनुप्रतीयते, तदा नादध्वनिसंयोगाद् घोषो जायते।

अघोषः- यदा श्वासोऽनुप्रदीयते, तदा श्वासध्वनिसंयोगाद् अघोषः।

महाप्राणः- महति वायौ महाप्राणः।

अल्पप्राणः- अल्पे वायौ अल्पप्राणः।

1.व्या. सि. सु . पृ. 226

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उदात्तः- यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति तमुदात्तमाचक्षते।

अनुदात्तः- यदा तु मन्दः भवति तमनुदात्तमाचक्षते।

स्वरितः- उदात्तानुदात्तसंनिकर्षात् स्वरितगुण इति ।

विकारः- अग्ने इत्यस्य ओग्नायि इति।

विश्लेषणम्- वीतये इत्यस्य वोयितोयाइ इति।

विकर्षणम्- ये इत्यस्य याऽ23यि इति।

अभ्यासः- पुनः पुनरुच्चारो यथा तो^{1}याऽ2यि। तो^{1}याऽ2यि इति।

विरामः- गृणानोहव्यदातये इत्यस्य गृणानोह। व्यदातये इति। गृणानोह इत्यस्य पदान्तत्वाभावेपि गानसौकर्यार्थं शब्दमध्य एव विरामादस्य विरामसंज्ञा भवति।

स्तोभः- ऋग्विलक्षणो वर्णो यथा औहोवा। हाउ इत्यादि।।

सामस्वराः-

सामवेदे ऋचि मुख्यतया स्वरत्रयाणां व्यवहारः क्रियते - यथा - उदात्तः, अनुदात्तः, स्वरितः इति। तथैव सामगाने सप्तस्वराणा-मुपयोगः क्रियते ते तु- क्रुष्ट, प्रथमः, द्वितीयः, तृतीयः, चतुर्थः, मन्द्रः, अतिस्वार्यः इति। छन्दोगा यत्र विरम्य पठन्ति तत्पर्वेति परिभाषाकार आह। तच्च पर्व द्विविधम्- एकस्वरमनेकस्वरं चेति। यस्मिन्पर्वण्येक एव स्वरो वर्तते तदेकस्वरं पर्व। तत् षड्विधं भवति।

अनेकस्वरं त्रिविधम्- अनुलोमगीतं प्रतिलोमगीतमुभयविधगीतं चेति।

(1) अनुलोमगीतम्- तत्रावरोहक्रमेण गानमनुलोमगीतं भवति। अर्थादुच्चादि नीचान्तम्।[1]

यथा द्वयोः स्वरयोः- आ^{1}न्धा^{2}ः, ए^{2}ऽ3, हँ^{3}ऽ4, जा^{4}रा^{5} इति ।

1.सा.त.भू पृ-13

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 2 2 3 4 50
त्रयाणां स्वराणाम्- अग्नायेऽ3, त्याऽ34म्, प्रत्यग्ने इति ।

1 2 3 4 5
चतुर्णां स्वराणाम्- ताऽ234म्, ऊतएकाम् इति ।

1
पञ्चानां स्वराणाम्- ओऽ2345इ इति ।

यत्र प्रथमात् द्वितीयो भवति तस्यैव संज्ञान्तरं निघात इति।

(2) प्रतिलोमगीतम्- [1]तर्जन्याघः पतन्युच्चात् सन्निघात इतीरितः इति । विपरीतगीतं प्रतिलोमगीतं भवति। आरोहक्रमेण नीचादुच्चान्तं गानम्। यथा -

2 1 30 2 4 5 4
द्वयोः स्वरयोः - नन्दाइ-एहिया, हाऽ3-पुरु इति।

3 0 2 1
त्रयाणां स्वराणाम्- नुषजना इति ।

5 0 30 2 1
चतुर्णां स्वराणाम्- सहोवानन्ता इति।

अत्रापि द्वितीयादि प्रथमान्तस्योद्धात इति संज्ञान्तरम्। "तर्जनीतः समुक्षिप्त उद्धातः परिकीर्तितः" इति।

(3) उभयविधगीतं द्विविधम्-

1 2 1 2 3 2 40 5 4 1 3 2 1
(1) उच्चाद्युच्चान्तम्- वाइश्पाताइ, हँसिया, प्रेष्ठँवाः, चाऽ2दक्षसाइ।

20 1 20 3 2 50 4 2 4 50
(2) नीचादि नीचानम्-ग्नेमहोभिः, प्रगोऽ3, दूताऽ3म्वोऽ3विश्ववे दसाम्।

अत्र च केषांचित्पर्वणां अन्धा इत्यादि सूत्रैः संज्ञा क्रियन्ते।

1
विस्वरः- अत्रैक अव स्वरः यदि स्वरान्तरं प्राप्नोति तदा तस्य विस्वर इति संज्ञा। यथा - ओऽ2345इ इत्यत्रौकारः । प्रथमस्वरस्सन्मन्द्रान्तं कृष्ट इति विस्वरः। विस्वरमक्षरं स्वरे स्वरे त्रिमात्रं भवति ।

1-सा.सा.पृ-8

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मात्रालक्षणग्रन्थप्रतिपादितम् प्रत्युक्रमातिक्रमकर्षणस्वारम्।

प्रत्युत्क्रमगीतं नवविधं भवति-

3 2 4
(1) अतिस्वार्यः मन्द्रं प्रत्युत्क्रामति- हिराऽ3साऽ5दाऽ656म्।।

5 0 0 5
(2) मन्द्रश्चतुर्थं प्रत्युत्क्रामति-तरोभिर्वोविदाऽ4द्वासूम्।।

4 3
(3) चतुर्थस्तृतीयं प्रत्युत्क्रामति-यज्ञाऽ5य।।

3 0 2 1
(4) तृतीयो द्वितीयं प्रत्युत्क्रामति-नुषेजना ।।

2 10
(5) द्वितीयः प्रथमं प्रत्युत्क्रामति- वृत्राजङ्घनात्।।

5 3 2
(6) मन्द्रश्चतुर्थमतिक्रम्य तृतीयं प्रत्युत्क्रामति- नरमोइ।।

4 5
(7) मन्द्रश्चतुर्थतृतीयावतिक्रम्य द्वितीयं प्रत्युत्क्रामति- अभिप्रियाऽ2।।

3 2
(8) तृतीयोद्वितीयमतिक्रम्य प्रथमं प्रत्युत्क्रामति- पुनाऽ31।।

1
(9) मन्द्रः चतुर्थतृतीयद्वितीयानतिक्रम्य प्रथमं प्रत्युत्क्रामतिः-ईऽ5

10 20 30 2
ही हौहीहौहिं ।।

अस्यैव नु इति नामान्तरम्।

अतिक्रमः- अतिक्रमश्चतुर्विधः । अतिक्रमो नाम अवरोहणगीतौ स्वरः क्रमेणोपनतं स्वरान्तरं विहाय ततः पराचीनं स्वरं प्राप्नोतीत्यर्थः।

1
तथाहि ओऽ2345इ इत्यत्र प्रथमस्वर ओकारः क्रमेण द्वितीयादीन्स्वरान्प्राप्नोति। यदा क्रमागतं स्वरमतिक्रम्य प्राप्नोति तदातिक्रमः।

11
(1) क्रुष्टः प्रथममतिक्रम्य द्वितीयं प्राप्नोति-ऊऽ2इति (ग्रा.7.6.284.2)। तदयं "क्रुष्टां जिमिगोः"[1] इत्यनेन प्रथमस्वरातिक्रमः प्रदर्शितः।

1 - सा.त-405

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(2) प्रथमो द्वितीयमतिक्रम्य तृतीयं प्राप्नोति- नार्केसुपार्णमुपया
(10 0 — नार्के)
त्पतन्ताम्। मासीऽ3या॥ अत्र सीकारोपरि नमनस्वरः। नमन-
(3 2 1 — त्पतन्ताम्; 1 नू 2 — मासीऽ3या)
स्वोरच्चारणकाले तं स्वरं तर्जन्यधोभागमारभ्याग्रं प्राप्याकाशं क्रमेण लब्ध्वा तृतीयस्वरे पतन्नङ्गुष्ठः प्रतिपादयति। ततश्च नमनं प्रथमस्वर एव भवति। अत एव परिभाषाकारः नमनस्वरेणाऽऽरब्धानां पर्वणां गिगीगुगूगे इति स्वरसंज्ञां चकार। प्रतिज्ञातं च "कवर्गः प्रथमस्वराणां तदादीनां च पर्वणां संज्ञे"[1]ति॥

(3)तृतीयश्चतुर्थमतिक्रामति-यज्ञाऽ5य।(ग्रा.1.4.35.4)वाऽ2र्तोऽ35हाइ।
(4 3 — यज्ञा; 1 — वा; 5 — हाइ)

(4) प्रथमो द्वितीयतृतीयचतुर्थानतिक्रम्य मन्द्रं प्राप्नोति-ईऽ5हीहीही
(1 10 20 — हीहीही)
हीहि ॥ (आ.गा.181)
(30 2 — हीहि)

कर्षणं पञ्चविधम्

1.आद्वितीयकर्षणम्- स्थूऽ2।बोधाऽ2बोधा (ग्रा.1.2.15.1)॥
(1 — स्थू; 1 — बो)

2.आतृतीयकर्षणम्- आऽ23।आऽ23इन्द्रा (ग्रा.7.5.275.2)॥
(1 — आ; 1 — आ; 2 — द्रा)

3.आचतुर्थकर्षणम्-होऽ234र्तियाः।न्माऽ234भाइ (ग्रा.2.8.87.1)॥
(1 — हो; 1 — न्मा)

4.आपञ्चमकर्षणम्- औऽ2345इ (ग्रा.1.1.3.1)॥
(1 — औ)

5.आमन्द्रकर्षणम् - इदाऽ6मे ।त्वंत्वाऽ6मे (ग्रा.2.4.42.2)
(5 — इ; 5 — मे; 5. — त्वं; 5 — मे)

द्वितीयः यदि तृतीयं प्राप्नोति तदा "प्रणत"मिति संज्ञा॥

स एव यदि चतुर्थान्तं कृष्यते- ज्योताऽ34इति । तृतीयो यदा कृष्यते तदा तेषां संज्ञा नोपलभ्यते।
(30 2 — ज्योता)

1 - सा.प.पृ-17

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वारस्त्रिविधः

प्रथमादिर्द्वितीयादिस्तृतीयादिरिति। अस्य सम्प्रसारणमिति संज्ञा।

(1) प्रथमादिः- किंनेऽ2345।।

(2) द्वितीयादिः- वाऽ345।।

(3) तृतीयादिः- हँऽ2345।।

मात्रालक्षणे विनतादीनां स्वरुपमेवमभिहितम्-

[1]विनतम्- प्रथमादिर्द्वीतीयान्तम्-अग्निर्नोऽ2।

विनतस्योपरि वि इति संज्ञा क्रियतेस्य "मिन्" इति संज्ञा।।

प्रणतम्- द्वितीयादिस्तृतीयान्तम्-प्रणेताऽ3।।

उत्स्वरितम्- चतुर्थादिर्मन्द्रान्तम्- मनुष्येऽ5भिरग्निः।।

अभिगीतम्- द्वितीयादिः प्रथमान्तम्- स्तोमाँ रुद्राऽ23या।।

नमनम्- ओमोऽ3वा।।

प्रेङ्खो द्विविधः - प्रथमादिः- तोयाऽ2इ। द्वितीयादिः- मतोऽ2।।

यत्र बहुषु पर्वसु स्वरा विवक्षितास्ते सङ्घातस्वराः इति कथ्यन्ते।।

अत्र संघातस्वराणां नामानि सोदाहरणं दीयते।

(1) अक्रेसङ्घातः - विधर्मान्।

(2) अरसङ्घातः-अराऽ34म्। अश्वाय।।

(3) आत्वसङ्घातः - आत्वासहा। स्त्रमाशतम्। आऽ2इहियाऽ234हाइ।

(4) इष्टावत्सङ्घातः- इ ष्टाहोत्रा। आसृक्षाऽ234ता।।

(5) उदुह्यसङ्घातः- उदोवाहाइ। त्रिः।।

1.सा.त.भू.पृ-17

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 अ नृ 2
(6) ऊर्मिसङ्घातः- ऊर्मिरिवाऽ2। ईऽ3या।।

304 50 3 2 3 5
(7) एदुसङ्घातः- एदुमधीः। मदाऽ32इन्ताऽ234राम्।।

2 0 1 अ 2 30 2
(8) गौरसङ्घातः- गौरोअऽ3पाकृतम्। ओऽ34। हाहोइ।

40 0 3 4 5 2 3 5
(9) णीथसङ्घातः- णीथाअतिथिम्। वासूराऽ234ग्नाइः।

20 1
(10) णीहँसिंसङ्घातः- णीहँसिया।।

1 2
(11) तत्र सङ्घातः- तत्रापूषाऽ3।।

2 1 3 2
(12) तवाहँसङ्घातः- दिवाऔऽ3हो।।

5 40 0 5 4 50 4 5
(13) तिस्रसङ्घातः- तिस्रोवाचउदीरतो। वाहाइ।।

10 2 नृ 2
(14) त्वावतः सङ्घातः-त्वावतोऽ3। होऽ3होऽ31इ।।

1 3 50 0 2 10 3 111
(15) दधसङ्घातः-दाऽ2धाऽ234औहोवा। नओजसाऽ2345।।

2
(16) दस्मसङ्घातः-दाऽ32साम्।।

3 4 30 4 5 4 50 2 2 4
(17) द्रप्ससङ्घातः-अवद्रप्सोअँशुमतीम्। एऽ3। औऽ3होऽ5वा।।

1 2 1 2 1
(18) द्रुक्सङ्घातः-द्रुकाइ। षूऽ3महिषो।।

20 111
(19) धियसङ्घातः-नोधियाऽ32उवाऽ345।।

3 0 4 2 4 5
(20) परिसङ्घातः - पाऽ5रि। स्वानाऽ3साऽ3इन्दवः।

3 4 5 0 0 2 3 5
(21) प्रनस्सङ्घातः-प्रनइन्दोऐ। हीऐहीऽ234या।।

1 वि0 1 0 2 1
(22) प्रप्रसङ्घातः- प्रप्राऽ2वयममृतम्। जाताऽ23वा। हिम्माइ।।

1 2 0 1 1
(23) बण्मसङ्घातः-एवाण्मा। हाँ अस्सिसू ऽ2रिया।।

2 1 नृ
(24) मतौसङ्घातः- मतौऽ2। हुवाइ। औऽ3हो2345वाऽ656।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(25) यज्ञसङ्घातः- यज्ञाऽ5य। ज्ञाऽ3वोऽ3ग्नायाइ।।

(26) यशसङ्घातः- यशा असि।

(27) युवसङ्घातः- युवाऽ3। साऽ234ख्रा। उहुवाऽ6हाउ। वा।।

(28) विभ्वीसङ्घातः- विभ्वीराऽ2तिश्शतक्रतो। शताऽ2क्राताउ।।

(29) विश्वसङ्घातः- वाइश्ववा। रप्रचाइताः। विश्वाऽ2इदिन्द्राऽ2।।

(30) विष्णुसङ्घातः- विष्णूऽ2। विचक्राऽ234माइ।।

(31) वीतसङ्घातः- अयावीता। औहोवा। औहोऽ2345।

(32) वृषासङ्घातः- वृषापावाऽ23। हौहोइ। औऽ3होऽ2345।।

(33) श्येनसङ्घातः- श्याइनोनाऽ3योऽ3। नाइमाऽ23हाऽ343इ।
साऽ234दोऽ6हाइ।।

(34) सत्यसङ्घातः- सत्यमित्थावृ। षाऽ5इदसाइ।।

(35) सोमसङ्घातः- होइ। होइ। सोमायवचाउच्याताऽ2इ।।

(36) सहसङ्घातः- सहस्रेणावाइवाऽ3शा। हिम्मायेऽ3।।

(37) स्तुषे सङ्घातः- स्तुषाइमित्राऽ3म्। इवाऽ2प्राऽ234याम्।।

(38) होर्तियासङ्घातः- होऽ234र्तियाः।।

(39) द्यौसङ्घातः- एषब्रह्मौहो। यात्र्त्वियाः।।

सामतन्त्रे प्रतिपादिता चतुस्त्रिंशद्भावाः प्रदर्श्यन्ते।[1]

1. सन्ध्यगीतम्- प्रति + अस्मै = प्रत्यस्मै एवमेव सामसु गानम्

1-सा.त.भू.पृ-37

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रत्यस्मै इति एवं प्रत्यग्ने आदयः।

2.ह्रस्वभावः- देवी + एतु देव्येतु इति ऋक्पदस्य गीत्यां प्रादाइवीये इति। अत्र विकर्षे वी शब्दस्य दीर्घस्य ह्रस्वभावः। एवं शिप्री - अन्धसः। इत्यत्रेकारस्य ह्रस्वभावः।

3.विकर्षभावः- वि + अञ्जते इत्येवमादौ [1]"अन्तस्थामि"त्यनेन सन्धौ ऋचि व्यञ्जते इति निष्पन्नस्य पदस्य गीत्यां वियञ्जते इति रूपसिद्धिः।

4.उद्घातः- ऋचि नीचस्वरस्य गीतावुच्चीभावः। सु- अपत्यस्य इत्यत्र नीचानां सु अप शब्दान्तं स्वपत्यं इति साम्नि उच्चस्वरभावः।

5.स्वरितभावः- स्वरितस्य उच्चस्थत्वेऽपि नीचीभावः । मनुष्ये ऽ5भिरग्निः इति। अस्य उत्स्वरितमिति संज्ञा ।।

6.आइभावः-योजान्विन्द्र इत्यत्रेकारस्याइभावः । योजानूऽ3वा ऽ3इ इति।।

7.ओभावः- शूरः + अग्ने सन्धौ प्रकृतिभावे च शूरो अग्ने इति ऋक्स्थितः ओकारः तथैव गीयते। शूरोआऽ3 इति।।

8.नु भावः-प्रत्युक्रम इत्यर्थः। देवोऽ3वोऽ3द्रविणोदाः। अत्र चतुर्थस्तृतीयं प्रत्युत्कान्तः । एवं तृतीयो द्वितीयम्। इदं च पर्व नीचादिनीचान्तमुभयविधगीतौ भवति। अत्र नु प्रत्युत्क्रम इत्वेव तात्पर्यम्।

9.कर्षणभावः- द्वितीयस्तृतीयं प्राप्नोतीत्यर्थः। प्रभूर्जयोयाऽ3 थापाऽ1थाऽ2।।

---

1. ऋ.त-109

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

10.मिन्भावः-विनतमित्यर्थः। स्माइन्वाऽ2जीनीऽ2वशु इत्यादि।

11.वृद्धभावः- ह्रस्वाक्षराणां दीर्घाक्षराणां वृद्धभावः। दूरादीऽ23 हैवयत्सताः। अत्र पर्वान्त्याक्षरस्य वृद्धभावः। मात्रात्रययुक्तमक्षरं वृद्धमित्युच्यते। त इति चास्य संज्ञा। तत्र अकारो वृद्धं प्राप्तः आकारो भवति। "अतन्द्रः" इत्यत्राकारस्य [1]"तानैधनोक्" इत्यनेन वृद्धे आतन्द्रो सम्पद्यते। एवम् इकार, ईकार, एकार,ऐकाराणां वृद्धानामाइकारो भवति। तद्धिविद्वाइ इत्यत्र [2]"सर्वोऽन्तः" इति सूत्रेण अन्त्य इकारस्य वृद्धत्वे तद्धिविद्वाइ इति रूपनिष्पत्तिः। उकार, ऊकार, ओकार, औकाराणां वृद्धनामाउकारो भवति। शतक्रतो इत्यत्र ओकारस्य वृद्धे शतक्रताउ । ऋकारो वृद्ध आर्भवति सुप्रकरस्नु इत्यस्य सकारोत्तरऋकारो वृद्धः सार्प्रा भवति। यस्य दीर्घस्य वर्णस्योपरि 0 चिह्नं नास्ति स वर्णो वृद्ध इति ज्ञेयः।

12.अवृद्धभावः- जागन्नाऽ234पाः। अत्र लघुयिनि इत्यनेन वृद्धं प्राप्तस्य गकारस्य तदभावः। मइहाऽ234ना । इत्यत्र इकारस्य तयोष्मि इति वृद्धौ निवृत्तप्रकरणपाठात्तदभावः।।

13.अभ्यासः- कथितस्य भागस्य पुनराम्नातः यत्सोमेऽ3सो मआ। यात्सोमे ऽ2सो इत्यादीनि।।

14.दीर्घभावः- तक्षद्यदी इत्यादीनि। दीर्घाक्षरस्योपरिष्टात् 0 अथवा र इति चिह्नं दीयते।

15.रेफलोपः- सत्सिबर्हिषि इत्यत्र ऋचि श्रुतस्य रेफस्य त्साऽ23 बाऽ3। हाऽ234इषोऽ6हाइ इति गीतौ लोपः।

1.सा.त-166, 2.सा.त-666

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

16.रेफत्वम्- ऋचि श्रूयमाणस्य रेफस्य गीतावपि श्रुतिः। सुवार्दृशम् इति।।

17.नतिभावः- कर्षणमित्यर्थः। ष्टूतौ । वाऽ32 इति वा शब्दस्य नतिः कर्षणम्।

18.स्तोभादेशः- स्वरपूरणार्थं स्तोभादेशः। प्रासोऽ3हाइ। आग्नेऽ3हाइ। तवाऽ31उवाऽ23। इत्येवमादीनि।

19.विकर्षः- उनपादत्वाद्विकर्षः । प्रकाव्यमित्यत्र त्रैष्टुभे छन्दसि प्रथमचतुर्थपादयोः दशदशाक्षराणि सन्ति। एकादशाक्षरसम्पत्यै काव्यमित्यस्य कावियमिति गीतौ विकर्षः। अस्यैव शास्त्रान्तरेषु व्यूह इत्याख्या । पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान्यूहेत् इति ऋग्वेदसर्वानुक्रमण्यां भगवान्कात्यायनः। निदान सूत्रे च द्वैधं कुर्यादसम्पूर्णे इति।।

20.निघातभावः- उदात्तस्य नीचीभावः - क्रैयदृतै । अत्र तैः इति उदात्तस्य नीचीभावः।

21.अनीचत्वम्- स्वरितस्य नीचस्य उच्चत्वम्। यस्सम्मिश्लोऽ2हरियोर्यः। यो इति ऋचि नीचत्वे साम्नि उच्चत्वम्।

22.उत्पत्तिः- ऋगुदात्तास्वरिताक्षराणां सङ्घातस्वरोत्पत्तिः। ऊत्सोदेवाऽ31 इति।।

23.हीषीभावः- हीऽ234षी एवं पर्वापत्तिः। पीऽ234बा इत्यादिषु स्वरिताक्षराणां सम्प्रसारणप्राप्तानामुदात्तानुदात्ताक्षराणां वृधेऽ1 स्वरप्राप्तानां च हीषी स्वरभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

24.आजुहोतापत्तिः- आजुहोता इति स्वरापत्तिः। प्राणाशिशुः इति।

25.परिस्वारः- मन्द्रः यदा अतिस्वार्यमन्द्रतिस्वार्यान् प्राप्नोति तदा तेषां स्वरसमुदायानां परिस्वार इति संज्ञा। यथा औ ऽ32345वाऽ656। अत्र वकारो मन्द्रः परिस्वर्यते।

26.अतिहारभावः- अनुस्वारस्पर्शरेफाः स्तोभे प्रत्यये स्तोभमतीत्य ऋगक्षरेण सन्धीयन्ते। यथा तङ्गूर्धयास्वर्णरम् इत्यत्र मध्ये औहो इत्यस्मिन् स्तोभे आगते रेफाक्षरं परेण णकारेण सन्धीयते। तङ्गूर्धयास्वौहोरोणाराम्। तत्र स्तोभानन्तरं यदि पर्व समाप्तं भवेत्तदा तस्यातिहृतस्य वर्णस्य लोपः,अन्यथा न लोपः। यथा वा तङ्गूर्धयास्वर्णरं देवासः इत्यत्र प्रथमसाम्नि ओवा इत्यनेन स्तोभेन तङ्गूऽ3र्धाऽ3यासु वर्णरोवा इति समाप्तपर्वणोऽतिहृतस्य म वर्णस्य लोपः ।

27.लोपभावः-ऋचि श्रूयमाणस्य व य लोपः। पूर्वत्रातिहार एवोक्तः।

28.वन्तविधिः- हाकारः गाने उकारान्तो भवति। एवमकारादीन्यप्यक्षराणि। यथा हाउहोऽ5हाउ। एवमकारोऽपि अनीक इत्यत्र आनीक याऽ31उवायेऽ3 इति ।।

29.अम्भावः-ऋक्षु श्रूयमाणा आकार, इकार, ऋकार,उकाराः गीतौ अकारमापद्यन्ते। सहमैहैऽ3होऽ2 इति । अत्र नृषाहम् इति षा गीतौ स भवति। सहाऽ3होयेऽ34। अत्र विश्वासाहं ऋचि गाने सहा इति अकारो भवति। कृपापवाहाउ। अत्र कृपा पावक ऋचि पावकइत्यस्य पा अम्भावेन प भवति। ग। वाहाइ गिर्वणः ऋचि गाने अम्भावे ग

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवति। । स[2]खिदाऽ3दा[1] सखाय ऋचि। गाने दकारे स्तोभे परे सखि भवति। धि[1]याऽ2। अ[1]र्णायाऽ2। ना[1]ऽ2। ई[10]रासाऽ23इ। इत्यत्र ऋणया ऋचि, साम्नि अर्णाया भवति। इ[3]न्द्रा[2]ऽ3हो[1]इ। ह[3]वे[2]ऽ3हो[1]इ। हुवे इति स्तोभगत हु शब्दो अम्भावेन ह भवति।

30.ओभावः-सप्तमसंख्यायां निर्दिष्टः एकः ओभावः। अयं ततोऽन्यः। तत्र सन्धौ ओकारः। अत्र अकारादीनामोभावः। अश्वाय इत्यत्र आकारः ओ भवति। आ[1]श्वो[0]ददा इति । एवमकारादीनामपि ओत्वं विहितम्।।

31.औभावः- आकारादयो वर्णाः औ भवन्ति । वरुणस्य इति रकारोत्तर उकारस्य औकारः व[2]रौ[1]होऽ2 इति।

32.ऐभावः-एकारादयो वर्णाः ऐकारमापद्यन्ते। यथा एहीत्ययमैहीति।

33.एभावः-इकारादयो वर्णाः ऐकारमापद्यन्ते। दिवावसो इत्यत्र दे[3]ऽ234वा[5]ः। दकारोत्तर इकारः ए भावः प्राप्य दे भवति।

34.यभावः- ऋचि अश्रुतस्य यकारस्य साम्नि श्रवणम्। इनीमसीत्यत्र मा[1]सी[न]ऽ3या[2] इति। शुक्र आहुतः इत्यत्र सामत्रयेऽपि यकारः भवति।।

एवं उपर्युक्तचतुर्स्त्रिशद्भावानां ज्ञानेन सामगतलक्षणनिर्णयं सुलभं भवति।

संहितोपनिषद्ब्राह्मणे उदुह्यस्वरुपमुपवर्णतमेवम्- चतुर्थोदात्त-त्मांत्स्वरान्ध्यन्तरानुदूहन्ति प्रागुपायात्, नचेत्समानं पुरुषवचने। तृतीयप्रभृतीनामुदात्ततमः कश्चित्स्वरो भवति तमुदूह इत्याचक्षते। तथा च यज्ञे क्रियतेऽरण्येगेयञ्चाधीमहे ग्रामेगेयं चेति। विवृतं चैतद्दिद्वजराज

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थोदात्ततमान् ......पुरुषवचने इति अस्मिन्विशिष्टगानविधौ चतुर्थोदात्ततमान् चतुर्थमन्द्रातिस्वार्यलक्षणान् स्वरान् आचार्यः द्व्यन्तरानुदूहन्ति। अन्तरानिति चतुर्थस्वराक्षरं प्रथमे स्वरे उदूहन्ति उच्चैः कुर्वन्ति। मन्द्रस्थं द्वितीये। अतिस्वारस्थं तृतीये। परन्तु प्रागुपायात् - उपाय वचनं विहाय मन्द्रस्वरवर्तमानसमीपं वचनं द्व्यन्तरोच्चं न कर्तव्यमित्याशयः। तत्रोदाहरणम्- ऐ5या5ऽ6इ5। हो4ऽ5इ। डा । नचेत्समानपुरुषवचनेनेति। समानाश्च ते पुरुषाश्च समानपुरुषाः। स्तोत्रगतसामप्रयोगे। साधारणा उद्गातार इत्यर्थः। तेषां वचनं समानपुरुषवचनमित्यर्थः।चतुर्थोदात्ततमस्वरं नोदूहितव्यमिति भावः।

यत्र मन्त्रानाश्रित्योच्चारणप्रयोगः शिष्यते स एव लक्षणग्रन्थः। अधस्तावत् लक्षणग्रन्थानां लघुपरिचयो प्रस्तूयते।

1) गायत्रविधानम्

"शुङ्गाचार्य"कृतं गायत्रविधानम्। अत्र त्रयः खण्डाः वर्तन्ते। अस्य व्याख्या विद्यते इति श्रूयते। नोपलभ्यते स्वरूपतः कर्तृतोऽपि । प्रतिपाद्यविषयाः।

[1]गायत्रसाम्नः तद्धिविङ्कास्वरः प्रस्तावः। प्रथमस्वरः एव प्रस्ताव इत्यर्थः। स च प्रथमपादस्थाक्षरमात्रे गीयते। तानि चाक्षराणि गायत्रीछन्दसि अष्टौ, जगत्यां द्वादश। सर्वेष्वपि छन्दस्सु अष्टाक्षराणि प्रस्तावः शिष्टानि उद्गीथेयोजयेत् इति वा प्रस्तावभक्तिः ओंकारान्ता प्रयोक्तव्या। उद्गीथभक्तिः सर्वापि निरुछ्वासं गातव्या। यदि न शक्यते तदा प्रथमखण्डमात्रं तथा गातव्यम्। खण्डत्रयात्मिका उद्गीथभक्तिः। हिम् आ इति प्रतिहारः। सोऽपि उद्गात्रा गेयः। प्रतिहर्ता तु मनसा ध्यायेत्। कामनानुसारेण निधनभेदः। बहिष्पवमाने वक्तव्या विशेषाः।

1. सा.सा.स पृ-121,122

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अक्षरन्यूनतायां यकारवकारयोः विकर्षप्रकारः। एवं गायत्रसाम्नः विशेषान् विशदयित्वा सामान्तराणामपि कतिचनविशेषाः प्रतिपाद्यन्ते।

2) ऋक्तन्त्रम्-

ग्रन्थस्यास्य कर्ता "शाकटायनः"। केचन औदव्रजीति प्रतिपादयन्ति। 1970 क्रिस्ताब्दे मेतल्लाहुरु सूर्यकान्तमहोदयेन ग्रन्थमिदं विस्तृत आग्लभूमिकया सम्पाद्य मुद्रापितम्। म.रामनाथदीक्षितमहोदयेनापि विवरणसहितं ऋक्तन्त्रं संपाद्य 1982 तमे वर्षे मद्रासतः प्रकाशितम् । 286 सूत्राणां सङ्कलनं विद्यते। परन्तु ग्रन्थान्ते लिख्यते ऋक्तन्त्रव्याकरणं शाकटायनादिभिः कृतम्। सूत्राणां संख्या 280 अशीत्यधिकशतद्वयं सूत्राणि इति लिखितम्।

"ऋचां तत्र व्याकरणे पञ्चसंख्या प्रपाठकाः।
शाकटायन देवेन द्वात्रिंशत्खण्डिका स्मृताः।।"[1]

इति निर्दिष्टम्। नागेशोऽप्येवमेवाह। भट्टोजिदीक्षितस्तु पाणिनीय-शिक्षाव्याख्यायां ऋक्तन्त्र व्याकरणाख्य छान्दोग्यलक्षणस्य प्रणेता औदव्रजिरप्यसूत्रयत् आह। "अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः" इत्यौदव्रजिः ।अपि च ऋक्तन्त्रे न्यायेनौदव्रजिः। "नाद इति शाकटायनः " इत्यादि वर्तते। अतः ऋक्तन्त्रस्य अनयोः कतरः कर्तेति निर्धारयितुं न शक्यते। ऋक्तन्त्रसामतन्त्रयोः कर्ता एक एवेति अभिप्रयन्ति केचन।

पूर्वार्चिकानां उत्तरार्चिकानाञ्च लक्षणमिदं सूत्रम् अत्यन्त लघुभूतम्। अत्र पञ्चप्रपाठकाः द्वात्रिंशत् खण्डाश्च सन्ति। एकैकस्मिन् खण्डे प्रायशः सप्तखण्डाः सन्ति। प्रथमे प्रपाठके अक्षराणामुत्पत्ति-स्थानानि उत्पत्तिप्रकारः तेषां स्वरूपं च प्रतिपाद्यते। द्वितीये अक्षराणां स्थान, स्वर, मात्रा निर्णयः क्रियते। तृतीये तेषां संहिता सन्निकर्ष

1. सा.सा.स. पृ-126,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विकाराश्चोद्यन्ते। चतुर्थे विसर्गस्य सकारः, लोपः, अन्यस्य वर्णस्य वर्णान्तरत्वम् इत्यादि विधीयते। पञ्चमे वर्णस्य दीर्घीभावः , द्वित्वं, मूर्धन्यभावः, इत्यादि। अस्य ऋक्तन्त्रव्याकरणमित्यपि व्यवहारो विद्यते, मूलग्रन्थेषु। व्याकरणसूत्रात् लघुभूतानि सूत्राणि विद्यन्तेऽत्र। यथा "लृतुलसानां दन्ताः", एतत्सूत्रस्थाने, "दन्तेत्स्लाः"[1] इति, "इचुयशानां तालु" इति स्थाने, "तालुनिश्च्ये"[2] इति एवमादीनि सूत्राणि नैकविधानि सन्ति। इदम् "अथ वाचो वृत्तिं व्याख्यास्यामः"[3] इत्यारभ्य "षाद्दन्त्यः"[4] इति समाप्यते।

3) लघु ऋक्तन्त्रसंग्रहः

ग्रन्थस्यास्य कर्ता "शाकटायनः"। 1940 क्रिस्ताब्दे लाहौरनगरे सूर्यकान्तमहोदयेन संपाद्य प्रकाशितं, पुनः 1982 खीष्टाब्दे देहल्यां पुस्तकमिदं प्रकाशितम्। अत्र अष्ट पञ्चाशदुत्तरशतं श्लोकाः वर्तन्ते इत्युच्यन्ते परन्तु 156 श्लोकाः एव दृश्यन्ते। लघुऋक्तन्त्रसंग्रहाख्योऽयं ग्रन्थः ऋक्तन्त्रस्थान् विषयान् श्लोकरूपेण विशदयति। प्रकरणारम्भे वक्ष्यमाण विषयान् सङ्गृह्य ज्ञापयति। यथा -

[5]"दीर्घास्तु संहिताकाले अचो व्यञ्जनपूर्वकाः।
पदकाले प्रपद्यन्ते ह्रस्वतां ये ब्रवीमि तान्।।
अच्छा रक्षा श्रुधी रास्वा वहा एह्यूषु युँक्ष्व तु।
अद्या शग्ध्यूष्वा जुहोता तिष्ठा ऊ षु सपर्यया।।"

[6]संहितायां दीर्घाणामक्षराणां पदकाले ह्रस्वतापत्तिः, यथा अच्छानप्त्रे- अच्छ-नप्त्रे । रक्षाणः- रक्ष-नः इत्यादि। एवं संहितायां ह्रस्वानि पदकाले दीर्घाणि भवन्ति। क्रियमाणस्य मह्नऋते- मह्ना-ऋते, सवर्णदीर्घम्, आभरास्मभ्यम्- आभर- अस्मभ्यम्, रथ्ये यथाऽऽजौ- यथा - आजौ, वर्मीव- वर्मी-इव, सर्पिर्मधूदकम्- मधु-

1. ऋ.त-7, 2- ऋ.त-5, 3- ऋ.त- 1, 4- ऋ.त-286, 5. ल.ऋ.त.स.पृ-02, 6. सा.सा.स पृ-123,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उदकम्, अपादुशिप्प्रन्धसः- शिप्री-अन्धसः. जनितेन्द्रस्य - जनिता-इन्द्रस्य, भानवेऽर्चा-भानवे-अर्चा, रोदसी उभे- रोदसी-उभे, परितोषिञ्चत इतः सिञ्चत इत्यादौ ह्रस्वत्वदीर्घत्वे, इ उ यण् गुणसन्धयः पूर्वरूपं, प्रगृह्यम्, ओत्वमित्यादयः श्लोकरूपेण प्रतिपादिताः।
अन्ते स्तावत् -

[1]"सवर्णस्य यणश्चैव वृद्धेश्चापि गुणस्य च।
प्रगृह्यस्य विकाराश्च पंचैव परिकीर्तिताः।
लघुऋक्तन्त्रग्रन्थेस्मिन् वनसंख्याकसंधयः।।"
इति लघुऋक्तन्त्रं समाप्तम्।

4) ऋक्तन्त्रविवृतिः

ग्रन्थमिदं 1933 तमे वर्षे सूर्यकान्तमहोदेयन संपूर्णतया संकलय्य लाहौरतः प्रकाशितम्। म रामनाथदीक्षितमहोदयेन मद्रासतः 1982 तमे वर्षे भागशः प्रकाशितम्। ऋक्तन्त्रविवृत्याख्योऽयं ग्रन्थः प्रकरणत्रयात्मकः। गायत्रगानप्रकाराख्य प्रथमप्रकरणे, यज्ञेषु बहिष्पवमानाज्यादि स्तोत्रेषु प्रयुज्यमानगायत्रसाम्नः गानप्रकारः उद्गीथादिभक्तिनिरूपणं ज्यायसि छन्दसि अधिकाक्षराणाम् उद्गीथभक्तौ आवापप्राप्तौ, तस्याः खण्डत्रयात्मकत्वात् कुत्रावाप इति विषये, प्रथमखण्ड आवाप इत्यादि आर्षेयब्राह्मणप्रौढब्राह्मणे प्रमाणीकृत्य, निर्णीयते। आर्षेयब्राह्मणस्य प्रथमस्वरैर्वा चतुरक्षर-वृद्धान्तैः इति वाक्यस्य ताण्ड्यस्थ त्र्यावृद्वेयं इति वाक्यस्य चार्थो विचार्य निर्णीतः। ततः प्रतिहारोपद्रवनिधन भक्तिप्रदर्शनमित्यादि।

द्वितीयप्रकरणे स्वरितनिरूपणम्,

अत ऊर्ध्वं प्रवक्ष्यामि ह्यार्चिकस्य स्वरत्रयम्।
उदात्तश्चानुदात्तश्च तृतीयः प्रचयस्वरः इति।

1. ल.ऋ.त.सं.पृ-64

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अत्र स्वरितस्य स्वरान्तरत्वेनापरिगणनात्स्वरितन्नाम किञ्चन नास्ति। उदात्तानुदात्तयोस्समाहारस्यैव स्वरितत्व व्यपदेशात्। अत्र प्रमाणानि। य एवोदात्त इत्युक्तस्स एव स्वरितस्वरः। नारदीयशिक्षायां - उन्नीचेमे, ऋक्तन्त्र -नीचे, विरामे प्रत्यये उत् उदात्तः, स्वरितो भवति। नीचमुच्चात्, ऋक्तन्त्र उच्चात् परं यन्नीचं तत्स्वरितं भवति। एवं नारदीयशिक्षा, ऋक्तन्त्र, मात्रालक्षणाद्यनुरोधेन स्वरितस्य स्वरान्तरत्वं नास्तीति समर्थ्यते।[1]

तृतीये प्रचयस्य एक श्रुतित्वं उदात्तस्वरत्वं प्रमाणपूर्वकं साधयति। अयं च ग्रन्थः अथ गायत्रगानप्रकारो निरूप्यते इत्यारभ्य आद्यार्धमात्रा एवोदात्ता भवन्तीत्यर्थ एव विवेकः इति समाप्यते। अस्य कर्ता नोपलभ्यते।

5) सामतन्त्रम्-

अस्य रचयिता "औदव्रजिः"। काशीहिन्दूविश्वाविद्यालयात् प्रकाशितम्। सामतन्त्रमिदं वेयगानारण्यगानाख्य प्रकृतिभागस्य लक्षणम्। पञ्चदशप्रपाठकात्मकम्। त्रयोदशप्रपाठकात्मकस्य सामतन्त्रमिति, चतुर्दशपञ्चदशात्मकस्याक्षरतन्त्रं संज्ञालक्षणमिति वा व्यवहरन्ति लक्षणविदः। उपलभ्यमानेषु ऋक्तन्त्रकोशेषु शाकटायनप्रणीतम् इति वर्तते सर्वानुक्रमण्याञ्च-

"ऋचां तत्र व्याकरणे पञ्चसंख्या प्रपाठकाः।
शाकटायन देवेन द्वात्रिंशत्खण्डिकाः स्मृताः।।"

इति निर्दिष्टम्। नागेशोऽप्येवमेवाह। भट्टोजीदीक्षितस्तु पाणिनीयशिक्षाव्याख्यायां ऋक्तन्तन्त्र व्याकरणाख्य छान्दोग्य-लक्षणस्य प्रणेता औदव्रजिरप्यसूत्रयत् इत्याह। अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः इत्यौदव्रजिः इति। अपि च ऋक्तन्त्रे न्यायेनौदव्रजिः।

1. सा.सा.स पृ-124,125

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नाद इति शाकटायनः इत्यादि वर्तते। अतः ऋक्तन्त्रस्य अनयोः कतरः कर्तेति निर्धारयितुं न शक्यते।

[1]सामतन्त्रे प्रतिपाद्याः विषयास्तावत्- स्वरोऽनन्त्यः इति प्रथमसूत्रम्। अनन्त्यः स्वरः गीतो भवति इति व्याख्यातम्। अतिस्वार्यस्वरभिन्नेषु षट्सु स्वरेषु अक्षराणि सस्वराणि गीयन्ते अतिस्वार्ये परमक्षरं सस्वरं न गीयत इति ज्ञायते। एवमारभ्य संज्ञापारिभाषात्मकं प्रकरणम्। तन्त्रमक्षरं सस्वरे नीचं चतुर्थ प्रथमयोः प्रपाठक -1. खण्ड-6,सूत्र-8 इतः प्रभृति नीचीभावः। अचं गेस्पर्शात् 1-9-8 इतः उच्चीभावः, तानैधनोत् 2.7.1 इतः वृद्धभावः, दिचुन्नु दिवि 2.9.6 इतः नुभावः, प्रथमाद्यातृतीयात् 2.10.3 उच्चम् नु अरोहणम् स्वरान्तश्च स्वर्यते सम्प्रसारणम् 3.1.1 हँ - इञुयुग्वा तचुर्भात् इत्यारभ्य मिन्भाव (विनतम्) आ भावः ओ भावः ए भावः औ भावः लोपः प्रणतम् प्रत्युक्रामः परिस्वारः इत्यादयः त्रिंशद्भावाः प्रकीर्त्यन्ते। ग्राम इहइ विपरीतं विश्व रोहतु इदमन्तिमं सूत्रम्। अत्र त्रयोदशप्रपाठकाः एकैकस्मिन् प्रपाठके दशखण्डाः सन्ति। आहत्यसूत्राणि 1311 वर्तन्ते। इदं सभाष्यम् बनारस हिन्दु विश्वविद्यालयेन मुद्रापितम्। तालपत्रमयेषु समतन्त्रभाष्येषु ब्रह्मानन्दसरस्वतीशिष्य वेङ्कटेशदीक्षित हृदयसरोज-वसति महागणपति कृतौ सामतन्त्र प्रकाशे इति वर्तते।

6) सामतन्त्रप्रकाशिका

अस्य कर्ता "महागणपति" । सामतन्त्रप्रकाशिकाख्योऽयं ग्रन्थः सामतन्त्रभाष्यस्य विवरणात्मकः। उदाहरणप्रत्युदाहरणानि विविच्य दर्शयति।

---

1. सा.सा.स पृ-126

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

7) सामतन्त्रपोतम्- सामतन्त्रसंग्रहः

अस्य कर्ता "वान्छिनाथः"। [1]अत्र प्रकृति साम्नां ओग्नाइ प्रभृति उन्नयामीत्यन्तानां प्रत्येकं यावन्ति सूत्राणि तावतां तत्तत्साम्नि समन्वयं करोति। यथा ओग्नाइ अस्मिन्पदे ग्नितुडाद्येषु तत्त्रिमात्रः असप्तिनः सर्वोन्तः एतानि चत्वारि सूत्राणि प्रवर्तन्ते। एवं एकैकं साम लक्षयति। अस्यारम्भ एवम्-

"ऋग्विहीनं छन्नगानं लेशं स्तोभमृचा सह।
आविर्गानं स्तोभहीनं एवं गानत्रयं विदुः।।"

8) अक्षरतन्त्रम्-

ग्रन्थस्यास्य कर्ता "आपिशलिमुनिः"। अक्षरतन्त्राख्यस्य ग्रन्थं सत्यव्रतसामश्रमी व्याख्यानं कृतवान्। मायूरम् म. रामनाथदीक्षितवर्यैः 1984 क्रिस्ताब्दे मद्रपुरीतः सम्पाद्य प्रकाशितम्। आपिशलिमुनिना प्रोक्तमिति कथयति। आपिशलिश्च ऋक्तन्त्रप्रणेतुः शाकटायनस्य, सामतन्त्रप्रणेतुः गार्ग्यस्य च समकालिक इति ज्ञायते ऐतिह्यात्। यास्कनिरुक्ते पाणिनीयव्याकरणे गार्ग्य शाकटायनयोः ग्रहणात् ऋक्तन्त्रं, सामतन्त्रं, अक्षरतन्त्रमिति ग्रन्थत्रयमपि निरुक्तव्याकरणयोः पूर्वकालिकमिति ज्ञायते।

[2]ऋचां स्वराक्षरविचारात्मकस्य ग्रन्थस्य ऋक्तन्त्रमिति, साम्नां विकार - विश्लेष - विकर्षणाभ्यास - विरामादि विचारात्मकस्य सामतन्त्रमिति च यथा संज्ञा। तथा स्तोभाक्षरविचारात्मकस्य अक्षरतन्त्रमिति संज्ञालक्षणमिति च संज्ञा। अत्र प्रपाठकद्वयं षड्विंशतिः खण्डाः षष्ठ्युत्तरद्विशतसूत्राणि च विद्यन्ते। सामतन्त्रस्य पञ्चदशप्रपाठकात्मकस्य शेषभूतोऽयं ग्रन्थ इति प्राच्याम्मतम्। ग्रन्थेऽस्मिन् प्रथमखण्डे अक्षराणां संज्ञा, द्वितीयादिषु षट्सु अक्षराणां

1. सा.सा.स.पृ-130। 2. सा.सा.स.पृ- 128

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रयोगविधिः, ततः आसमाप्तेः अक्षरगतस्वरपर्वणां विधिश्च निर्दिश्यते।

सामसु, आर्चिकाक्षरेषु गीयमानेषु ऋगक्षरादधिकानि कानिचिदक्षराणि सस्वराणि गीयन्ते, यानि स्तोभत्वेन प्रसिद्धानि । छन्दः पदपाठे स्तोभपदत्वेनाऽधीयन्तेऽध्येतृभिः । अधिकत्वे सति ऋग्विलक्षणत्वमिति लक्ष्यन्ते पूर्वमीमांसायां नवमाध्याय द्वितीयपादैकशाधिकरणे, आद्यन्तदर्शनस्तोभो विधागीतेषु सामसु इति लक्षणग्रन्थे च विचार्यन्ते, तानि स्तोभाक्षराण्यधिकृत्य विचारोऽत्रग्रन्थे क्रियते। अक्षरतन्त्रमिति घटकाक्षरपदस्य स्तोभाक्षरमित्यर्थः। स्तोभानां प्रयोगपरिज्ञानं एतद्ग्रन्थबोधं विना न संभवति।

अस्यादिमं सूत्रम् अनृगाद्यक्षरम् इति ऋगक्षरभिन्नं यत् साम्नि दृश्यते तदक्षरमिति। तस्यैव स्तोभ इति संज्ञा । स्तोभाश्च हाउ, होइ, औ, ओ, हो, इट् एवमादयः। एतेषां सामसु प्रवृत्तिः अत्र विचार्यते।

9) आर्षेयदीपिका

अस्य कर्ता "भट्टभास्करः"। वि आर् शर्मा महोदेयन 1967तमे वर्षे संपाद्य तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठात् प्रकाशितम्। आर्षेयदीपिकाख्योऽयं ग्रन्थः ग्रामगेयारण्यगेययोः विद्यमानानां ऋचां साम्नां च क्रमेण ऋषीन् ज्ञापयति। यद्यप्यार्षेय ब्राह्मणेन ज्ञातुं शक्यते। तथापि तत्र बहवः ऋषयः बह्व्यश्चदेवताः ज्ञाप्यन्ते तेषां निर्धारणे प्रमाणग्रन्थमन्तरा बुद्धेः क्लेशो भवति। तादृशक्लेशं विना एकैकस्य साम्नः ऋषिरयमिति निर्णयत्ययं ग्रन्थः। तद्वत् देवताविषयेऽपि। अपि च एकस्यामृचि एकं साम, द्वे सामनी, बहूनि सामानि इति अनेकधा विद्यते। तत्र प्रतिसाम ऋषिरयमिति विवेचयतीयं दीपिकेव। किञ्च दिशांव्रतं, दशानुगानं, कश्यपव्रतं, महादिवाकीर्त्यं, पुरुषव्रतं,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदित्यव्रतमेकविंशत्यनुगानं इत्याद्यार्षेय ब्राह्मणपठितानां वाक्यानां विवेचनार्थं बहूपकरोति।

आर्षेयब्राह्मणस्योऽयं सङ्कुचितव्याख्यारूपमिति वक्तुं शक्यते। अत्र आर्चिकानां साम्नां च विभाजकधर्माणां प्रपाठकत्वेनाध्येतृ-प्रसिद्धानां अध्यायत्वेन व्यवहारः, खण्डानामनुवाकत्वेन व्यवहारश्च विद्यते। भट्टभास्करः कर्त्रेति ज्ञायते। तस्यारम्भः श्लोकः-

"वेदसाम्नामृषिच्छन्दः प्रकारा अथ देवताः।
आर्षेयाद्यनुसारेण भूत्यै भास्करयज्वना।।"

अग्न आयाहीत्यादितस्त्र्यनुवाकानां गायत्रीछन्दः। चतुर्थप्रभृतीनां त्रयाणामनुवाकानां बृहतीछन्दः इत्यादि एवमैन्द्रं पर्व, पावमानं पर्व, आरण्यकमिति क्रमेणानूद्यते। ततः अथ ऋचां साम्नां च क्रमेण ऋषय उच्यन्ते। अग्न आया हि इत्यस्या ऋचः भरद्वाजऋषिः। तत्साम्नां प्रथमस्य पर्कस्य गौतमः। द्वितीयस्य बर्हिष्यस्य कश्यपः। तृतीयस्य पर्कस्य गौतमः। इत्यारभ्य क्रमेण सर्वेषां साम्नां अनुगानानां च विविच्य ऋषीनुक्त्वाऽन्ते विदामघवन्नित्येकं साम, विदामघव-न्नित्येका ऋक् विदाराये सुवीर्यमित्युत्तरा इन्द्रन्धनस्य सातये इत्युत्तमा। तासु ए विदा मधवन् ए विदा राये ए इन्द्रन्धनस्य इत्येकं साम। तदेव सिमाः , शक्वर्यः, मह्विण्यः, महानाम्न्यः इति व्यवहरन्ति। ऋचामिन्द्रः शक्वरी इन्द्रो देवता। साम्नामिन्द्रः ऋषिः ऋचां प्रजापतिः विष्णुः विश्वामित्रो वा ऋग्वच्छन्दोदेवते । पुरीषपदानि सर्वाण्यैन्द्राण्येव। तत्तन्नियामकत्वेन सर्वदेवानां बलरूपेण इन्द्रस्संबोध्यते, इति पूर्यते।

10) नैगम्

ग्रन्थस्यास्य कर्ता नैव विदितः। नैगाख्योऽयं ग्रन्थः प्रपाठकद्वयात्मकः। प्रथमे प्रपाठके पूर्वार्चिकानां उत्तरार्चिकानां च प्रत्येकं ऋषयः प्रोच्यन्ते। द्वितीये प्रपाठके पूर्वोत्तरार्चिकानां पृथक्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवता निर्दिशति। आर्षेयब्राह्मणं तावत् प्रकृतिसाम्नां ऋषीन् क्वचिद्देवताश्च निर्दिशति। आर्षेयदीपिका तु प्रकृतिस्थानामृचां साम्नां च ऋषीन् देवताश्च ज्ञापयति। इदन्तु पूर्वोत्तरार्चिकानां सर्वेषामपि ऋषीन् ज्ञापयतीति।

ग्रन्थस्यास्य प्रारम्भः एवम्- "अथार्षमार्चिकस्याग्ने त्वमग्नेऽग्निः" इति । प्रथमतः समष्टिरुपेणाभिधाय ततः व्यष्टिरुपेण कथयति। कासुचित् ऋक्षु पादस्य पृथक् देवताः कथयति। उत्तरासु ऋक्षु प्रकृतौ अपठितानामेव ऋचां देवता अभिधत्ते। कानिचित् वाक्यानि प्रदर्श्यन्ते। अग्न आग्नेयं प्राक्तद्धः। तद्ध ऐन्द्रं प्रागुच्चा। उच्चात आसमाप्तेस्सौम्यम्। रहस्यास्वृक्षु देवता अनुक्तास्ता ऐन्द्र्यः इति सामान्यरुपेणाभिधाय विशेषतः कथयति। पाददेवता भेदः । उदुत्तमं वारुणी आदित्यस्तृतीयः पादः। अरुरुचत्सौमी पित्र्यश्चतुर्थः पादः इत्यादि कथयति सायणाचार्यः। अस्य ग्रन्थस्य नैगेयम् नैगेयार्चिकमिति नामान्तरमपि विद्यते।

11) सामवेद सप्तलक्षणम्

सप्तलक्षणमिति आर्चिकानां लक्षणग्रन्थः। अस्य कर्ता "नारायण पण्डितः"। तस्य नारायण इति नाम शौरीसूनुः इति च ज्ञायते। अस्य उभयकर्तृता आशङ्का विद्यते। ग्रन्थोऽयं लघुऋक्तन्त्र-संग्रहेण सहैव 1940 तमे वर्षे सूर्यकान्तमहोदयेन विस्तृतभूमिकया संपाद्य प्रकाशितम्। अत्र प्रकरणानि सप्त, श्लोकाश्च (138) अष्टत्रिंशदुत्तरशतसंख्याकाः।ग्रन्थस्यास्य प्रतिपाद्यविषयास्तावत्-

1,2- प्रथमद्वितीयप्रकरणौ- (शमानम्) , (विसर्ग लोपालोपौ)

"आकारः प्लुत पूर्वो यो घोषवद्व्यञ्जनोत्तरः।
शसकार परश्चैव विसर्गस्सतु लुप्यते।
संहितायामृचां तानि पदान्यत्र विवृण्महे।।"[1]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उदाहरणम् इतरा विदामुनि स्तोमा देवा रुद्रा। विवरणम् अग्न इत्थेतरागिरः। विदागाधं तुचेतुनः। पवमानविदारयिम्। अयं संहिता पाठः।पदपाठस्त्वेवम्।अग्ने- इत्था - इतराः- गिरः। विदाः-गाधं-तुचे-तु- नः । पवमान- विदाः-रयिम्। अत्र यादृशे पदे विसर्गः पदपाठे संहितायां तत्रैव विसर्गलोपः। अस्य शमानमिति संज्ञा। सङ्केताक्षराणां ज्ञानं एतदर्थमत्यन्तमावश्यकम्। तत्र 1.मुनिः-3, 2.शरः-5, 3. विश्वाः,विश्वानि,विश्वार्युः-2, 4.साहप्रत्यये परतः विश्वा,विश्वानि-2, 5. नेत्र-2, 6.कर- 2, श्रोत्र-2, युग्म-2 इति ज्ञातव्यम्।।

3- तृतीयप्रकरणम्- (रङ्गम्)

"रङ्गस्तु द्विविधो ज्ञेयः स्वर परो व्यञ्जनपरः।
नकारवैकृतं चात्र नासिक्यं रङ्ग उच्यते।।"[2]

उदाहरणम्- कलशाँ अचिक्रदत्। दाशिवाँ वोचे। पदपाठः कलशान्-अचिक्रदत्। दाशिवान्- वोचे।

4-चतुर्थप्रकरणम् - (विलिंघ्यम्)

"एकारैकार वर्णौ यौ संहितायां विकारिणौ।
तदन्तानि विलिंघ्यानि उच्यन्ते वेदवित्तमैः।।"[3]

उदाहरणम्- अग्न आयाहि। वन्दद्ध्या अग्निम् । अहये हन्तवा उ । अत्र ए ऐ इति द्वयमपि अ आ इति संहितायां विक्रियते।

5- पञ्चमप्रकरणम्-(नपर तपरे)

"नत्वा विनायकं देवं सर्वसंपत्करं परम्।
शौरिसूनुः प्रवक्ष्यामि नवं नतपरं पदम्।।"[4]

नकारतकारान्तयोः सन्धिवषये विधयः ।उदाहरणम्- आसन्नः

1. सा.स.ल. श्लो-1, 2. सा.स.ल श्लोकः-20, 3. सा.स.ल.श्लो-23,
4. सा.स.ल.श्लो-41,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पात्रं जनयन्त, महान्महीभिः, सनादग्ने , यन्मातृरजगन् , वचस्तच्चिन्न ओहसे, उन्नयामि इत्यादि। एषां पदपाठः -आसन् नः , महान् महीभिः, सनात् अग्ने, यत् मातृः, तत् चित्, उत् नयामि।

6 - षष्ठप्रकरणम् (अवर्णि)

"ओदेदवर्ण सच्छन्नं संहितायां पदादिगम्।
अवर्णं ज्ञातुमस्माभिरिदं शास्त्रं प्रणीयते।।"[1]

उदाहरणम्- युद्ध्योऽस्माकम्। अस्या नवेऽसि प्रशर्धतुर्वशे, दोषो आगात्, या इन्द्र भुज आभरः । पदपाठः- युद्ध्यः अस्माकम्, आनवे असि, दोषः आ अगात्, आ अभरः, अत्र अवर्णः संहितायां ओत् एत् अवर्णः एतैः संछन्नः वर्तते। सचावर्णः पदादिगः।

प्रकरणम्-7 (अनवग्रहः-अनिङ्ग्यम्)

"नमस्कृत्य विनेतारं विघ्नानामनुशिष्यते।
अधुना लक्षणं वक्ष्ये अनवग्रहसंज्ञकम्।।[2]"

अनिंग्यमित्यस्य अवग्रहरहितमित्यर्थः । अवग्रहमित्यस्य वेष्टन पदमित्यर्थः। वेष्टनपदरहिता ऋचः उदाह्वीयन्तेऽत्र। त्वमग्ने यज्ञानां होता, एह्यूषुब्रवाणिते, आदित्प्रत्नस्यरेतसः इत्यादि। ग्रन्थेऽस्मिन् पारिभाषिकशब्दाः बहवो विद्यन्ते।

12) अवग्रहसूत्रम्-

अवग्रहं नाम आर्चिकानां पदपाठे यादृशं पदं विभक्तं सत् आवर्त्यते तत्। तादृशमवग्रहं पदमत्र निर्णीयते। इदं द्वादशसूत्रात्मकम्। अथावगृह्यमति चतुरक्षरं पदम् इत्यरम्भः। चतुरक्षराधिकं पदम्। यस्मिन् पदे पञ्चाक्षराणि तदधिकानि वा सन्ति तत्पदं अवगृह्यत इत्युत्सर्गः। हव्यदातये हव्य-दातये इत्युदाहरणम्। एवं विश्ववेदसम्

1 सा.स.ल. श्लो-71, 2 सा.स.ल. श्लो-121

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

और्वभृगुवत् इत्यादि विभागे च पदविभागे यस्य चतुरक्षाधिक्यं भवति। तदप्यवगृह्यम्। नर्यापसम् नर्य अपसम्। दध्याशिरः दधि आशिरः। द्वादशसूत्रैरवग्रह विधिमक्त्वा। "चिकितिश्रुक्रुधं चैवेत्येताश्च प्रकृतयो नावगृह्यन्ते" इति समाप्यते। अस्यापि कर्ता नोपलभ्यते।

13) हितवाक्यम्-

1979 तमे वर्षे म.रामनाथदीक्षितमहोदयेन सामप्रातिशाख्य-संग्रहाख्यग्रन्थे समायोज्य मद्रासनगरीतः प्रकाशितम्। अयं ग्रन्थः ऋक्षु एकैकस्यां वेष्टनपदानि कति इति अकाराद्यक्षरकथनेन सूचयति। सूचनविवरणमेवं कृतम।

"अकारे पञ्च ऐको वा आकारो द्वौ षडेववा।
इवर्णे सप्तवा त्रिर्वा उवर्णे चतुरष्ट वा ।।
ए ऐ ओ औतु इत्येते विज्ञेया अनवग्रहाः।"

अकारे श्रुते एकं पञ्च वा वेष्टनानि विद्यन्त इति जानीयात्। आकारे श्रुते द्वे षड्वा इवर्णे श्रुते त्रीणि सप्त वा उवर्णे श्रुते चत्वारि अष्टौ वा वेष्टन पदानीत्यर्थः । ए ऐ ओ औ एतेषां श्रवणे अवगृह्यं नास्तीति विद्यात्। धर्मोपादानं सन्तोषः श्रेष्ठः इदं प्रथमवाक्यम्। अत्र ध इत्यत्र अकारो गृह्यते अनेन, प्रथम ऋचि अग्न आयाहीत्यत्र एकं वेष्टनपदं विद्यत इति ज्ञायते। तच्च पदं हव्यदातये इति। अत्र दशाक्षराणि विद्यन्ते। तानि प्रथमखण्डस्य दशानामपि ऋचां क्रमेण वेष्टनसूचकानि। एवं रूपेण एकस्मिन्वाक्ये यान्यक्षराणि वर्तन्ते तानि तत्खण्डस्थ ऋचां वेष्टनसूचकानीति विद्यात्। धर्मो इत्यत्र द्वितीयमक्षरं ओकारः सच द्वितीयर्चि वेष्टनपदाभावसूचकः। त्वमग्नेयज्ञानामित्यत्र वेष्टनपदं नास्ति। अत्रत्यानां वाक्यानां लक्ष्यविशेषसूचकत्वेऽपि, वाक्यार्थे सामान्यधर्मबोधकत्वं विद्यत इति विचित्रतया रचितोऽयं ग्रन्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथाहि "अशीलस्याचारो न भ्राजते", "आचार्यस्याज्ञां कुर्वीत", कल्याणभाजी न स्त्रीवशः, "नाश्रद्दधाने कीर्तिश्शाश्वतं तिष्ठेत्", "मितभोक्ता सदा न बाध्यते रोगैः" एषु वाक्येषु अक्षरार्थबोधकत्वेऽपि शीलस्यावश्यकत्वं, गुर्वाज्ञानुवर्तित्वं, स्त्र्यवश्यत्वं, श्रद्दधानत्वं, मितभोजकतृत्वं इत्यादयो धर्मा अवस्यानुष्ठेया वाक्यार्थतया बोध्यन्ते। एवं सुचित्तो दानं दया ह्रीः कृत्वा क्षमासत्यं प्रथमः इति स्तोभपदस्यापि विद्यते। उत्तरार्चिकपदस्यापि वेदो धर्मायैवा देवोऽत्र इत्यारभ्याऽऽ समाप्ति छलाक्षरं विद्यते। अस्य कर्ता नोपलभ्यते।

14) स्तोभानुसंहारः

साम्नि गीयमाने ऋग्व्यतिरेकेण स्तोभो नाम गानसाधनं पदं विद्यत इत्युक्तम्। तादृशस्तोभानां कुत्र गानमिति विचारोऽस्मिन् ग्रन्थे क्रियते। श्लोकबद्धेऽस्मिन् ग्रन्थे चतुश्चत्वारिंशच्छ्लोकाः विद्यन्ते।

"आद्यन्तदर्शन स्तोभो विधागीतेषु सामसु।
पादे पादेऽनुसंहार्यस्सोपायो निधने भवेत्।"

इत्यारम्भः। प्रकृतौ साम्नि आरम्भे समाप्तौ च स्तोभः विद्यते चेत् सः पादे पादे प्रयोज्यः यज्ञेषु प्रयोगकाले यथा धेनुसाम्नि।

"अन्वयी चानुषङ्गी च द्वौ स्तोभावनु कीर्तितौ।
अन्वयी तु पदादौ स्यादनुषङ्गी पदात्परः।।"

पदारम्भे विद्यमानः स्तोभः अन्वयी पदावसाने विद्यमानोऽनुषङ्गी एवं संज्ञा। एवं ग्रामगेयारण्येगेययोः स्तोभप्रयोगः यज्ञेषु प्रयोगकाले प्रयोगश्चात्र निरूपितः।

"पदं पदं विधां मात्रां छन्दो विज्ञाय दैवतम्।
आर्षं च ब्राह्मणं चैव ततस्साम प्रयोजयेत।।
अक्षरज्ञो विरामज्ञः प्रत्यारम्भी तथैव च।
स्वरमात्राविभागज्ञस्सविप्रो गानमर्हति।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामस्वरविधिज्ञश्च पङ्क्तिपावनपावनः।
किमर्थमनुसंहार्यो विधौ पादे पुनर्भवेत्।।
अनग्नत्वात्तु वै साम्नां न्याय एष विधीयते।
उद्धारः पुनराचार्यैः स्वाध्याये लाघवार्थिभिः।।
प्रोक्तस्तस्मिन् प्रतिष्ठा च संहारस्तेन इष्यते।।"

इति लक्षणपरिज्ञानस्यावश्यकतामुपपाद्य समाप्यते। स्तोभं प्रति सामविधानब्राह्मणे तस्य हवा एतस्य साम्नः ऋगेवास्थीनि स्वरो मांसानि स्तोभा लोमानि इति साम्नः श्लक्ष्णता प्रयोजकत्वमुक्तं स्तोभस्य ।अस्य कर्ता नोपलभ्यते।

15) मात्रालक्षणम्

कर्ता- "वररुचिः"। श्री वि. आर्. शर्मा महोदयेन केन्द्रियसंस्कृत विद्यापीठ तिरुपतितः 1969 वर्षे विवरणसमन्वितं संपाद्य प्रकाशितम्। अत्र खण्डिकात्रयं 56 सूत्रेण सहैव प्राप्यते। मात्रा नाम कालविशेषः। वेदाक्षराणामुच्चारणसमये कालस्य परिच्छेदो विद्यते। आर्चिकानां साम्नां च मात्रानियमोऽत्र प्रतिपाद्यते। अतः मात्रालक्षणमिति संज्ञा। यद्यपि शिक्षासु मात्रामधिकृत्य विचारो वर्तते। तथापि सामवेदस्य स्वरबाहुल्यत्वात् मात्रा विचारार्थमेव ग्रन्थोऽयं प्रवृत्तः।

[1]"अथातो ह्रस्वदीर्घप्लुतमात्राण्यक्षराणि व्याख्यास्यामः" इत्यारम्भः। सामस्वर्धमणुमात्रं च। ह्रस्वं मात्रा । दीर्घं द्वे । प्लुतं वृद्धं चेत् त्रिमात्रमभिधीयते। ह्रस्वं द्विमात्रसंयुक्तं प्लुत वृद्धं चेति त्रिमात्रमभिधीयते।

[2]"ह्रस्वं द्विमात्रसंयुक्तं प्लुतमाहुर्मनीषिणः।
दीर्घन्तु मात्रासंयोगाद्वृद्धमित्यभिधीयते।"

मात्रायाश्चतुर्थोऽशोणुमात्रा नाम[3]। अक्षराणि त्रिविधानि ह्रस्वदीर्घप्लुत

1. मा.ल-1, 2. मा.ल-4, 3. मा.ल- 5

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भेदात्। एकमात्राकालमक्षरं ह्रस्वम्, द्विमात्रकालमक्षरं दीर्घम्, त्रिमात्रं प्लुतम्। ऋचि ह्रस्वमक्षरं साम्नि त्रिमात्रं गीयते चेत् तत्प्लुतम्, ऋचि दीर्घमक्षरं साम्नि त्रिमात्रं चेत् गीयते तद्वृद्धम्, पादमात्राया अणुरिति संज्ञा। ह्रस्वत्वादि धर्माः अचामेव न व्यञ्जनानाम्।

वृत्तिस्त्रिविधा- द्रुता, मध्यमा, विलम्बिता चेति। द्रुतायां त्रिकला मात्रा, सा चामुखी करणे। मध्यमायां चतुष्कला- सा च प्रयोगसमये। विलम्बितायां पञ्चकला सा च गुरोर्ग्रहणसमये, वैस्वर्ये प्रतिस्वरं त्रिमात्रं भवति। विस्वरमक्षरं स्वरे स्वरे त्रिमात्रं भवति हौ३ऽ234षौ५ इत्यादौ। प्रणवः सार्धत्रिमात्रः। एवम्मात्रानियममुक्त्वा आरोहावरोहौ विवेचयति। प्रत्युत्क्रामातिक्रमकर्षणस्वाराः।

प्रत्युत्क्रामोऽष्टविधः -अतिस्वारो मन्द्रं प्रत्युत्क्रामति। मन्द्रश्चतुर्थं, चतुर्थस्तृतीयं, तृतीयो द्वितीयं, द्वितीयः प्रथमम्। मन्द्रश्चतुर्थमतिक्रम्य तृतीयम्। मन्द्रश्चतुर्थतृतीयावतिक्रम्य द्वितीयम्। तृतीयो द्वितीय-मतिक्रम्य प्रथमम् इत्यष्टविधः। अयमारोहः। अन्ते [1]"प्रतिज्ञा खलु वर्तत" इति ग्रन्थ समाप्तिः।

16) आर्चिकलक्षणम्

सामप्रातिशाख्यसंग्रहाख्ये ग्रन्थे आर्चिकलक्षणं 1978 तमे वर्षे म.रामनाथदीक्षितमहोदयेन सम्पाद्य प्रकाशितम्। अस्य मूलकर्ता न ज्ञायते। अयं ग्रन्थः श्लोकरूपेण विद्यते। आर्चिकानां स्वरनिर्णयः तेषामवान्तरभेदः स्वरसन्निवेशप्रकारः हस्तेन निर्देशप्रकारः इत्यादयोऽत्र प्रतिपाद्यन्ते। आरम्भश्लोकः-

"उदात्तश्चानुदात्तश्च स्वरितः प्रचयस्तथा।
बह्वृचां स्वरभेदाः स्युस्तद्युक्त्यार्च्चिकमुच्यते।।"[2]

1.मा.ल- 10, 2.आ.ल- 1,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋचां चत्वारः स्वराः उदात्तानुदात्तस्वरितप्रचयसंज्ञकाः। उदात्तं ज्ञापयति 1 चिह्नः, स्वरितं ज्ञापयति 2 चिह्नः, अनुदात्तं ज्ञापयति 3 चिह्नः। कुत्रचित् 2 अपि उदात्तं ज्ञापयति। अङ्गुष्ठेन उदात्तं, तर्जनीमध्यरेखया स्वरितं प्रचयं कुत्रचिदुदात्तं च प्रदर्शयेत्। मध्यमा मध्यरेखया अनुदात्तं च निर्दिशेत। स्वरितात्परः प्रचयस्वरः।।

उदात्तस्वरः अनुदात्तात्परः पूर्वो वा स्यात्। अनुदात्तयोर्मध्ये उदात्तस्वरे अनेकाक्षराणि चेत् तत् शिवकोदात्तसंज्ञं स्यात्। स नः पवस्व शं गव इति मध्यमाङ्गुलिं सङ्कोच्यनिर्दिशेत्।

[1]"सङ्कोच्यमध्यमां किञ्चिदुदात्ते तर्जनीं स्पृशेत्" इत्युक्तम्। उदात्तस्थादेकाक्षरात्परं यत् स्वरितं तत् स्वारसंज्ञं गणनामर्हति छलाक्षराय। तस्य हस्त सन्निवेशप्रकारः कथ्यते। ततः

"आवाजं वाज्यमेतत्तु जात्यादिस्वरितान्हृदि।

इतोन्यो योविशेषः स्यात् सन्नियम्ययथामिति"।।[2] इति समाप्यते।

17) छलाक्षराणि आर्चिकछलाक्षरम्-

म.रामनाथदीक्षितमहोदयेन 1978 तमे वर्षे सामप्रातिशाख्य-संग्रहाख्यग्रन्थे छन्दार्चिकपदानां छलाक्षराणि संपाद्य प्रकाशितम्। अस्य मूलकर्ता न ज्ञायते। छलाक्षराणि अक्षरप्रदर्शनव्याजेन तत्रत्यस्वरादीनां सूचकानि। यथा अग्ने वेखाथे इत्यादि अस्य विवरणमेवम्। पूर्वस्याम् ऋचि उदाहरणम्। स्वरितोदात्तधारीणां परिज्ञानमनेन भवति। यथा उदात्तात्परः स्वरितः 2 द्वि इति संख्यया ज्ञाप्यो भवति। तत्र अनुदात्तात्परः स्वरितोत्तरः अनेकोदात्तः यत्र तत्र स्वरितस्य गणना भवति अनुदात्तात्परोऽनेक उदात्तः स्वरितोत्तरः। संजगुः स्वारसञ्जतं सैव वामेन निर्दिशेत। एना विश्वानि

1. आ.ल- 9,　　2. आ.ल-16

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संग्राह्यमुदाहरणमुत्तमम् अनुदात्तयोर्मध्येऽनेकोदात्तः यत्र तत्रोदात्तग्रहणम्-

[1]"मध्येऽनुदात्तयोः स्यातामुदात्तौ प्रथमं तयोः।
उत्कलाः कोशमित्याहुः उदात्तं सम्प्रदायिनः॥"
सङ्कोच्यमध्यमां किञ्चिदुदात्ते तर्जनीं स्पृशेत्।

यादृशाक्षरेषु स्वराङ्कनो नास्ति पूर्वाक्षरस्वरेणैवैषामपि स्वरः तादृशाण्यक्षराणि धारीत्युच्यन्ते। अत्र पूर्वोक्तस्वरिताक्षरगणनेन यत्संख्या भवति तत्र पञ्चशो विभागे शिष्टं यद्येकं तदा "क" इति , यदि द्वे तदा "च" इति यदि त्रीणि, तदा "च" इति यदि चत्वारि तदा "त" इति , यदि पञ्च तदा "प" इति जानीयात्। तथा उदात्तान् परिगणय्य पञ्चशो विभागे शिष्टं यद्येकं तदा स्वरिताक्षरस्य प्रथमं यदि द्वितीयं तदा वर्गद्वितीयम् यदि तृतीयं तदा वर्गतृतीयं इत्यादि वर्गाक्षरं जानीयात्।

तथा धारीणां परिगणने दशशो विभज्य शिष्टं यद्येकं तदा उदात्ताक्षर प्रथमं क - प्रथमस्वरविशिष्टं जानीयात्। यदि द्वे तदा का - द्वितीयस्वरविशिष्टं एवं क,का,कि,की,कु,कू,के,कै,को,कौ इति क्रमेण जानीयात्। पूर्वोक्तरीत्या परिगणने नमस्ते अग्न ओजस इति द्वितीयखण्डस्य स्वरितानि षट् उदात्ते द्वे धार्यः द्विपञ्चाशत् स्वरितस्य शिष्टमेकं क इति उदात्तस्य द्वे, ख इति धार्याः, द्वे तदा खा इत्येतदक्षरं निर्देश्यं स्यात्। एतादृशैव मुद्रितपुस्तकेषु दृश्यते।

यदि कस्मिंश्चित् खण्डे उदात्तमेव नास्ति तदा स्वरितं परिगणय्य शिष्टम् ह य र ल व इत्यक्षरैः यथासंख्यं एकं, द्वि, त्रि, चतुष्पञ्च, संख्याभिर्जानीयात्। एतत्परिज्ञानाय "अग्ने नमस्तेऽग्निवो" इत्यारभ्यार्चिकखण्डान् परिगणय्य तत्र यथासंख्यं [2]"अग्नेवेखाथे" इति प्रपाठकानां छलाक्षराणि सम्यक् बोधयति छलाक्षराख्योऽयं ग्रन्थः।

1. आ.ल-8, 2. छ-1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

18) पदछलाक्षरम्

आर्चिकवत् पदपाठस्यापि छलाक्षरं विद्यते। आर्चिके यत् स्वरितं तत्स्थाने अत्र आद्युदात्तम्। उदात्तस्थाने अवग्रहम्। धारीस्थाने पदं च गणनीयम्। आद्युदात्तं च अग्ने इत्यत्र- 20 एतादृशाङ्कं विद्यते एतदेव गणनीयम् । अवग्रहं नाम वेष्टनपदम् हव्यदातये - हव्य-दातये इति । पदमिति सर्वपदानां ग्रहणम्। आद्युदात्तावग्रहयोः पञ्चशः पदानां दशशः विभागः करणीयः।

अग्न आयाहि इति प्रथमखण्डे आद्युदात्तानि 33। अत्र त्रीणि शिष्यन्ते पञ्चशो विभागे। त्रिसंख्यायाः "ट" इत्यक्षरम्। अवग्रहः 9 अत्र पञ्चशो विभागे चत्वारि शिष्यन्ते । अत्र चतुस्संख्यायाः पूर्वाक्षरवर्ग चतुर्थाक्षरग्रहणम्। पदानि 121 अत्र दशशो विभागे एकमवशिष्यते । तस्य "ढ" इत्येव ग्रहणम्। प्रथमखण्डे पदपाठस्य छलाक्षरं "ढ" इति। एतदेव अग्ने ढ ढो टे णी ज्ञौ इत्यारभ्य स्तोभपदपाठपर्यन्तं छलाक्षराणि ज्ञापयति। अवग्रहाभावे आर्चिके उदात्ताभावे यथा हकारादिगणनं तद्वत्।

उत्तरार्चिकपदपाठस्यापि एवमेव छलाक्षराणि विद्यन्ते। यथा उपास्मै गायत अस्य पदपाठे आद्युदात्तम् -12 , अवग्रहः -1, पदानि -32 छलाक्षरम् "चा" इति पूर्वोक्तरीत्या ज्ञातव्यम्। पूर्वस्यामृचि यथा छलाक्षरलक्षणमुक्तं तथैवोत्तरस्यामृचि उत्तरार्चिक छलाक्षरं ज्ञेयम्। तत्र प्रथमतः धारी, ततः उदात्तं, ततः स्वरितमिति क्रमेण गणनीयम्। "उपदविपव" इत्यारभ्याऽऽन्तं छलाक्षरमुक्तम्। प्रथमायामृचि "ती" इति द्वितीयायां "यि" इति दृश्यते।

19) प्रकृतिसामछलाक्षरम्

प्रकृतिसाम्नि दीर्घाक्षराण्यादितो गणनीयानि तानि पञ्चशः विभज्य शिष्टं क च इति क्रमेण एकद्वयादि संख्ययाऽर्चिकवत्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जानीयात्। ततः पदानि परिगणय्य पञ्चशो विभज्य दीर्घाक्षरवर्गे प्रथमादि यथासंख्यं पूर्ववज्जानीयात् । अनन्तरं मात्रां गणयित्वा दशशो विभज्य पदे यदक्षरं गृहीतं तस्य स्वरविशिष्टस्य क का कि की इति क्रमेण दशशो विभक्तस्य शिष्टं यत् तत्संख्यानुसारं गृह्णीयात्।

अत्र दीर्घमित्यनेन द्विमात्रमक्षरं "0" एतच्चिह्नविशिष्टं जानीयात्। पदमित्यनेन तावत् सर्वाणि पदानि। मात्रा इत्यनेन अनुस्वारः, विसर्गः व्यञ्जनं केवलं स्वराः एतत्सर्वं गृहीतव्यम्। एतेषां प्रमाणवचनानि कचटतपा ये वर्गाः विज्ञेया ग्रहणेन ते। हयरलवा इत्युक्तो वर्गो यत्र न गृह्यते।

"वर्गाक्षरं पदैर्विद्यात् मात्रां विद्याद्विवृत्तिभिः।
अनुस्वारो विसर्गश्च व्यञ्जनं स्वरवर्जितम्।
स्वराश्च सर्वे कथिता विवृत्तय इति ध्रुवम्।।"

विवृत्तयः मात्राः । एताः पदारम्भे यदि स्युः तदा न गणनीयाः। आर्चिकपदपाठयोरविद्यमानः कश्चित् विशेषः अत्र साम्नि वर्तते। साम्नि ऊनिधनं चेत् छलाक्षरे रेफः पूर्वं स्यात्। र्क इतिवत्। ई निधनं चेत् रेफः परं क्र इतिवत्। साम्नि वृद्धोपा चेत् छलाक्षरे लकारः, मध्योपा चेत् वकारः, दण्डो पाचेत् यकारश्च योजनीयः। क्ल क्व क्य इतिवत्। एवं छलाक्षरोदाहरणम्।

ओग्नाइ अत्र साम्नि दीर्घाः- 7 पञ्चशो विभागे द्वे शिष्यते। तस्य "च" इत्यक्षरम्। पदानि- 9 पञ्चशो विभागे चत्वारि शिष्यन्ते। तस्य चवर्ग चतुर्थं "झ" इति, मात्राः- 9 तस्य ओकारः "झ" इत्यनेन ओकारयोगे "झो" इति स्यात्। प्रकृति छलाक्षरं "अग्ने झो तू तू" इत्यारभ्य समाप्तिपर्यन्तं लभ्यते।

ऊहरहस्ययोरपि प्रकृतिवत् छलाक्षराणि गणनीयानि, किन्तु पदस्थाने उद्धं गणनीयम्। उद्धं नाम द्वितीयस्वरात् प्रथमस्वरं प्रति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आरोहतया यद्गीयते तत्पदम्। एतादृशोद्धाभावे आर्चिके उदात्ताभावे यथा ह य र ल वा गृह्यन्ते तथैव। ऊह छलाक्षरं द्विविधं विद्यते। "उच्चा न आमहीयवं पुनाबौटी रौरवयौधाजये" इत्यारभ्यते। "आमन बौटी" इत्यारभ्यापरो ग्रन्थः दृश्यते। ऊहगानारम्भ साम्नि आमहीयवे दीर्घाणि 9 , उद्धाः 5 , मात्राः 21, अत्र पूर्वोक्तरीत्या परिगणने **न**, इत्यक्षरं स्यात्। एवं छलाक्षर परिज्ञानेन वेदगताक्षरस्वरमात्राविपर्यासदोषान् निवर्तयितुं शक्यते।

20) छलप्रक्रिया

अस्मिन् ग्रन्थे छलाक्षराणां परिज्ञानप्रकारः, निधनभेदेन छलाक्षरभेदः, प्रत्युत्क्रामाभिगीतकर्षणवत्सु, छलाक्षरवैलक्षण्यं, उद्धतलक्षणं, विवृतिविवरणमित्यादयो विषयाः प्रतिपाद्यन्ते। अयं द्वाविंशच्छ्लोकात्मकः ग्रन्थः।

"पञ्चविधाष्टविधयोः छलयोः कथ्यतेऽधुना।
सन्देहमोचनी साम्नां प्रक्रिया निधनस्य च।।" इत्यारभ्य
"विधर्म साम चोत्तरं विवृत्या हीनमुच्यते।
पवस्वसोमसंज्ञकं कमित्युदीरिताक्षरम्।।"इति समाप्यते।

21) छलाक्षरकारिका

छलाक्षरकारिकायां आर्चिके छलाक्षरपरिज्ञानाय यादृशसङ्केताः प्रोक्ताः साम्नि तादृश सङ्केतात् अन्यः प्रकारः इति, आर्चिकगानयोः छलाक्षरपरिज्ञानप्रकारं सम्यक् बोधयति ।

[1]"दीर्घस्थाने तु स्वरितं पर्वस्थान उदात्तकम्।
मात्रा स्थाने तु धारी स्यात् प्राकृती छललक्षणम् ।।" इत्यारभ्य
"स्वरो विकारस्सर्वत्र पदादि वर्जमेव च।
पदान्ते च विसर्गश्च व्यञ्जनः स्थितसन्धिताः।।" [2]

इति पर्यन्तं अष्टश्लोकात्मकोऽयं ग्रन्थः समाप्यते ।।

1. छ.का-1,　　2. छ.का-8

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

22) सामप्रकाशकम्

सामप्रकाशनाख्योऽयं ग्रन्थः वेयगाने अरण्यगाने च विज्ञेयानि, दुरुहानि, सूक्ष्माणि, अवधारणसाधनानि बोधयति।

"गजवदनचरणकमलं नत्वा सामप्रकाशनं ग्रन्थम्।
रचयति सामसमूहात् प्रीतिकरस्सारमुद्धृत्य।"

इत्यारभ्य प्रवर्तेते। वेयगाने ऋग्विर्जितमेकमेव साम सन्त्वाहिन्वेति । दीर्घपद मात्राणां पञ्चैव विद्यन्ते, यस्तेनूनमिति साम्नि। सप्तस्वरात्मकं साम एकमेव मोषुत्वा वा द्वितीयम्। तृचात्मकं साम एकमेव एषाहाउ इति। प्रथमद्वितीयस्वरमात्रायुतं सामद्वयं इन्द्र सुतेषु च। आदावन्ते च पुनरुक्तं पादं ऋक्त्रये। उपनो हरिभिः मान इन्द्रपरावृणक् तरत्समन्दी। असंपूर्णार्चिकानि सामानि षट्। मानोह्वणीथा द्वयम्। अग्नेत्वन्नो द्वितीयं चतुर्थं च। अयारुचा द्वयम्। अकारस्य ओकारः षट्सु सामसु। अग्न आयाहि, अग्निर्वृत्राणि, अग्निस्तिग्मेन, अग्ने त्वन्नो इत ऊती, पुरोजिती। ऊकारनिधनानि सप्तसामानि, ईनिधनानि चतुर्विंशतिः, दण्डोपा निधनान्वितानि दशसामानि। मध्योपायुतानि पञ्चत्रिंशत्, आउवायुक्तं वा औहोवायुक्तं, दीप्तायुक्तं च साम, ऋचि ह्रस्वमक्षरं साम्नि दीर्घं भवति। तृतीयस्वरे चतुर्थस्वरे च धारी, धारी नाम पूर्वाक्षरस्वरेणैव स्वरवत्वम्। एतेषां सर्वेषां उदाहरणानि सम्यङ्निर्दिष्टानि।

स्तोभरहितानि सामानि चत्वारिंशत्। आदिछेकः त्रयस्त्रिंशत्। यथाऽरम्भे गानं तथौवोत्तरत्रापि। यथा अश्वन्नत्वा द्वितीयं, शन्नो देवीद्वितीयम् इत्यादि। एवं वेयगाने प्रतिपाद्य अरण्ये गेयेऽपि कथ्यते।

अत्र सप्तस्वरात्मकं साम एकम्। काह्वह्वह्व। आर्चिकपाठे स्तोभपदपाठे च अनधीतम् आक्रन्दय इति एकं ऋक्पदपूर्वकं गीयेतऽरण्ये। त्रिस्वरान्तरितस्वरं अश्विनोर्व्रतपूर्वे। ऊकारनिधनं प्रोक्तं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चैवारण्यसामसु। ऋग्युग्मेन समन्वितानि षट् अतीषङ्गाद्याः। द्विस्वराणि अष्टौ सुवस्संसर्प अग्निमीडे, अग्निरश्मि इत्यादि। तृचात्मकानि सामानि नव शाक्वरं, यण्वं, अपत्यं, परिधिसामानि षट्। दीप्तायुक्तानि एकादश। या औहोवा, वा औहोवा युक्तं साम। हस् अस् इति निधनयुतानि सामानि। आदिछेकस्त्रयोविंशतिः। ऋग्वर्जितानि स्तोभमात्रेण गीयन्ते सप्तत्रिंशत् सामानि। पतिर्दिवः इत्यादीनि। ईकारनिधनानि चतुःपञ्चाशत्। उहुवा हाउ वा इति युतानि षट्।

अथोहगीतीनां तृतीयचतुर्थयोरक्षरं तद्धार्यमुच्यते, इत्यारभ्य ऊहगाने "धारी" कथ्यते। तरोलेपेतेमा अयं दासे इन्द्रगो, अभीवर्ते सर्वत्राधार्यः, इति चतुर्थधारी । अथ तृतीयधारिण अभिश्यैते प्रस्ते इत्यादि। अभीवर्ते सर्वत्र तस्मान गोवर्जम् इति समाप्यते।

श्रीकृष्णस्वामिश्रौतिमहोदयैः मात्रालक्षणावग्रह-हितवाक्या-र्चिकलक्षण-छलप्रक्रिया ग्रन्थाः ग्रन्थाक्षरेण सङ्कलिताः।

23) रावणभेट्

ग्रन्थोऽयं मद्रासनगरस्थ कलाशालायां ग्रन्थाक्षरेणोपलभ्यते। रावणभेट् इति सर्ववेदलक्षणग्रन्थः । तत्र सामवेदे ओं कनक, तत्कं नरः, आने दिग्नं, गम्सः 7, नमोरस नेत्र अरः52 , अग्निग्रह द्वमासः52, यज्ञाधा 9 पावकत्यगीतिः। एनाथि चैकसप्ततिः। देवो रुद्रानयन मासः57 इत्यारभ्य ""एवा ह्येव यदिन्द्र जज्ञानश्चन्द्रमा अपि। अया सो मेति चैतेषु पदमात्रं प्रतिष्ठते। आद्युदात्तावग्रहौ नस्तः तेष्वृक्षु इत्यर्थः। पूर्व ऋक्पदस्य खण्डं प्रति रावणभेट् समाप्तः। अस्य व्याख्या नोपलभ्यते । छलाक्षरयुक्तमिति प्रतिभाति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

24) पाणिनीयशिक्षा

कर्ता "पाणिनिमहर्षिः"। पाणिनीयशिक्षायास्साधारण्येऽपि सामवेदलक्षणेष्वन्यतममिति प्रस्तूयतेऽत्र। आरम्भे "अचां व्यञ्जनानां व्यवस्था क्रियते"। अक्षराणां बुद्धिमनस्संयोगेन आविर्भावः मन्द्र मध्य तार स्थायि त्रयस्य उत्पत्तिस्थानं उदात्तादिस्वरेभ्यः निषादादयः उत्पद्यन्ते। अक्षराणां उच्चारणहेतुभूतानि स्थानानि अष्टौ। अक्षरोच्चारणप्रकारः यथा व्याघ्री स्वापत्यस्य नयनानयनकाले स्वदंष्ट्राभिः नात्यन्तकाठिन्यमार्दवाभ्यां संगृह्य नयति तथोच्चारणं कर्तव्यमिति ज्ञापनम्। वेदपाठकानां षड्गुणाः दोषाश्चेति कथनं, वेदपुरुषस्य छन्दः पादौ, कल्पसूत्राणि हस्तौ, ज्योतिषश्शास्त्रं नेत्रं, निरुक्तं श्रोत्रं, शिक्षा घ्राणं, व्याकरणं मुखम्, उदात्तादयः हस्तरेखासु हस्तविन्यासेन दर्शनीयाः अन्यथा दोषः। वेद पारायणेन पापानि नश्यन्ति पुण्यानि वर्धन्ते इत्यादयो नैका विषयाः प्रदर्श्यन्ते।

"अथशिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा।
शास्त्रानुपूर्वं तद्विद्यात् यथोक्तं लोकवेदयोः।"

इत्यारभ्य

त्रिणनयमभिमुखनिस्सृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः।
स भवति धनधान्यपशुपुत्र कीर्तिमान् अतुलं च सुखं समश्नुते दिवि।।

इति समाप्यते। ग्रन्थेऽस्मिन् एकोनषष्ठिश्लोकास्सन्ति।

25) नारदीयशिक्षा

नारदेन प्रणीयत्वादस्य नारदीयशिक्षेति नाम। भट्टशोभाकरो अस्या व्याख्याता। प्रपाठकद्वयं षोडशखण्डाः चत्वारिंशदुत्तर द्विशतश्लोकाश्चात्र सन्ति।

"अथातः स्वरशास्त्राणां सर्वेषां वेदनिश्चयम्।
उच्चनीच विशेषाद्धि स्वरान्यत्वं प्रपद्यते।।" इत्यारम्भः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वरस्त्रिविधः, आर्चिकसामिकगाथिकभेदात्। स्वरादिवैगुण्ये विपरीतफलस्य श्रुतत्वात् तत्र अवधानमावश्यकम्। मन्द्रमध्यमताराणां स्थानभेदः। कुत्र कानि व्यज्यन्ते। ऋग्वेदे कीदृशः आह्वारकाः स्वराः के ? छन्दोगवाजसनेयिनोः ब्राह्मणस्वरः। ताण्डिभाल्लविनां स्वराः, एते प्रतिपाद्यन्ते प्रथमे खण्डे। सप्तस्वराः, त्रयो ग्रामाः एकविंशतिर्मूर्च्छनाः । तेषां विवरणम्, मूर्छनानां नामानि उत्पत्तिः षड्जादिना केषां प्रीतिः इत्यादयो द्वितीये। रक्तं पूर्णमित्यादयो गानगुणा दश तेषां लक्षणानि। गानदोषाश्चतुर्दश। तेषां लक्षणानि च तृतीये। षड्जादीनां स्वराणां वर्णः पद्मपत्रनिभष्षड्जः, इत्यादिना स्वरसन्निवेशेन सामगानमनन्तप्रभेदं भवति। तथा ग्रामभेदोऽपि इत्यादयो विशेषाश्चतुर्थे।

वैदिकलौकिकगानयोः स्वरवैलक्षण्यम् यस्सामगानां प्रथमस्स वेणोर्मध्यमः स्वरः इत्यादिना। षड्जादीनां उर आदि स्थान विशेषादुत्पत्तिः, षड्जादीनां अग्न्यादिदेवताकत्वचिन्तनमावश्यकं, गान्धारादि स्वरश्रवणेन गवादीनां प्रीतिर्भवति, निषादादिशब्द निर्वचनं च क्रियते पञ्चमे। गानसाधनं वीणाद्वयं तत्र दारुमयी वीणा लौकिकगानस्य, शरीरमेव वीणा वैदिकस्य । हस्तसन्निवेशप्रकारः। प्रणवव्याहृतिसावित्र्यनुवचनपूर्वक स्वाध्याया-भ्यासः, अङ्गुल्या स्वर निर्देशः मात्रागणनं सव्येन, शरीरचेष्टा-राहित्येन गानं हस्तसन्निवेश-मुखोच्चारणयोस्समकालिकत्वम्। स्वरच्युतौ दोषः द्रुतमध्यमविलम्बितभेदेन वृत्तिस्त्रिविधा। तस्य उपयोगकालः, एवं शिक्षाशिक्षित एवाध्यापयितुं शक्त इत्यादि षष्ठे प्रतिपाद्यते।

क्रुष्टादिस्वराणां मूर्धादिस्थानादुत्पत्तिः, अङ्गुष्ठाद्यङ्गुलिविशेषेण स्वरसन्निवेशप्रकारः, देवमानुषपशुगन्धर्वादयः सप्त, क्रुष्टाद्यैस्स्वरै-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रुपजीव्यन्त इत्यादिः । दीप्ताऽऽयताकरुणानां ज्ञापनायाऽङ्गुलिसन्निवेशप्रकारः, तेषां उच्चनीचत्वादि विशेषश्च प्रतिपाद्यते सप्तमे।

अष्टमे, आर्चिकस्वरत्रयं, स्वरितप्रचययोस्स्वरुपं, स्वरितस्य साप्तिविद्ध्यं, वैस्वर्यलक्षणमित्यादयः प्रतिपाद्यन्ते। सप्तविधस्वरितस्य पृथग्लक्षणं, कम्पलक्षणं चोच्यते नवमे। ह्रस्वदीर्घभेदेन कम्पो द्विविधः, शिवकोदात्तलक्षणं, व्यञ्जनानां द्वित्वविधिः, तस्यापवादः, यमाख्यस्य वर्णविशेषस्य लक्षणं, अनुस्वारोपध्मामूलीयानां लक्षणं, तेषां पूर्वाङ्गत्वपराङ्गत्वनिर्णयः इत्यादयो विचार्यन्ते दशमे।

पदकाले उदात्तादीनां स्वरान्तरत्वप्राप्तिः, मात्राद्विमात्रादीनां, कालनिर्णयः, प्राणिध्वनिसादृश्येन, अवग्रहलक्षणमित्यादयः, प्रतिपाद्यन्ते एकादशे। चतसृणां विवृत्तीनां लक्षणं, तासां मात्राकालः, अनुस्वारलक्षणं, रङ्गलक्षणं, रङ्गोच्चारणप्रकारः, इत्यादयोद्वादशे निरुप्यन्ते। स्वराणामुदात्तादीनां स्वरानुवर्तितत्वम्। अष्टविधा गतिः, सन्ध्यलक्षणं, तस्य विकारः, इत्यादिः त्रयोदशे। स्वरभक्तिलक्षणमुच्यते चतुर्दशे। पथ्यालक्षणं पदपाठे आद्युदात्ताद्यष्टविधस्वरलक्षणं, पञ्चविधमाचार्यलक्षणं, तत्र प्रतिज्ञायाः प्राबल्यं, स्वरसौक्ष्म्यस्य तुम्बुरुनारदादिभि रप्यविज्ञेयत्वमुक्तं पञ्चदशे। गानप्रागल्भ्याय शरीरारोग्यसाधनं, अभ्यव्यवहारादिकं,प्राणोपरोधस्वरोनोपयोक्तव्यः, सदाचार्यादभ्यासः, वेदोच्चारणसमये मुखसन्निवेशप्रकारः, विद्यादाने अपात्रनिरुपणं, विद्यार्थिभिरभ्यसनीयागुणविशेषाः, गुरुशुश्रूषाया आवश्यकत्वं च प्रतिपाद्यते अन्तिमे।

"एवं वर्णाः प्रयोक्तव्याः नाव्यक्ता न च पीडिताः।
सम्यक् वर्ण प्रयोगेण ब्रह्मलोके महीयते।"

इति समाप्यते। भट्टशोभाकरकृतव्याख्यानस्य, प्रकाशाख्या टिप्पणी काचित् श्रीनारायणस्वामिदीक्षितेन विरचिता विलसति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

26) गौतमीयशिक्षा

गौतमीयशिक्षायां अक्षराणां संयोगे कीदृशो विकारः कति व्यञ्जनानि एकस्मिन् अक्षरे संयोक्तुं शक्यन्ते इत्यादयो विचार्यन्ते। गौतममहर्षिणा रचिता इयम्। अस्यास्संयोगश्रृङ्खलेति नामान्तरमस्ति। द्वे प्रपाठके षोडशखण्डाश्च सन्ति।

अत्र त्रयस्त्रिंशद्व्यञ्जनानि इत्यारम्भः। व्यञ्जनानि त्रयस्त्रिंशत्। कादयः मावसानाः स्पर्शाः। यकारादयः चत्वारः अन्तस्थाः। शकारादयः चत्वारः ऊष्माणः। एतेषां एकत्रयोगे संयुक्ताक्षरं भवति तत्र प्रथमस्थ द्वित्वं भवति। यथा अग्न आयाहीत्यत्र गकारस्य द्वित्वम्। वर्गद्वितीयचतुर्थाक्षराणां रेफहकारयोश्च द्वित्वं नास्ति। वर्गद्वितीयस्य द्वित्वस्थले पूर्वं वर्गप्रथमाक्षरं, चतुर्थस्य तृतीयाक्षरं च क्रमेण श्रूयते। यथा वेत्थाहि, भरामेध्मम् इत्यादौ। रेफहकारयोः परमक्षरं द्विर्भवति। अर्क्कोदेवानां, ब्रह्मजज्ञानम् इत्यादौ अथ द्व्यक्षरयोस्संयोगः।

शन्नोदेवीः, उन्नयामि अत्र यथासंख्यम्, न् न् ओ, न् न् अ इति नकारद्वययोगः। त्र्यक्षरयोगः आक्रन्दय न् न् द् अ नकारद्वयं दकारश्च।

चतुरक्षराणाम्। अग्न आयाहि, ग् ग् यम न् अ। अत्र गकारद्वयं नकारः, गकारतकारयोर्मध्ये यम इत्यक्षरमेकं विद्यते। तच्च निस्वरूपम्। अशरीरं यमं विद्यात् इत्युक्तेः। अनन्त्यान्त्यसंयोगे मध्ये यमो नाम कश्चिद्वर्णविषयः अस्तीति ज्ञेयम्। अत्र गकारः अनन्त्यः नकारः अन्त्यः तयोर्योगे मध्ये यमो वर्तते वर्णक्रमोच्चारणसमये तस्य विवरणं भवेत्। पञ्चाक्षराणाम्। विश्वप्स्न्या इति प् प् स् न् य् आ एवं अग्नेयुङ्क्ष्वा ङ् ङ् क् ष् व् आ। षडक्षराणामुदाहरणम् तत्र कात्स्न्यी। र् त् त् स् न् य् आ एवं सप्ताक्षराणामपि उदाहरणं शाखान्तरे दृश्यते। इत्थमक्षरपरिज्ञानात् सुष्टु प्रयोगो भवति। संयुक्ताक्षराणि त्रिधा विभक्तानि, अयस्पिण्डः,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दारुपिण्डः, ऊर्णापिण्डः इति । यमयुक्तः अयस्पिण्डः, अन्तस्थयुक्तः दारुपिण्डः। यमान्तस्थरहितः ऊर्णापिण्डः एवं निरुप्य-

"एषा सहस्रवर्त्मात्मा नाना वृत्तिविभूषिता।
संयोगश्रृङ्खलानाम सामवेदनिबन्धनात्।।"

इति ग्रन्थः समाप्यते। अस्य व्याख्या नोपलभ्यते।

27) लोमशीयशिक्षा

अस्य ग्रन्थस्य कर्ता गर्गाचार्यः।

"लोमशीयशिक्षा प्रवक्ष्यामि गर्गाचार्येण चिन्तिताम्।
साभिधानां यथोक्तान्तु आचार्य वचनं यथा।"

इत्यारम्भः अष्टखण्डात्मिकैषा शिक्षा प्रवर्तते। अत्र स्वरविशेषाः तेषां उच्चारणप्रकाराश्च कथ्यन्ते। ह्रस्वदीर्घवृद्धाभिगीतादयस्वराः मृदङ्गवत् श्रूयन्ते, कम्पस्य निर्वचनं, दीर्घकम्पेह्रस्वकम्पे च उच्चनीचयोः मात्राविधिः, रङ्गो द्विविधः, स्वरपरो व्यञ्जनपरश्चेति, तस्य मात्राकालः, अनुनासिकोच्चारणप्रकारः, अक्षराणां द्विर्भावः, तत्र पूर्वङ्गत्वपराङ्गत्व-विधिः स्वारलक्षणम् पदपाठे, आद्युदात्तान्तोदात्तमध्योदात्तादयः स्वरविशेषाः, बहवः प्राणापानसाम्नोः उच्छ्वासनिश्वासप्रकारः, अणुमात्रादीनां स्थाननिर्देशः, मात्रादीनां चाषादिध्वनिसमानता इत्यादि विचार्यतेऽत्र ।

"शून्यगृहे पिशाचस्तु गर्जते न च दृश्यते।
एवं यकारा वक्तव्याधियग्निर्जर्म निदर्शनम्।।"इति समाप्यते।

28) गीतिकल्पम्

कर्ता "रामशुक्ला" । गीतिकल्पम् अथवा गीतिकल्पपरिशिष्टम् इति कश्चनग्रन्थः वर्तते। अत्र ऊहसाम्नां प्रतिसाम प्रस्तावभक्तिः कथ्यते। चतुश्चत्वारिंशत्खण्डा सन्त्यत्र। पुष्पसूत्रान्तिमे खण्डद्वये

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रस्तावभक्तिरुक्ता। तथापि अत्र तदपेक्षया विशदतया प्रस्तावपरिज्ञानं भवतीति विशेषः। अपि च ऊहगानस्य साम्नां योनिभूतप्रकृतिसाम्नां बृहद्भारद्वाजादीनां महानाम्न्यन्तानां प्रतिसाम प्रस्तावः प्रस्तूयते। अथोहगीतसाम्नां योनिगानान्यनुक्रमिष्यामः प्रस्तावलक्षणैस्साकम् इत्यारभ्य-

"प्रस्तोतुर्मोह नाशाय गीत्याख्यं बोधसिद्धये।
चकार रामशुक्लाख्यो गीतिकल्पं सलक्षणम्।।" इति समाप्यते।

29) सामधारणलक्षणम्

कर्ता सभापतिः। जैमिनीयसामगानां प्रकृत्यारण्यक साम्नां हस्तस्वरादिविषये लक्षणमत्र विद्यते। अवरोह, उद्गम, यानम्, आवर्तः, क्षेपणम्, मर्शनम्, अवरुह्यक्षेपणमित्यादि स्वराणां विमर्शनं क्रियतेऽत्र। श्लोकात्मकोऽयं ग्रन्थे (75) पञ्चसप्ततिः श्लोकाः सन्ति।

"स्वरं सप्तविधः प्रोक्तमङ्गुष्ठेनाङ्गुळीषु च।
क्रुष्टोप्यङ्गुष्ठ तर्जन्योरग्रसंश्लेषमेव च।। इत्यारभ्य
त्रिसहस्त्रं जैमिनीयशाखायां वेदवित्तमैः।"इत्यन्तमुपलभ्यते।

विषयबहुलसत्वेप्यत्रावश्याकानि विषयानि यथामति प्रतिपाद्य आत्मानं कृतकृत्य मन्यामहे।

==*********==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शोधार्थं ज्ञातव्याः

राणायनी, कौथुम, जैमिनीशाखामतिरिच्य इतोऽपि सात्यमुग्र, नैगेय, शार्दूलः, वार्षगण्यः, गौतमः, भाल्लविनः, शाट्यायिनः, तारुकिणः, कापेयः, माषशराव्यः, शरद्विषः, शाण्डिल्यः, ताण्ड्यः शाखाः एवं प्रान्तभेदेन पाठपरम्परामबलम्ब्य शाखान्तराणि श्रूयन्ते। तेषां सर्वेषां प्रमाणानि एवं च ग्रन्थानां विषये शोधकर्तृभिः शोधः कर्तव्यः।

अत्र किञ्चित् उपरोक्त शाखाविषये प्रस्तूयते-

1-सात्यमुग्रः- एतत्तु राणयनीय उपशाखा इति कथ्यते। शिक्षाग्रन्थस्य षष्ठप्रकरणे

"छन्दोगानां सात्यमुग्री राणायनीया ह्रस्वानि पठन्ति।

सात्यमुग्र शाखीयाः सन्ध्यक्षराणि ह्रस्वरूपेण पठ्यन्ते।

व्याकरणमहाभाष्ये (1.1.4.46) "नमच भूश्छन्दोगानां सात्यमुग्री राणायनीया अर्धमेकारमर्धमोंकारञ्चाधीयते" इति विद्यते।

2-नैगेयः- कौथुमशाखायाः अवान्तरशाखेति चरणव्यूहे उक्तास्ति। इतोपि द्रष्टव्या।

3- शार्दूलः- काशिस्थ पुस्तकभण्डारे पुस्तकसूच्यां शार्दूलशाखा इति ग्रन्थस्य नाम विद्यते। खादिरगृह्यसूत्रं शार्दूलशाखायाः गृह्यसूत्रं विद्यते। हेमाद्रिश्राद्धकल्पपरिभाषाप्रकरणं 1078-1079 पृष्ठायां तद्यथा शार्दूलशाखिनां "सपूर्वो महोनमिति मधुश्श्रुन्निधनं" इत्युक्तम्। अस्य शाखायाः नैकानि प्रमाणभूतवाक्यानि श्राद्धकल्पप्रकरणे उक्तानि सन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

4-वार्षगण्यः- त्रयोदश शाखायां वर्णितास्ति। चरणव्यूहटीकायां महीदासेन पिङ्गलछन्दस्सूत्र (3-12) टीकायां, यादवप्रकाशः वार्षगण्यसंहितायां प्राप्तः नागी गायत्री छन्दसः उदाहरणम्- "यूयोरिदं विश्वमेजिति ता विद्यां सा हवामहेवां। वीतं सोम्यं मधु" इति वार्षगण्यः इत्युक्तम्।

5- गौतमः-गौतमधर्मसूत्रम्, गौतमपितृमेधसूत्रम्, गौतमशिक्षा इदानीन्तन समये प्रचारे अस्ति कारणात् इतः पूर्वं गौतमीशाखा प्रचारे चासीदिति ऊहितुं शक्यते।

6- भाल्लविनः- अस्य शाखायाः प्रतिवचनम्- "हत्वा विद्यान्धियैवे यत्तद्विष्णोः परमं पदम्" 219 बृहदारण्यकभाष्यवार्तिके उद्धृतकारणात् जैमिन्युपनिषद् भाष्यस्य पूर्वमस्याः शाखायाः प्रचारः आसीदिति ज्ञायते। अस्याः शाखायाः ब्राह्मणस्योल्लेखः नारदशिक्षा(1-16), द्राह्यायणश्रौतसूत्रम् (3-4-2), निदानसूत्रम् (3-3), शाङ्करवेदान्तसूत्र-भाष्यम् (3-3-26), महाभाष्यम् (4-2-104), बृहद्देवता (5-23), इत्यादि नैके ग्रन्थेषु प्रमाणभूतरुपेणदृश्यत्वात् "भाल्लविनशाखा" व्यापकतया आसीदिति ज्ञायते।

7- कालबविनः- अस्याः शाखायाः वचनानि आपस्तम्ब श्रौतसूत्रम्(20-9-9), उपग्रन्थसूत्र(1-10), निदानसूत्रम्(6-7), पुष्पसूत्र (8-8-84), इत्यादि ग्रन्थेषु उद्धृताः सन्तीति कारणात् पूर्वमस्याः शाखायाः विद्यमानत्वं प्रमाणयति।

8- शाट्यायनिनः- खादिरगृह्यसूत्र (1-3-15) "प्रायश्चित्तं जुहुयात्" सूत्रस्य रुद्रस्कन्दभाष्ये पुनश्च "व्याहृतिभिराज्यं जुहुयात्" इति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शाट्यायनविधानं निरुपितमस्ति। एतद्रूपेण अस्य शाखायाः विद्यमान विषये प्रमाणवचनानि जैमिन्युपनिषद्ब्राह्मण,उपग्रन्थसूत्र भारद्वाज एवं बोधायनसूत्राणि, वेङ्कटमाधवकृतभाष्यं, पुष्पसूत्रम्, ताण्ड्य-ब्राह्मणसायणभाष्यम्,कात्यायन ऋक्सर्वानुक्रमणिकायां उपलब्धत्वात् अस्याः शाखायाः व्यापकरुपेण प्रचारः आसीदिति निश्चप्रचं वक्तुं शक्यते।

9- तारुकिणः- "तारुकि शाखोक्तानि यजूँषि " इति ताण्ड्यब्राह्मणस्य सायणभाष्ये विद्यते। एवं रुपेण अस्याः शाखायाः उक्तिः, गोभिलगृह्यसूत्रे, द्राह्यायणश्रौतसूत्रे च दृश्यमानत्वात् अस्याः अस्तित्वविषये इतोऽपि ज्ञातव्यम्।

10- कापेयः- अस्याः शाखायाः वचनानि जैमिनीयब्राह्मणम्, सत्याषाढ श्रौतसूत्रेषु च दृश्यते।

11- मूषशराव्यः- पाणिनीय गणपाठे एवं च द्राह्यायण-श्रौतसूत्रटीकायामस्याः शाखायाः वचनानि दृश्यन्ते।

12- शरद्विषः- ताण्ड्यमहाब्राह्मणे अस्य शाखायाः नाम विद्यते।

13- शाण्डिल्यः- लाट्यायन एवं द्राह्यायणकल्पसूत्रेषु तथा आपस्तम्ब श्रौतसूत्रस्य रुद्रदत्तभाष्येऽस्याः वचनान्युपलभ्यन्ते।

14- ताण्ड्यः- कौथुमशाखायाः अवान्तरभागः ताण्ड्यशाखा आसीदिति शाङ्करवेदान्तसूत्रभाष्ये- "अन्येऽपि शाखिनस्ताण्डिनः शाट्यायनः" (3-3-27) , "यथैतेषां शाखिनां ताण्डिनां पैङ्गिनांच" (3-3-24), छान्दोग्ये(6 -82), ताण्डिनमुपनिषदि (3-3-36), उल्लेखो विद्यते। छान्दोग्यस्य ताण्ड्यरहस्यब्राह्मण, ताण्ड्यआरण्यकमिति नाम आसीदिति उह्यते। ताण्ड्यशाखायाः अन्यगृह्यसूत्रं स्यात्।

==*********==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

फुल्लपोतम्

(गणेशपण्डितकृतम् ऊहरहस्यसामलक्षणग्रन्थस्य पुष्पसूत्रस्य व्याख्यारूपम्)

श्रीगुरुभ्यो नमः। हरिः ओम्

वन्दे वररुचिं नित्यमूहाब्धेः पारदृश्वनम्।
पोतो विनिर्मितो येन फुल्लसूत्रशतैरलम्।।

नमोस्तुऽनीलग्रीवाय नमो रामानुजाय च।
नमो नन्दकुमाराय नमो गोविन्दयज्वने।।

निमज्जतामूहमहाम्बुराशौ उत्तारहेतोः कृपया गणेशः।
आदायफुल्लान्यपवादसूत्राण्याद्यादिभावेषु करोति पोतम्।।

अथोहरहस्ययोः क्रत्वर्थमधीतानां पञ्चचत्वारिंशदुत्तराधिक सहस्रसंख्याकानां आमहीयवरथन्तरादीनां साम्नां ऊहगाने योनिवत्स्वरा स्तोभाभ्यासविरामाश्च योनिवदुत्तरयोर्गीतिर्यद्योन्यां गायति तदुत्तरयोर्गायेदित्यादि सूत्रे योनिवत् स्तोभाभ्यास विरामैरुहाध्ययने प्राप्ते प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनेषु पञ्चभक्तिषु वररुचेः फुल्लसूत्रे आइभावाद्यष्टादशभावेषु यानि सूत्राण्यपवादत्वेनाधीतानि तानि यथामति श्रुतं मुहुर्मुहुः विमृश्य सामगानां सम्यगवबोधनार्थं अस्माभिः प्रतिस्तोत्रं गृह्यते।।

दशरात्रम्

प्रथमो विंशः

5 0 2 40 5
1.आमहीयवम्-उच्चाताऽ3इजातमन्धसाः ।। पादप्रस्तावः। [1]पद्योऽनादेशे इति वचनात्। अथ तालव्यमाइयद्वृद्धम्, इति महासामान्यम्। एतद्वृद्धं वृद्धोवृद्धिः प्लुते इति त्रिमात्राभूतानां वर्णानां पर्याय संज्ञा। [2]वृद्धस्सिते वृण्यन्तः। शाक्त्ये हीष्यन्तो वृद्धः [3]इति सूत्रकारेणोक्तः त्रिमात्रभूतानां तालव्याक्षराणां सर्वत्र आइभाव आदेशो

1.ख- पाद्योनादेशे।। 2. वृद्धिः..। 3. ख- वृद्धः वृद्धिः प्लुतेः इति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवति इति सूत्रार्थः। कानि तालव्यानीत्यत आह[1] - ए इ ऐ ई इत्येतानि तालव्यानीति। इचुयशानां ताल्विति शास्त्रान्तरोक्तं अत्र न प्रवर्तते। एवं वृद्धानां तालव्याक्षराणां आइभावे प्राप्ते यत्र यत्र अपवादत्वेन वृद्धमन्तः पदे तालव्यमाभवति। यौधादेवस्तावे, इत्येवमादिसूत्रैः आभावप्रकृतिभावावुक्तौ[2] । तत्र तत्र तौ प्रदर्शयिष्यामः। अथोस्थभावो वृद्धमाउ। अस्य सूत्रस्य अयमर्थः । उस्थशब्देन उकारऊकार ओकार औकारा गृह्यन्ते। एतेषां वृद्धानां उस्थाक्षराणां आउभाव आदेशो भवतीति। सर्वत्रैवमाउभावे प्राप्ते यत्प्रकृत्या तस्य वचनं [3]ग्रहणम्। अपदान्तस्समानं चेति अस्यायमर्थः। पदमध्यवर्तिनां पदान्तानां वृद्धानां उस्थाक्षराणां पुनः प्रकृतिभाव विधानम्। दिवाइसाऽ1द्धूऽ2। वरुणाऽ1याऽ2। मरुऽ23द्भिर्याः। मधूऽ2प्रियाम् इति रौरवे एवं सर्व प्रकृतिभावे प्राप्ते [4]न रवे विकल्पे इत्यादिना यत्र यत्र [5]पुनराउभावो विधीयते तत्र तत्र व्यञ्जयिष्यामः। वोवित्सर्वत्रेति अत्र वोविच्छब्दस्य प्रकृतिभावे प्राप्ते नामरुप इत्यादिना अत्र आइभाव एव। आउवाव्यवहितमाउभवति [6]सर्वं पदान्त्यं च व्यञ्जनं लुप्यत इति एतदपि महासामान्यम्। महाऽ23इश्रवाउ इत्यत्र वश्शब्दस्य । वनामह इत्यत्र हे शब्दादीनां सर्वत्राभावविधानम्। एवं सर्वात्राभावे प्राप्ते अनाउभावो कण्वतर इत्यादिभिः यत्र यत्र [7]अनाउभावः प्राप्तस्तत्र तत्र दर्शयिष्यामः। उच्चैर्वरीयवे इत्यत्र मध्यमायां तृतीयपादाद्यस्याक्षरस्य योनिवन्नीचे प्राप्ते उच्चविधानम्। आमहीयवमध्यमायां उग्रँशर्मा ररि मातामिति पूर्वसूत्रेणोक्तार्थमेतत् [8]नामान्तरमस्ति । अवृद्धादिपदान्तात् स्वरे परे यकारो व्यवधीयते। उ पदान्ताच्च वकारो विकर्षे सर्वत्र इति। एतेऽपि महासामान्ये।

1- आह फुल्लकारः, 2- ..भावावौक्तौ, 3- ..तस्य वचनम्, 4- न रौरवे, 5- यत्राउभावो, 6- स्वरं पदान्तं च.., 7- नाउभावः उक्तः, 8- पदं नास्ति,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अत्र विश्वानीत्यत्र [1]निशब्दात्परं यकारस्य व्यवधाने प्राप्ते द्व्यन्तस्थ परे तु लोपः इति निशब्दात्परं यकारस्य लोपः। स्तौभिकानि सामान्तिकानि सामान्ते सर्वत्रेति सामान्ते निधनं न प्रतिस्तोत्रीयम्।।

2 0 0 1 5
2.रौरवम्- पुनानस्सोमा॰3धारा॰34या । पादप्रस्तावः पूर्ववत्। रवे घं षष्ठमिति आद्यन्तयोः प्रस्तावषष्ठस्य दीर्घाक्षरस्य वृद्धिविधानम्। मध्यमायां ह्रस्वत्वादवृद्धिरेव । दिव्यं ज्यर्षसि यशस्सँसर्पपुष्पोष्विति, अत्र विप्रकृष्टौ आपृच्छ्यमवृद्धँ सर्वत्रेति अत्र पृच्छशब्दस्य कृष्टः। अर्षसि यारत्नधायो इत्यत्र अवृद्धादि पदान्तादित्यादिना यकारव्यवधानमेव । स्वोवारथन्तरमितिवत्। अत्र साम्नि सङ्कृष्ट- ग्रहणाभावात् । ओवौकारयोरनन्तरस्वरनीचाद्ययोः प्रत्यययोस्सर्वं वृद्धमाभवत्यन्तलोपश्चेति महासामान्यसूत्रेणाभावे प्राप्ते सर्ववर्णानां ऋगन्तीयस्पर्शः प्रथमस्वरो नामिविसर्जनीयश्च ना भवति तत्र [2]चौहोशब्दः प्रथमात् कृष्यत इति । अत्र [3]मध्यमायां ऋगन्तभूतस्य तकारस्य नाभावः। तत्र चौहोवाशब्दः प्रथमात्कृष्यते । निधनोपायान्ताः स्तोत्रीयास्सर्वत्रेति। अत्र पूर्वयोः स्तोत्रीययो-रुपायान्ता भवति। अत्रोपायशब्देन वा शब्द उच्यते।।

3 2
3.यौधाजयम्- पुना॰31 ।। पूर्ववत् पादप्रस्तावः। यौधादेवस्तावे इति देवशब्दस्य प्रकृतिभावः। निधने हीषीस्थँ सर्वत्रेति अत्र निधनभूतस्य [4]हीषीस्वरस्थस्य तालव्यस्य[5] प्रकृतिभावः। निधनलक्षणं द्राह्यायणेन [6]दर्शितम्। इहकारे वाथकारे॰त्यादिना । नजिनं वृषा सन्तनिनीत्यादिभिर्यत्र पुनराइभाव उक्तस्तत्र तत्र दर्शयिष्यामः। सौभराभीवर्तयौधाजयानां वृद्धन्तुरीयमिति। अत्राद्ययोस्स्तोत्रीययोः प्रस्तावतुरीयस्य दीर्घाक्षरस्य वृद्धिविधानम्। ह्रस्वत्वात्तृतीयाया-न्तुरीयस्यावृद्धिरेव। अभरादिर्यौधाजये सर्वमिति स्यायमर्थः ।

1- वि शब्दात्परं, 2- चौहोवाशब्दः, 3- मध्यमायामृगन्ते भूतस्य.., 4- हीषीस्थस्य, 5- सर्वत्र, 6- संदर्शितम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अत्राद्यन्तयोस्स्तोत्रीययोः प्रस्तावषष्ठस्य[1] वृद्धिविधानम् । मध्यमायां रेफस्य अवृद्धिरेव। भक्तिमध्यः पादमध्यश्चास्तोभे प्रत्यये सन्ध्यगीतं सर्वत्रेति भक्तिमध्यभूतस्य पादमध्यभूतस्य च [2]वृद्धस्याःकारस्य अस्तोभे प्रत्यये सर्वत्र सन्धिगानविधानम्। आपोऽ3-ऊत्सोऽ3- दाइवो ऽ2- धौतोऽ2 इत्येवमादय एवं सर्वत्र सन्धिगाने प्राप्ते । देवः प्रत्युत्क्रान्त इत्यादिभिर्यत्र यत्र पदगानविधानं तत्र तत्र प्रदर्शयिष्यामः। देवोजयसाप्तमिकत्रिणिधनायास्येषु च थे [3]सर्वादिरिति। अत्र मध्यमायामुद्गीथे द्वितीयपर्वादि भूतस्य देवशब्दस्य वृद्धिविधानम् । अन्यत्र यौधाजये न भवति इत्यर्थः। यौधाजये चेति वसान इत्यत्र अःकारस्य अत्वविधानम् । विसर्जनीय लोप इत्यर्थः । व्यञ्जनमपराङ्गं विरामे लुप्यत इति। एतदपि महासामान्यम् । अस्य सूत्रस्यायं पिण्डितार्थः। पदमध्यगतानां अतिहार विध्यङ्गभूतानां पूर्वस्वराङ्ग-भूतानां अनुस्वारस्पर्शरिफाणां पर्वावसाने लोपविधानम्। यत्र सामगा विरम्य[4] गायन्ति तत्र विरते सामभागे पर्वसंज्ञा वर्तते। वामदेव्ये-ऽनुस्वारस्योदाहरणं मँहिष्ठ इति। अत्र नौधसे स्पर्शस्योदाहरणम्। क्षुमन्तमित्यत्रावसानो अर्षसीति रेफस्य । एवं सर्वत्र लोपे प्राप्ते नोर्मयार्णसार्जुनऋभ्वस इत्यादिना यत्र यत्र लोपो[5] विद्यते तत्र तत्र व्यञ्जयिष्यामः। भक्त्यन्तः पदगीतस्सर्वत्रेति। अत्र प्रथमायां प्रति-हारान्तस्य उत्स इत्यत्राःकारस्य वृद्धस्य पदगानविधानं । एवं पदगानं सर्वभक्तिष्वन्ते प्राप्ते क्रौञ्चाष्टमिकेश्वो इत्यादिना यत्रापवादो विद्यते तत्र व्यञ्जयिष्ये।जयेहारादित्यत्र सर्वासु प्रतिहारात्परस्याक्षरस्य वृद्धिः।।

4.औशनम्- प्रातू । पर्वप्रस्तावः।। [6]जाराग्निन्दूतोपक्रमणान्ते एवाविभाग्यानामिति यथैतच्चतुर्थमन्द्रातिस्वार्याणां स्वराणां

1- दीर्घाक्षरस्य, 2 - वृद्धस्याःकारभूतस्य, 3- थे सार्वादिः, 4- विरम्य विरम्य.., 5- लोपो न विद्यते। 6- जराग्नि..,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्व्यन्तरमुच्चमुदूह इति उदूहविधानं प्रस्तावस्य । चतुर्थस्य प्रथमम्, मन्द्रस्य द्वितीयम्, अतिस्वार्यस्य तृतीयं एवं च द्व्यन्तरशब्दस्यार्थः । “न चेत्समानपुरुषे वचने तृतीयप्रभृतीनामुदात्ततमः कश्चित्स्वरो भवति, तमुदूह इत्याचक्षते” इत्यनेन ब्राह्मणवचनेन यत्र यत्र उदूहप्रतिषेधो विद्यते तत्र तत्रोच्यते । ([1]शनेषीदइन्दुर्ऋषियेना । प्र। सर्वत्र प्रशब्देन प्रकृति भवति इति जानीयात्। शने च स्वास्विति। अत्र सर्वासु उद्गीथ द्वितीयस्य वृद्धिविधानम् । नान्यत्रेत्यर्थः)। स्वासुशने द्वितीयपादद्वितीयमिति। अत्र सर्वासु द्वितीयपाद द्वितीयस्याक्षरस्य वृद्धिविधानं नान्येष्वौशनेषु । पदान्ते काम्पापदादौ च दीर्घे इत्येतदपि महासामान्यं । अस्यायमर्थः । प्रकृतौ काम्पा वृधन्तेति पदद्वयमस्ति। इ^{2}द^{1}न्तए- का^{2}ऽ3म्पा^{1}रः- अ^{5}ग्निँवाऽ6ए^{5}- वृ^{2}ध^{1}न्ताम् इत्येते पर्वणी । ऊहगीतौ पार्थौशनवाराहादिषु ऋचि पदान्ते वर्णादिभूते [2]ह्रस्वे दीर्घे च काम्पा भवति। पदादौ दीर्घाक्षरादिभूते एव । अन्यत्र वृधन्तेत्यर्थः। एकाक्षर पदादिभूते वृधन्तैव। शु^{2}ष्मी^{1}शर्धो-न$^{2\,1\,0}$मारु - स$^{2\,1\,0}$म्मातृभाङः -सईँ$^{2\,1\,0}$ रथो। आद्यन्त्यवदेकस्मिन्नित्युभयधर्मत्वमिति । त्रिष्टुभिचोतायांशने च द्वितीय चतुर्थस्थमिति त्रिष्टुप् छन्दसि औशनपार्थवाराहादिषु या ऊता गीतयः तासु द्वितीयचतुर्थस्थे त्वक्षरे दीर्घे यदि वृद्धे भवत इत्यर्थः। अयतीमित्यादि प्रतिषेधो यत्र विद्यते तत्रोच्यते । स्वास्वौशने चेति स्वायुध इत्यत्र सु शब्दात्परमवृद्धादि पदान्तादित्यादिना व्यवधान प्राप्तस्य वृद्धात्परौ य्वौ लुप्ताविति लोपप्राप्तस्य [3]यकारस्य पुनरलोपविधानं । [4]अन्त्यायाञ्चान्त्येति । अन्त्यायां स्तोत्रीयायां अन्त्यपाददद्वितीयस्यापि शब्दस्य वृद्धि विधानम्।। [5]शनेनस्वास्विति उद्गीथद्वितीयस्याक्षरस्य वृद्धिः।

1- क- पुस्तके एतद्भागं नास्ति, ख- शनेनीषीद इन्दुऋषियेन, 2 - ख- ह्रस्वे दीर्घे नास्ति,
3- ख- वकारस्य , 4- अन्त्यायामन्त्येति, 5- ख-वाक्यमिदं नास्ति , क- तालपत्रे वर्तते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5.वामदेव्यम्- कयानः वामदेव्यम्। काऽ5या। पादप्रस्तावः। देव्येखीनाम्। प्रस्तावोपान्त्य देव्ये दाखीसो इति योनिवत् । स्तावोपान्त्यस्याक्षरस्यावृद्धिप्राप्ते उत्तरयो र्दा, खी इति एतयोः उपान्त्ययोः वृद्धिविधानम् । मत्सरि शब्दाः स्वासूत्तरयोर्देव्ये इत्यत्र उत्तरयोः स्तोत्रीययोश्चतुर्थपर्वणि मत्सरीत्येतेषान्त्रयाणां वृद्धि-विधानम्। योनाववृद्धिरेव। विच्छन्दस्सु च देव्ये इत्यनेन विच्छन्दसां वामदेव्यसाम्नां विशेषविधानात्। [1]विच्छन्दसि सर्वत्र चतुर्थपर्व योनिवदुच्चनीचमेव। ओवौकारयोरित्यादिना सर्ववर्णानामाभावे प्राप्ते देव्येत्वनृगन्तीय इत्यादिना जरितृणामिति [2]ऋ मध्यभूतस्य णां शब्दस्यानाभावविधानम् । तत्र [3]चौहोशब्दः प्रथमात् त्कृष्यते । ओवौकारयोरेकी भावे लोप इति सर्वत्र महासामान्यम्। सियौहोऽ3। रुजौहोऽ3, इत्येवमादीनि। मन्द्रकृष्टंचामन्द्रकृष्टं च ओ भवति सर्वत्रेति। [4]वृता,वस्वित्यादिनामो भवति।।

6.नौधसम्-तँवोदस्मनौधसम्।ताऽ234म्-वोदस्मामृती।षाहाम्। पादप्रस्तावः। धसेभिषुधेरिन्न । इति प्र। धसे वे कृष्टाद्धिस्तो मुद्रोजिष्ठञ्चश्चवाज्योरिन्नरोजीति। अत्र तृतीयायां द्वितीयपर्वणि रिन्न इत्यतयोः उच्चविधानं । धसे चतुर्थोच्चाद्यं योनिवदिति अत्र मध्यमायां द्वितीयपर्व योनिवदुच्चनीचं भवति। नौधस आइन्द्रन्तात् इति नौधसे सर्वत्र प्रतिस्तोत्रीयं पर्वद्धयमस्ति। तयोः परस्याक्षरस्य वृद्धिविधानम् । आइन्द्रेति किम् ? सँहिते स्वादिष्ठायां आइन्द्रा । अतं,नपु,ण इति ।एवं सर्वत्र वृद्धिप्राप्ते क्षुमन्तमित्यत्र तं शब्दस्य गिरिन्न इत्यत्र न शब्दस्य [5]चावृद्धिविधानम्। प्राह्वांघंह्लंचासंयोगे इति अत्राद्ययोः प्रहूयसाया द्वितीयस्य [6]वृद्धिः असंयोगपरत्वात्। अन्त्यायां संयोगपरत्वादवृद्धिरेव

1.ख- सच्छन्दसि.., 2.क- निधनमध्यभूतस्य णां, 3.ख- चौहोवा..,
4. ख- वृता,वसू,तये..मो भावः, 5. ख- ..स्य अवृद्धि.., 6- वृद्धम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वाचिसर्वमोभवतीति ओभावस्सर्वत्र । प्रतिस्तोत्रीयमार्चिकानि निधनानीति प्रतिस्तोत्रीयं निधनं भवति।।

7.कालेयम्- तरोभिर्वोकालेयम्। 5 0 2 40 5 4 5 तरोभाऽ3इर्वोविदद्वसूम्। पादप्रस्तावः। संहिते योनिद्रोणे सर्वत्र पर्षि इति। लेये प्रस्तावसदृक् तुरीयं शिप्रमतिसुताद्ययोरिति। अत्र तृतीयायां प्रस्तावतुरीयस्य वृद्धिविधानम् । पूर्वयोर्न । लेये योच्चादिर्यस्याच्छोत्तरयोः परिप्रत्नायां चेति। अत्र सर्वासु उद्गीथे पञ्चमपर्वाद्यस्याक्षरस्य नीचारम्भः[1]। थादेश्चपरमिति अत्र सर्वासु उद्गीथ द्वितीयस्य वृद्धिः। ओवौकारयो-रेकीभाव इति सर्वासु लोपः।।

8.सँहितम्-स्वादिष्ठायां सँहितम्। 10 2 0 स्वादिष्ठयाम। पादप्रस्तावः। संहिते योनिं द्रोणे सर्वत्र पर्षि इति प्र। दक्षसंहितयोः स्वादिमान्त्ययोः इत्यत्र उत्तरयोः प्रस्तावादिः नीचैः। द्व्यन्तरमुच्चमुदूह इति अत्र प्रस्तावस्योदूहः। पातवे नौ संहिते इति तालव्यमाइयद्वृद्धमित्यनेना आइभावं प्राप्तस्य वृद्धमन्तः पदे तालव्यमित्याभावप्रकरणे पातवे[2] इत्यत्र वे शब्दस्य पदान्तस्य ग्रहणादाभावविधानम् । प्रतिस्तोत्रीय-मार्चिकानि निधनानीति सर्वासु निधनम्।।

9.सफम्- पवस्वमधुसफम्। 2 1 2 4 5 पवस्वाऽ3मधु।। पादप्रस्तावः। सफे पीत्वा स्तावे क्रमीन्नाए । इति प्र। सफपौष्कलयोर्वे हीष्यामित्यत्र मध्यमायां प्रस्तावे हीषीस्वरे परतः पूर्वस्य मोशब्दस्य वृद्धिविधानम्।। ह्रस्वत्वादाद्यन्तयोरवृद्धिः।।

10.पोष्कलम्- इन्द्रमच्छापौष्कलम्। 2 1 2 4 5 इन्द्रमाऽ3च्छसु ।। पादप्रस्तावः। ष्कले [3]ताइसइविदइन्द्रो अप्सुजित्सर्वत्रेति प्र। अत्रापिसर्वासु प्रस्तावे हीषी स्वरे परतः पूर्वस्य दीर्घाक्षरस्य वृद्धिः। ष्कले योनाविति । अत्राद्यायामुद्गीथे द्वितीयस्य वृद्धिः। भक्त्यन्तः

1.क -नीचारम्भम्। 2.ख- पातवे नौ ।3- .विदे दिन्द्रो..।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदगीतस्सर्वत्रेति। अत्र मध्यमायां प्रतिहारान्तस्य पर्वमध्यगतस्य मश्शब्दस्य पदगानमेव।

"आर्चिकं निधनं न्याये स्तौभिकं वा यदाक्षरं
कृष्टाकृष्टं भवेत्स्वार्यमन्तोदात्तं वृधे स्वरम्।।"

अस्य श्लोकस्यायमर्थः- आर्चिकानां स्तौभिकानां निधनानां [1]निधनगतवतीनां अन्त्योवर्णः प्रचयश्चेत् द्वितीयादिसम्प्रसारणं- स्वरितश्चेत् प्रथमादि । उदात्तश्चेत् वृधे स्वरमित्येवं सर्वत्र प्राप्ते मणाञ्जनमित्यादि न्यायादपेतप्रकरणे आविशासि विदेऽप्सुजिदिति ग्रहणादत्रोत्तरयोस्स्तोत्रीययोः दे शब्द जि शब्दयोः उदात्तयोः सम्प्रसारणमेव । सर्वत्र पञ्चभक्तिषु आर्चिकानि स्तौभिकानि वाङ्निधनभूतानि। अन्तर्निधनभूतानि निगदवन्तीनि पर्वाणि यानि सन्ति तानि समस्तानि । षिबमन्तदुक्थयोर्वे, द्रिदँष्टे, षासिते, वँसङ्कृतियशसोः । धस्सन्तनिनीत्येवमादिति[2]। एवं यत्र यत्र ऋक्स्वरप्रतिषेध उक्तः तत्र तत्र प्रतिषेधं विमृश्य ऋक्स्वराबाधेन गेयानि।।[3]

11.श्यावाश्वम्-[4]पुरोश्यावाश्वम्। पुरोऽ31।। (पु and रो marked 3 2) पादप्रस्तावः। वाश्वेजिति श्नथि घजि योवृद्धाद्दीसर्वत्रेति-श्वाची-प्र। श्यावाश्वेचेति । अत्र सर्वासु तुरीयस्य दीर्घाक्षरस्य वृद्धिः । यकारे च प्रत्यये वृद्धमन्तः पदे तालव्यमाभवति। एतदपि महासामान्यम्। तालव्यमाइयद्वृद्ध- मित्यनेनाइभावप्राप्तस्य यकारे च परतः आभावविधानम्। ह्वाऽ345योऽ6हाइ- त्वाऽ345योऽ6हाइ (marked 2, 5, 2, 5) । एवं सर्वत्राभावे प्राप्ते नरथ्यं [5]महस्तवानायामित्यादिभिः यत्र पुनराइभाव उक्तः तत्र प्रदर्शयिष्यामः। यज्ञायसन्तु सर्वत्रेति। सन्त्वद्रय इति । अत्र तु शब्दात् परं [6]वृद्धादिपादान्तादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परौ य्वौ

1-निगदवर्तिनां ।2- धस्सन्तनीनि। क. 3- मदेष्वश्रेति.... दावसयोरिति लोपप्राप्तस्य वकारस्य लोपः।।ख.4- नास्ति। 5- महस्तवायाम्। 6-ख- अवृद्धादि पदान्ता..,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लुप्ताविति लोपप्राप्तस्य [1]वकारस्य पुनरलोपविधानम्।।

12.आन्धीगवम्- [2]पुरोजितीवोअन्धसः- आन्धीगवम्। पादप्रस्तावः। पुरोजितीवोऽ1न्धासाः। धीगवे घजिनस्तावे अभी। प्र। अन्धस क्षुल्लकान्धीगवयोरिति। अन्धस इत्यत्र अकारस्य लोपः। धीगवे स्ताव षष्ठं प्रत्युत्क्रामति सर्वत्र । चमं योनौ इत्यत्र [3]सर्वत्र प्रस्तावषष्ठस्य प्रत्युत्क्रामे प्राप्ते । प्रथमायां पञ्चमाक्षरस्य प्रत्युत्क्राम-विधानम्। कौल्मलान्धीगवकावाभीकसोमसाम ऋषभमरुतां योनौ प्र। इत्य थमायामुद्गीथाद्यस्य नीचविधानम्। ओवौकारयोरित्यादिना सर्ववर्णानां आभावे प्राप्ते ऋगन्तीयस्पर्श इत्यादिना अत्र प्रथमायां ऋगन्तभूतस्य यं शब्दस्यनाभावविधानम्। विश्वाच्याश्विनोर्व्रत[4] इत्यादिना च्याशब्दोऽत्र विकृष्टः। आन्धीगवे च द्वितीयं, इत्यनेनोपद्रव द्वितीयाक्षरस्य [5]सर्वत्र वृद्धिः गावे प्राप्ते असन्त्वित्यत्र [6]सा शब्दस्य वृद्धिप्रतिषेधः।।

13.कावम्- अभ्योवाकावम्। अभ्योवा ।। वान्तप्रस्तावः। [7]कावेधिरतार्ती अधितृतीयायां, प्र। [8]कावेस्वासुभि शब्दादकारागमो वाशब्दे च नित्यमोत्वं । इति अभि इत्यत्र भि शब्दात्परमकारागमो भवति । अभि आ इति स्थिते इकारस्य अन्तस्थापत्तिः। वाशब्दे च नित्यमोत्वं भवति। [9]अकारागमाभावे अभोवा इति प्राप्नोति। कौल्मलान्धीगवेत्यादिना प्रथमायां उद्गीथाद्यस्य नीचविधानम्। सूर्यस्याभिप्रियाणीत्यत्र स्वारकावज्ञीययोरितिं। अत्र र्यशब्दः सङ्कृष्टः। वृद्धमृवर्णं सर्वमार्भवति षकारस्पर्शयोः प्रत्यययोरिति वृद्धानां सर्व ऋवर्णानामार्भावे प्राप्ते तृकारस्तु न सर्वेषु स्पर्शेष्वार्भवतीति अनेन तृ शब्दस्यानार्भावे प्राप्ते तृकारस्तर्षयोः प्रत्यययोरार्भवतीति । अत्र

1- नास्ति, 2.क-पुरोजितितः ...प्रस्तावः इत्यन्तं ख पुस्तके नास्ति, 3- योनौ, अत्र प्रस्ताव..., 4- ..नोर्वत, 5- नास्ति, ख- द्वितीयाक्षरस्य वृद्धिप्राप्ते वृद्धिप्रतिषेधः, 6- स शब्दस्य, 7- कावेधिरता तार्ती रधी.., 8- कावेभिशब्दा.., 9.क- स्वारकाव अकारा..।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयायामित्यत्र तृ शब्दस्य आर्भावः। आन् कारो वृद्धोऽनुनासिक-स्सर्वत्र इति। कलशाँ इत्यत्र वृद्धस्यआन् कारस्य अनुनासिकमेव।।

14.यज्ञायज्ञीयम्-यज्ञाय यज्ञायज्ञीयम्। यज्ञा 4 3 ऽ5य।। प्रथमायां पादप्रस्तावः। [1]उत्तरयोद्व्र्यक्षरः सर्वत्र प्रगाथेषु। बृहद्रथन्तरयोः यज्ञायज्ञीयस्य [2]चानादेशे ककुभावुत्तरयोद्व्र्यक्षरप्रस्तावः सर्वत्रेति द्राह्यायणेनोक्तः। ज्ञीये स्वासुपुनादेवः। आद्यायामन्यत्रेति अत्र सर्वासूद्गीथाद्यस्य [3]वृद्धिः। गिरागिराप्रप्रनशँसिषं तस्थुषश्चेत्यनुब्राह्मणं स्वाध्यायेति। अत्र इराइरा पप्रीं सुशँसिषं इत्यनुब्राह्मणमेव। ज्ञीये वयमूर्जस्तँसिञ्चमातधीतिमिति। अत्र वयमूर्जस्तं इत्येषां वर्णानां नीचविधानम्। ष्विता दाशेमहायां ज्ञीयविशीय वारमहामित्र तरेष्विति। अत्र ष्वशब्दः सङ्कृष्टः। अग्नये ज्ञीये इति। यज्ञायज्ञावो अग्नय इत्यत्र एङः पदान्तादित्यनेन पूर्वरूपप्राप्तस्य प्रकृत्या अन्तः पादमध्यपरः। इति विशेषप्राप्तस्य अकारस्य पुनर्लोपविधानम्। प्रतिस्तोत्रीयं बोधीयधुरासाकमश्वयोः कण्वबृहति चेति। अत्र वाङ्निधनस्य पूर्वयोः स्तोत्रीययोर्नप्रवृत्तिः। थमोच्च द्वितीयं ज्ञीये सर्वत्रेति थमोच्च द्वितीयस्य सर्वत्र कर्षणे प्राप्ते अत्र ककुभि-चतुर्थमित्यत्र उत्तरयोः प्रथमोच्चस्य चतुर्थस्याक्षरस्य कर्षणविधानम्। ज्ञीये दान्त इति प्रस्तावोऽपान्तस्य वृद्धिः। आउवा व्यवहितमित्यादिना सर्वत्राउभावः।।

15.साकमश्वम्-एह्युष्व-साकमश्वम्। एह्यूषू 500 2 ऽ3ब्रवाणा 4 0 5 ऽ6इताइ 5।। पादप्रस्तावः। वृण्यादिकमश्वे। इति सर्वत्र उद्गीथे द्वितीयपर्वाद्यस्या-क्षरस्य नीचविधानम्। नोत्तरयोः स्वास्वित्यत्र उत्तरयोः उच्चमेव। एह्यूकमश्वे इति एह्यूशब्दः सङ्कृष्टः। श्वासुकमश्वोत्तरयोरेभिर्वर्धा प्रवइन्द्रायां पूर्वसूत्रोक्तार्थमेव। पर्जन्यवल्लक्षणप्रवृत्तिरिति न्यायेन

1. ख-उत्तरयोस्सर्वत्र द्व्यक्षरः..। 2.ख- च अकुभा..।। 3.ख- वृद्धिविधानम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नार्थान्तरमस्ति। एकारादःकाराच्च भोग इति । एभिर्वर्धास इत्यत्र एकारात्परं यकारापत्तिः। वृद्धमन्तःपदमित्यादिना इन्दुभिरित्यत्र इकारस्याभावः।।

16.सौभरम्- वयमुत्वा-सौभरम्। व[5]या[4]ऽ3मू[2]ऽ3त्वा[4]मपू[50]र्वियो[4]वा[5]।। पादप्रस्तावः।। सौभराभीवर्तेत्यादिनात्र आद्यन्तयोः तुरीयस्य दीर्घस्य वृद्धिः। मध्यमायां ह्रस्वत्वादवृद्धिः। भरेस्थूरमेवासर्वः । इत्यत्र प्रथमायां उद्गीथाद्यस्य नीचविधानम्। गतिमान् पूर्वस्तोभः सौभरेसनोयुवेति। अत्र मध्यमायां पूर्वस्तोभस्य गतिः। उत्तरस्त्वगतो[1] भद्राइन्द्रस्य मदत्यनुमादेवत्राहव्यं प्रेमध्वरायेति। अत्र सर्वासु उत्तरस्तोभस्य गतिरेव। त्वामिध्यविभरे त्वां सर्वत्रेति अत्र त्वाध्याशब्दयोः सङ्क्रुष्टविधानम्। योनौ प्ररे चेति। अत्र सर्वासु प्रतिहाराद्यस्य उच्चमेव। वाचि सर्वमोभवतीति सर्वास्वोभावः। भरन्तस्सौभरलेययोरिति अस्तोभे प्रत्यये सन्धिगाने प्राप्ते पदगानविधानम्। अनुस्वारः स्पर्शः स्ववर्गीये प्रत्यये रेफस्पर्शोष्मभिस्संयुक्ता एते शब्दास्त्रयोऽन्तःपदिकाः स्तोभव्यवहिताः सर्वत्रातिर्ह्रीयन्ते। स्तोभान्ते विरामे लोपः सन्धावलोपः इति । एतदपि महासामान्यम्। अस्य सूत्रस्यायं पिण्डितार्थः। व्यञ्जनमपराङ्गं विरामे लुप्यत इत्यनेन पदमध्यवर्तिनामतिहारभाव-विध्यङ्गभूतानां अनुस्वारस्पर्शरिफाणां विरामे लोप उक्तः। एते अनुस्वार स्पर्शरिफाः। येन स्तोभेन व्यवहिताः तस्य स्तोभस्य पुरस्तात् स्तोभाक्षरेण सन्धीयमानाः तं स्तोभमतीत्य स्तोभात्परं विरामे सति । विरामात्पूर्वं[2] दृश्यमाना विरामात्परं स्पर्शेन ऊष्मणावा सति एकीभवतीति एतदतिहारविधानम्। अतिहारस्य उदाहरणमपि सूत्रकारेणोक्तम् । बर्हिषितर्तुराणाः पिशङ्गमीशानकृदघशँसरांशिसं = हमंहेत्येवं[3] जातीयानि। एवं सर्वत्रातिहारे प्राप्ते अतिहार प्राप्तं व्यञ्जनं लुप्यते आनँशदेव्ये । इत्यादिभिस्सूत्रैर्यत्र यत्रातिहारे लोपः उच्यते तत्र

1. उत्तरस्त्वगतिमान् । 2.ख- विरामात्पूर्वमदृश्य..।3. ख- अधशँसहँ हमँहेति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्र प्रदर्शयिष्यामः। मयोभरेति स्तोभे प्रत्यये सन्धिगानम्। ओवौकारयोरित्यादिना आभावः सर्वासु।।

17.नार्मेधम्- अधाहीन्द्रगीर्वणाए-नार्मेधम्। अधाहीन्द्रगीर्वणाऽ 3ए। पादप्रस्तावः।। यथेतच्चतुर्थेत्यादिना उदूहः। नार्मेधेऽधाह्याद्ययो[1]-रिति योनिवत्सर्वत्र प्राप्ते अत्राद्ययोः[2] ऊनछन्दस्त्वात् [3]स्य गा थ या इति पर्वचतुष्टयस्य लोपः । नार्मेधे द्वितीयं [4]वसोराधायान्तेति योनौ अस्यायमर्थः। योनौ वसोराधाद्वयमस्ति। ऊर्जाम्पाता, चातासृभा इति। योनौ सृशब्दस्य अवृद्धिः। ऊहगीतौ तत्स्थानगतस्य राधाद्वितीयस्य सर्वत्र वृद्धिरिति। ससृग्मावावृध्वा च नार्मेधे इति। वृद्धमृवर्णं सर्वमार्भवतिषकारस्पर्शयोः प्रत्यययोरिति सर्वत्रार्भावे प्राप्ते अत्राद्ययोः स्तोत्रीययोः सृशब्द वृशब्दयोः अनार्भावविधानम्। नार्मेधे मई, दभि, व्याभिस्तिशूह्माणि दिवे पूर्वमिति प्र। व्याभिर्नार्मेधे इति व्याशब्दस्सङ्क्रुष्टः स्वस्सर्वत्रेति । स्वर्विद इत्यत्र स्वशब्दात्परस्य पदान्तभूतस्य ओवौकारयोरित्यादिना लोपप्राप्तस्य विसर्जनीयस्य अतिहारविधानम्। ओवौकारयोरित्यादिना सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति । तऊदभिरित्यत्र ऊ शब्दस्य नाभावः।।

18.वैतहव्यम्- पान्तं-वैतहव्यम्। पाऽ5न्तम्।। पादप्रस्तावः। होहव्ये इति अत्र तृतीयायां प्रस्तावोपान्त्यस्य हो शब्दस्य वृद्धिः। हव्येचेति । अत्र प्रथमायामुद्गीथद्वितीयस्य वृद्धिः । हव्येहारद्वितीय-मिति, अत्र सर्वासु षडक्षरस्य प्रतिहारे द्वितीयाक्षरस्य नीचविधानम् । अपुरोजिप्रान्त्ययोरिति। पुरोजित्यां वैतहव्ये प्रथमान्त्ययोः तृतीय-प्रभृतीनां नीचविधानम्। हव्येत्सिबायामिति सर्वत्र त्सिबायां प्रत्यये पूर्वस्याक्षरस्य वृद्धिविधानम् । अयादाविति । आदौ विद्यमान

1. ख-द्ययोः पाह्यूम इति। 2.ख- ..द्ययोः ष्ठकारः ऊन..। 3.ख- स्य गा थ या नास्ति। 4- राधायान्तेति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यकाराद्यायां त्सिबायां प्रत्यये अवृद्धिः। उपदान्ताच्चवकारो विकर्षे [1]प्राप्ते वकार प्रत्ययस्य आकारस्य वृद्धिविधानं सर्वत्र । ऊनानां पादानां अन्यथा गीतिरेव।।

19.शाक्त्यम्- प्रवइन्द्रा- शाक्त्यम्। प्रवइन्द्राऽ2 ।। पादप्रस्तावः। शाक्त्ये प्रथमायां सर्वे इति प्रथमायां सर्वेषां अगतिः। उत्तरयोश्चकृमासत्यत्वंहिरण्ययुश्च दीर्घवृद्धोपहित [2]इति यकारापत्तिः । शाक्त्ये हीष्यन्तोवृद्ध इति । अत्र सर्वासु हीषीस्वरस्य अन्त्याक्षरस्य वृद्धिप्राप्ते अशतेति अत्र तृतीयायां शतक्रतो इत्यत्र त शब्दस्य हीषीस्वरान्त्यस्य अवृद्धिः। शाक्त्ये चेति। अत्र कृष्टात्परस्याक्षरस्य अवृद्धि प्राप्ते । नयमेति । सखाय इत्यत्र यकारस्य चकृमा इत्य मकारस्य वृद्धिविधानम्। ओकारस्सखायस्सो शाक्त्ये इति ओवौकारयोरित्यादिना आभावे प्राप्ते सखायस्सो इत्यत्र सोशब्दस्य अनाभावविधानम्। वाचि सर्वमोभवति इति अनेन सर्ववर्णानामोभावे प्राप्ते अनुस्थमिति हिरण्ययुरित्यत्र ओभावो न भवति । ण्यायूर्वा इति, चकृमा शाक्त्य इति, वृद्धमृवर्णं सर्वमित्यादिना सर्व ऋवर्णानामार्भावे प्राप्ते चकृमा इत्यत्र कृशब्दस्य अनार्भावविधानम्। ओवौकारयो रित्यादिना सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति। गव्यूरित्यत्र व्युशब्दस्य अनाभावः।।

20.काण्वम्-वयमूत्वातदिदर्थाः-काण्वम्।वयमूऽ3त्वातदिदर्थाः[3]। पादप्रस्तावः।। अन्ते चेति उपरिष्टात्स्तोभाः प्रस्तावाङ्गत्वे प्राप्ते उद्गातुस्तु काण्वऋषभः[4] वासिष्ठे इति उद्गीथाङ्गं भवति। काण्वे तवेदयन्ति यन्ति प्र। उपायद्वितीयं काण्वे योनाविति। अत्र प्रथमायां उपद्रव द्वितीयस्य वृद्धिः।उत्तरयोर्न भवति । काण्वेरन्ते इति अनेन

1.ख-विकर्षे सर्वत्र। 2.ख-..पहित इपदान्त इत्यादिना यकार..। 3.ख. वयमूऽ3त्वा तदिदर्थाः। 4.ख- ऋषभः पवमान जनित्राणां हुवादिर्वासिष्ठे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यद्वृद्धं जरन्त इत्यत्र ते शब्दस्य [1]पदान्तश्चाइभावे प्राप्ते यकारे च परतः आभावविधानम्। प न काण्वे इति योनिवत् प्रस्तावान्त्यस्य नीचप्राप्ते [2]पकारस्य उपान्त्यस्यापि नीचविधानम्।।इति प्रथमः।।1।।

==*==

।।द्वितीयो विंशः।।

1 0 2 1 20 1

1.श्रौतकक्षम्-इन्द्रायमद्वनेसुतम्-श्रौतकक्षम्। इन्द्रायमद्वनेसुतम्। वान्तप्रस्तावः। कावश्रौतकक्षेत्यादिना । कक्षेसुते। प्र। कक्षेसर्वे इति सर्व स्तोभा अगतयः । नेन्द्रं गीर्भिराघागमन्नियमते इति एतेषु गतिः। अनुस्वारस्पर्श इत्यादिना अत्र चतुर्थस्थाने ष्वन्तः पदाधिकारः। वाचिसर्व मो भवतीत्योभावः[3] ।।

4 3 4 3

5

2.दैवोदासम्- अयन्तइन्द्रसोमा-इहवद्दैवोदासम्। अयन्तइन्द्रसोऽ4मः । पाददृयं प्रस्तावः। द्विपात्सञ्जयेत्यादिना । दासेषि। प्र। दासे चेति। अत्र प्रथमायां प्रस्तावाद्यस्य मध्यमायामुद्गीथाद्यस्य चायमित्यत्र अकारस्य नीचविधानम्। अयं दासोत्तरयोर्जरिसंघातमिति अत्र उत्तरयोः स्तोत्रीययोः प्रस्तावे जरिसङ्घातो भवति। न योनिवत्। जरिसङ्घातः अग्नेजरितर्विश्पतिद्वितीये साम्नि । सोशब्दो दासे इति। अत्र प्रथमायां सोम इत्यत्र सो शब्दस्य वृद्धिः। एहीमिहवद्दैवोदासे इति । एहीमित्यत्र वृद्धस्य हि शब्दस्य ओइभावविधानम्। एकारश्च प्रकृतिप्राप्त ऐ भवतीति [4]इहवद्दैवोदासे । अत्र एहीमिति एकारस्य प्रकृतिप्राप्ते ऐकारादेशविधानम्। इहवद्दैवोदासोत्तमायां प्रथमः । इति प्रणपादित्यत्र णकारस्य प्रइति विरामे नत्वे प्राप्ते पुनः णत्वादेश-विधानम्। कुण्डपाय्यः सद्मने इत्यत्र पाय्यशब्दो विकृष्टः। द्वियकारः संयुक्ते विकृष्टे पूर्वो यकारः प्लुत आकारस्सम्पद्यते इति पाय्य इत्यत्र

1.ख- पदान्तस्याइभावे। 2.- क पुस्तके विद्यते। ख - नास्ति। 3.ख- ..तीति सर्वास्वोकारः। 4.ख-इहदासे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सङ्क्रुष्ट यकारोऽत्र विकृष्टः। [1]पूर्वो यकारः प्लुत आकारे प्राप्ते [2]य्य शब्दः कुण्डपाय्यो महेनायां चेति। दासवाजीययोः या शब्द एव। प्रणपात्कुण्डपायाऽ23याः। सत्यश्रवसिवाऽ3। यायाइ इति। [3]अयं दासोत्तरयोः। दैवोदासे उत्तरयोः स्तोत्रीययोच्छतोत्पत्तिः भवति। स्तौभिकानि सामान्तिकानि सामान्ते सर्वत्रेति सामान्ते निधनं न प्रतिस्तोत्रीयम्।

3.और्ध्वसद्मनम्- अयन्तइन्द्रसोमः - और्ध्वसद्मनम्। अयन्तइन्द्र सोमः । उवाहाइ। उपरिष्टात्स्तोभसहितः पादप्रस्तावः। अन्ते चेति वचनात्। सद्मनेऽयमिति अत्र प्रथमायां प्रस्तावाद्यस्य मध्यमायां उद्गीथाद्यस्य नीचविधानम्। अवृद्धादि पदान्तादित्यादिना बर्हिष्युवाऽ23होइ । इति व्यवधानो भवति। कुण्डपाय्यस्सद्मने इति अत्र य्य शब्दस्सङ्क्रुष्टः। दीर्घवृद्धोऽपहित इत्यादिना यस्मिन् दा इति यकारापत्तिः। सामान्ते निधनं न प्रतिस्तोत्रीयम्।

4.आकूपारम्-आतूनइन्द्र-आकूपारम्। आतूनइ।।पादप्रस्तावः। द्व्यन्तरमुच्चमुदूहइति अत्रोदूहः। आतूनाकूपारे चाद्याया मिति अत्र प्रथमायामाद्यपर्वणिचत्वार्यक्षराणि। षट्पञ्चाक्षराणि[4] उत्तरयोरिति [5]उत्तरयोः प्रस्तावाद्यं पर्वषट् पञ्चाक्षराणि यथासंख्यम्। आकूस्ताव तृतीयं नीचमाद्यायाम्। [6]आद्यं मध्यमायां इति। आद्यं मध्यमायां नीचं, पारे कूर्मि। प्र। विद्माकू इति मध्यमायां प्रस्तावादिर्नीचैः। सङ्गृभातून इति अत्राकूपारे। इति अत्र प्रथमायां गृ शब्दस्यानार्भावः। ओवौकारयोरनन्तर [7]इत्यादिना आभावे प्राप्ते गृशब्दस्यानाभावः।

1.क- प्रचयकारः।। 2.क- या शब्दः। 3.क- अयं .... भवति पर्यन्तं नास्ति। 4.क...क्षराणि यथा संश्लेषःस्तोभान्तेच नीवारयाद्य द्यन्तमायातिभिः नीचम्। 5.क- उत्तरयोः..द्यायाम् -नास्ति। 6.क- आद्यं.. नीचं- नास्ति। 7. इत्यादिना स्थाने अन्त्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आकूहविषेत्यादिना। आद्ययोस्तोत्रीययोरुद्गीथाद्यस्य नीचविधानम्।

5.आर्षभम्- अभित्वावृषभासुते-आर्षभम्। अ2भि1त्वा20वृषभा0सुते10। वान्तप्रस्तावः। कावश्रौतकक्षेत्यादिना। आर्षभेमाकीं । प्र। आर्षभ-श्येनयोः प्रान्त्ययोरित्यत्र आद्यन्तयोः प्रस्तावाद्यस्य नीचविधानम्। तृम्पायां ऋवर्णं प्राप्तं रेफम् प्रथमस्वरायां वृद्धायामपदिश्यते इति। तृम्पाव्यश्नुहीत्यत्र प्रथमस्वरस्थस्य [1]वर्णस्य वृद्धस्य तृकारस्य तारम्पा इति आर्भावे प्राप्ते ऋवर्णस्य रेफादेशविधानं [2]ताम्पा इति। प्रति स्तोत्रीयं आर्चिकानि निधनानि इति। अत्र सर्वासु निधनम्।।

6.गारम्- इ2दँव0सोसुतमन्धाऽ3ए2। पादप्रस्तावः। गारेभयिन्न-रिगोभिस्त्वास्मिन्। प्र। हित पौष्कलहव्यगारमानवन्तीय भरपर्ण-यामस्विति । अत्र तृतीयायां श्रीणन्त इति श्रीशब्दस्य दीर्घस्य आदिद्धोदातस्य इत्यादिना प्रत्युत्क्रामे प्राप्ते अभिगानादेशविधानम्। नदीषूत्यत्र उकारस्य ओवौकारयोरित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्र [3]आ भवति इति। ओवौकारयोरेकी भावे लोप इति।।

7.घृतश्चुन्निधनम्- इ2दँह्यनूऽ3ओ20जसा। पादप्रस्तावः। द्व्यन्तर मुचमुदूह इति उदूहः। अत एवातिस्वारास्थान विवर्जितस्य अतिस्वाराङ्गभूतस्य अनुस्वारस्य लोपः। घृतनिधनेऽन्त्यस्सर्वास्विति। अत्र सर्वासु अन्त्यस्तोभस्यागतिः। घृतनिधनसांवर्तयोराद्यायामिति। अत्राद्यायां स्तोत्रीयायां त्सिबायां प्रत्यये पूर्वस्याक्षरस्य [4]गिर्शब्दस्य वृद्धिः। उत्तरयोरवृद्धिरे वेत्यर्थः। गतेरेकाराभावप्राप्ताया एकार निवृत्तिरिति प्रकृतिवत् इकारस्य एकारे प्राप्ते ऊहगीतौ एकारस्य निवृत्तिः। इकार एवेत्यर्थः । [5]घृतनिधनाद्यायान्तेति अस्यायमर्थः । अत्र प्रतिस्तोत्रीयं पञ्चवसोराधायास्सन्ति । आद्यायां स्तोत्रीयायां

1.क-..स्थस्य वृद्धस्य। 2.क- ताम्पा इति नास्ति। 3.ख- सर्वत्रेति अनाभावः। 4.ख-गीर्वशब्दस्य। 5- ख- घृतनिधनायान्तेति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आद्यायां वसोराधायां अन्ते द्व्यक्षरस्य वृद्धिः। 2 1 2 सूतँराधा इत्यत्र रा,धा इत्येतयोः वृद्धिरित्यर्थः। शूवत्याइन्तवदिति शूशब्दवत्यां वसोराधायां मन्तवदन्त्यानि त्रीण्यक्षराणि वर्धन्त इत्यर्थः। दान्ते होपरे इति घृतनिधने छतानुवमिति अत्र स्वरागमो हविः[1]। अत्र सर्वासु होपरे पदान्ते अक्षरे परतः पूर्वाक्षरयोर्वृद्धिविधानम्।।

30 2 0 0
8.दैवातिथम्- आतूऽ34 - एतानि। पादप्रस्तावः। तिथेच नावाद्यमिति । अत्र प्रथमायां [2]तृतीयपादाद्यक्षरस्य वृद्धिविधानम् । तिथे च तृतीये प्रथमं योनाविति पर्जन्यवल्लक्षणप्रवृत्तिरिति न्यायेन अस्य सूत्रस्य उक्तार्थमेव पूर्वसूत्रेण नार्थान्तरमस्ति।

20 0 0 0 0 0 1 2
9.सौमेधम्-योगेयोगेतवाहाउस्ताराम्। पादप्रस्तावः। सौमेधे तये हुवे निधनयोः। प्र। सौमेधेस्तावे । इति आद्यन्तयोः प्रस्तावे हादौ स्तोभे परतः पूर्वस्याक्षरस्य ह्रस्वस्य दीर्घविधानम्।

2 0 0 1 2
10.कौत्सम्- इन्द्रसुतेषुसोमेषु । पादप्रस्तावः। कौत्सेमेषुमनि। अप्सुजित्सर्वत्रेति। प्र। व्योमनीन्द्रसुतायामुद्धँशीये इति व्योमशब्दोऽ विकृष्टः।।

1 0 1
11.आश्वम्- अभिद्रोणाऽ2निबभ्रवाः[3]। पादप्रस्तावः।। आकूहविषेत्यादिना अत्र उद्गीथादिर्नीचैः।।

1 2
12.सोमसाम- सुताइन्द्रा।। चतुरक्षरप्रस्तावः। सोमसामगायत्री क्रौञ्चेत्यादिना।।

1.क- सूत्रकारेण... अक्षर स्वरागमः क्रियते। ..नामौ इति...भावे छतानुवमौ इति प्राप्नोति। षाविहेतिपाद अन्तगतायां वसोराधायां जशौ परम...विधानं। अनायमन्द्रसं ..कक्षान्ते अत्र तृतीयायां स्तोत्रीयायां मात्रायां वसोराधायां आद्यस्त्र्यक्षरस्य प्रेशब्दस्य वृद्धिविधानम्। प्रेन्द्रेति संतृप्तात् ...विशेषैः। धार अभिहिता तस्यां.. वसोराधायां द्वितीयं वर्द्धत इत्यर्थः। आकूह...अमीषाद्रस्य नीचविधानम्। 2.ख-पादाद्यस्य। 3-ख-अभिद्रोणाऽ2निबभ्रवाः। (1 0 1)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

13.यौधाजयम्- प्र[3]सो[2]ऽ31 । पादप्रस्तावः। [1]यस्य साम्नः पूर्वं प्रस्तावमक्षरं अस्माभिरुक्तं ऋगन्तरे गीयमानस्तस्य नपुनरुद्धरेम[2]। यौधादेव। प्र। सौभराभीवर्तेत्यादिना प्रथमायां तुरीयस्य दीर्घस्यवृद्धिः। अभरादिर्यौधाजये सर्वमिति। अत्र सर्वासु प्रस्तावषष्ठस्य वृद्धिः। नदीष्वाप्रियस्सूनायां योधाजयद्वैगतकण्वतरेष्विति। नदीषु इत्यत्र षु शब्दात्परं अवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परौ य्वौ लुप्ताविति लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्।।

14.सँहितम्- प्र[1]सो[0]मा[2]सो[0]म[0]। हितपौष्कलेत्यादिना विदथे इत्यत्र थे शब्दस्य दीर्घत्वात् प्रत्युत्क्रामे प्राप्ते अभिगानविधानम्।।

15.सफम्- अ[2]या[10]पा[2]ऽ3व[4]स्व[5] । सफेषि। प्र। सफपौष्कलयोर्वे हीष्यामिति देवयुरित्यत्र दे शब्दस्य प्रस्तावे वृद्धिः।।

16.आक्षारम्-प[5]व-ते[30]हा[2]ऽ34। पादप्रस्तावः। दीर्घवृद्ध इत्यादिना अ[3]भा[2]ऽ34य[2]र्षो[3] । इति यकारापत्तिः।।

17.गौरीवितम्- प्र[5]सु- न्वा[30]ना[2]ऽ3 । एकस्याम्। पादप्रस्तावः। [4]वाचि सर्वमो भवतीति भृशब्दस्य ओभावः। अनुस्वारस्पर्शेत्यादिना अत्र रेफस्य अतिहारः। गा[4]ऽ5वोऽ6हा[5]इ इति।।

18.गौतमम्-प्र[5]सुन्वा[3]ना[0]य[2]अ[0]न्ध[3]सा[4]:[5]।। एकस्याम्। पादप्रस्तावः। प्रसुन्वानायाँ सर्वत्र। इति सर्वत्र विश्लेषः। न भृ प्रसुन्वानायामित्यादिना भृ शब्दस्य अनाभावः।

19.यौक्ताश्वाद्यम्- औ[20]हो[1]हो[2]हाइ। वृ[1]षा[2]।। द्व्यक्षरप्रस्तावः। यौक्ताश्वेत्यादिना यौक्तयोः स्वधा प्रत्ययेत्यगतिः। स्वशब्दः पूर्वः पूर्वे -

1.क- यस्य..क्षरं नास्ति। तत्र प्रस्तावाद्रेव अक्षरस्थ..विद्यते। 2.क- पुनरुद्धरते। 3.क- प्रसुन्वायास्सर्व वाचि..।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यौक्ते। इति स्वर्दृशमित्यत्र स्वशब्दात्परस्य पूर्वविसर्जनीयस्य लोपः।

1 2 1

20.ऐडमायास्यम्- आइपुना । द्व्यक्षरप्रस्तावः। यौक्ताश्वेत्यादिना। ऐडमायास्ये षसि दसि नोद्गीथादौ देवो। प्र। त्सोदेहारेथेच धौच हारेयास्ये। इति सो शब्द दे शब्दयोः प्रतिहारे उद्गीथे च वृद्धिविधानम्। उत्तमायां प्रतिहारे धौशब्दस्य च। क्रेष्यायास्ये पुनान इत्यत्र सोमं सो, दे, वृद्धे धौ च इति पर्जन्यवल्लक्षणप्रवृत्तिरिति न्यायेन पूर्वोक्तार्थमेव। नार्थान्तरमस्ति। अगतिस्तोभस्य सन्धाविति मध्यमायां प्रस्तावे स्वरप्रत्ययत्वादगतिः। देवः प्रत्युत्क्रान्त ऐडयास्य इत्यादिना [1](प्रत्नंसधस्थमित्यत्र) भक्तिमध्यः पादमध्यश्चास्तोभे प्रत्यये सन्ध्यगीत स्सर्वत्रेति अत्र मध्ये पदगानविधानम्। [2]प्रत्नँसधस्थमित्यत्र ऐडमाया-स्येत्यादिना नृभिरित्यत्र नृ शब्दस्यानार्भावः।। इति द्वितीयः।। 2।।

==**==

।।तृतीयो विंशः।।

2 0 0 0 0 1 2

1.त्रिणिधनमायास्यम्-पुनानस्सोमधाहाउहोवा । वान्तप्रस्तावः। कावश्चौतकक्षेत्यादिना त्रिणिधनायास्ये इति । निधने हीषीस्थँ सर्वत्रेति प्र। अत्र मध्यमायां प्रस्तावे हादौस्तोभे परतः पूर्वस्य पादमध्यगतस्य ह्रस्वस्य रेफस्य दीर्घविधानम् । देवोजये इत्यादिनात्र मध्यमायामुद्गीथे दे शब्दस्य वृद्धिः। उपद्रवे योनिवद्भावात् वृद्धिः। नो अर्षसीत्यादिना वसान इत्यत्र अः कारस्य अत्वविधानम्। हीषीस्वर उत्सस्त्रीणिधनायास्य इति अस्तोभे सन्धिगाने प्राप्ते पदगानविधानम्। प्राह्वां घं ह्वाासंयोगे इति अत्राद्ययोः प्रहूयसायाः द्वितीयस्य असंयोगपरत्वात् वृद्धिविधानम् । तृतीयायां तु संयोगपरत्वादवृद्धिः।

1.क-पदं नास्ति। 2.क- उद्गीथे अगतस्य देव ई अत्र वकारात् परस्य प्रवृत आन्तात् परस्याः कारस्य संबन्धीगाने प्राप्ते ऊहगानविधानम्। अत्र प्रथमायां...त्वात्..। ऊहगानमेव ऋषिः प्रत्नं सधस्थात्..अत्र ऐडायास्येत्यादिना...शब्दस्यानार्भावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आयास्य आन्धान्तोऽसंयोगे। एतस्य नार्थान्तरमस्ति। तृतीयादिन्या-मौहोवायां चतुर्थस्थो वृद्धः पदान्तः सर्वत्राभवतीति । अत्र तृतीयादिन्यामौहोवायां प्रत्यये पदान्तभूतानां वर्णानां सर्वत्राभावः। स्वःपृष्ठे इत्यादिभिर्यत्र अपवादो विद्यते तत्र प्रदर्शयिष्यामः। पदमध्यगतस्य पृच्छब्दस्य अनार्भावे प्राप्ते वृद्धमृवर्णं सर्वमार्भवति इत्यादिना आर्भाव विधिबलात्। पृ शब्दस्य पारित्यार्भावमेव। रेफस्य पूर्वस्वराङ्गत्वे प्राप्ते अनुस्वारस्पर्शेत्यादिनात्रातिहारमेव।।

10 20 30 2 1 3 2 2 10 0
2.वासिष्ठम्-[1]औहोवाहाऽ3होइ। इहा । वृषाशोणो । सस्तोभ-विभाग्यः। पदसदृशीनि गीतिनि विभाग्यानि। तत्र तत्र पदं विभज्य उपोत्तमं प्रतिहर्तुरिति कात्यायनवचनात्। स्तोभश्च सामाद्यस्सामान्ते यथान्यायं इति। सामादौ स्तोभः । सामान्त एव भवति। न प्रतिस्तोत्रीयं न प्रतिपादमित्यर्थः। अक्षरे द्वे पार्थे। एकं वासिष्ठे इति अत्र सर्वासु पादादिभूतस्य अक्षरस्य नीचविधिः। सिष्ठे षिपृथिवीं षिम एषि इति। प्र। पदान्ते काम्पा पदादौ च दीर्घे इति। अस्य सूत्रस्य अयं पिण्डितार्थः। प्रकृतौ विद्यमानयोः काम्पा वृधन्तयोः पर्वणोरादिवर्णः पदान्तश्चेत् काम्पा भवति। पदादिवर्णोदीर्घश्चेदपि काम्पा भवति। अन्यत्र वृधन्तैव। पदं एकवर्णश्चेत् तदादिभूतं वृधन्तैव। आद्यन्तवदेकस्मिन्निति उभयधर्मत्वात् एवं सर्वत्र प्राप्ते नजागृविरि-त्यादिना यत्र यत्रापवादो दृश्यते तत्र तत्र प्रदर्शयिष्यामः। त्रिष्टुभिचोतायामित्यादिना वृद्धिः।।

4 3 4 5 0
3.श्यैतम्-अभिप्रवस्सुरा-उपरिष्टात्स्तोभसहितः पादप्रस्तावः। अन्ते चेति वचनात्। श्यैते त्राणि। प्र। श्यैते द्वे योनावित्यादिना अत्राद्ययोः प्रस्तावादिः नीचैः। क्रौन्ध्यष्टम्भ तमच्छन्दसवैयश्वत्वाष्ट्री सामोर्ध्वेडश्यैतसाध्राणां यथर्चस्तृतीयोदादिः इत्यत्र सर्वासु तृतीयपादादि भूतस्य ऋक्स्वरवदुच्चनीचविधानम् । लं विस्मिन्

---

1 2 2 0 0 1
1.ख- औहोवाहाऽ3होइ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]सिचवरुणपृश्निश्यैतमद्रेषु इति। शिक्षाणो अस्मिन्नित्यत्र स्मिन् शब्दस्य ऋक्स्वरे उदात्तस्य पुनरुच्चविधानम् । अन्यत्र तृतीयपाददादि भूतस्य पर्वणः अन्त्याक्षरस्य नीचस्य नीचमेव। गिरेरिव प्रेत्येवमादीनां ग्रहणानि। श्यैते यौनौ प्र रे इति अत्र प्रथमायां प्रतिहाराद्यस्याक्षरस्य नीचविधानं श्यैते हुम्मा ज्ञीयवत्। हिम्माइ इत्यर्थः । योनिवत् आये भावोऽत्र न भवति।।

4.माधुच्छन्दसम्- त्वामिदा (30 450) - हौइ (2)।। पादप्रस्तावः।। छन्दसे गहिनान्त्ये तिवे। प्र। तृतीयोच्चान्त्यँहिस्तोभे दीर्घी भवति इत्यत्र मध्यमायां प्रस्तावे उपस्वसारमित्यत्र सशब्दस्य ह्रस्वस्य दीर्घविधानं हादौ स्तोभे परतः। माधुच्छन्दस उपस्वसारं त्वयाभूषन्त्विति अगतिः। क्रौन्ध्यष्टम्भेत्यादिना सर्वासु तृतीयपादान्त्यस्य ऋक्स्वरवदुच्चनीच विधानम्। स्युपमाच्छन्दसे इति स्युशब्दः सङ्कृष्टः। सुतेषु त्वयाभूषायां माधुच्छन्दसमानवयोरिति। सुतेष्वित्यत्र षु शब्दात्परं अवृद्धादि-त्यादिना व्यवधानप्राप्तस्य वृद्धात्परौ ख्वौ लुप्ताविति लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्।।

5.हाविष्मतम्- हाउयस्तेमदोवरेणियोहाउ (20 0 0 0 0) ।। पादप्रस्तावः। ष्मते वे पूर्वं स्थाभिर्नधे । प्र। पवस्वयस्तेमदायां सर्वत्रेत्यत्र विश्लेषः। प्राह्वां घं ह्रं चासंयोगे इति । अत्राद्यायां प्रहूयसायां द्वितीयस्य संयोगपरत्वा-दवृद्धिः। उत्तरयोरसंयोग परत्वात् वृद्धिः। अत्र नन्दायाः त्सिब्यकर्षणं इति। अत्र कर्षणवृद्धे न भवतः। [2]कर्षणे तु निवर्तते त्साइबायां उपद्रवे इति पूर्वसूत्रेण उक्तार्थमेव, नार्थान्तरमस्ति । स्तौभिकानीत्यादिना सामान्ते निधनं न प्रतिस्तोत्रीयम्।।

6.शङ्कु- पवस्वमा (1 2 10) ।। एकस्याम्। षडक्षरप्रस्तावः।। शङ्कुनि महि। प्र। शङ्कुन्यस्यप्येषसर्वः इति प्रस्तावाद्युच्चम्। शङ्कुन्येकार इति एकारे

1. सिचरुपृश्नि ।2. कर्षणं तु..

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परतः पूर्वस्य मकारस्य दीर्घविधानम्। एकारे च नित्यं दीर्घत्वं शङ्कुनीति, उक्तार्थमेतत्। नार्थान्तरमस्ति।

7.सुज्ञानम्-इन्द्रमच्छा। एकस्याम् । पर्वप्रस्तावः। जाराग्निन्दूतो-पक्रमाणान्ते एवाविभाग्यानामिति। अग्निन्दूतास्वरत्वात् । कर्षणे त्वित्यादिना कर्षणवृद्धे न भवतः। सुज्ञाने निधामेकिनेस्वरमित्यादिना योनौ एकारस्य अवृद्धिः। पा शब्दस्य नीचत्वम्। ऊहगीतौ एकारस्य कर्षणं, पा शब्दस्य उच्चत्वं, एतावान्विशेषः।।

8.गौरीवितम्- अयम्-पूषाऽ3।। एकस्याम् । पादप्रस्तावः।[1] दीर्घवृद्धोऽपहित इत्यादिना वायख्यद्रो इति यकारापत्तिः। वाचि सर्वमोभवतीति सिशब्दस्य ओभावः।।

9.तृतीयं क्रौञ्चम्- अयम्पूषा - पादप्रस्तावः ।। क्रौञ्चेभि प्र। अयम्पू पुरः क्रौञ्चे इति प्रथमायां प्रस्तावादिर्नीचैः। क्रौञ्चयोः पर्याकूपारे चागताः स्तोभाः इत्यत्र सर्वास्वगतिः। अयम्पूषायां क्रौञ्च इति पुनान इत्यत्र अः कारस्य अत्वं। तृतीयोच्चान्त्यँ हिस्तोभे दीर्घी भवति इति अत्र तृतीयायां प्रस्तावे हादौ स्तोभे परतः पूर्वस्य ष्ठ शब्दस्य दीर्घविधानम्। क्रौन्ध्यष्टम्भेत्यादिना तृतीयपादादिः यथर्चमुच्चनीचं । यि क्रौञ्चे निधनत्वादिति अस्यायमर्थः। श्रवाय्यमित्यत्र व्यञ्जनभूतः प्लुतः पूर्वयकारो यि भवति निधनत्वात् ।प्रकृतिरेव आइभावो न भवति।।

10.यामम्- आऽ2इ- इया - वृषामताइनाऽ1म्पवताऽ23इ। सस्तोभपदविभाग्यम्। पदसदृशगीतीनि विभाग्यानि। तत्र तत्र पदं विभजन्ते उपोत्तमं प्रतिहर्तुरिति स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति अत्र आद्यन्तयो स्तोभः । न प्रतिस्तोत्रीयमिति। यामे पूर्वे ।प्र। आन् कारोवृद्धोऽनुनासिकस्सर्वत्रेति सिन्धूनां कलशं

1- क पुस्तके इतः परं नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परिकोशमित्येतयोः आन् कारयोरनुनासिकमेव। आदिद्वोदा इत्यादिना दीर्घस्य प्रत्युत्क्रामः। ह्रस्वस्य अभिगीतिः। अगृरमिस्नि-रित्यादिभिः। यत्र अपवादोऽस्ति तत्र तत्र वक्ष्यामः।।

50 0 2 4 50

11.उक्थ्यामहीयवम्-एवाहोऽ3असिवीरयूः । पादप्रस्तावः।। हि शब्द एवाहिसौभरामहीयवयोः इति हि .शब्दस्याइभावे प्राप्ते ओइभावविधानम्। एवाहोऽ3असिवीरयूः इति प्राप्ते असमानस्वरे परतः गतिश्चान्तस्थमापद्यते इति इकारस्य यकारः। आइय्ये इत्यस्य अयमर्थः। असवर्णयोः स्वरयोः मध्यगतायाः अन्तस्थाया लोपो भवतीति। यकारस्य लोपः। एवाहो असि वीरयुरिति फुल्लभाष्य-कारेणोक्तः। कनीयस्यादितोलोप इति हि शब्दस्य लोपः। हि शब्दस्य सौभरामहीयव कौल्मलानामिति उक्तार्थमेतत्।।

1 0 2 0 1 2

12.आष्टादँष्ट्रंपूर्वम्-इन्द्रँविश्वाअवीवृधन्। ऐंयाहाइ। उपरिष्टात्स्तोभ सहितपादप्रस्तावः। अन्ते चेति वचनात्। दँष्ट्रे पतिं पूर्वद्वितीयमभि। प्र। दँष्ट्रे चेत्यत्र सर्वासु प्रस्तावाद्यस्य नीचे प्राप्ते अनिन्द्रंतवात्वारं पर्या प्रान्त्ययोरिति अत्र आद्यायां प्रस्तावाद्यस्य उच्चं। द्रिदँष्ट्रेति उदात्तात्परस्य[1] स्वरितस्य द्रिशब्दस्य पदान्ताच्चपरमुच्चैर्भवतीति उच्चप्राप्तस्य नीचविधानात् अत्र प्रस्तावादिषु पञ्चभक्तिषु निधनेषु तेषु निगदवर्तिषु पर्वसु षिबमन्तदुक्थयोर्वे। पेमगौतमेति। एवमादीन्यप-वादसूत्राणि विचिन्त्य सर्वत्र उदात्तात्परस्य स्वरितस्य उच्चत्वमेव। नीचे परतः उदात्तयोर्मध्यगतस्य नीचस्य नीचमेव। सधष्टम्भे इत्यादि विशेष विधानाभावे त्वामभिदँष्ट्रोत्तरे इति त्वां शब्दोऽत्र विकृष्टः।।

4 3 0

13.क्षुल्लकवैष्टम्भम्- उच्चाऽ5ते।। पादप्रस्तावः। क्षुष्टम्भे देवोवित्सर्वत्रेति। प्र। क्षुष्टम्भे स्वादिष्ठाद्ययोरन्त्यः इति सर्वासु गतिरेव। विश्वान्यर्य इत्यत्र नि शब्दात्परमवृद्धादि पदान्तादित्यादिना यकारस्य

1- उदात्तात्परस्य उदात्ताच्चपरं..।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्यवधाने प्राप्ते द्व्यन्तस्थ परेतु लोप इति यकारस्य लोपः। कर्षणेत्वित्यादिना अत्र कर्षणवृद्धे न भवतः।।

14.पौरुमद्रम्- अभिसोमासआयवाः । औहोवा। उपरिष्ठा स्तोभसहितपदविभाग्यम्। पादप्रस्तावः। अन्ते चेति वचनात्। मद्रेमनी प्र। मद्रेप्रत्नमिति सर्वासु गतिरेव। मद्रे चेति सर्वत्र प्रस्तावाद्यस्य नीचे प्राप्ते अनुत्सोराजेति अत्र उत्तमायां प्रस्तावाद्यस्य उच्चम्। मद्रे प्रथमोच्चं चतुरक्षरमाद्यं पिबासोमां परं योनिवदिति। अस्य अयमर्थः योनावुद्गीथाद्यं पर्व ऋक्स्वरवदुच्चनीचम्। ऊहगाने अभिसोमादिषु तादृक्स्वरे प्राप्ते आद्यं चतुरक्षरं पिबासोमामापद्यते। परं चतुरक्षरं योनिवदुच्चनीचं भवतीति। प्रहूयसायामित्यादिना उत्तरयोः प्रहूयसाद्धितीयस्य संयोगे परत्वादवृद्धिः।।

15.उभयतस्तोभं गौतमम्- हावभिसोमासआयवोहाउ । स्तोभान्तः पादप्रस्तावः। गौतमेऽन्त्ये इति अत्र सर्वासु अन्त्यस्तोभस्या-गतिः। उत्तरयोः स्वरे तु गतिर्भवतीति स्वरपरत्वाद्गतिरेव। क्रौन्ध्यष्टम्भेत्यादिना अत्र सर्वासु तृतीयपादादि भूतस्य वर्णस्य ऋक्स्वरवदुच्चनीचम्। पेमगौतमे इति, विष्टप इत्यत्र पे शब्दस्य ऋक् स्वरे स्वरितभूतस्य उदात्ताच्चपरं उच्चैर्भवतीत्युच्चप्राप्तस्य नीचे परतोऽ नीचपरत्वात् नीचप्राप्तस्य उच्चविधानम्। वाचि सर्वमोभवतीति सर्वास्वोभावः।।

16.आष्कारनिधनंकाण्वम्- प्रहिन्वाऽ3नऋतम्बृहात्[1]।। पादप्रस्तावः।

17.अङ्गिरसांसंक्रोशः- होइ। हो। हाऽ3होइ। तिस्रोवाचाः।। सस्तोभपदविभाग्यम्। संक्रोशे चं रं वह्निः तीं ब्रमनी धेनवस्तिमदे। प्र। पदान्तेकाम्पा पदादौ च दीर्घे, इति । त्रिष्टुभिचोतायां शने च

---

1. ख-प्रहिन्वाऽ3नऋतम्बृहात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयचतुर्थस्थमित्यत्र। एतयोः स्वरूपं औशने दर्शितम्। अत्र एतयोः सामान्यमेव। अपवादो नास्ति। स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति आद्यन्तयोः स्तोभः। न प्रतिपादं न प्रतिस्तोत्रीयम्।।

18.महावैष्टम्भम्- वायङ्क्त्वोहाइ[1]।। स्तोभसहितपादप्रस्तावः। ष्टम्भेस्वब्दी । प्र। वैष्टम्भे वयमन्त्यस्सर्वासु कण्वेभिरित्यगतिः। ष्टम्भे वयं प्रत्नं राय आ सुतं इति अत्राद्यायां प्रस्तावाद्यस्य पुनः नीच-विधानम्। क्रौन्ध्यष्टम्भेत्यादिनात्र तृतीय पादस्याक्षरस्य ऋक्स्वरवदु-च्चनीचविधानम्। ष्टम्भेमहाचौशसूपे। तृषाण ओक इत्यत्र उदात्तस्य ओकारस्य पुनरुच्चविधानं[2] अन्यत्र महीयते इत्यत्र ते शब्दादीनां ऋक्स्वरे उदात्तानामनुदात्तज्ञापनार्थम्। कर्षणेत्वित्यादिना कर्षणवृद्धे न भवतः।।

19.रौरवम्- तरणिरित्साऽ3इषासाऽ234तौ ।। रवेसति। प्र। रवेघंषष्ठमित्यत्र प्रथमायां प्रस्तावषष्ठस्य दीर्घाक्षरस्य वृद्धिः। न रवे विकल्पे । उकारस्य पदान्तीयस्य च प्रकृतिर्भवति। अपवादत्वादाउ भवति विकल्पपक्षे । नेमिन्तष्टेवसाऽ23उहाइ। युजाणिरित्सिषायां रौरवे इति। आवइन्द्रमित्यत्र पादादिभूतस्य अकारस्य पादान्तात्पर-स्वरो विकृष्यते इति अनेन विश्लेष प्राप्तस्य प्रश्लेषविधानम्। ओवौकारयोरनन्तर इत्यादिना सर्ववर्णानामाभावे प्राप्ते ऋगन्तीय स्पर्श इत्यादिना अत्राद्ययोः ऋगन्तभूतयोः स्पर्शयोरनाभावः।।

20.पाष्ठौहम्-तिस्रोवाचाऽ2उदीरताइ। पादप्रस्तावः।। ष्ठौहेति-कयन्तीः ।प्र। ष्ठौहाद्यमिति अत्र सर्वासूद्गीथाद्यस्य नीचविधानम्। नौ च पञ्चममित्यत्र प्रथमायामुद्गीथ पञ्चमस्यापि नीचविधानं एतयो-स्सूत्रयोरर्थः। सूत्रकारेण पर्वविकारो चिन्तितः । पाष्ठौहोत्तरयोर्वृण्यौ-

1. ख,ग-वयङ्क्त्वोहाइ । 2-..रुच्चविधानात् । इत्यत्र महीयते.।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तद्विविद्धामिति। ओवौकारयोरनन्तर इत्यादिना सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति उवर्णानां सर्वत्रानार्भावः प्राप्तः। ग्रहणादाभवतीति प्रकरणे । शिशुं तिस्त्रोवाचायां सर्वत्रेत्यत्र शु शब्दस्य पुनराभावः। श्वतः पाष्ठौहे इति अत्र उत्तमायां विश्वत इत्यत्र तश्शब्दस्य वृद्धिविधानम्।।इति तृतीयः ।।3।।

==***==

।।चतुर्थो विंशः।।

30 40 50
1.वाचस्साम- आसोतापा । एकस्याम्। स्तोभसहितः पादप्रस्तावः। वाचस्साम्न्यासो प्रियंदेवायविकोशमित्यत्र अगतिः।।

5 0 3 2 3 5
2.शौक्तम्- सखा-यआओऽ234वा । एकस्याम्। वान्तः प्रस्तावः। कावश्रौतकक्षेत्यादिना शौक्तेश्रिये। प्र। शौक्ते चाद्ययोरित्यत्र द्वितीयपादाद्यस्य नीचविधानम्। शिशुन्नयज्ञैः परीत्यत्र शिशुशब्दस्य उवर्णन्तु न सर्वत्रा भवतीत्यनेन अनाभावमेव। शाऽ234इशूमोवा इति ग्रहणात् आभवतीति प्रकरणे शिशुं तिस्रोवाचायां सर्वत्रेति विशेषग्रहणात् तत्रैवाभावः। अत्र न ।।

5 0 3 0 2 4 5
3.गौरीवितम्-सुता-सोमाऽ3। धुमत्तमाः।। यथैतच्चतुर्थमित्यादिना अत्र च उदूहप्राप्ते न चेत्समानपुरुषवचन इत्यादि ब्राह्मणवचनेन अत्र उदूहो न भवति। वाचिसर्वमो भवतीत्योभावः।।

2 0 0
4.त्र्यन्तंत्वाष्ट्रीसाम- सुतासोमा। पर्वप्रस्तावः।। जाराग्निन्दूतेत्यादिना। त्वाष्ट्रीसखे। प्र। द्व्यन्तरमुच्चमुदूहइति उदूहः। पवित्रवन्त इति देवासश्च इति त्र्यन्ते त्वाष्ट्रीसाम्नीति। अत्र भक्त्यन्तभूतयोः पदगानप्राप्तयोः वृद्धयोः अकारयोः [1]सन्धिविधानम्। रश्च्यैच । त्र्यन्ते च त्वाष्ट्रीसाम्नि इति अत्र प्रथमायां उत्तरतः प्रतिहारभूतस्य दे शब्दस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृद्धिविधानम्। [2]अक्षरन्नब्रुवन्निति च त्र्यन्ते त्वाष्ट्रीसाम्नि इति अकारलोपः।।

5.प्रमँहिष्ठीयम्-प्रमँहाऽ3इष्ठायगायता।पादप्रस्तावः। प्रमताञ्ने द्युम्नीभवीभिः। प्र। हिष्ठीये चेत्यत्र सर्वासु उद्गीथद्वितीयस्य वृद्धिप्राप्ते अमेति। अत्र मध्यमायां उद्गीथस्य अवृद्धिः। प्रमँह्याद्ययोर्भात् । अत्र आद्ययोः स्तोत्रीययोः स्तोभात्परस्याक्षरस्य वृद्धिः। अत्र अन्त्यायाः स्तोभात्परस्य अवृद्धिरित्यर्थः। प्रमँहिद्वितीयायां वाघद्भिर्योदेवामिति । अत्र मध्यमायां योनिदृष्टावाघद्भिः योदेवामापद्यत इत्यर्थः। तवत्यन्नर्यायां योदेवास्य तद्विविद्वा वृणीमहामापद्यत इत्यर्थः। मघवावाइराऽ3 इत्यत्र म शब्दस्य [3]नीचवृद्धिः विधानम्। आद्यन्तयोरुच्चमित्यर्थः। द्युम्निप्रमँहिष्ठीयेति द्युम्न्याहुत इत्यत्र म्नि शब्दात्परं [4]अवृद्धादिपदान्तादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परौ य्वौ लुप्तौ इति लोपप्राप्तस्य यकारस्य पुनरलोपविधानम्। भवीयसी प्रमँहिष्ठीये इति। दीर्घवृद्धोपहित इत्यादिना सुमतिर्भवीयसि इत्यत्र सिशब्दात् आइ भूतात् परं व्यवधानप्राप्तस्य यकारस्य पुनः अलोपविधानम्।।

6.हारिवर्णम्-तन्तेमदाऽ2ङ्गृणीमसाइ। पादप्रस्तावः। हारिवर्णे सहिंदिथपत्नीः। प्र। हारिवर्णे उलोककृन्मन्दान इत्यगतिः। अकृत्तन्ते मदायां हारिभरवारेष्विति [5]कृत्नमीत्यत्र कृशब्दस्य अनार्भावः। ज्योतींष्यायवे इत्यत्र षिशब्दात् परं अवृद्धादि पदान्तादित्यादिना यकारस्य व्यवधाने प्राप्ते द्व्यन्तस्थे परे तु लोप इति अत्र यकारलोपः । [6]कर्षणे तु निवर्ततेत्यादिना अत्र कर्षणवृद्धे न भवतः। अत्र निधनभूतानां पर्वणां ऋक्स्वरवत् उदात्तानुदात्तमेव।।

1-सन्धिगानमेव। रश्च्येच, 2- क पुस्तके वाक्यमिदं नास्ति, 3- नीचविधानम्।
4- अवृद्धादिना व्यवधान..।5- कृत्नुमी..।6- कर्षणन्तु..।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

7.तैरश्च्यम्- श्रुधीहाऽ3वन्तिरश्रियाः।। पादप्रस्तावः। रश्च्येस्पूर्ध्यसिप्यूषीम्। प्र। तैरश्च्ये प्रत्नामृतस्येत्यगतिः गतेरेकारभाव प्राप्ताया ऐकार निवृत्तिरिति नियमात्। ऊहगीतौ एकारो न भवति। गतिरेव रश्च्ये चेति। अत्र प्रथमायां प्रतिहाराद्यस्य वृद्धिः।।

8.निधनकामम्-पवस्वदाऽ2क्षसाधनाः।पादप्रस्तावः।[1]मदमदो धनकामे इति विकल्पः । कामे च सर्वासु मदभिय रुहशब्दा मध्यमे विकल्पे। इत्यत्र सर्वासु मध्यमविकल्पे अःकारस्यात्वविधानम्। कामे च प्रथमकल्पे सर्वास्विति। अत्र सर्वासु प्रथमविकल्पे द य ह इत्येतेषां ह्रस्वाक्षराणां दीर्घविधानम् । प्रतिस्तोत्रीयं बोधीय धुरासाकमश्वयोः । कण्वबृहति चेति विशेषग्रहणात्। अत्र पूर्वयोस्तोत्रीययोः निधनं न भवति ।सामान्त एव।।

9.आष्ट्रादँष्ट्रोत्तरम्- [2]तावाहँसोमरारणऐयादौ । होऽ3वा।। स्तोभसहितपादप्रस्तावः। अन्ते च इति । दँष्ट्रे वे धनि प्र। दँष्ट्रे चेति। अत्र सर्वासु प्रस्तावाद्यस्य नीचप्राप्ते अनिन्द्रं तवात्वारं पर्यां प्रान्त्ययोः इति । अत्र प्रथमायां प्रस्तावाद्यस्य उच्चम्। गोष्ठप्रतोदेत्यादिना अत्र सर्वासु पादादिभूतस्य ऋक्स्वरवदुच्चनीचविधानम्। अतिसूर्यं पुष्पमरायकीर्त्ये ष्विति र्य शब्दोऽत्र विकृष्टः।।

10.आभीशवोत्तरम्- [3]तवाहँसोमरारणए। ए।। स्तोभसहित-पादप्रस्तावः। शवे वे पूर्व परिते दि । प्र। आभीशवे पुरुणिघृणा इत्यगतिः। सञ्ज्ञयाभीशवेत्यादिना पूर्वस्येकारस्य ऊहगीतौ पर्वभेदो नास्ति। आदिद्धोदा इत्यादिनाऽत्र दीर्घस्य प्रत्युत्क्रामः। ह्रस्वस्य अभिगीतमेव। अगृरमिरित्यपवादोऽत्र नास्ति। आभीशवेऽभिगीता-दिति। तृतीयायामिति सूर्यमित्यत्र अभिगीतयकारात्परस्य पकारस्य वृद्धिः । तस्माच्चेति । अस्यायमर्थः - अत्राभिगीत प्रत्युत्क्रामयोः

1- मदोनिधनकाम इति। 2- ख,ग-तवाहँ....। 3- तवाहँसोमरारणए।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परात्परस्याक्षरस्य वृद्धिः। पर्वान्तभूतस्येत्यर्थः। एवं सर्वत्र वृद्धिप्राप्ते अविर्यंदंतोरः इत्यत्र तृतीयायां अतिसूर्यंपर इत्यत्र रेफस्यावृद्धिः। तवद्वितीयायामाभीशवद्वैगतयोरिति। द्वितीयायां तवाहन्नमित्यत्र वशब्दात् परस्य प्रश्लिष्टाकारस्य विश्लेषविधानम्। वाचि सर्वमोभवतीति सर्ववर्णानां ओभावे प्राप्ते अनुस्थमिति सूत्रेण द्वितीयायां ऊधनी इत्यत्र ऊकारस्य ओकारो न भवति।।

11.स्वःपृष्ठमाङ्गीरसम्- 1तवाऽ2हँ3सो2ऽ34।। पादप्रस्तावः।

स्वःपृष्ठे सर्वे इति सर्वास्वगतिः। इन्दो च स्वःपृष्ठ इति। 1सख्याऽ2इं3न्दो2ऽ34 इत्यत्र दोशब्दस्य तृतीयादिन्यामौहोवायां इत्यादिना आभावे प्राप्ते अनाभावविधानम्। ओवौकारयोरित्यादिना सर्ववर्णानां आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति। अत्र तृतीयायां ऊधनी इत्य ऊकारस्य अनाभावविधानम्। [1]न रँगः स्वःपृष्ठनैपातिथरश्मेष्विति। प्रथमायां तं इति रहस्ये च ।।

12.सत्रासाहीयम्- पु3ना2ऽ34-नो0अक्र0मीदभि-ओ5ऽ6वा5। स्तोभ-सहितः पादप्रस्तावः। साहीये विप्रं ध्रुवे प्र। साहीये शताद्वितीयं सङ्कर्षात् इति। योनाविति योनौत्यमुव इत्यत्र त्यशब्दस्य सङ्कृष्टत्वात् द्वितीयस्वरापत्तिः। तथा सर्वत्र स न्याय इति । ऊहे द्वितीयस्वरारम्भ इति केचिन्मन्यन्ते। केचित् तृतीयारम्भ ऊहेवेति। मन्द्रश्चतुर्थमिति अस्य अयमर्थः। ऊहे द्वितीयं पर्व अत्रापि योनिवदुदात्तानुदात्ते प्राप्ते सर्ववर्णानां चतुर्थस्वरविधानं अयोनाविति । योनौ न भवति। महामिन्दो सत्रासाहीये इति इन्दो इत्यत्र दो शब्दस्यात्वविधानम्।

1.ख- रागः स्वःपृष्ठ नैपातिथरश्मेष्विति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

13.त्रैशोकम्- विश्वोहाइ। द्व्यक्षरप्रस्तावः। यौक्ताश्वेत्यादिना। शोकेमुरिमोजिकर्णेस्विनोयदि। प्र। रिनुरपिशोके इत्यत्र प्रथमायां इन्द्रं जजनुश्चेऽत्यत्र विशब्द नुशब्दयोः मध्यमायां अपिकर्णे इत्यत्र पि शब्दस्य वृद्धिविधानम्। नुष्पि च शोके प्रस्वरे इति पूर्वोक्तार्थमेव नार्थान्तरमस्ति। शोकेमान्त्ययोरिति। अत्रोऽत्तरयोः उद्गीथाद्यस्य नीचविधानम्। त्रैशोके चाद्यन्त्ययोरिति अत्राद्यन्तयोर्निहोतैवा मध्यमायां वारैव इत्यर्थः। धृतव्रतः त्रैशोके इति धृतव्रत इत्यत्र तः शब्दस्यास्तोभे प्रत्यये सन्धिगाने प्राप्ते पदगानविधानम्। सिष्ठे त्रैशोकयोश्चेति। स्वःपतिरित्यत्र स्वशब्दस्य स्वस्सर्वत्रेत्यनेन अतिहारप्राप्ते विसर्जनीयस्य लोपविधानम्। समृत्रैशोके इति मृ शब्दस्य अनार्भावविधानम्।।

14.भरद्वाजस्यपृश्नि[1]- योराजाऽ23चर्षणीनाँहाउ ।। पाद प्रस्तावः। पृश्निन्यस्य द्विस्तावे। प्र। प्रृश्निनि ज्येष्ठमिन्द्रं तं शु हस्तेनेति अगतिः। पृश्निन्यपादादिर्भादिति अत्र सर्वासु पादमध्यगतस्य स्तोभात्परस्य अक्षरस्य वृद्धिप्राप्ते। अनोऽविभिरप्सुरुताभज्रः इति अत्र रुताभज्र इत्येतेषां वर्णानां अवृद्धिविधानम्। आद्यात् इति। अत्र सर्वासु प्रस्तावद्वितीयस्य वृद्धिप्राप्ते अनुत्सो यस्येति। अत्र द्वितीयायां प्रस्तावद्वितीयस्य अक्षरस्य अवृद्धिः। पृश्निन्येकर्चे। पुनानायां मन्तवत्। पर्याम्म इत्येतेषु उद्गीथाद्यस्य नीचविधानात्। अत्र सर्वासूच्चमेव। पृश्निनि तृतीयपादान्ते च दक्षसा पतिः कवीमिति योनौ तृतीययादान्ते योनि दृष्टा च दक्षसा ऊहगीतौ सर्वत्र पतिःकवीमापद्यते। यज्ञातृतीये च दक्षसा। पर्यौ- होइवाजा इत्यत्र पतिःकविः। पृतानातद्विषामिति अत्र प्रथमायां पृतनानामित्यत्र पूर्वसूत्रेण पतिःकविर्गाने प्राप्ते उतद्विषामापद्यते। त्वन्नो अग्ने। अत्रोतद्विषा। अस्मिन्नर्थे उच्चनीचेपि सूत्रकारेण

1- पृश्नि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चिन्तितम्। ष्ठश्चैके नीचैः। पृश्निनि पृताचेति पृ शब्दस्य नीचमेके आचार्या मन्यन्ते। पतिः क व्युत्तमे चेति अत्र सर्वत्रोत्तमे पादे योनि दृष्टापतिः कविःपुनरप्युत द्विषामापद्यते। लं विस्मिन् सिचवरुपृश्नि-श्यैतमद्वेष्विति उत्तमँ हविरित्यत्र वि शब्दस्य ऋक्स्वरे उदात्तस्य पुनरुच्चविधानात्। वृत्रहागृणे इत्यत्र णे शब्दस्य उदात्तस्यानुदात्तमेव। इडाभिरैडानामिडान्ता इति पूर्वयोः स्तोत्रीययोः इडान्तैव।।

15.और्णायवोत्तरम्- परिप्रियाऽ2दिवःकवाङः।। पादप्रस्तावः। और्णायवेयातिमही। प्र। नप्त्योः परिप्रियायां षूक्तौर्णायवयोरिति नप्त्योरित्यत्र विसर्जनीयस्य पदान्तस्यातिहारः। यवारव्ययोर्हितान्त इति (त्रिपाद प्रभृतीनां चाप्युक्त वा शेषमाहेत्यनेन) ऋक्सँहितायामवसानभूतस्य द्वितीयपादान्त्यस्य ऊहगाने सर्वासु वृद्धिविधानम्। और्णायवयोस्त्वो भवतीति अत्र सर्वासु या स्तोभे प्रत्यये त्सिबास्वरस्य ओभावविधानम्। और्णायवयोरोभवति यकारे इति पूर्वोक्तार्थमेव नार्थान्तरमस्ति।।

16.बृहत्कम्-तुवँहि ।। त्र्यक्षरप्रस्तावः। त्र्यक्षरोबृहत्क इति। हत्के वँहि नविस्तावे इति प्र। त्वँह्यङ्गे च सौपर्णे इति त्वँह्येत्येतौ शब्दौ त्वं ह्य शब्दावत्र विकृष्टौ वाचिसर्वमोभवतीत्योभावः।।

17.आतीषादीयम्- सोमःपुना । पादप्रस्तावः।। षादीये वात्यग्रे अभि प्र। आतीषादीये सर्वे इति सर्वासु अगतिः। तृतीयोच्चान्त्यँ हिस्तोभे दीर्घो भवतिति अत्र उत्तरयोः प्रस्तावे हादौस्तोभे परतः ह्रस्वस्य अक्षरस्य दीर्घविधानम्।।

18.नानदम्- पुरोजितीवोअ- द्विपात्प्रस्तावः।। अत्र द्विपात्सञ्ज्ञय इत्यादिना। पुरोनानदे इत्यादिना अत्र प्रथमायां प्रस्तावादिर्नीचैः। न दे च दुरो इत्यत्र तृतीयायां प्रस्तावे चतुर्थपर्वणि । आदौ त्रीण्यक्षराणि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थस्वरे भवन्ति। अन्यत्र द्वे इत्यर्थः। योवृद्धादि सर्वत्रेति प्र। पुरस्वासूत्तरयोश्चारङ्गमानदे इति अस्यायमर्थः। अत्र सर्वासु तृतीयपादादौ त्रीण्यक्षराणि तृतीयस्वरे भवन्ति। विकल्पपक्षे तानि चतुर्थस्वरे इत्यर्थः। हारद्वितीयं नानदे पुरोजित्यामिति अत्र सर्वासु प्रतिहारद्वितीयस्य वृद्धिः। अन्यत्र न भवति। विश्वाच्याश्विनो-व्रतेत्यादिना च्या शब्दोऽ विकृष्टः।।

19.वात्सप्रम्- हाउहाउहाउ-ओ-होहोवा। (20 0 0 1 2) वात्सप्रेवते दवि ए तिराणि प्र। सस्तोभपदविभाग्यम्। यथैतच्चतुर्थमन्द्रेत्यादिना उदूह प्राप्ते न चेत् समानपुरुषवचने इत्यादिना ब्राह्मणवचनेन । अत्र हाउकारस्य उदूहो न भवति। इदं सङ्घातस्त्रिष्टुप्सु पार्थवाराहवासिष्ठ कुत्सरथीयादिष्विति। अस्मिन् साम्नि इदँ सङ्घातः प्राप्तः । नित्रवत् त्रिष्टुप्सुत्सप्रे दादय इत्यस्यायमर्थः। अथ प्रथमायामुत्तरेषु त्रिषु पादेषु इदं सङ्घातत्वात् पादादौ एकाक्षरस्य नीचप्राप्ते द्व्यक्षरनीचविधानम्। पादतुरीयस्य वात्सप्रे त्रिष्टुभि इति अत्र सर्वासु पादतुरीयस्य वृद्धिविधानम्। पाष्टे च दीर्घे इति अत्र सर्वासु पादेषु पञ्चमाष्टमाक्षरे दीर्घे यदि स्यातां ते अपि च वृद्धौ भवतः। स्यत्रे इति स्यत्र इत्येतयोः ह्रस्वयोरपि वृद्धिविधानम्। षाणी दान्ते इति अत्र उत्तमायां पादान्त्यभूतयोः षाणी शब्दयोः वृद्धिविधानम्। वात्सप्रे वृधन्तादेः कर्षणप्राप्तस्याकर्षणमिति पदान्ते काम्पा पदादौ च दीर्घे इत्यनेन कर्षणप्राप्तस्य अक्षरस्य अत्र अकर्षणविधानम्। ऊतएका च द्वितीयमिति द्वितीयादि चतुर्षु स्वरेषु गीयमाना ऊतएका च अत्र सर्वेषु पादेषु द्वितीयस्वरो भवति। अभ्यासश्चेति अत्र सर्वेषु पादेषु अभ्यास पर्वणि च द्वितीयस्वरे भवन्त। नयोनिवच्चतुर्थमन्द्रयोरित्यर्थः। त्सप्रेद्वितीयान्त्यस्सूर्यस्य इत्यत्र प्रथमायां तृतीयपादान्त्यस्य शब्दस्य ह्रस्वस्य दीर्घविधानम् । स्तोभश्चसामाद्य सामान्ते यथा न्यायमिति अत्र

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामादौ सामान्ते च स्तोभनियमः न प्रतिस्तोत्रीयं न प्रतिपादमित्यर्थः।।

20.सैन्धुक्षितम्- अग्निँर्वोवृधान्ताम्। पादप्रस्तावः। सैन्धुक्षिते नप्त्रे प्र। ओवौकारयोरेकीभावे लोप इति लोपः। वाचिसर्वमो भवतीत्योभावः।। इति चतुर्थः।।4।।

****

।।पञ्चमो विंशः।।

1.वसिष्ठस्यप्रियम्[1]- इममीऽ23 - पर्वत्रयं प्रस्तावः।। जारान्तो वीङ्कवसिष्ठस्यप्रियपञ्ञाणां इति। प्रियइन्द्रज्येष्ठंहरि ब्रवीत्सुरिन्द। प्र। ष्टुप्रिये इति अत्र मध्यमायां तृतीयपादे तृतीयस्य ष्टुशब्दस्य वृद्धि-विधानम् आद्यन्तयोर्न भवति। स्वश्वोनकिष्ट्वद्रथायाप्रियासितयो-रिति। स्वश्व आनश इत्यत्र सुशब्दात्परं अवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परौ ख्वौलुप्ताविति लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्। अर्चतप्रिये इति नूनमर्चतेति अत्र त शब्दात्परस्य पादादिभूतस्योकारस्य आद्गुण इत्यनेन प्रश्लिष्टभूतस्य पादान्तात्पर-स्वरो विकृष्यत इत्यनेन विश्लिष्टस्य पुनः प्रश्लिष्टविधानम्।।

2.गौरीवितम्- इन्द्र- जुषाऽ3- स्वप्रवहा ।।विते हेश।प्र।।

3.शाकलम्- अर्षासोमाऽ2द्युमत्तमाः। पादप्रस्तावः। कलेर्षा - प्रान्त्ययोरिति। अत्राद्यन्तयोः उद्गीथाद्यस्य नीचविधानम्। वने विष्णव इत्येतौ शब्दावर्षासोमायां शाकल इति अस्यायमर्थः। वनेष्वित्यत्र नेशब्दस्य विष्णव इत्यत्र विशब्दस्य च उभयोः पादमध्यवर्तिनोः तालव्यमाइयद्वृद्धमित्यनेन आइभावप्राप्तयोः वृद्धमन्तः पदे तालव्यमा भवतीति हादौ स्तोभे प्रत्यये इत्यनेन आभावप्राप्तयोः अत्र पुनराइ

1.ख,ग-वसिष्ठप्रियम् ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भावविधानम्। वनेष्वर्षासोमायां शाकलवार्शसन्तनिवर्णहरेषु अस्यार्थः। वनेष्वित्यत्र षुशब्दात्परं अवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परौ ख्वौ लुप्ताविति लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्।।

4.वार्शम्-अर्षासोमा-पर्वप्रस्तावः।। जाराग्निंदूतेत्यादिना वार्शेऽभिद्रोणोग्रँशर्मामिषन्तोकायामिति अत्र तृतीयायां द्वितीयपादे योनि-दृष्टा वह्निमद्या-उग्रँशर्मामापद्यते इत्यर्थः । योनौ चेति योनौ शब्दस्य प्रकृतिभावे प्राप्ते । अभे इति अत्र नौ शब्दस्य स्तोभे परतः आउभाव विधानम्। वनेष्वर्षासोमायामित्यादिना पूर्ववत्। षूशब्दात्परस्याव शब्दस्यात्राप्यलोपविधानम्। शनवार्शयोरिति अत्र सर्वासूद्गीथादि नींचैः। सोमावार्शे इत्यत्र मध्यमायां प्रतिहार द्वितीयस्य वृद्धिविधानम् अन्यत्र न भवति। कर्षणन्त्वित्यादिना अत्र कर्षणवृद्धे न भवतः।

5.मानवोत्तरम्- होवाइ - सोमउष्वाणस्सोतृभिः । होवाइ ।। स्तोभसहितपादप्रस्तावः। अन्ते चेति वचनात्। न वे मन्द्राभि सोमत्ससुषा इति अत्र मध्यमायां प्रस्तावादिर्नीचैः। नवेगीथादिरिति अत्र सर्वासु उद्गीथाद्यस्य वृद्धिः। अयोनाविति योनौ न भवति। उत्तरेचैतस्यामेवेति अस्यायमर्थः। दाइदेऽ1थकं। ण्वाक्रंतजाऽ31। योनौ शुर्मदाद्वयमस्ति। तावप्यत्र द्वितीयायां ऊनत्वात् त्र्यक्षरे भवतः। आनूपे। गोमान्गोऽ31 इति कनीयस्यादितोलोप इति न्यायेन वृद्धभूतयोराद्याक्षरयोः लोपे प्राप्ते अवृद्धयोः उपान्त्ययोर्लोपविधानम्। अन्यत्र शुर्मदायाः पूर्वस्य उपान्त्यं नीचमिति अन्यत्र ऊहगीतौ अत्र शुर्मदायाः पूर्वस्याः उपान्त्याक्षरस्यापि नीचविधानम्। योनौधि शब्दस्य उच्चमेवेत्यर्थः। हितपौष्कलहव्यगारमानववन्तीयभरपर्णयामसु इत्यत्र मध्यमायां अनूपे इत्यत्र दीर्घस्य नूशब्दस्य आदिद्वोदेत्यादिना

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रत्युत्क्रामप्राप्तस्य अभिगानविधानम्। मां शब्दस्य च । मादायतोनवे इति ओवौकारयोरित्यादिना सर्ववर्णानामाभावे प्राप्ते तोशते इत्यत्र तोशब्दस्य अनाभावः।।

6.आनूपंवाध्र्यश्वम्-सोमासोमाः। पर्वप्रस्तावः। अभ्यस्तोद्व्यक्षर इत्यादिना। ध्र्यश्वेतृभिःयेवपेगो ।प्र। ध्र्यश्वत्वाष्ट्रीसाम्नोश्च दक्षसा पतिःकवीमिति। द्रातेऽ1साखाऽ2 इति। योनिदृष्टा च दक्षसा अत्र पतिः कवीमापद्यते इत्यर्थः। तृकारस्तु न सर्वेषु स्पर्शेषु आर्भवतीति अत्र तृ शब्दस्यनार्भावः।।

7.वाम्रम्- सोमउष्वाणस्सो। हाऽ3हाऽ3इ। वान्तप्रस्तावः।। कावश्रौतकक्षेत्यादिना। वाभ्रेमन्दी। प्र। वाम्रेहोइस्तोभ स्योत्तरस्या गतिः इति अत्र सर्वासु उत्तरस्तोभस्यागतिः। मान्यत्र अत्र मध्यमायां प्रस्तावादिर्नीचैः। अधिसोमउष्वावाम्रे इति। अधिष्णुभिरित्यत्र अधिशब्दस्य पदान्तस्य हादौ स्तोभे परतः आभावविधानम्। मान्गो च मागायतोपहितेति अस्य सूत्रस्यायमर्थः। योनौ आइतग्वाचित्-यआ इताशी इति द्वे पर्वणीस्तः। अत्र मध्यमायान्तु तयोः स्थाने मागायतान्धे भवतः, इति। मागायताद्व्यक्षरोच्च। वाम्रे चेति ऊहे उद्गीथद्वितीयस्य वृद्धिः। अयोनाविति योनौ न भवति। अत्र ऊनपादेऽपि योनिदृष्टा च दक्षसैव। नवाध्र्यश्ववत्। तृतीयोच्चान्त्यँहिस्तोभे दीर्घी भवति इति अत्र तृतीयायां प्रस्तावे हादौ स्तोभे परतः रेफस्य ह्रस्वस्य दीर्घविधानम् । अगृरमिस्निर्दन्वन्नपोक्षश्च। आदिद्धोदेत्यादिना तृतीयायां रेफस्य अभिगाने प्राप्ते प्रत्युक्रामविधानम्।।

8.अग्नेस्त्रिणिधनम्-सोमउष्वा । पर्वप्रस्तावः। अग्निन्दूतास्वर-त्वात्। यानिध्र्यश्वेतान्यग्नेस्त्रिणिधने मन्दीच ।प्र। निहोता णस्तो, पम्मघ,यज्ञैः परिक्रतुरिमान्गो इति अत्र योनिवत् वारास्वरे प्राप्ते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

णस्सोतृभिरित्यत्र निहोतास्वरविधानम् । अग्नेस्त्रिणिधनउष्वायां द्वितीयपाद्'द्वितीयं विधि। अत्र प्रथमायां द्वितीयपादे द्वितीयाक्षरस्य वृद्धिविधानम्। मान्गोवत्यांचानीकयायामाद्यम् । अस्यायमर्थः । अत्र मध्यमायां तृतीयपादे द्वितीयपर्वणि आद्याक्षरस्य वृद्धिः। मान् शब्दस्य मुद्रन्निद्रस्वब्दी चर्कृत्या निष्यते णिमृढ्वम् । अस्यायमर्थः। समुद्रन्न इत्यत्र मुशब्दस्य वाराद्वितीयस्य वारानिहोतयोश्च इत्यनेन संयोग-परत्वादवृद्धि प्राप्ते वृद्धिविधानम्। ओष्ठ्यश्चान्तः पदिकोऽनाउ भवति सर्वत्रेति तोशत इत्यत्र तोशब्दस्य अत्र अनाउभावः। अधिष्णुभि-रनूपेगोमान् सोमोदुग्घाभिस्समुद्र इत्येतेषु ऊनपादेषु कनीयस्यादितो लोप इति न्यायेन लोपं कृत्वा गेयम्। कुतः गौषूक्ते तूचातायां ऊनेषा शब्दाभ्यासात् संप्राप्तिः इत्येवमादि सूत्रैः आगमविधानप्रकरणे अत्रागमविधानाभावात् द्राह्यायणेन इहकारे ला-ज़गीतन्त निधनस्वरं हीषी स्वरद्व्यक्षरं । हीषी स्वरस्य द्व्यक्षरनियमात्। अत्र च त्रिषु ऊनपादेषु उद्गीथे लोपं कृत्वा गेयमित्यर्थः। प्रकृतमनुसरामः।।

9.शैशवम्- यत्सोमचित्रमुक्थायाम्।। (2 0 … 1 2) पादप्रस्तावः। शैशवे यूँषि पती पूर्वं नापि। प्रांशवे इत्यत्र सर्वासु उद्गीथस्य नीच प्राप्ते नेन्द्र इत्यत्र तृतीयायां उद्गीथाद्यस्य अत्रोऽच्चविधानम्।।

10.सन्तनि- असाहाउ।। (1 2) पर्वप्रस्तावः।। हाउकारान्तस्सन्तनि रिति निधने हीषीस्थँ सर्वत्र प्राइन्द्रश्श्येन सन्तनिनीति अत्र श्येनशब्दस्य स्तोभे परतः पदगाने प्राप्ते सन्धिगानविधानम् । गोष्ठप्रतोदेत्यादिना त्रिपादादिभूतानां वर्णानां ऋक् स्वरवदुच्चनीच विधानम्। असाव्यँशुस्सर्वत्र न सन्तनिनि इति अत्र व्यशब्दो विकृष्टः। दादिस्तनिपार्श्वयोर्यथर्चस्सर्वत्र इति अत्र पादादि भूतानां वर्णानां ऋक्स्वरवदुच्चनीच प्राप्ते । अस्तावहारयोरवश्ये हिस्तोमसुमराप्रमरजी च, इति श्येन इत्यत्र शेशब्दस्य प्रतिहारादिभूतस्य ऋक्स्वरे नीचस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उच्चविधानम्। सन्तनिनीति। शुभ्रमन्ध इति अत्र ध शब्दस्य ऋक्स्वरे स्वरितभूतस्य उदात्तात्परमुच्चैर्भवतीति उच्चप्राप्ते सन्तनिन्येव नीचविधानं न गौषूक्तादिषु।।

11.च्यावनम्- अ[3]भाऽ234इ-द्यु[5]म्नम्। स्तोभसहितपादप्रस्तावः। अन्ते चेति वचनात् । सूत्रकारश्चाह । हाउकारान्तश्च्यावनमिति। अभिद्युच्यावनेपासास्थमिति। अत्र उत्तरयोः स्तोत्रीययोः उद्गीथमध्ये पासास्वरस्थस्य अकारस्य पदगाने प्राप्ते सन्धिगानविधानम् । उद्घेदभितृतीये साम्निपासागीतिः। वनेश्पतिः। प्र। वनेहारादिरिति। अत्र सर्वासु प्रतिहाराद्यस्य वृद्धिः। गविष्टयेऽभिद्युच्यावने। इति गविष्टय इत्यत्र पादान्त्यस्य ये शब्दस्य हादौस्तोभे परतो आभावविधानम्।।

12.क्रोशम्- प्रा[20]णा[1] ।। द्व्यक्षरप्रस्तावः। यौक्ताश्वेत्यादिना। क्रोशेप्रियात्रीणि ते सर्वत्र विवृतमकारप्रत्ययमित्यनेन ते शब्दस्य प्र। क्रोशौपगवेत्यादिना सर्वासूद्गीथाद्युच्चम्। योनावेवनीचम्। पाष्योः क्रोशे। ष्वैरयत्रैतक्रोशवार्शेष्विति। ष्योः ष्वैरित्येतयोरत्रसङ्कृष्टः।।

13.गौरीवितम्-प[5]व-स्व[3]वा[2]ऽ3।। वाचिसर्वमो भवति। इत्योभावः सर्वासु। अनुस्वारस्पर्शेत्यादिना अत्राद्ययोः तकार रेफयोरतिहारः।।

14.पार्थम्- औ[2]ऽ3हो[2]ऽ3हो[2]इ। प[2]व-स्व[1]वाऽ2। ज[3]सा[2]ता[3]ऽ234या[5]इ।। सस्तोभपदविभाग्यम् । अनुष्टुप्सु त्वृभुसङ्घातमिति अत्र ऋभुसङ्घात मेव। थेचाद्ययोरिति अत्राद्ययो स्तोत्रीययोर्महित्रीणा द्वितीयस्याक्षरस्य वृद्धिप्राप्ते, अनदु इति । अत्र मध्यमायाम् अद्रुह इति अकारस्य वृद्धि विधानम्। उत्तमायां सर्वत्रावृद्धिरेवेत्यर्थः।।

15.दाशस्पत्यम्- इ[2]न्दुरौ[2r]हो[2r]वा[0]हा[0]ई[1r]या[2] ।। यान्तप्रस्तावः। यान्तो-दाशस्पत्येत्यादिना दाशस्पत्ये रातिंसखिप्राइन्दुरित्यत्र दु शब्दादीनां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ओवौकारयोरेकीभावे लोप इति लोपः। दाशस्पत्ये चाद्ये तृतीयम्, अस्यायमर्थः। अत्र प्रथमायां पूर्व प्रतिहारे तत्स्थानगतयोः रिशब्द-धशब्दयोः वृद्धिविधानम्। अयोनाविति योनौ न भवति। उत्तरे वसोराधोत्तरयोरिति अस्यायमर्थः। उत्तरे प्रतिहारे वरिवस्कृण्व-न्नित्यत्र वस्कृ इत्येतयोरवृद्धिः। उत्तरयोः वसोराधा भवति। अन्त्यानि त्रीणि वर्धन्त इत्यर्थः। स्पत्योत्तरयोश्चेति अस्य सूत्रस्यायमर्थः। अत्र प्रथमायां सप्तवसोराधास्सन्ति। आद्यायामन्ते द्व्यक्षरवृद्धिः, तीयायां मध्ये द्व्यक्षरवृद्धिः, तृतीयायां अन्त्यस्य वृद्धिः, चतुर्थ्यां द्वितीयचतुर्थयो-र्वृद्धिः, पञ्चम्यां अन्त्यभूतानां त्रयाणां वृद्धिः, षष्ठ्यां द्वितीयस्य वृद्धिः, सप्तम्यां अन्त्यस्य वृद्धिः, अत्र उत्तरयोर्योनिवत्प्राप्ते प्रतिस्तोत्रीयं सप्तवसोराधाः अपिमन्तवत् अन्त्यानि त्रीण्यक्षराणि वर्धन्त इत्यर्थः। तिरोवत्यां योनिवत् इति अत्र मध्यमायां वसोराधा योनिवत् भवति। मध्ये द्व्यक्षरवृद्धिनी, इत्यर्थः। आद्यायामन्ते सर्वास्विति अत्र सर्वासु आद्यायां वसोराधायां अन्ते द्व्यक्षरमित्यर्थः। नि^{1}योघा^{2}उ। पृ^{1}चाना^{2}उ। पु^{1} नाना^{2}उ इति, ण्वनृस्पत्ये इत्यत्र सर्वासु वसोराधासु आदिभूतस्य अक्षरस्य नीच प्राप्ते ण्वन्वृजनस्येति ण्वन्वृजशब्दस्य उच्चविधानम्। ओवौकारयोरित्यादिना सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति। दुग्घ इत्यत्र दुश्शब्दस्य अनाभावः। आउवा-व्यवहितमित्यादिना आभाः। अनुस्वारस्स्पर्शे इत्यादिना पृञ्चन्नत्यत्र रेफस्यातिहारः। ण्यृतुथा वसान इत्यत्र णि शब्दात्परमवृद्धादि पदान्ता-दित्यादिना। वृद्धं ॠवर्णं सर्वमार्भवतीति व्यवधानार्भावौ भवतः।।

16. सञ्जयम्- [1]आ^{3}ते$^{40\ 5}$अग्नयिधी^{0}- मा^{2}ऽ3हा^{2}इ। द्विपादप्रस्तावः।। द्विपात्सञ्जयेत्यादिना। सञ्जयेद्यवि प्र। जयेच स्तावान्त्ये इति उत्तरयोः

----

1. ग-आ^{30}ते$^{40\ 5}$ अग्नइधी^{0} ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयोच्चपर्वणः प्रस्तावान्त्यस्य वृद्धिः। अयोनाविति योनौ न भवति। जयउतोनः इति अत्र उत्तमायां उद्गीथाद्यस्य नीचारम्भः। पर्वशेषं ऋक्स्ववदुच्चनीचम्। सञ्ज्ञयाभीशवेत्यादिना अत्र उत्तरयोः पर्वैक्यमेवम्। शवसस्सञ्ज्ञये इति, शवस्पतय इत्यत्र सशब्दात्परस्य विसर्जनीयस्यातिहारः। समानोदर्केषु उदर्कस्योद्धारः। पूर्वयो-स्तोत्रीययोः इति पूर्वयोरुद्धारः।।

17.सौमित्रम्- औहौ होइ - स्तोभविभाग्यम्। मित्रे कृते चिते स्यवे असिपूर्वं। प्र। स्तोभश्च सामाद्यस्सामान्ते यथा न्यायम्। इत्याद्यन्तयोः स्तोभः न प्रतिस्तोत्रीयं न प्रतिपदम्। गोष्ठप्रतोदेत्यादिना अत्र निधनभूतपर्वाद्यक्षराणि ऋक् स्वरवदुच्चनीचानि। निधनशेषाक्षराणि तेभ्यो यन्निगदवर्त्यनन्तरमार्चिकमिति सूत्रकारवचनात्। ऋक्स्वरवत् सामिकः। उदात्ताच्चपरमुच्चैर्भवतीति न्यायेन ऋक्स्वराबाधेन गेयानि। आर्चिकं निधनं न्याये इत्यादिना सर्वत्र निधनभूतपर्वणामन्त्योवर्णः उदात्तश्चेत् वृधे स्वरं भवतीति। स्वरितश्चेत् प्रथमस्वरादि सम्प्रसारणम्। प्रचयश्चेत् तृतीयस्वरादि सम्प्रसारणलक्षणम्। मात्रालक्षणे त्रिविध स्वरेणोक्तः। त्रिविधस्वराः- प्रथमादिर्नवमात्रः, द्वितीयादि-ष्षण्मात्रः, तृतीयादिरष्टमात्रः, स्वरे त्रयोन्त्याः। पृथगेकमात्रा इति विस्वरमक्षरं स्वरे स्वरे त्रिमात्रं भवतीति। प्रत्युत्क्राम अतिक्रामकर्षण स्वरेष्विति सामान्यसूत्रस्य अपवादः। वृधेस्वरसम्प्रसारणे सर्वत्र प्राप्ते मणाञ्जनमिति न्यायादपेत प्रकरणे यत्र अपवाद उक्तः तत्र दर्शयिष्ये। त्वँ सूर्यं सौमित्रे इति अत्र र्यं शब्दः सङ्कृष्टः।।

18.महावैश्वामित्रम्-हयाइ- हयाऽ3- ओहाओहा। असाविसो।। सस्तोभपदविभाग्यम्। महामित्रेगहिहरी प्र। जाराग्निन्दूतोपक्रमाणां ते एवाविभाग्यानामिति विशेषवचनात्। अत्राग्निन्दूतास्वरस्य न

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चेत्समानपुरुषवचन इत्यादिना उदूहो न। पृणक्तुमहावैश्वामित्र-त्वाष्ट्रीवितेष्विति। पृणक्त्विन्द्रियमित्यत्र तु शब्दात्परं व्यवधानप्राप्तस्य वकारस्य लोपः। मातावृद्धं श्वामित्रे। विकल्पपक्षे इत्येतयोर्वृद्धिः। स्तोभश्च सामाद्यस्सामान्ते यथान्यायम्। इत्याद्यन्तयोस्तोभः।।

19.इषोवृधीयम्- इन्द्रायेन्दाउ (2 0 0) । पर्वप्रस्तावः ।। अग्निन्दूता स्वरत्वात्। नन्दायात्सिव्यकर्षणम्, इत्यत्र कर्षणवृद्धे न भवतः। अवृद्धादि पदादित्यादिना मृजन्ति इत्यत्र ति शब्दात्परस्य व्यवधाने प्राप्ते द्व्यन्तस्थ परे तु लोपः इति लोपः। ओकारः पादमध्य इति पादमध्यभूतानां ओकाराणां प्रकृतिभावे प्राप्ते अयेन्दो इति दो शब्दस्य पादमध्यभूतस्य आउभावः।।

20.गायत्रीक्रौञ्चम् - इन्द्रायेन्दाऽ1औहो (2 0 0 2) । चतुरक्षरप्रस्तावः ।। सोमसामेत्यादिना। क्रौञ्चे चोवित्सर्वत्र । प्र । इन्द्रायेन्दविति क्रौञ्चेवलोपस्सन्धौनविति लोपः। क्रौञ्चे पा षष्ठं नवमात्रमिति। अत्र विकल्पपक्षे सर्वासु द्वितीयपादे षष्ठस्याक्षरस्य नवमात्रं वृद्धिविधानम्। इन्द्रायेन्दविति क्रौञ्चे पूर्वयोः स्तोत्रीययोः वाहाइ स्तोभे प्रत्यये आकारस्य अत्वविधानम्। दीर्घवृद्ध इत्यादिना सन्त्वामृजन्ताइ यकारापत्तिः।। इति पञ्चमः ।।5।।

==*****==

।।षष्ठो विंशः।।

1.वाजदावर्यः- इन्द्रायेन्दाउ (2 0 0)। पर्वप्रस्तावः। जारेत्यादिना। क्रौञ्चे चोवित्सर्वत्रेति। प्र। इषोवृधीयवर्त दो शब्दस्याउभाव विधानम्। वाचिसर्वमो भवतीति ओभावः।।

2.स्वारमौक्ष्णोरन्ध्रम्- मृज्यमानाः (2 0)।। पर्वप्रस्तावः। जारेत्यादिना। रयिं रन्ध्रे। प्रारन्ध्रयाश्च सर्वे। अगतिः। इष प्रीप्रज्ररन्ध्र स्रौग्मतेष्विति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्यायमर्थः।। अत्रोत्तरयोः ता[1]वाऽ2रु[3]ऽ234णा[5]म् इति पर्व इ[1]वाऽ2 प्रा[3]ऽ234या[5]म् आपद्यते इति। अयोनौ। योनौ न भवति। ता[1]वाऽ2रु[3]ऽ234णा[5]म् ।यदाकदातृतीये।इ[1]वाऽ2प्रा[3]ऽ234या[5]म् ।प्रेष्ठँ वो द्वितीये।।

3.ऐडमौक्ष्णोरन्ध्रम्- मृ[2]ज्य[1]मा[0]न[2]स्सुहस्त्या[0]।। पर्वप्रस्तावः। काव-श्रौतकक्ष्येत्यादिना । रयिंरन्ध्रे ।प्र। रन्ध्रयोश्चसर्वे इति अत्र सामत्रयस्य अगति प्राप्ते नोत्तरे वृषो अचीति। अत्र वृषा अचि गतिः। सुहस्त्या रन्ध्रोत्तरवरुणगोष्ठार्क पुष्येष्विति। अत्रस्त्याशब्दः सङ्क्रुष्टः। रन्ध्रोत्तरे शुर्मदोत्तरयोर्जातः पृच्छाम् इति अत्र उत्तरयोः योनिदृष्टांशुर्मदाजातः पृच्छामापद्यते। असाव्यंशु तृतीये शुर्मदा। अबुन्दं वृ इत्यत्र जातः पृच्छाम्। रन्ध्रोत्तरवाजजितोर्योनौ इति अत्राद्यायां प्रस्तावाद्यस्य नीच-विधानम्। वने च रन्ध्रोत्तरे। वने इत्यत्र ने शब्दस्य ऋक्स्वरे स्वरित-भूतस्य पर्वान्ते नीचप्राप्ते उच्चविधानम्। रन्ध्रेचोत्तमायां द्वितीयम्, मध्यमायां प्रथमम्, प्रथमायां तृतीयम्, इति। अत्र सर्वासु प्रतिहारे प्रथमायां तृतीयाक्षरस्य। द्वितीयायां प्रथमाक्षरस्य तृतीयायां द्वितीयस्य च वृद्धिविधानम्। सौहविषरन्ध्रोत्तरयोर्गोभिरिति । इत्थमेतत्।। अचिक्रमृज्यमानायां रन्ध्रोत्तरवाजजिन्मन्तेष्विति। वृद्धमन्तः पद इत्यादिना अचिक्रदित्यादिना चि शब्दस्य हादौस्तोभे परतः आभावे प्राप्ते आइभावविधानम्। अत्र सर्वासूद्रीथान्त्यं पर्व ऋक्स्वरवदुच्च-नीचमेव।भायर्षसीत्यत्र दीर्घवृद्ध इत्यादिना यकारापत्तिः।।

4.वाजजित्- मृ[2]ज्य[1]मा[0]न[2]स्सुहा[1] ।। षडक्षरप्रस्तावः।। षट्शङ्कुबार्हत इत्यादिना वाजजिति सर्वे इति सर्वत्रागतिप्राप्ते न रयिमचिक्र इति। उभयत्र गतिः। रन्ध्रोत्तरवाजजितोर्योनौ इति अत्र प्रथमायां प्रस्तावाद्यस्य नीचम्। जितोश्चपूर्वे। असंयोगे इत्यत्र सर्वासु वृण्यादिभूतस्य ह्रस्वस्य असंयोगे प्रत्यये दीर्घविधानम्। अमपेति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमशब्दस्य वृण्यादिभूतस्य असंयोगेप्यत्र ह्रस्वमेवेत्यर्थः। अचिक्रमृज्यमानायां रन्ध्रोत्तरवाजजिन्मन्तेष्वित्यादिनात्र चिशब्दस्य पदमध्यगतस्य हादौ स्तोभे प्रत्यये आभावे प्राप्ते आइभावविधानम्। जिति भिया इति भिया शब्दस्योच्चविधानम्।।

2 0 1 2 1 2
5.वरुणसाम- मृज्यमानस्सुहस्त्योवा - ओवा। पादप्रस्तावः।। न्वसि रयिं वरुणसाम्नि। प्र। लं वरुणसाम्नि। लं विस्मिन् सि च वरुणपृश्निश्यैतमद्रेष्विति। अत्र लं शब्दस्य सूत्रद्वयेन उच्चविधानम्। ऋक्स्वरे लं शब्द उच्चं उच्चस्य पुनरुच्चविधानम्। वरुणसाम्नि अन्येषां यथर्च पर्वणोऽन्त्याक्षरस्योदात्तस्य अनुदात्तविधानार्थम्। निष्कृतं वरुणसाम्नि वृषोचिक्रायामिति। एतत्सूत्रमतिहारे आभावे च उभयत्रोक्तः।निष्कृतमित्यत्र निशब्दात्परस्य विसर्जनीयस्य पादान्त्यस्य पूर्वाङ्गे प्राप्तेऽतिहारविधिः। हादौ स्तोभे परतः पदान्तश्चाभवति। प्रकरणेऽप्युक्तत्वात् निशब्दस्याभावविधानम्। सुहस्त्या रन्ध्रोत्तर इत्यादिना स्त्यशब्दः सङ्कृष्टः।।

2 2 1 0 2 10
6.आङ्गिरसांगोष्ठः- हाउहाउहाउवा-मृज्यमानस्सुहस्त्या। स्तोभविभाग्यम्। गोष्ठप्रतोदेत्यादिना अत्र सर्वासु पादादिः यथर्चमुच्चनीचम्। सुहस्त्यारन्ध्रोत्तरेत्यादिनात्र स्त्यशब्दः सङ्कृष्टः। सुहस्त्यागोष्ठार्कपुष्पयोरिति। ऋक्स्वरवत् सामिक इति न्यायेन नीचप्राप्तस्य स्त्याशब्दस्योच्चविधानम्।।

20 1 2 1 2 1 2
7.इहवद्वामदेव्यम्- एतमुत्यन्दशक्षिपः। स्तोभसहित पादप्रस्तावः। एतँ हवद्देव्ये इत्यत्र आद्यायां प्रस्तावाद्यस्य नीचविधानम्। क्रोशौपगवेत्यादिना अत्र सर्वासूद्गीथादिर्नीचैः।योनावुच्चम्।।

20 0 0 0 1 2
8.वारवन्तीयम्- रेवतीर्नाऔहोहाइ । चतुरक्षरप्रस्तावः । सोमसामेत्यादिनाभिर्वन्तीयेप्रावन्तीय इन्द्रेसन्त्वित्यगतिः। रङ्गचेति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वमवृद्धमाभवत्यौस्तोभे सस्वरे प्रत्ययेत्यनेन अवृद्धानां औस्तोभे परतः आभावे प्राप्ते आघत्वावानित्यत्र रङ्गभूतस्य त्वा शब्दस्य अनाभावविधानम्। स्तोतृभ्यश्चेति स्तोतृभ्यो परे सन्धिगानम्। अत्र भ्य शब्दस्य मध्यमायां ओभावविधानम्। दान्तेयहोध्रिगोस्तावेमिन्दो इति शब्द दोशब्दानां पदान्तभूतानां परिसंख्यानरूपेण प्रकृतिभाव उक्तः। अत्र आयद्दुवश्शतक्रत इत्यत्र तो शब्दस्य पदान्तस्य अत्राउभावः उक्तः। तृतीयादिन्यामौहोवायामित्यादिना सर्वत्र पादान्त्यानामाभावे प्राप्ते व्यञ्चेति। अत्र पदमध्यवर्तिनां तालव्याक्षराणां देशब्दक्रिशब्दचि-शब्दानामाभावविधानम्। दान्दतीय यौक्तेष्वौकारे इत्यादिना अत्र नशब्दवशब्दयोर्ह्रस्वयो रौकारे प्रत्यये दीर्घविधानम्।।

9.तृतीयं वैदन्वतम्- पा(3)ऽ5रि- पादप्रस्तावः। विश्वे असि निधने दन्वते प्रथमे । प्र। सोमोदन्वते इति अभ्यासे सो शब्दस्य वृद्धिः। वृद्धादक्षरद्वैदन्वते प्रथमे इति वृद्धादोकारात्परस्य अकारस्य लोपः। स्वानः परिस्वानायां इत्यादिना अत्र स्वा शब्दस्सङ्कृष्टः। गतेरित्यादिना अत्र एकारनिवृत्तिः।।

10.आद्यंवैदन्वतम्-पा(1)रि(2) । पर्वप्रस्तावः। पवित्रेसो सर्वत्र तुवे सःपी द्वितीये प्र। इत्यादिना स्वशब्दः सङ्कृष्टः। दन्वते प्रथमत्रृध्येव-प्रियामुत्तरयोः इति अस्य अयमर्थः। अत्र प्रथमायामुद्गीथे द्वितीय-पर्वाद्यस्य आद्याक्षरस्य नीचम्। उत्तरयोरुच्चमिति। त्वं कविर्द्वितीये दन्वते। अत्र त्वं शब्दस्सङ्कृष्टः।।

11.चतुर्थंवैदन्वतम्-[1]औ(नु)ऽ3हो(2)इ-इ(1)हा(2)हा(3)हा(0)हा(2)इ(1)। प(2)राइस्वा(3)ऽ2नो(5)। सस्तोभपदविभाग्यम्। कविस्तुवेश्वेससःपी असि तृतीये प्र। दन्वते चेति। अत्र सर्वासु निहोताविधानम् । अगिरि प्रभृति तिस्रः । इति

---

1 औ(नु)ऽ3हो(2)इ। इ(1)ह(2)हा(3)ह(0)हा(2)इ(1)।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गिरिष्ठा इत्यारभ्य त्रिषु पर्वसु निहोता न भवति। वारैव अत्र वारानिहोतयोश्चेति। असंयोगे द्वितीयस्याक्षरस्य वृद्धिः, संयोगे अवृद्धिः। समानोदर्केषूदर्कस्योद्धारः पूर्वयोः स्तोत्रीययोः इति एतेषु त्रिषु सामसु पूर्वयोरुद्धारः।।

12.दीर्घम्- सा^{1}सू^{2}। द्व्यक्षरप्रस्तावः।जारास्वरवत्वात्। दीर्घइन्द्रः आये नमि प्र। दीर्घे परयोः दोषापरं नीचैः । इति अस्यायमर्थः। अत्र उत्तरयोः स्तोत्रीययोः उद्गीथे तृतीयपर्वाद्यस्याक्षरस्य योनिवदुच्चप्राप्ते विकल्पपक्षे नीचविधानम्।।

13.कार्णश्रवसम्-ता^{3}ऽ234म्वाः^{5}। सा^{3}ऽ234ख्वा^{5}। पर्वद्वयं प्रस्तावः। कार्णश्रवस इव प्र। कार्णश्रवस उत्तरयोर्नुषोजनासदा व्यधाम्। कार्णश्रवस उत्तरयोर्व्यैस्वदयासदावृद्धामिति सूत्रद्वयेन उत्तरयोर्द्वितीयस्वरारम्भनियमः ।योनौ द्वितीय स्वरे वर्णमित्यर्थः।।

14.गौरीवितम्- सो$^{5\text{र}}$मा^{0}ः- पा^{3}वा^{2}ऽ3[1]- वितेरेसर्वत्र। पादप्रस्तावः। प्र। स्वाध्यस्सोमाःपवन्तायामित्यादिना स्वाध्य इत्यत्र सु शब्दात्परं अवृद्धं इत्यादिना व्यवधानप्राप्तस्य वृद्धात्परौ य्वौ लुप्ताविति लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्। स्वस्सर्वत्रेति। अत्र स्व शब्दात्परस्य वाचिसर्वमो भवति इति लोपप्राप्तस्य विसर्जनीयस्यातिहारः। दध्याशिरोविते इति अत्र ध्याशब्दस्सङ्कृष्टः।।

15.मधुश्चुन्निधनम् - सो$^{2\text{र}}$मा^{0}ःपवन्तइन्दवाऽ3ए^{2}।। पादप्रस्तावः। मधुनिधनेऽन्त्यवर्जम् इत्यादिना अगतिः। स्वाध्य इत्यादिना पूर्ववत् लोपप्राप्तस्य वकारस्य लोपः। दीर्घवृद्ध इत्यादिना यकारापत्तिः। इति मधुनिधने त्वचिसुष्वाणायामिति हादौ स्तोभे परतः त्वचि शब्दस्य

---

1. ख,ग- पा^{3}वा^{2}ऽ3 ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आभावविधानम्। व्यद्रिभिर्ज्रीये इति अत्र विकृष्टः। कर्षणेत्यादिना कर्षणवृद्धे न भवतः।।

16.वाङ्निधनं क्रोञ्चम्-सोमाःपावाऽ31234।। पदविभाग्यम्। क्रोञ्चेधिया । प्र। जिगत्नवस्तेपूतायां वाङ्निधनेक्रौञ्चे इति अस्तोभे प्रत्यये सन्धिगाने प्राप्ते पदगानविधानम्। वाङ्निधनस्य कण्वबृहति च इति प्रतिस्तोत्रीयविधानात्। अन्यत्र यज्ञायज्ञीयादिषु पूर्वयोर्न भवति।।

17.ऐडं क्रौञ्चम्-सोमाःपवन्तइन्दवाः।। पादप्रस्तावः।। अत्र निगदवर्तीनि निधनानि ऋक्स्वराबाधेन गेयानि।।

18.श्नौष्टम्-औहोहाइ - अयोहाइ। द्व्यक्षरप्रस्तावः। यौक्ताश्च इत्यादिना । श्नौष्टे सूनि जूतिं सूनि। प्र। श्नौष्ट उत्तमास्त्रयः प्र। द्यौमा इत्यत्र आद्यायां द्वितीयादिषु पादेषु मध्यमायामुत्तरयोः पादयोश्च आद्याक्षरस्य नीचविधानम्।।

19.गूर्दः- ओग्नाइ। द्व्यक्षर प्रस्तावः। गूर्देष्ठदीषष्ठः । प्र। गूर्दपूर्वयोर्हुम्मा अगतिः। गूर्दे वृद्ध ओ भवत्यकारोऽग्नि प्रत्यये वादौ। अत्र प्रथमायां प्रस्तावे अकारस्य वृद्ध ओकारो भवतीति। गूर्द उत सुम्ना इत्यत्र आद्यन्तयोः द्वितीयपादादेः नीचविधानम्। वाचि सर्वमो भवतीति वाशब्दपरतः सर्ववर्णानां ओभावे प्राप्ते अनुस्थमिति वरुथ्य इत्यत्र रु शब्दस्य ओभावो न भवति। गूर्द उत्तरयोर्होता यक्षां इति। उत्तरयोर्होतायां यक्षामापद्यते। पर्वभेदः। योनावेकं पर्व। साहीयगूर्द-पुत्रेषु चेति। अत्र मध्यमायां रयिन्द इत्यत्र इकाराभ्यासविधानम्।।

20.उद्वँशपुत्रः- प्रावाः[1]। द्व्यक्षरप्रस्तावः।। यौक्ताश्चेत्यादिना पुत्रेर्धेडोपायमाद्यमाद्यायां। अत्राद्यायामुपद्रवस्य वृद्धिविधानम्। अर्चन्तूद्वँशपुत्रे ।अत्र दीर्घवृद्ध इत्यादिना प्राप्तयकारस्य प्रतिषेधः।

1. ख, ग-प्रवाः ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ता अर्कमिति। साहीयगूर्दपुत्रेषु च। इकाराभ्यासः। सइन्द्र इत्यत्र त इन्द्र इत्यत्र च ।।इति षष्ठः।।6।।

* ** *

।।सप्तमो विंशः।।

1.सन्तनि-वृ[1]षाहा[2]उ।। स्तोभसहितद्व्यक्षरप्रस्तावः। तनिपर्ण कूलीयेषुन्वेवा । प्र । आउवाव्यवहितमित्यादिना सर्ववर्णानामाउभावे प्राप्ते ओष्ठ्यश्चान्तःपदिकोऽनाउ भवति सर्वत्रेति अत्र दा[1]धा[0]न[2]ओऽ3आ[1] उवाऽ23। वा[1]जे[0]षु[2]चोऽ3आ[1]उवाऽ23। इत्येतयोः पदमध्यगतयोः ओष्ठ्याक्षरयोरनाभावः। ण्योस्तन्त्वाधर्तायां हाविष्मतसन्तनिनोरिति। निधनेहीषीस्थँसर्वत्रेति जि शब्दस्य प्रकृतिभावे प्राप्ते जा[3]ऽ234इना[5]म् इत्याइभावः। गोष्ठप्रतोदेत्यादिना अत्र पादादिभूतानां वर्णानां ऋक्स्वरवदुच्चनीचविधानम्। दादिस्तनिपार्श्वर्योर्यथर्चस्सर्वत्र। अत्र पादादिभूतानां ऋक्स्वरवदुच्चनीचे प्राप्ते अस्तावहारयोरवश्ये हि स्तोमसुमराप्रमरजी चेत्यत्र प्रतिहारादिभूतस्य हिन्वे इत्यत्र हि शब्दस्य उच्चमेव।।

2.ऐडँसौपर्णम्- वृ[2]षा[0]प[1]वो[1]वा[2]। वान्तप्रस्तावः। ऋगन्तीयस्पर्श इत्यादिना अत्र मध्यमायां ऋगन्तभूतस्य मकारस्य अनाभावः।

3.रोहितकूलीयम्-वृ[1]षा[20]प[1]स्व[2]धा[1]। षडक्षरप्रस्तावः। षट्शङ्कु इत्यादिना। अत्र न्वेशब्द एव। प्र। लीयेऽयाभिसुता दिवःपी । अत्र अयाचित्त इति नीचादिः। वृषालीयेमरु इत्यत्र प्रथमायां उद्गीथद्वितीय पर्वाद्यस्य नीचविधानम्।।

4.कण्वरथन्तरम्-पू[20]ना[0]न[1]स्सो[20]म[10]धा[2]र[1]या। पादप्रस्तावः। कण्वतरे षसिपूर्व प्र। प्रस्तावाद्यं कण्वतरे इत्यत्र सर्वासु प्रस्तावाद्यस्य ह्रस्वस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दीर्घविधानम्। ण्वतरे तुरीयं नीचं सर्वत्रेति। योनिवदृक्स्वरे प्राप्ते सर्वस्यात्र प्रस्ताव तुरीयस्याक्षरस्य नीचविधानम्।।

5 0 2 40 5 40 5
5.गौङ्गवम्- पुनानाऽ3स्सोमधारया ।। पादप्रस्तावः।। नार्षसि पुनानायां यथा गौङ्गवाभीवर्तयोरिति। दीर्घवृद्धे इत्यादिना गतेः परं प्राप्तस्य यकारस्यात्रलोपः। गवे तृतीयमिति अत्र सर्वासु तृतीयपादाद्यक्षरस्य नीचविधानम्। गवे तृतीयं दशमं कृष्टं सर्वत्रेति। गौङ्गवे सर्वत्र विकल्पपक्षे तृतीयपादे दशमस्य अक्षरस्य कर्षणविधानम्। पूर्वपक्षे कर्षणत्रयं विद्यते। सप्तमाष्टमदशमेषु विकल्पपक्षे एककर्षणमित्यर्थः। नृभिःप्रत्नँसधस्थमित्यादिना अत्र नृ शब्दस्यानार्भावः।

4 0 3 40 40 4 50
6.साप्तमिकमायास्यम्- पुनानस्सोमधारया।। स्तोभसहित पादप्रस्तावः।। आयास्ये षसि दसि प्रियं षसि। प्र। साप्तमिकमायास्ये इति । अत्र सर्वासु प्रस्तावाद्यक्षरस्य नीचप्राप्ते अनुत्सस्तव । इति अत्र मध्यमायां उच्चारम्भः। जयत्रिणिधनेत्यादिना अत्र सर्वासु उद्गीथद्वितीय पर्वाद्यस्य अवृद्धिप्राप्तस्य अत्र देव इत्यत्र मध्यमायां दे शब्दस्य द्वितीयपर्वाद्यस्य वृद्धिः। नो अर्षसीत्यादिना अः कारोऽत्वम्।।

20 10
7.प्रवद्धार्गवम्- प्रोअयासाइत्।। पदविभाग्यम्। प्रवृतिपादादौ द्वे इति प्रवद्धार्गवे पादादौ द्वे अक्षरे नीचैर्भवतः। मध्येचेन्दुर्युवमन्द्रोश इति अत्र पादमध्ये च इन्दुः युव मन्द्र उश इत्येतेषु द्व्यक्षरं नीचम्। एकमन्यत्र। अन्यत्र एकमक्षरं नीचम्। वर्णसदस्यवप्रवदुत्सामराजेषु स्पर्शानामलोपः। आउवाव्यवहितमित्यादिना आभावे प्राप्ते अत्र उत्तमायां स्पर्शस्य आभावविधानम्। उगत्यन्ताः प्रवदुद्धत्साम-राजेष्विति अत्र पूर्वयोरुगत्यन्ता भवति। अशिश्रयुः प्रवद्धार्गवे इति आउवाव्यवहितमित्यादिना आभावं प्राप्तस्य अशिश्रयुशब्दस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अनाभावविधानम्। संवरणेष्वित्यादिना वृद्धात्परौ ख्वौलुप्ताविति लोपप्राप्तस्य वकारस्यालोपः।।

8.अभिनिधनंकाण्वम्- औहोहोहाइ । आइही । वायाम्।। द्व्यक्षरप्रस्तावः। जारेत्यादिना। अभ्यन्ते वणे सुतेरेके स्वब्दी कण्वे दर्षि प्र। क्रौञ्चेभिनिधनेत्यादिना अत्र वृण्यादेः ह्रस्वस्य दीर्घविधिः। ओकारः पादमध्ये इत्यादिना वसोनिरेके इत्यत्र सोशब्दस्य प्रकृतिभावप्राप्तस्य वसो आवसूनि अयेन्दो इत्यादिना आउभाव-प्राप्तस्य पुनः प्रकृतिभावविधानम्। वसोनिरेकेऽभिनिधने इति वृद्धस्य तालव्यस्य आइभावे प्राप्ते निरेक इत्यत्र के शब्दस्य आवृद्धस्याप्याइ भावविधिः। काइ उक्थिनः इति स्थिते असवर्णयोः स्वरयोर्मध्यगतायाः अन्तस्थायाः लोपो भवति यकारस्य लोपः। का उक्थिनः । वृक्तवयंघत्वायामभिनिधने काण्वे इति वृ शब्दस्य अनार्भावः। अत्र तृकारस्तर्षयोः प्रत्यययोरार्भवतीति तृ शब्दस्य अनार्भावः। वृद्धमृवर्णमित्यादिनापि। निहोताणस्सो पम्मेत्यादिना पम्मघन्निति निहोतैवावारानिहोतयोश्चेति संयोगे वाराद्वितीयस्य अवृद्धिप्राप्ते नासाद्दधीनित्यादिना इन्द्रस्वब्दी इत्यत्र न्द्रशब्दस्य संयोगेऽपि वृद्धिः।।

9.वैखानसम्- नकिष्टाऽ3ङ्कर्मणानशात्।। पादप्रस्तावः। खानसे सहितमभ्यसोमाने। प्र।।

10.मौक्षम्[1]- यस्तेमदोवरेणियाः। वान्तप्रस्तावः।। कावश्रौत-कक्षेत्यादिना। मौक्षेस्थाभिः । प्र। दक्षणिधनेगोषातिः। इत्यत्र गोषाति रित्यगतिः। पवस्वयस्तेमदायां सर्वत्रेति विश्लेषः। दक्षसंहितयो रित्यादिना अत्र सर्वासु प्रस्तावाद्युच्चम्।।

11.शार्करम्- एषाऽ3स्यधारयासुताः। पादप्रस्तावः । शार्कर

ग-1. दक्षणिधनमौक्षम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इवोद्गीथेवर्मी । प्र। करेऽभि इत्यत्र अभिव्रजमिति नीचारम्भः।

2 2 2
12.प्लवः-हा-वोऽ3हा-वोऽ3हाऽ3। सस्तोभपदविभाग्यम्। प्लवे नी षी समी अभि यवी । प्र। प्लवे वारान्तः । तिस्रः तृतीयेपादे द्वितीयेतूष्णिक्षु चतुरक्षरा, प्रथमा, द्व्यक्षरे परे इति। एतेषामयं पिण्डितार्थः। योनौ तृतीयपादे चतुरक्षरास्तिस्त्रो वारान्तास्सन्ति। अन्यत्र द्वितीयपादे सर्वासु प्रथमा चतुरक्षरा द्व्यक्षरे परे इत्यर्थः। प्लवे वारान्त इत्यत्र सर्वासु वारास्वरान्तभूतस्य वृद्धिः। अषतयश च । इति अत्र वारान्तभूतयोः षट, यशा इत्येतयोरवृद्धिः। निहोताणस्सो पम्मघेत्यादिना ज्ञैः परीति निहोता भवति।।

5 3 2 40 5
13.गौरीवितम्- पुरः-जिताऽ3इ-वो अन्धसाः।।

2 0 0
14.कार्तयशम्- पुरोहाहाउ। हाउकारान्तः प्रस्तावः। हाउकारान्तस्सन्तनिनीत्यादिना। कार्तयशे इत्यत्र सर्वास्वगति कार्तयशेतीवोयित्नवे। प्र। यो वृद्धाद्दीसर्वत्र इत्यत्र दीशब्दस्य उपद्रवे प्रकृतिभावे प्राप्ते कार्तयशेत्यादिना अत्र उपद्रवे न प्रकृतिः। हादौ स्तोभे आभावमेव। ओवौकारयोरित्यादिना आभावे प्राप्ते उवर्णन्तु न

2 1 2 2
सर्वत्राभवतीति अत्र इन्दूरौऽ3हौऽ3इ, इत्यत्र इन्दु शब्दस्य अनाभावः। श्वःकार्तयशेत्यादिना अत्र श्वशब्दस्य अस्तोभे सन्धिगाने प्राप्ते

2 1 2 2
पदगानविधानम्। तन्दु कार्तयशे स्वरान्तमेके इति। तन्दूऔऽ3हौऽ3इ-

4 5
रोषाऽ6म् । इति स्वरान्तमेके मन्यन्ते। विसर्जनीयान्तमिति वा। तन्दू

2 1 2 2 4 5
तन्दूहौऽ3हौऽ3इ - औषाऽ6म् इति विसर्जनीयान्तः।।

1 20 1 2 1
15.सौहविषम्- प्रवाजियक्षाः। पादप्रस्तावः। अथाक्षरः पञ्चतयोः विंशत्यक्षरा चतुष्पदा पञ्चाक्षराः पादा इति वचनात् पञ्चाक्षरः पादः। हविषे याहि प्र। आकूहविष इत्यादिना आद्ययोस्तोत्रीययोरुद्गीथादि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीचैः। आदिद्वोदेत्यादिना ह्रस्वस्याक्षरस्याभिगाने प्राप्ते हविषे च गीथे इति अत्र सर्वासूद्गीथ ह्रस्वस्य प्रत्युत्क्रामविधानम्। न प्रवाज्युत्तरयो-रुद्गीथे षष्ठस्य ह्रस्वस्याक्षरस्य पुनरभिगानविधानम्। सौहविष-रन्ध्रोत्तरयोर्गोभिरिति। अत्र भि शब्दस्य वृद्धिः। श्रीणाहविषे (प्र) सवाज्यक्षायामिति। वृद्धमन्तःपदेत्यादिना हाउस्तोभे आभावे प्राप्ते अत्र पदमध्यगतस्य श्री शब्दस्य आइभावः।।

16.जराबोधीयम्- 20 0 0 1 2 येसोमासोवा। वान्तः प्रस्तावः। काव इत्यादिना उद्गीथोपान्त्यं त्रीषुबोधीये। इति सर्वासु उद्गीथोपान्त्यस्य वृद्धिः। न योनौ इति । योनौ उपान्त्यस्य वृद्धिर्न भवति। बोधीये सर्व-मिति। अस्य अयमर्थः। जराबोधीये सर्वत्र आदिद्वोदा इत्यादिना प्रतिहारतृतीयस्य दीर्घस्याक्षरस्य प्रत्युत्क्रामे प्राप्ते ह्रस्वस्यापि प्रत्युक्राम विधानम्।अयोनौ इति । योनौ प्रतिहारतृतीयस्य ह्रस्वस्य अभिगानमेव।।

17.वात्सम्- 20 0 आर्तवत्साः। पर्वप्रस्तावः । जारेत्यादिना । वात्सेत्राहि। प्र।।

18.सौश्रवसम्- 5 2 4 50 तुवन्नाऽ3इन्द्रआभरा।। पादप्रस्तावः। क्रौशौपगवेत्यादिना अत्र सर्वासूद्गीथाद्युच्चं योनावेव नीचम्। त्वम्मा-तौपगवे इत्यत्र त्वं शब्दस्सङ्क्रुष्टः। निधनोपायान्ताः सर्वत्रेति। अत्र पूर्वयोः निधनात्पूर्वं उपायान्ते प्राप्ते ऋक्समाः पगवयोः इति अत्र पूर्वयोः ऋक्सममेव। दान्तेयहोध्रिगोस्तावेमिन्दो इति हो शब्द गोशब्दानां पादान्तभूतानां उस्थसंज्ञकानां परिसंख्यानरूपेण प्रकृति-भाव उक्तः। अतः पितावसाउ सो इत्यत्र सो शब्दस्य पादान्तभूतस्य उस्थभूतस्य आउभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

19.वीङ्कम्-यदिन्द्रचित्रमइ-हनाऽ3-आस्ती। पर्वत्रयं प्रस्तावः। जारान्तो वीङ्क इत्यादिना। वीङ्केऽस्तिवीवी प्र। दृढाचित्स्वासु वीङ्केऽभ्यासे प्रत्यये। इति दृढाचिदिति अत्र चिशब्दात्परस्य, तकारस्य अभ्यासे प्रत्यये लोपः। राधस्तन्नो वीङ्के । इति नो शब्दस्य पदगानविधानं। अस्तोभे परतः।।

20.वैरूपम्- अध्वर्योऽ234आ ।। चतुरक्षरप्रस्तावः । सोमसामेत्यादिना। रूपे पवितवे इन्दोपीयूसर्वत्रेति प्र। वादिर्गीथा दिर्धनादिश्चरूपे। इति अत्र प्रस्तावोद्गीथनिधनानां आदिभूतस्याक्षरस्य सर्वत्र व्यभिचारेण नीचविधानम्।। इति सप्तमः।।7।।

* * * *

।।अष्टमो विंशः।।

1.आशुभार्गवम्-अध्वर्योअद्रि । भिस्सुऽ3ताम्।। पादप्रस्तावः। आशुभार्गवे पञ्चाक्षरोद्धा इति। अस्य अयमर्थः । सर्वत्र ऊहगाने प्रस्तावाद्यं पर्वपञ्चाक्षराभवतीति। योनौ चतुरक्षरमिति आशु चेति सर्वत्र प्रस्तावाद्यस्य नीचप्राप्ते नाध्व तव प्रसो सनः इत्यत्र आद्ययोः प्रस्तावाद्युच्चम्।।

2.मार्गीयवम्-अध्वौहोवा। वान्तप्रस्तावः। हीन्द्रातवेयवे प्र। यवेमह्यामिति महित्रीणाद्धितीयस्य सर्वत्र वृद्धिप्राप्ते अरसं दोषं प्र। इति अत्र उत्तरयोः अ,म इत्येतयोः महित्रीणाद्धितीयभूतायोरवृद्धिः। अध्वयवमध्यमायां अस्यायमर्थः। अत्र मध्यमायां पवमानस्येत्यत्र हादौ स्तोभे परतः पूर्वस्य वृद्धिविधानम्।।

3.सौमित्रम्- अध्वर्योअद्रिभिस्सुताऽ3मे।। पादप्रस्तावः।। मित्रेदिविद्युम्नास्य द्वे। इति अत्र सर्वासु उद्गीथाद्युच्चम्। अत्रोद्गीथाद्यं पर्व ऋक्स्वराबाधेन गेयम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 2 1 2
4.ऐटतम्- अध्व-एआध्वा। पर्वद्वयं प्रस्तावम्। अभ्यस्तो द्व्यक्षर इत्यादिना। पविटते प्र। ऐटतसारथिनोरविगीतेति। अस्यायमर्थः। वारानिहोतयोश्चेति। निहोताद्वितीयस्य असंयोगे वृद्धिप्राप्ते अत्र निहोताद्वितीयस्य संयोगेऽपि वृद्धिः।
3Q 2 3 5
सोमाम्पाऽ234वी इत्येवमादीनि। ओवौकारयोरित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्र इति अत्र मु शब्दस्य अनाभावः।।

1 Q 2
5.धुरासाकमश्वम्-अध्वर्योआऽ3-पादप्रस्तावः।। चतुरक्षरो वा सुरुपाजिगैडसाकमश्वानामिति विकल्पः। साकमश्व उच्चायामाद्य-स्सर्वास्विति। साकमश्वे प्रतिस्तोत्रीयं षट् स्तोभास्सन्ति। उच्चायां साकमश्वे आद्यः स्तोभः सर्वास्वगतिरिति। शिष्टानां गतिरेव। अन्यत्र प्रथमतृतीयपञ्चमा इति । अत्र प्रथमतृतीयपञ्चमानामगतिप्राप्ते न मधोस्तृतीय इति अत्र मध्यमायां तृतीयस्यापि गतिरित्यर्थः। पव्यध्वर्यो साके। इति वृद्धमन्तःपद इत्यादिना हादौ स्तोभे पदमध्यवर्तिनां तालव्यानां आभावे प्राप्ते अत्र प्रथमायां पवित्र इत्यत्र विशब्दस्य पुनः पदमध्यवर्तिनो प्याङ्भावविधानम्। कमश्वे च पूर्वे, इति अस्यायमर्थः। साकमश्वे पूर्वप्रतिहाराद्यस्याक्षरस्य ऊहे सर्वत्रोच्चम्। योनावेव नीचम्।
2 1 2
वयमिन्द्राऽ3 इति प्रतिस्तोत्रीयं बोधीयधुरासाकमश्वयोरिति। स्तौभिकानि सामान्तिकानि सामान्ते सर्वत्र। अत्र सर्वत्र च अन्ते प्रान्ते प्रतिस्तोत्रीयविधानम्।

1 2Q 1 2 1
6.विलम्बसौपर्णम्- अध्वर्योअद्रिर्भिस्सुतम्।। स्तोभसहितः पादप्रस्तावः। अन्ते चेति। तवे पर्णे प्र। तृतीये लंबे सोममिन्द्राय शुक्रं दुदुह्रे इति। अत्र तृतीयायामगतिः। सौपर्णे चेति । अत्र अन्त्यायां आशुभार्गववत् प्रस्तावाद्यस्य नीचविधानम्। पर्णे चेति। ऊहगीतौ सर्वत्र योनिवदुद्गीथाद्यस्य नीचे प्राप्ते असोमवरुणेति। अत्र

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आद्यन्तयोरुद्गीथाद्यस्य सोमशब्दस्य उच्चविधानम्। सुनोत सौपर्णे, अस्यायमर्थः। आउवाव्यवहितमित्यादिना सर्ववर्णानां आभावे प्राप्ते ओष्ठ्यश्चेत्यादिना ओष्ठ्याक्षराणां मध्यवर्तिनामनाभाव उक्तः। सुनोत इत्यत्र नोशब्दस्य पदमध्यगतस्य ओष्ठ्य संज्ञकस्य आउभावविधानम्। तृतीयोच्चान्त्यं हिस्तोभे दीर्घी भवति इति। अस्यायं पिण्डितार्थः। ऊहगीतौ सर्वत्र तृतीयोच्चपर्वणां अन्त्यभूतस्य ह्रस्वस्य हादौ स्तोभे परतः दीर्घविधानम्। एवं सर्वत्र प्राप्ते न वाम्रे स्पर्शान्त्यं व्यं चेत्यपवादः। तत्र वक्ष्ये। अत्र तृतीयायां वाशब्दस्य दीर्घः। अन्यत्र माधुच्छन्दसक्रौञ्चवाम्रादिषु द्रष्टव्यम्। अत्र योनौ षिसूर्यस्येति निधनं स्यात्। सर्वानुदात्तत्वात् द्वितीयादि सम्प्रसारणम्। ऊहगीतौ सर्वत्र हारिवर्णार्षभादिषु ऋक्स्वरगानमेव।।

7.द्विहिङ्कारवामदेव्यम्-अभिसोऽ23मासआयवाः।पादप्रस्तावः। (2 1 40 50) मद्यं द्विहिंकारेत्यादिनाद्यशब्दस्सङ्कृष्टः। ओवौकारयोरनन्तरइत्यादिना आभावे प्राप्ते, ऋगन्तीयस्पर्शइत्यादिना अत्र उत्तरयोः ऋगन्तीय स्पर्शभूतयोः तकारयोरनाभावः।।

8.गायत्रपार्श्वम्- आभी (1 2) । द्व्यक्षरप्रस्तावः। जारेत्यादिना। पार्श्वेभि। प्र। गोष्ठेत्यादिना पादादिः यथर्चः। ऋतमाउवा व्यवहितं पार्श्वसन्तन्यच्छिद्रमैधातिथांजोरुपोग्नेस्त्रिणिधनेष्विति। एतेषु सामसु आउवाव्यवहितमित्यादिना आभावप्राप्तस्य ऋतमित्यत्र मकारस्य अतिहारः। दादिस्तनिपार्श्वयोर्यथर्चस्सर्वत्रेति पदादिभूतस्य अक्षरस्य ऋक्स्वरवदुच्चनीचे प्राप्ते अस्तावहारयोश्वस्ये हिस्तोमसु मराप्रमरजी चेति। अत्र उत्तरयोः प्रतिहारभूतयोः रेफप्रशब्दयोः अयथर्चविधानम्।।

9.पौरुहन्मनम्- अभिसोऽ3मासआयवाः।। (5 2 40540 5) पादप्रस्तावः। हन्मगतयोर्मनि। प्र। पौरुहन्मने स्तोत्रामागायता जा स्वरोत्पत्तिः प्रा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तरूतायाः। इति सूत्रद्वयस्यायमर्थः। योनौ तृतीयपादे वा1इश्वासा2ऽ3म्। इति पूर्वाक्षरयोः प्रथमस्वरे वृद्धिः। अन्यस्य द्वितीयादिकर्षणं ऊहगीतौ सर्वत्र। मागायता भवति। तरूतायाः पूर्वं मागायतायाः परं जा स्वरश्च भवति। इन्द्रायसाम प्रथमे मागायता कदावसो प्रथमे स्तोत्राम्। उदुत्यमित्यत्र जा स्वरः।।

10.द्वैगतम्- अ5भिसो2ऽ3मा40स5आ40यवा5ः । पादप्रस्तावः। हन्मगतयोर्मनि। प्र। द्वैगतेऽभिगीतादिति। ऊहगीतौ सर्वत्र अभिगीतात् परस्य वृद्धिः। प्रत्युत्क्रामात्परस्य अवृद्धिः।।

11.हारायणम्- अ1भिसो0मौ0होऽ2इसआ0य1वाः।। पादप्रस्तावः। हारायणेन्द्रं पवमानस्य वरुण इत्यगतिः। मद्यापि। अत्रापि सङ्कृष्टः।।

12.अच्छिद्रम्- अ2भिसो0मा। पर्वप्रस्तावः। जारेत्यादिना। निधने हीषीस्थँ प्र। अच्छिद्ररयिष्ठयोश्च। अत्र सर्वासु पादादिर्यथर्चम्। मद्यमाउवाव्यवहितमित्यादिना अत्र मद्यमिति मकारस्य पादान्त्यस्य आउवाव्यवहितं इत्यादिना अत्र लोपप्राप्तस्य अतिहारः। ऋतमित्यादिना ऋतमिति मकारस्यापि पूर्वसूत्रन्यायेनातिहारः। अच्छिद्रेऽभिसोमाद्यायां नीचं ध्यभ्यास इति। धिविष्ट इत्यत्र अभ्यासविषयनीचविधानम्। योनौ नर्यो इत्यत्र नकारस्य उच्चम्। यो शब्दस्य कर्षणम्। आर्चिकं अकृष्टं सर्वत्रेति अत्र सर्वत्र कर्षणनिवृत्तिः। अच्छिद्राङ्गोरुपसन्तनि पार्श्वानामाउवा सर्वत्रेति। एतेषु सामसु सर्वत्र आउवास्तोभः अगतिरित्यर्थः न तालव्यात्। व्यात्परमतिहारमेके इति सूत्रद्वयस्य अयं पिण्डितार्थः। एतेषु चतुर्षु सामसु तालव्यसंज्ञका-दक्षारात् परायाः आउवाया अन्ते गतिरित्यर्थः। अन्यत्र गतिर्न भवतीति विरते गतिलोप इति। अस्यायमर्थः। तालव्यस्तोभयोर्मध्ये विरामे सति स्तोभात्परं गतिर्भवतीति। न सन्धाविति। सन्धौ विषये गतिलोपो न

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवति। कुत इत्यत आह। रूचाहराऽ31उवाऽ23इ । णीऽ234या (एकाह-2-3) इति सूत्रकारेणोक्तं आउवाव्यवहितमित्यादिना आभावे प्राप्ते ओष्ठ्यश्चेत्यादिना अत्र मध्यमायामूकारस्यनाभावः।।

13.बार्हदुक्थम्- प्रहिन्वानऋ। पादप्रस्तावः। हदुक्थेभिर्ये। प्र। मन्तवदुक्थे। प्रहिन्वोच्चैरिति। अत्र प्रस्तावाद्यस्य उच्चम्। दुक्थेभिगीत-क्रमयोरिति बार्हदुक्थे सर्वत्र अभिगीतप्रत्युत्क्रामयोः परस्याक्षरस्य वृद्धिप्राप्ते आहर्येति। अत्राभिगीतादक्षरात्परस्य र्यशब्दस्यावृद्धिः।।

14.उद्वद्भार्गवम्- धर्तोदाइवाऽ23।। पर्वप्रस्तावः। उद्वद्भार्गवेभ्रे। प्र। क्रौञ्चेऽभिनिधनेत्यादिना अत्र सर्वासु वृण्यादि भूतस्य ह्रस्वस्य दीर्घविधानम्। अत्योधर्तायामुद्वद्भार्गवे इति यकारे च प्रत्यये वृद्धमन्तः पदे तालव्यमाभवतीति। अन्त्यो न इति अत्र तिशब्दस्य पदमध्यगतस्य यकारे परतः आभावे प्राप्ते आइभावविधानम्। उगत्यन्ताः प्रवदुद्व-त्सामराजेषु। इति अत्र पूर्वयोः स्तोत्रीययोः उगत्यन्त्यावेव। जठरे षूद्वत्काववासिष्ठाभिक्रन्दार्केष्वित्यत्र षु शब्दात्परं व्यवधानप्राप्तस्य वकारस्य (लोप) अव्यवधानं कावाभिक्रन्दयोरिति स्वशब्दोऽ विकृष्टः।।

15.नैपातिथम्- यदिन्द्रप्रागपागुदाऽ3गे। पादप्रस्तावः। नैपे नृभिः नवे र्वशे न स्तावे प्र। नैपेगीथतृतीयम्। इति सर्वत्र उद्गीथ-तृतीयस्य नीचविधानम्। कृपे स्वासु नैपे इत्यत्र हादौ स्तोभे परतः कृपे इत्यत्र पादान्तभूतस्य पेशब्दस्याप्याभावविधानम्। ओवौकारयो-रित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्र आभवतीति तुर्वश इत्यत्र तु शब्दस्य अनाभावः। इन्द्रायच्छन्तिस्रुचश्चरन्ति नैपे इति दीर्घवृद्धोपहित इत्यादिना सन्धिविषये तकारात्परं प्राप्त यकारस्य लोपः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

16.वैयश्वम्-उभयँशृणवच्चनाऽ3ए। पादप्रस्तावः। वैयश्वे पुनाना यामन्त्यः। अत्र सर्वत्रगतिरेव। योनौ वैयश्वे सप्तमम् । इति पञ्चममुत्तरयोरित्यत्र सर्वत्र तृतीये पादे प्रथमायां सप्तमस्य कर्षणम्। उत्तरयोः पञ्चमस्य । क्रौध्यष्टम्भेत्यादि। अत्र सर्वासु तृतीयपादादिर्यथर्चमुच्चनीचम्। श्वेतृतीये पतृषट् परे । इति अत्र उत्तरयोः स्तोत्रीययोः तृतीयेपादे तृतीयषष्ठसप्तमाक्षराणां नीचविधानम्। ऋक्स्वरवत् इत्यर्थः। प्ररेवैयश्वेनौ, इति अत्र प्रथमायां प्रतिहाराद्यस्य नीच विधानम्। ऋगन्तीय स्पर्श इत्यादिना अत्र आद्ययो स्पर्शविसर्जनीययो रनाभावः। ष्ठश्चैके नीचैरिति। धियाशविष्ठ इत्यत्र ष्ठशब्द एके नीचं मन्यन्ते। सञ्ज्याभीशवेत्यादिना अत्रोत्तरयोः स्तोत्रीययोः तृतीयपादे वृषभाम् थमाम्, इति पर्वैकत्वं। नीचात्परः षष्वेधमैधदैर्घवैयश्वपृश्नि कौल्ममद्रस्थानेष्विति। अस्यायमर्थः। एतेषु सूत्रोक्तसामसु दैर्घश्रवस पृश्निपौरुमद्रदेवस्थानेष्विति चतुर्षु ऋक्स्वरवत्सामिकः संहिते उदात्ताच्च परमुच्चैर्भवतीति न्यायेन अपोवसानो अर्षसीति पर्वाणि गीतानि। इतरेषु चतुर्षु निषेधवैयश्वमैधातिथ कौल्मलबर्हिषेषु। ऊहगाने योनिवत्स्वरा इति न्यायेन योनिवद्गीतानि। अर्षसीति षकारः (ऋक्स्वरे नीचपूर्वनीचैः) निषेधादिषु चतुर्षु ऊहगाने योनिवत्स्वरा इत्यादिना अर्षसीति षकारस्य नीचपूर्वोच्च नीचत्वमस्ति। दैर्घश्रवसादिषु नीचात्पर इति नीचपूर्वस्य नीच षकारस्य उच्चविधानप्रकरणे निषेधादिषु नीचपूर्वोच्चस्य षकारस्य अनुच्चत्वं प्रसज्यते। तस्मान्निषेधादीनां ग्रहणमिति सूत्रार्थः।।

17.सुरुपाद्यम्- पवस्वदाऽ2इ ।। पादप्रस्तावः। चतुरक्षरोवा । अन्तेचाविधाद्य इति। द्वियकार संयुक्तेत्यादिना पूर्वो यकारः प्लुत आकारास्संपद्यते । आजिकसुरुपाणां च । इति अत्र उपद्रवद्धितीयस्या-वृद्धिः। योनावेव वृद्धिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5 2 4 5

18.भासम्- पव-स्वाऽ3दाइ-वाः-यान्तप्रस्तावः। यान्तो दाशस्पत्येत्यादिना। भासेक्रतुवित् तेनापवस्वमंहिष्ठः। इत्यादिना अत्र क्रतुविच्छब्दस्यागतिः। वायुमारोभासे इति। ओवौकारयोरित्यादिना आभावे प्राप्ते वायुमारो इत्यत्र रो शब्दस्य नाभावः। अवृद्ध स्तोभात्परः इकारस्संपद्यते। श्रवाय्यमित्यत्रावृद्धस्तोभात्परस्य व्यञ्जनरूपस्य पूर्व यकारस्य इकारादेशो भवति। भासे च नौ इति योनौ एव उत्तरप्रतिहारादेर्वृद्धिः। अत्र न, आर्चिकं निधनन्यायेन अत्र सर्वासु निधनानां संप्रसारणे प्राप्ते मणांजनमाविशेति न्यायेदपेत प्रकरणे ग्रहणात्। अत्र वृधेस्वरमेव। ऊहगीतौ सर्वत्र निधनानां अन्त्यक्षरात् पूर्वेषां वर्णानां ऋक्स्वरवत् उदात्तानुदात्तत्वमेव। नयोनिवत्। योनौ सर्वाण्यक्षराण्यनुदात्तानि। ओवौकारयोरनन्तर इत्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति मु शब्दस्य अनाभावः।।

5 2 40 50

19.काक्षीवतम्- पवस्वाऽ3देवआयुषाक्। पादप्रस्तावः। काक्षीवत उच्चावत्। इति योनौ काक्षीवते कालेयवत् प्रस्तावस्वरः। ऊहगीतौ आमहीयवादि त्र्यृचः। क्षीवते द्वितीयपादान्त्यमद्वितीय स्वरम्, अस्यायमर्थः। काक्षीवते ऊहगीतौ सर्वत्र द्वितीयपादा-न्त्याक्षरस्य प्रथमादिकर्षणम्। योनौ द्वितीयादिकर्षणम्। एतावान् विशेषः। वायुमपघ्नन् पवसायां काक्षीवित इति। अत्र तृतीयायां वायुमित्यत्र यु शब्दात्परस्य मकारस्य ओवौकारयोरेकीभाव लोप इति लोपप्राप्तस्यातिहारविधानम्।।

3 4 5 Q 4 50

20.गायत्रीसामासितम्[1]- पवस्वदेवआ - यान्तप्रस्तावः। यान्तो इत्यादिना। सितेऽन्त्यः इत्यगतिः। सितेऽघ्नन् इति अत्र तृतीयायां प्रस्तावाद्यस्य नीचविधानम्। सिते च देवाद्ययोस्तृतीयोच्चान्त्यमग्निमी

ग.1-वासिष्ठमासितम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति अत्र आद्ययोः आद्यपर्वन्त्यं अग्निमी स्वरमापद्यते न योनिवत्। अग्निमीडिष्वायां अग्निमी। सितेथे द्वितीयमिति। अत्र सर्वासु उद्गीथाद्यस्य वृद्धिः। योनौ न भवति द्वियकारसंयुक्त इत्यादिना श्रवाय्यमित्यत्र पूर्वयकारस्य अकारः। अयामिति।। इति अष्टमः।।8।।

* *   * *

।।नवमो विंशः।।

1.ऐषिरम्-अ[2]भिद्युम्नंबृहद्याऽ3शा[2]ः।। पादप्रस्तावः। ऐषिरे दे द्वितीयं देवपूर्वं श्पति स्वारि। प्र। ध्यममैषिरे इति। ध्यममित्यादिना वाचिसर्वमोभवतीति लोपप्राप्तस्य पदान्तस्य मकारस्यातिहारः। चगृरमिस्निर्दन्वन्नपोक्षाश्चेति। अस्मिन् सूत्रे अप इत्यत्र अकारस्य जिन्वन्नित्यत्र न्वशब्दस्य च अत्र तृतीयायां आदिद्वोदेत्यादिना अभिगाने प्राप्ते प्रत्युक्राम एव।।

2.त्रैतम्- प्रा[20]णा[0]शिशुर्म[1]हाइना[2]म् ।। पादप्रस्तावः।। ष्वैरयत्रैतक्रोश वार्शेष्विति अत्र ष्वै शब्दस्सङ्कृष्टः। उवर्णन्तु न सर्वत्र भवतीति सु शब्दस्यनाभावः। अत्राद्ययोः स्तोत्रीययोः निधनान्त्यभूतस्य ताशब्दस्य यं शब्दस्य उदात्तवृधे स्वरे प्राप्ते न्यायादपेत प्रकरणे ग्रहणात्। अत्र सम्प्रसारणमेव। अन्त्यायांतुश्शब्दस्य स्वरितत्वात् सम्प्रसारणम्। योनौ उभयोर्निहितत्वात् द्वितीयादि सम्प्रसारणमेव।।

3.गौरीवितम्- अ[5]भी[0] - नौ[30]वा[2]ऽ3।।

4.कौत्सम्- अ[3]भी[0]हि[20]नो[1]ऽ23 - वा[40]जसा[0]तमईया[5][1]। पादप्रस्तावः। कौत्से च हीशब्दोवृद्धः प्रकृतौ। ऊहेदीर्घस्सर्वत्र । संयोगे ह्रस्वः। अत्र तृतीयायां संयोगपरत्वात् हि शब्दस्य ह्रस्वमेव। कौत्से चेकारोकारौ, अस्यार्थः। ऊहे सर्वत्र प्रस्ताव द्वितीयभूतयोः ह्रस्वयो इकार उकारयोः

1.ग- वा[40]जसा[0]तमीया[5] ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हादौ स्तोभे परतः दीर्घविधानम्। अकारत्वात् अत्र मध्यमायां ह्रस्वमेव ऐडंकौत्से चेति। अस्यायमर्थः। ऊहे सर्वत्र प्रस्तावे द्वितीयपर्वणि सर्ववर्णानां चतुर्थस्वरविधानम्। कौत्से वे सूष्वाचतुर्थमेकोना । अस्यायमर्थः। पूर्वसूत्रेण सर्ववर्णानां चतुर्थस्वरे प्राप्ते अन्त्यवर्णस्य याशब्दस्य पुनर्मन्द्रस्वरविधानम्। त्सेरयि,मिन्द्रासर्वो, भियो इति। अत्राद्यायामुद्गीथाद्यस्य नीचविधानम्। तुव्यभीनः कौत्से । अत्र प्रथमायां तुवी इत्यत्र वि शब्दस्य पदान्तस्यापि हादौ स्तोभे आभाव विधानम्। कौत्सेऽभि तृतीयायामुभौस्तोभाविति। अत्र तृतीयायां स्तोभद्वयस्यापि अगतिः। दान्ते यहोध्रिगो स्तावे मिन्दो। इति गो शब्दस्य पदान्तभूतस्य प्रस्तावे परिसंख्यानरूपेण प्रकृतिभाव ग्रहणात्। अत्र निधनभूतस्य गो शब्दस्य आउभावः।।

2 10 0 20 10 2 1
5.पदनिधनशुद्धाशुद्धीयम्- अभीनोवाजसातमाम् ।। पाद-प्रस्तावः। शुद्धीयेभिद्धे। इति अत्र आद्ययोः प्रस्तावाद्यस्य नीचविधानं, क्रोशौपगवेत्यादिना। ऊहगाने सर्वत्र उद्गीताद्यस्य उच्चम्। दावसुनिधने-त्यादिना तृतीयपादाद्युच्चम्। योनावेव नीचम्। तु विशुद्धीयौदलयोः। इत्यत्र आद्यायां चतुर्थे पादे द्वितीयभूतस्य विशब्दस्य वृद्धिविधानं, न योनौ ।ते सर्वत्र मकारप्रत्ययं इति प्र।।

2 0 10 0
6.क्रौञ्चाद्यम्- अभीनोवोहो।। पदविभाग्यम्। क्रौञ्चेऽभि निधनेत्यादिना अत्र वृण्यादिभूतस्य ह्रस्वस्य दीर्घविधानम्। वसो इति ओकारः। पदमध्येत्यादिना अत्र पादमध्यभूतानां उस्थसंज्ञकानां ओकाराणां प्रकृतिभावे प्राप्ते वसो इति पादमध्यभूतस्य सो शब्दस्या उभावविधानम्। पदान्तभूतस्य गोशब्दस्याप्यत्राउभावः। पूर्ववत्।।

2 0 0
7.रयिष्ठम्- अभीनोवा। पर्वप्रस्तावः।। पूर्वार्कपुष्परयिष्ठयोः स्तौभिकं पर्वानुपादम्। अत्र स्तोभानां आद्यं पर्व प्रतिपादं भवति सामान्ते सर्वाणीति। अत्र च अन्ते सर्वस्तोभानां प्रवृत्तिः आर्चिकमकृष्टं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वत्रेति। योनौ ऋगन्तभूतानां अक्षराणां यत्र कर्षणमस्ति अत्र तत्स्थानभूतस्य अक्षरस्य कर्षणं नास्तीत्यर्थः। अयोनाविति। अच्छिद्ररयिष्ठयोश्चेति अत्र सर्वासु पादादिभूतस्या-क्षरस्य ऋक्स्वरवदुच्चनीच विधानम्। अत्र तृतीयपादे कनीयस्यादितो लोपः। ओकारः पादमध्ये। इत्यादिना वसोर्वसो इत्यत्र सोशब्दस्य प्रकृतिभावे प्राप्ते आउभाव विधानम्। अभ्यस्तान्ताः पुष्पाद्य-रयिष्ठयोरिति। अत्र पूर्वयोस्तोत्रीययोः अन्ते आद्यस्तोभस्य अभ्यास इत्यर्थः। औकारे प्रत्यये रयिष्ठ इति। अध्रिगो इत्यत्र गो शब्दस्य आउभावप्राप्तस्य अत्वविधानम् औकारे प्रत्यये।।

8.औदलम्-आ[1]भी[20]नो[0]वा[1] । चतुरक्षरप्रस्तावः। सोमसामेत्यादिना तु विशुद्धीयौदलयोरिति अत्र तुविद्युम्नमित्यत्र विशब्दस्य वृद्धिः। योनौ न भवति। ओकारः पादमध्य इत्यादिना वसोर्वसो इत्यत्र सोशब्दस्य प्रकृतिभावे प्राप्ते आउभावविधानम्।।

9.धर्म- औ[20]होऽ3वा[2]। सस्तोभपदविभाग्यम्। धर्मणितादेधर्तासि। प्र। स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति अत्राद्यन्तयो स्तोभानां निधनम्। गोष्ठप्रतोदेत्यादिना अत्र पादादिभूतानां वर्णानां ऋक्स्वरव-दुच्चविधानम्। अश्वान्धीगवेत्यादिना अत्र तृतीयायां धर्मन्नित्यत्र मन् शब्दस्य ऋक्स्वरे प्रचयभूतस्य द्वितीयादि सम्प्रसारणे प्राप्ते वृधे स्वरविधानम्। धर्मविधर्मणोः पञ्चाक्षरो निधनानि इति विकल्पः।।

10.विशोविशीयम्-हि[2]न्वा[0]हि[0]म्(स्थि)ताऽ3इसू[2]।। पादप्रस्तावः। वैच्छन्दसेषु गीतं प्रास्ताविकं एवं स्यादिति अस्मिन् सर्वासु गीतिरेव प्रस्तावः। विशीये विन्दुमहि निया ष्टुतिं प्र। हिन्वविशीयोत्तरयोरन्त्य इति अगतिः। विशीये च पूर्वे,इति हिन्वन्ति विशोविशीये इति। अनुस्वारस्पर्श इत्यादिना हिन्वन्नित्यत्र वशब्दात् परस्य नकारस्य अतिहारे प्राप्ते लोपविधानम्। अहिन्वन्ति सर्वासु। इति अस्यायमर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योनौ तृतीये पादे प्रथमपर्वणि आद्यस्याक्षरस्य नीचत्वं, उत्तरयोरुच्चत्वम्। अत्र सर्वासु तत्स्थानभूतस्य आद्यस्योच्चत्वम्। इतरयोरनुच्चत्वम्। हिन्वविशीयेताइभ्यामादिः। इति योनौ चेति अस्यायमर्थः। योनौ पञ्चमपर्वणि आद्यस्य वृद्धिः। अत्र सर्वासु ऊनत्वात् चतुर्थपर्वणि आद्यस्य वृद्धिः अन्यत्रावृद्धिः। वसूनि पवमानरुचायां विशीय इति। वसून्याविश इत्यत्र निशब्दात्परं वृद्धात्परौ य्वौलुप्ताविति लोपप्राप्तस्य पुनरलोपविधानम्।।

11.औशनम्- प्रेष्ठँवाः। चतुरक्षरप्रस्तावः। शने थिम् र्तीये। प्र। शने प्रेष्ठंवोजुहोतामिति अत्र उत्तरयोः आजुहोतावत् मध्ये वर्णद्वयस्य नीचविधानम्। शनवार्शयोरिति। अत्र सर्वत्र उद्गीथाद्यस्य नीच-विधानम्। अनूने अत्र प्रथमायां ऊनत्वादनीचम्। कविमिवायां चौशन इति निमर्त्येष्विति। अत्र षुशब्दात्परं वृद्धात्परौ य्वौ लुप्ताविति, लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्। नृङ्पाहीत्यत्र नृ शब्दस्य अनाभाव प्रकरणात् अग्रहणात् नृङ् पाहित्याभावमेव।।

12.सांवर्तम्- ऐन्द्रनोऽ2गधिप्रायां[1]। पादप्रस्तावः। घृतनिधन-सांवर्तयोराद्यायां इति त्सिबायां प्रत्यये अत्र आद्यायां श्वत इत्यत्र त शब्दस्य वृद्धिविधानम्। कर्षणे तु निवर्तेते इत्यादिना अत्र उत्तरयोः कर्षणवृद्धे न भवतः। पृथुस्सांवर्ते इति। अत्र प्रथमायां औहोवायां प्रत्यये थु शब्दात्परस्य विसर्जनीयस्य लोपविधानम्। ओवौकारयो-रित्यादिना थु शब्दस्याभावे प्राप्ते उवर्णन्तु न सर्वत्रा भवतीति अनाभावः। प्रतिस्तोत्रीयं आर्चिकानि निधनानीति अत्र प्रतिस्तोत्रीय निधने प्राप्ते समानोदर्के इत्यादिना अत्र पूर्वयोरुद्धार एव।।

13.मारुतम्- पुरांभिन्दुर्युवाकवीः।। पादप्रस्तावः। मारुते कविः यसीः प्र।।

---

[1] क,ख-1..गधिप्रायाम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

14.अदारसृत्[1]- हा[20]उपवमा[0]ना। पर्वप्रस्तावः। जारेत्यादिना क्रोशौपगवेत्यादिना अत्र सर्वासु उद्गीथादिर्नीचैः। योनावेवोच्चम्। कर्षणेत्यादिना अत्र कर्षणवृद्धे न भवतः।

15.सुरुपोत्तरम्-प[2]वमा[10]नौहोऽ2। पादप्रस्तावः। चतुरक्षरो वा सुरुपाजिगैडसाकमश्वानां चेति। अत्र सर्वासु उपद्रवद्धितीयस्य अवृद्धिः। योनावेववृद्धिः।।

16.हरिश्रीनिधनम्- प[1]वमा[20]नस्यजि[1]घ्नत[2]ः।। पर्वद्वयं प्रस्तावः। द्वादशहरिश्रीयन्ते इति। अयाहरिश्रीरिति, अत्र सर्वासु प्रस्तावाद्युच्चम्। अत्र वृद्धकर्षणे न भवतः।।

17.सैन्धुक्षितम्- प[1]वमा[20]नो[1]-हाइ। चतुरक्षरप्रस्तावः।। सोमसामेत्यादिना। क्षिते च हा शब्दे इति। हकारे परतः पूर्वाक्षरस्य सर्वत्र ओकार विधानम्। योनौ न भवति। सैन्धुक्षिते तिस्रोवाचोत्तमायां अन्त्यः। पवस्वाद्यायां चेति। अत्र सर्वासु गतिः। क्षिते शुभ्रं रायस्सं इति। अत्र सर्वासु प्रस्तावाद्युच्चम्। क्षिते च। अमदाय। अत्र सर्वासूद्गीथादिर्नीचैः। विसर्जनीयाकारौ जीरास्सैन्धुक्षिते इति। जिरा अजिर इत्यत्र विसर्जनीयाकारयोर्लोपः। जी[20]रा[0]जो[3]ऽ234हा[5]इ। ऋगन्तीय स्पर्श इत्यादिना अत्र तृतीयायां मकारस्य न लोपः।।

18.गतनिधनबाभ्रवम्-प[2]वमा[0]नाः। पर्वप्रस्तावः। जारेत्यादिना। बाभ्रवे स्तोत्रे प्र। भ्रवजि पवमानस्य जिघ्नतायामिति वृद्धमन्तःपद इत्यादिना अत्र जीरेति पदमध्यगतस्य जिशब्दस्य हादौ स्तोभे परतः। आभावे प्राप्ते आइभावविधानम्। चन्द्रोबाभ्रे। इति स्तोभे परतः पदगाने प्राप्ते सन्धिगानविधानम्। गतेरेकारभाव प्राप्ताया एकार निवृत्तिरिति। अत्र सर्वासु गतिरेव।।

ग-1.अदारसृक्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

19.इडानांसक्षारः- औहोइहुवाऽ3होइ। पवमानाऽ3स्याऽ3 जिघ्नतः। पादप्रस्तावः। संक्षारे नावी प्र। स्तोभश्च सामाद्यस्सामान्ते यथान्यायम्। अत्र न प्रति स्तोत्रीयं न प्रतिपादं। व्यश्नुहिसंक्षारे। वृद्धात्परौ य्वौ लुप्तौ इति लोपप्राप्तस्य व्यश्नुहीत्यत्र वि शब्दात्परस्य यकारस्यालोपः। सर्वं जनित्रसंक्षाररथिराजेषु। इति अत्र महित्रीणा द्वितीयस्य ह्रस्वस्यापि, संक्षारे वैश्वज्योतिष गोरांगिरसेषु नियान्त इति। अत्र नियान्तभूतस्य अक्षरस्य अवृद्धिः। इडाभिरैडानामिडान्त इति अत्र पूर्वयोरिडान्तैव।।

20.ऋषभःपवमानः-हाहाउपवमाना। पर्वप्रस्तावः। कौल्मलान्धी कावाभीकेत्यादिना अत्र सर्वासु द्वितीयपादस्य उद्गीथाद्यस्य अक्षरस्य उच्चम्। योनावेव नीचम्। मरुत्पवमानोरथीतमायां कूलीयसन्तनिषभे-ष्विति। मरुद्गण इत्यत्र रेफात्परस्य तकारस्य पदान्ते वाचिसर्वमो भवति इति लोपप्राप्ते अनुस्थमिति उकारस्य ओभावात् पूर्वाङ्गप्राप्ते अतिहारः।।इति नवमः।।9।।

* * * *

।।दशमो विंशः।।

1.पृष्ठम्- पराऽ3इतोषिञ्चतासुताम्।। पादप्रस्तावः। पृष्ठे चेति। अत्र सर्वासु उपद्रव द्वितीयस्य वृद्धिः। नोविभिः सुषाव सोमायां सर्वत्रेति। अत्र विश्लेषः। नवमे चाहनि सर्वत्रेति अत्र नर्यशब्दः सङ्कृष्टः। चित्वा नव इति अत्र विश्लेषः।।

2.कौल्मलबर्हिषम्-पराऽ3इतोऽ3षिञ्चतासुताम्। पदप्रस्तावः। कौल्मलान्धीगवेत्यादिना अत्र उद्गीथाद्युच्चम्। योनावेव नीचम्। अत्र नर्यशब्दः सङ्कृष्टः। अत्र तृतीयायामुत्तरमिति। अत्र उकारस्य वाचि सर्वमो भवतीति ओभावे प्राप्ते अनुस्थमिति उकारस्य ओभाव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रतिषेधः। ओवापरायान्त्वोभवतीति पुनरोभावः। कौल्म इष्टासि कृणुषामिति। अस्यायमर्थः। योनावुद्गीथद्वितीयं पर्व मन्द्रादि मन्द्रान्तं। ऊहगीतौ सर्वत्र द्वितीयादि द्वितीयान्तमिति उदूहलक्षणाभावात्। विशेष विधानार्थमिदं सूत्रम्।।

3.अर्कपुष्पाद्यम्- परीतोषिञ्चतासुतम्। सस्तोभपदविभाग्यम्। गोष्ठप्रतोदेत्यादिना अत्र सर्वासु पादादिभूतस्य अक्षरस्य ऋक्स्वरवदुच्चनीचविधानम्। दशेपाण्यक्षराणि सर्वाणि। ऋक्स्वरावबोधेन गेयानि। हरिं हिष्ठीये। वं सङ्कृतियशसोः। ऊ सदोविशीयाष्टेडरूपेषु। षिबमन्तोक्थयोर्वे इत्येवमादीनि प्रस्तावोद्गीथ प्रतिहारोपद्रव निधनेषु ऋक्स्वरविरोधविधानसूत्राणिविमृश्य ऋक्स्वरावबोधेन गेयानि। पूर्वार्कपुष्परयिष्ठयोस्तौभिकं पर्वानुपादम्। सामान्ते सर्वाणीति सर्वे स्तोभाः। अनुपादं स्तोभानामाद्यं पर्व। आर्चिकमकृष्टं सर्वत्रेति। योनिवत्कर्षणमूहगीतौ न भवति। अयोनाविति। योनावेवकर्षणं। नर्यशब्दोऽत्रापि सङ्कृष्टः। नोविभिरित्यादिना अत्र नोशब्दात् परस्य अकारस्य विश्लेषप्राप्ते आष्टादँष्ट्रेत्यादिना अत्र पुनः प्रश्लेषविधानम्। चित्वानव इति अत्र प्रश्लेषः। अभ्यस्तान्ताः पुष्पाद्यरयिष्ठयोरिति अत्र पूर्वयोर्निधनात् पूर्वं आद्यस्तोभस्याभ्यासः।।

4.दैर्घश्रवसम्- परितोषिञ्चतासुतमोहाओहाऽ3एँ।। स्तोभसहित पादप्रस्तावः। एतयोर्दैर्घे चैवमिति। अस्य अयमर्थः। दैर्घश्रवसे पुनापरीतोष्योः पुनानायां प्रथमान्त्ययोः अत्र मध्यमायां उद्गीथादिर्नीचैः। नवमे चाहनि सर्वत्रेति अत्र नर्यशब्दस्य सङ्कृष्टे प्राप्ते दैर्घवर्जमिति। अत्र न। दधन्वानायाँ सर्वत्रेति अस्तोभे सन्धिगाने प्राप्ते पदगानविधानम्। वाचिसर्वमोभवतीति ओभावे प्राप्ते अनुस्थमिति अत्र तृतीयायां उकारस्य ओभावे न भवति। भी रुच, इति वृद्धाद्य सर्वत्रेति अत्र विश्लेषः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5.वैयश्वम्- परीतोषिञ्चतासूता । पादप्रस्तावः। अत्रापि नर्यशब्दस्सङ्कृष्टः।।

6.आभीशवाद्यम्- परीतोषिञ्चतासुताम् ।। पादप्रस्तावः । भीशवेसुते प्र। आभीशवे अभिगीतादिति। सर्वत्र अभिगीतात्परस्य वृद्धिः। अद्रिनो अर्षण्यः। इति अभिगीतात्परस्याक्षरस्य सर्वत्र वृद्धिप्राप्ते अत्र मध्यमायां अभिगीतात्परस्य द्रिशब्दस्य अवृद्धिः। तस्माच्चेति। अत्र सर्वत्राभिगीतात्परात् पदान्तभूतस्य अक्षरस्य वृद्धिः। अविर्यंदंतोरः । इति एवं सर्वत्राभिगीतपरात्परस्य वृद्धिप्राप्ते अत्र प्रथमायां विशब्दस्य उत्तमायां रेफस्य चावृद्धिविधानम्। आभीशवे पुरुणिघृणा इत्यादिना अत्र श्रीणन्त इत्यगतिः। वाचिसर्वमोभवतीति। अत्र सर्वत्र वाचिप्रत्यये पूर्वाक्षरस्य ओभावे प्राप्ते अनुस्थमिति अत्र तृतीयायां उत्तरमित्यत्र उकारस्य ओभावो न भवति।

7.क्रतुवासिष्ठम्- श्रीणन्तोगोऽ2भिरुत्तराम्।। पादप्रस्तावः। अ नवमेहनि। स्वशब्दोऽत्र विकृष्यते। श्री वासिष्ठ उतद्विषा पतिः कवीमिति। अत्र तृतीये पादे योनिदृष्टा उतद्विषा, अत्र पतिः कवीमापद्यते ।आद्यस्य नीचमित्यर्थः।।

8.सामराजम्-हाउहोवाऽ3हाइ। असाविसोमोऽ3आ । सस्तोभ-पदविभाग्यम्। सामराजे षि निमायासि प्र ते सर्वत्रेति अत्र ते शब्दस्य च। वर्णसदस्यवप्रवदुद्धत्सामराजेषु स्पर्शानामलोपो यथा द्युम्नानि । इति आउवा व्यवहितमित्यादिना आभावे प्राप्ते अत्राद्यन्तयोः ऋगन्तभूतयोः तकारमकारयोरनाभावः। अत्रैव तृतीयायामन्त्य-स्सर्वत्रेति त्यशब्दस्सङ्कृष्टः। उगत्यन्ताः। प्रवदुत्सामराजेषु अत्र पूर्वयो स्तोत्रीयान्ते उगतिरेव। स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

20 2
9.श्रायन्तीयम्-श्रायन्तइवसूऽ1रायाम्। पादप्रस्तावः। श्रायन्तीये नदी परिकृष्टं प्रति प्रथमायां प्र। श्रारेभद्रादेवे पुरुदाना। अमृतोग्रहणं । इति अत्र मध्यमायां प्रतिहाराद्यस्य नीचम्। स्वासुनकारश्श्रायन्तीये। इति अत्र तृतीयायां चोदयन्नित्यत्र नकारस्य प्रथमादौ स्तोभे परतः आभावविधानम्।।

1 2 1 0 2 1
10.समन्तम्- यतइन्द्रभयामहाइ। पादप्रस्तावः। मन्तेषोविनो-द्गीथेस्यासि। प्र। मन्ते प्रत्नं इत्यादिनात्र सर्वासु गतिरेव। मन्तेराधाया अन्त्यानि वर्धन्ते। मन्ते च त्रीणि तृतीये इति सूत्रद्धयस्यायमर्थः। ऊहगीतौ सर्वत्र तृतीयपादान्त्ये त्रीण्यक्षराणि वर्धन्त इत्यर्थः। योनौ मध्यममिति। योनौ तृतीयपादान्त्येषु त्रिषु मध्यमस्याक्षरस्य वृद्धिरित्यर्थः। वादौ मन्तेत्यादिना अत्र सर्वासु प्रस्तावाद्युच्चम्। योनौ प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनेषु यानिपर्वाणि ऋक्स्वरोदात्ता-नुदात्तयुक्तानि ऊहगाने सर्वत्र तत्स्थानभूतेषु सर्वासु उच्चनीचप्रकरणे। षिबमन्तदुक्थयोर्वेति। द्रिदँष्ट्रेसधष्टम्भे पेमगौतमे शीये च नकृद्दँहत्। वं सङ्कृति यशसोः । वने च रन्ध्रोत्तरे प्रयघृतवनि। इत्यादिनां ऋक्स्वरापवाद सूत्राण्यालोच्य ऋक्स्वरवत्सामिकः। उदात्ताच्च परमुच्चैर्भवति इति न्यायेन ऋक्स्वराबाधेन गेयम्।।

2 30 4 5 0
11.आश्वसूक्तम्- आऔहोवाहाइ-तुवँसोमा।। चतुरक्षरप्रस्तावः। जारेत्यादिना। काशीतहाविष्कृतयोः त्वं शब्दस्सर्वासु। इति त्वं शब्दोऽत्र सर्वासु विकृष्टः।।

3 4 50 0 0
12.शाम्मदम्- तुवँसोमासिऐ। यान्तप्रस्तावः। यान्तो दाशस्पत्ये-त्यादिना । हयत्वं सोमासि शाम्मदे अत्र प्रथमायां मँहयदित्यत्र यकारात्परस्य पादान्त्यभूतस्य तकारस्य वाचि सर्वमो भवतीति ओवौकारयोरित्यादिना लोपे प्राप्ते अतिहारः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

13.दावसुनिधनम्- तुवँसोऽ23मासिधारयुहाउ[1]।। पादप्रस्तावः। दावसुनिधने त्वँसोमान्त्यस्सर्वासु इति। अत्र सर्वासु अन्त्यस्य अगतिः दावसुनिधन पूर्वनित्रेत्यादिना। अत्र सर्वासु तृतीयपादाद्यस्याक्षरस्य उच्चम्। योनावेवनीचम्। त्सिबायां प्रत्यये अत्र कर्षण वृद्धे न भवतः।।

14.प्रतिचीनेडंकाशीतम्-त्वँसोमासि-धाऽ2रयूः।। पादप्रस्तावः। काशीतेत्राजित् प्र। अस्यपीत्वाकाशीते। इत्यत्र सर्वासु प्रस्तावाद्युच्चम्। काशीतहाविष्कृतयोः त्वं शब्दस्सर्वास्विति। अत्र सर्वासु त्वं शब्दस्सङ्कृष्टः। ऋगन्तीय स्पर्श इत्यादिना अत्र प्रथमायां ऋगन्तभूतस्य नामि विसर्जनीयस्य अनाभावः।।

15.हाविष्कृतम्- त्वँसोमासिधाहाउरायूः ।। पादप्रस्तावः। कृते चापदान्त इति। अत्र मध्यमायां प्रस्तावे हादौ स्तोभे परतः पदमध्यगतस्य ह्रस्वस्य दीर्घविधानम्। अत्र उत्तमायां अद्रिभिरित्यत्र अकारस्य अवग्रहपदान्तस्य दीर्घत्वं, न भवति मदिन्तमदिष्ठ नोगि हाविष्कृते इति। अत्र मध्यमायां पूर्वसूत्रेण दीर्घप्राप्तस्य दिशब्दस्य हादौ स्तोभे परतः आभावविधानम्। कृते थे तुरीयं सर्वत्र। हाविष्कृते उद्गीथचतुर्थमक्षरं वर्धते। ध्वक्षयोरिति। अत्र प्रथमायामुद्गीथे षष्ठभूतस्य अकारस्य वृद्धिविधानम्। हाविष्कृते त्वं सोमाद्यन्तयो-रगतिः। अत्र कर्षणवृद्धे न भवतः।।

16.स्वारँसौपर्णम्-त्वँह्यङ्गदैवाऽ3या।। पादप्रस्तावः।। त्वँह्येत्येतौ शब्दौ सौपर्णे। इति अत्र त्वं ह्येत्येतौ शब्दौ सङ्कृष्टौ। स्वारे पर्णे योनौ इत्यादिना तृतीयायां देवानामिति उद्गीथादिर्नीचैः। तृतीयोच्चान्त्य-मित्यादिना आद्यायामुद्गीथाद्यस्य पर्वणः अन्त्यस्य मकारस्य दीर्घ-

1.क,ख- तुवँसोऽ23मासिधारयुहाउ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधानम्। प्रकृतौ ऋक्स्वरगीतिश्चतुर्विधा। प्रथमद्वितीययोः, द्वितीयतृतीययोः, तृतीयचतुर्थयोः, चतुर्थमन्द्रयोश्च। प्रथमद्वितीययोरुदाहरणं अर्कपुष्पसन्तनिगायत्रपार्श्वादिषु। द्वितीयतृतीययोरुदाहरणं परीतोषीं चतुर्थेषु । तृतीयचतुर्थयोरुदाहरणं परीतिपरित्याकूपारशार्ङ्ग सञ्जययामादिषु। चतुर्थमन्द्रयोरुदाहरणं आष्टादँष्ट्रोद्वँशीय यद्वाहिष्ठीयविलम्बसौपर्णादिषु। एतासु चतुर्षु प्रथमद्वितीययोरेव उदात्ताच्चपरमुच्चैर्भवति। इति उदात्तात्परस्य स्वरितभूतस्य अनुदात्त परतः उच्चत्वं। इतरत्र ऋक्स्वरवत्सामिकः। इति उदात्तानुदात्तमेव। न स्वरितस्य उच्चत्वम्। कुतः फुल्लकारेण षिबमन्तदुक्थयोर्वे। द्रिदँष्ट्रे इत्येवमादिभिः प्रथमद्वितीययोरेव उदात्तात्परस्य स्वरितभूतस्य उच्चत्वं। इतरासु गीतिषु ऋक्स्वरमेव। उदात्तानुदात्तमेवेत्यर्थः। प्रकृतमनुसरामः। त्वँह्यङ्ग प्रथमायां चेति। अमृतत्वयेत्यत्र प्रतिहारात्परस्य त शब्दस्य दीर्घविधानम्। स्वारे च पर्णे योनाविति अत्र सर्वासु उपद्रव द्वितीयस्य अवृद्धिः। योवावेव वृद्धिः।

17.वैश्वमनसम्- प॑वस्वदे॑ववी॑ताऽ3य॑ाइ ।। पादप्रस्तावः । वैश्वमनसे राथीतमासख्यइन्दामिति अस्यायमर्थः। योनावुद्गीथाद्यपर्वणि स्वाय इत्येतौ नीचौ। अत्र सर्वासूद्गीथद्वितीयाक्षरस्य नीचमित्यर्थः। जसावैश्वमनसे इति । अत्र सा इति आकारस्य अत्वं। जास्वरं श्वमनसे च द्विषः। इति अस्यायमर्थः। योनौ प्रतिहारात्पूर्वं आ इति जास्वरमस्ति। अत्र सर्वासु तस्य लोपः। वैश्वमनसेऽत्वात्स्तोभा-र्चिक सन्धेः ग्रहणात्। वैश्वमनसे प्रश्लेषो न भवति। जस आकलश-मिति। असन्धिरित्याह। योऽसौ अकारात्वमादितः सस्तोभ इत्यभिप्रायः।।

18.गौरीवितम्- प॑रि- त्वँहा॑ऽ3- य॑तँहराइम् ।। वाचिसर्वमो भवतीति ओभावे प्राप्तेऽत्र मध्यमायामूकारस्य ओभावो न भवति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

19.निहवः- आइही॒ऽ3 - आइही । सस्तोभपदविभाग्यम्। निहवेरेण सर्वत्रेति प्र। स्तोभानामुद्धारः इति। ऊहगाने सर्वत्र स्तोभानामुद्धारे प्राप्ते सामाद्यस्सामान्ते यथान्यायमिति स्तोभश्च अनुपद (स्तुब्धानि च) आद्यन्तस्तुब्धानि च यानि सामानि सन्ति ऊहे तेषां साम्नामाद्यन्तयोरेव स्तोभ नियमः न प्रतिपाद न प्रतिस्तोत्रीयमित्यर्थः।।

20.यद्वाहिष्ठीयोत्तरम्- परित्यँहर्यतँहरिम्।। वान्तः प्रस्तावः। कावश्चौतकक्षेत्यादिना। हरिँहिष्ठीय इति। अत्र हरिमिति, अत्र रिशब्दस्य स्वरितस्य विरामे अनुच्चप्राप्ते पुनरुच्चविधानम्। हिष्ठीयगवसितेषु सचपवृत् सर्वत्रान्त्यमयोनौ । इति अत्र सर्वासु सप्तमपर्वान्त्यस्याक्षरस्य वृद्धिः। योनौ न भवति। हिष्ठीयासितयोरयमिति।अत्र सर्वासुप्रस्तावाद्युच्चम्।।इति दशमः।10।

* * * *

।।एकादशो विंशः।।

1.आसिताद्यम्-परित्यँहर्यताम्। षडक्षरप्रस्तावः। षट्शङ्कु इत्यादिना। हिष्ठीयगवसितेत्यादिनात्र सर्वासु पञ्चमपादान्त्यस्याक्षरस्य वृद्धिः। सितेयोदेसर्वत्र, मदेनरेसर्वत्र प्र। सिते स्वया तमा पुरु सुतमिति अत्र मध्यमायां प्रस्तावोपान्त्यस्य ऋच्युदात्तस्य पुनरुच्चविधानम्। अन्यत्र प्रस्तावोपान्त्यस्योच्चस्य नीचविधानार्थम्। ओवा परायां त्वो भवतीति। वाचिसर्वमोभवतीति सर्ववर्णानां ओभावे प्राप्ते अनुस्थमिति उस्थस्य प्रतिषेध उक्तः। अत्र मध्यमायां ऊर्मय इत्यत्र ओवापरत्वात् पुनरोभावविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5 2 4 5 4 5
2.साध्रम्- परित्याँऽ3हर्यतंहराइम्।। पादप्रस्तावः। निधने हीषीस्थमिति प्र। क्रौध्यष्टम्भेत्यादिना सर्वासु तृतीयपादादिर्यथर्चम्। सञ्जयेत्यादिनात्र सर्वत्र भेदो नास्ति। कइत् पुरु। इति योनावेव।।

2 1 4 5
3.आकूपारम्- परित्याँऽ23हर्ये। पादप्रस्तावः।।

2Q 2
4.विधर्म- औहोऽ3वा - स्तोभविभाग्यः ।। धर्मणिजन्ति प्र। गोष्ठप्रतोदेत्यादिनात्र सर्वासु पादादि भूतानां वर्णानां ऋक्स्वरवदुच्चनीचम्। धर्मविधर्मणोः पञ्चाक्षरशो निधनानीति विकल्पः।।

1 Q
5.श्रुध्यम्- उपोषुजाऽ2तम्। पादप्रस्तावः। क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादादिर्यथर्चमुच्चनीचम्।।

20 0 Q 1 2
6.ऐध्मवाहम्- आघायेअग्निमिन्धाताइ ।। पादप्रस्तावः। वाहेस्तृणन्ति देवमपान्नमिति अत्र प्रथमायामुद्गीथाद्यस्य नीचविधानम्। वाहेशृङ्गेवत्सायामिति योनावेव प्रतिहारादिर्नीचैः। समानोदर्केत्यादिनात्र पूर्वयोरुद्धारः।।

2 0 0 2
7.त्रैककुभम्- यएकइद्विदायाऽ3ताइ ।। पादप्रस्तावः। त्रैककुभे विवापामी। ककुभेदय त्रैककुभे त्वं सर्व इति अत्र सर्वासूद्गीथाद्युच्चम्। ककुभे च योनाविति योनावेवोद्गीथादिर्वृद्धिः। कौत्सदँष्ट्रेत्यादिना योनावेव तृतीयपादाद्यस्य वृद्धिः। उग्रं कदा नत्वत् ग्रहणात्। इत्यत्र उत्तरयोस्तृतीयपादाद्यस्य नीचविधानम्। वसु च द्वितीयात् त्रैककुभे

1 2 2
इत्यत्र द्वितीयस्वरात्परो वशब्दो वर्धते। वासुमर्तायाऽ3दा इति समानोदर्क इत्यादिना पूर्वयोरुद्धारः।।

10 20 0 0 1 2 1
8.उद्वँशीयम्- गायन्तित्वागायत्रिणआ ।। पादप्रस्तावः। वँशीये मीरे शामी प्र। शीये विव्ययुँक्ष्वेति अत्र अन्त्यायां प्रस्तावाद्यस्य नीचविधिः। अर्चन्त्युद्वँशीयवितयोः। सान्वारुहो वँशीय इति। अत्र त्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न्वा इत्येतौ शब्दौ सङ्कृष्टौ। शीये ब्रह्मायूथे गिरां, इत्यत्र एतेषां पर्वणा-माद्यस्य नीचम्। उद्धँशीये गायन्त्याद्यायां अच्छाहोतारं व्यौ चतुरक्षरशः परयोस्त्र्यक्षरे पञ्चाक्षरे होता द्व्यक्षरेन्यत्र इति। एतेषामयमर्थः। अत्र
2 1 0 0 2 2 2
प्रथमायां ब्रह्माणस्त्वाशताऽ1क्राऽ3ताउ। चतुरक्षरा। अत्र उत्तरयोः पूर्वा त्र्यक्षरा। उत्तरा शतक्रता पञ्चाक्षरे। होता द्व्यक्षरे वँशीये चेति। सर्वत्र उपद्रव द्वितीयस्य वृद्धिः। वृष्णिर्यत्सानो वँशीय इति । वृष्णिरित्यत्र वृशब्दस्य अनाभावः। भूर्यवँशीयलेय वितेष्विति। अत्र र्यशब्दः सङ्कृष्टः। दान्ते यहोध्रिगो स्तावे मिन्दो। इति एतेषां पदान्तभूतानां ओष्ठ्याक्षराणां परिसंख्यानरूपेण प्रकृतिभाव ग्रहणात्। अत्र शतक्रतो इत्यत्र तोशब्दस्याउभावः।।

1 2
9.आजिगम्-उच्चातेजा। पादप्रस्तावः। चतुरक्षरो वा। जिगेतेजा प्रा। वोवित्सर्वत्रेति च। आजिगसुरूपाणां चेति योनावेव उपद्रव द्वितीयस्य वृद्धिः। द्व्यन्तस्थपरे तु लोप इति निशब्दात्परं यकारस्य लोपः। कनीयस्यादितो लोप इति नुषाणमित्यत्र नु शब्दस्य अभिगमनमेव।।

1 0 0 0 4 5
10.आभीकम्- ऊऽ234च्चातेजाऽ5-तमौहोन्धासाः। आभीके ददे प्र। वोवित्सर्वत्रेति च। कौल्मलान्धीगवेत्यादिना अत्र प्रथमाया-मुद्गीथादिर्नीचैः। स्तोभव्यवहिते त्वलोपो यथा इति उच्चान्त्याया-माभीकषूक्तयोरिति। अवृद्धादि पदान्तादित्यादिनात्र तृतीयायां न्यर्य इत्यत्र निशब्दात् परं यकार व्यवधाने प्राप्ते द्व्यन्तस्थ परेतु लोप इति यकारस्य लोपः प्राप्तः। अत्र स्तोभ व्यवहितो पुनरलोपविधानम्।।

4 0 3 40 30 4 50
11.उत्सेधः- पुनानस्सोमधारया। वान्तःप्रस्तावः। कावश्रौत-कक्षेत्यादिना सेधे पुनापरितवामन्तवदिति अत्राद्यन्तयोः प्रस्तावाद्यस्य नीचारम्भः। धारयासेध इति अत्र धाशब्दात्परस्य पादादिभूतस्य अकारस्य पादान्त्यात् परस्वरो विकृष्यत इति। अनेन विश्लेष प्राप्ते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रश्लेषविधानं पुनः। सेधेहाद्धितीये यथर्चं भवति। इति उत्सेधे सर्वत्र द्धितीयहकारे परतः पूर्वाक्षरं ऋगध्ययनवत् ह्रस्वदीर्घमित्यर्थः। सर्वत्र पादतृतीयतुरीयवृद्धमिति। उत्सेधे सर्वत्र तृतीये पादे चतुर्थाक्षरस्य वृद्धिः। अन्त्यस्यावृद्धं, इति चतुर्थपादे चतुर्थमक्षरं सर्वत्रावृद्धमिति। संशयनिराकरणार्थं सूत्रद्धयम्। आपृच्छ्यं सेधेति। ओवौकारयोनन्तर इत्यादिना आभावे प्राप्ते पृच्छ्यमित्यत्र मकारस्यानाभावविधानम्। तृतीयान्यामित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्र आभवतीति ऊध इत्यत्र ऊकारस्यानाभावः।।

12.यज्ञायज्ञीयम्- पुनाऽ5नः (4 3)।। पादप्रस्तावः। ज्ञीये षसिपूर्वं प्र। तत्र ककुभि चतुर्थमिति थमोच्चद्धितीयं ज्ञीये सर्वत्रेति। यज्ञायज्ञीये सर्वत्र प्रथमोच्चद्धितीयस्य कर्षणे प्राप्ते अत्र उत्तरयोः ककुभोः चतुर्थस्याक्षरस्य कर्षणविधानम्। ज्ञीये स्वासु पुनादेव इति। अत्र सर्वासूद्गीथाद्यस्य वृद्धिः। ज्ञीये दान्त्य इति प्रस्तावोपान्त्यस्य वृद्धिः।।

13.निषेधः-पुनानस्सोमाऽ3धारया (2 0 0 20)। पादप्रस्तावः। नीचात्पर इति सूत्रस्य अर्थं वैयश्व प्रसङ्गे पूर्वमेवोक्तम्। अतः इह नोच्यते। नृभिः प्रत्नँसधस्थमित्यादिना अत्र नृशब्दस्य अनार्भावः।।

14.गौरीवितम्- आजा (50 0) - गृवाऽ3इः (3 2) । निकामवितश्रृङ्ग्योरिति निकामाध्वर्यवो इत्यत्र मशब्दात्परयोः विसर्जनीयाकारयोः लोपः। वाचि सर्वमोभवतीति ओभावे प्राप्ते सुहस्त इत्यत्र सुशब्दस्य अनुस्थमिति ओभावो न भवति। विते च पसू प्रधन्वा वर्धनश्चेति अत्र उत्तरयोः प्रस्तावे कृष्टात्परं उपसू वर्धन इति त्रीण्यक्षराण्युदात्तानि। अन्यत्र द्व्यक्षरमिति। आजावितोत्तरयोरेन्द्रयाहिपूर्वयोः पर्यूषु चोपान्त्योच्चा पतिङ्गिरा। पूर्वसूत्रेणोक्तार्थमेव। अद्रिं सवर्धितायां वितशृङ्ग्योरिति। अत्र तृतीयायां अद्रित्येत्र द्रिशब्दात्परस्य पदान्त्यस्य मकारस्य वाचिसर्वमो भवतीति लोपप्राप्ते अतिहारः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

15.मैधातिथम्- मा[20]चिदन्यदो[1]हा[2]इ । चतुरक्षरप्रस्तावः । सोमसामेत्यादिना। मैधे क्था प्रत्यये इत्यगतिः। मैधे च इति ऊहे सर्वत्र हा शब्दे परतः ओभावे प्राप्ते अयोनाविति। योनौ हाशब्दे परतः ओभावो न भवति। माचिदन्योहाइ । इति प्राप्ते मा[20]चिदन्यदो[1]हा[2]इ नोभावः। तकारस्यालोप इत्यर्थः। उभयँस्वासुमैधे। अत्र तृतीयायां उभयमित्यत्र पदान्तस्य मकारस्य आउवाव्यवहितमित्यादिना लोप प्राप्तस्यातिहारः। उभयँस्वासुमैधातिथे इति ओवौकारयोरनन्तर इत्यादिना आभावप्राप्तस्य उवर्णन्तु न सर्वत्राभवतीति पुनरनाभाव प्राप्तस्य अत्र तृतीयायां उभयाविनमित्यत्र मुशब्दस्य पुनराभाव-विधानम्।।

16.अभीवर्तः- उ[5]दू[4]ऽ3त्ये[2]ऽ3मा[4]धुम[5]त्तमो[4]वा[5] । पादप्रस्तावः। वर्तेत्येमधीतं प्र। अतिमधुदस्ममिति । सौभरेति। इत्यादि सूत्रद्वयेन त्रिषु सामसु तुरीयस्य दीर्घाक्षरस्य वृद्धिविधानप्रतिषेधावुक्तौ । अत्र प्रथमायां तुरीयस्य ह्रस्वस्य मकारस्यापिवृद्धिविधानम्।।

17.रोहितकूलीयम्- इ[1]न्द्र[2]मच्छा[1] । चतुरक्षरप्रस्तावः। सोम-सामेत्यादिना रोहितपूर्वे साईस्यचे प्र। इन्द्रमलीये प्र। अत्र प्रथमायामुद्गीथादिर्नीचैः। स्वस्सर्वत्रेति। अत्र प्रथमायां स्वशब्दात्परस्य पदान्तभूतस्य विसर्जनीयस्यातिहारः। मदेष्वाकूलीय इति अत्र ष्वाशब्दस्सङ्कृष्टः। उष्णिक्षु च कूलीये। अत्र सर्वासु प्रस्तावे आजुहोतावत् मध्ये द्व्यक्षरस्य नीचविधानम्।

18.श्यावाश्वम्- प[3]रा[2]ऽ31इ।। वाश्वे नाई गोजि जिये अभि प्र। तरध्यै विते इति। धिया इत्यत्र विकृष्टः। श्यावाश्वे चेति । अत्र प्रस्तावतुरीयस्य दीर्घस्य वृद्धिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

19.आन्धीगवम्- प[20]र्यूषुप्रधाऽ1न्वा[2]वा ।। धीगवे परिनाईमहे अभि प्र। पर्यूषु विशस्त्वाँ त्वंध्याञ्चेति। धीगवे स्ताव षष्ठमिति। सर्वत्र प्रस्तावषष्ठस्य प्रत्युत्क्रामे प्राप्ते अत्र प्रथमायां पञ्चमस्य प्रत्युत्क्रामविधानम्। पर्यूष्वान्धीगवसँस्तोभयोः। राज्येधीगवदेव्ययोः। इति पर्यू,रान्त्ये,इत्येतौ शब्दौ सङ्क्रुष्टौ। रयिंप्रियमभिद्धिता इति। अस्यायमर्थः। वाजमभीत्यत्र भिशब्दस्य निधनान्त्यभूतस्य उदात्तस्य वृधे स्वरे प्राप्ते सम्प्रसारणविधानम्।।

20.सौहविषम्- प[1] । ये[2]पारी ।। पर्वद्वयं प्रस्तावः। अभ्यस्तो द्व्यक्षर इत्यादिना। सौहपर्यभ्यासे प्र। हविषयज्ञाप्रस्वामृतेसु। एतानि पर्वादि भूतानि नीचैः। स्तावे हविष उत्तरयोः प्रथमे इति। अत्र उत्तरयोः प्रस्तावे सर्ववर्णानां विकल्पपक्षे प्रथमस्वरेस्थितिरित्यर्थः। गतेरेकार-भाव प्राप्ताया एकारनिवृत्तिः। अत्र सर्वासु स्तोत्रीयान्त्यभूतस्य गतेः योनिवदेकारे प्राप्ते एकारस्य निषेधः। स्तोभान्त्यस्य गतिरेव । कण्वबृहति चेति कण्वबृहत्येव प्रतिस्तोत्रीयं निधनविधानात्। अत्रपूर्वयोर्नभवति। अत्र प्रथमायां एपारी ति यकारः। अवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तः। अमृतायेत्यत्र अकारस्य विश्लेषप्रकरणे अग्रहणात् ऋग्वत् प्रश्लेष एव सर्वत्र।।इति एकादशः।।

=***********=

1.वाजजित्- सू[20]र्य[10]स्येवा। सस्तोभपदविभाग्यम्। एष एव शब्दस्सूर्यवतीषु। इति अत्र सूर्यशब्दः सङ्क्रुष्टः । उत्तरे स्तोभ इति। अत्र उत्तरे वाजजिति सर्वासु प्रतिपादं वृणीस्वरद्वयमस्ति। स्तोभे परतः उत्तरवृण्यादिभूतस्य ह्रस्वस्य दीर्घविधानम्।।

2.वामदेव्यम्-आ[3]ऽ5ग्निम्। पादप्रस्तावः। देव्येप्रेद्धो प्र। देव्येदीधिति। धीशब्दस्य दीर्घविधानम्। (ऊहे द्वादश) विच्छन्दस्सुच देव्ये।। अस्यायमर्थः । ऊहे द्वादश वामदेव्यानि अधीतानि। विच्छन्दस्सु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नव। सच्छन्दस्सु त्रीणि। अग्निन्नरः पर्यूषु शिशुञ्जज्ञा एदुमधोः कस्तमिन्द्रा, एना प्रत्यु इमाउवा अग्ने विवस्वत्। एतेषु विच्छन्दस्सु चतुर्थं पर्व अन्त्याक्षरात् प्राक् सर्वाण्यक्षराणि उच्चैर्भवति । अन्यत्र कयानश्चित्र कयाते अग्ने, रेवतीर्नः। एतेषु सच्छन्दस्सु चतुर्थं पर्वयोनिवत्स्वरा इति न्यायेन योन्यां यादृक्स्वरं तत्स्वरमेव । विराट् पर्यूषु च देव्ये गीथस्तदादि अस्य सूत्रस्य अयमर्थः। अग्निन्नर पर्यूष्वोः विच्छन्दस्सुच देव्ये। इत्यनेन चतुर्थपर्वणः अन्त्यस्याक्षरस्य नीचत्वं विधीयते। विकल्पपक्षे तदप्युच्चमिति सूत्रार्थः। दूरेदृविराट्सु वामदेव्य इति ओवौकारयोरनन्तर इत्यादिना आभावे प्राप्ते दृशब्दस्य अनार्भावविधानम्। गृकारो हकारे, हकारे परतः गृहपतिमित्यत्र गृशब्दस्यैव आर्भावः। न इतरेषां ऋवर्णानाम् । ऋण्वन् देव्यहदाग्नेययोरिति। इति ऋवर्णे प्राप्तं अर्कारः क्रियते इति। ऋण्वन् इत्यत्र ह्रस्वस्य ऋवर्णस्य अर्कारादेशविधानम्। नाइ अनृ इति स्थिते दीर्घवृद्धोपहित इपदान्तः आइभूतोऽकाराकारयोः प्रत्यययोः सन्धौ यकारमापद्यते । गतिर्विरते इति विरामात्परं यकारापत्तिः। नाइयर्ण्वन् इति। न्यूण्वन् दक्षाय्य इत्येतौ शब्दौ मराय इति ऋण्वन्, य्य, इत्येतौ विकृष्टौ। सनित्यस्सर्वत्र इति अत्र त्यशब्दः सङ्कृष्टः। देव्य आकाराकार-यकाराभ्यास एना तंवो अग्निमिति। अत्र मध्यमायां त्यशब्दात्परं यकाराभ्यासः। सनित्य इत्येतेभ्यः परेभ्यो सश्चदेव्ये । इति अभ्यास यकारस्य ओभावविधानम्। देव्येविष्ठ, ष्ठभ्यासे। इति सूत्रद्वयस्याय-मर्थः। विच्छन्दस्सु च देव्ये, इत्यनेन सूत्रेण तृतीयायां त्वां शब्दात् पूर्वेषां वर्णानां उदात्तत्वं विधीयते। त्वां शब्दात्पूर्वयोः विष्ठशब्दयोः पुनर्नीचविधानम्। विकल्पपक्षे विराडित्यादिना सर्वेषां वर्णानामुच्चत्वे प्राप्ते ष्ठशब्दस्यैव पुनर्नीचविधानम्।।

।।दशरात्रस्समाप्तः।।

******

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सँवत्सरः प्रारभ्यते

।।प्रथमो विंशः।।

5 0 2 4 50
1.आमहीयवम् - वृषापाऽ3वस्वधारया।।

2 0 1 20 10 2 1
2.समन्तम्- पुनानस्सोमधारया ।। वादौमन्ते नीचैः इत्यादिनात्राद्ययोः प्रस्तावाद्यस्य नीचविधानम्। थे पुनानायां प्रान्त्ययोः । इत्याद्यन्तयोः उद्गीथादिर्नीचैः ।दीर्घवृद्धोपहित इत्यादिना नो अर्षसाइ। यारत्ना इति विरामादनन्तरं यकारमापद्यते। सर्वत्र ना अर्षसीत्यादिना यत्रापवाद उक्तः तत्र वक्ष्ये। मकारः कार्तयशमन्तयोरिति। ओवौकारयोरित्यादिना आभावे प्राप्ते मध्यमायां मधुप्रियमित्यत्र मकारस्यनाभावः। मन्ते प्रत्नमित्यत्रागतिः।।

2 2
3.प्लवः- हा-वोऽ3हा। वारानिहोतयोश्चेति अत्र सामान्यमेतत्।।

2 0 0 0 0 2
4.दैर्घश्रवसम्- प्रत्नँसधस्थमासददोहाओहाऽ3ए।। एतयोर्दैर्घे चैवमिति अत्रोद्गीथादिर्नीचैः।।

2 2 2 2 0 1
5.पार्थम्- ओऽ3होऽ3होइ। प्रकाँवियाम्।। पार्थेवक्तितितिसा जूतिंमते प्र। इदं सङ्घातः त्रिष्टुप्सु पार्थवाराहवासिष्ठ कुत्सस्याधिरथीयादिषु। इत्यनेन पार्थे सर्वत्र इदं सङ्घाते प्राप्ते अक्षरे द्वे पार्थे, पादादौ सर्वत्र द्वे द्वे अक्षरे नीचे भवतः। पार्थे तु वृण्याद्ये हीषौं प्रकृतौ ऊहे द्वितीयमिति। अक्षरे द्वे पार्थे इत्यस्य सूत्रस्यानुवादः। नार्थान्तरमस्ति। वकः । इति अस्यायमर्थः। त्रिष्टुभिचोतायामित्यादिभिरुता द्वितीयचतुर्थयोः दीर्घाक्षरयोः वृध्यपवादावुक्तौ। तत्स्थानभूतानां ह्रस्वाक्षराणां ह्रस्वत्वे प्राप्तेऽत्र प्रथमायां पावक इत्यत्र वशब्दस्य ह्रस्वस्यापि वृद्धिविधानं। पाशब्दः प्रकाव्यायामित्यादिनात्र पावक इत्यत्र पाशब्दस्यात्वविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

50 4 2 4 5 4 5
6.अभीवर्तः-माचाऽ3इदाऽ3न्यद्विशँसतोवा।। गांवर्ते । इति अत्र मध्यमायां गान्नचर्षणीसहमित्यत्र गां शब्दस्य योनिवन्नीचे प्राप्ते उच्चविधानम्।।

2 0 1 2
7.जराबोधीयम्-यस्तेमदोवा ।। बोधीये स्थाभिः प्र। गीथोपान्त्य-मित्यादिनात्र सर्वासूद्गीथोपान्त्यस्य वृद्धिः। बोधीये सर्वमिति अत्र मध्यमायां ह्रस्वस्यापि प्रत्युत्क्रामविधानम्। ये च तृतीयाद्वेष्णा-तृतीयमिति अत्र सर्वासु चतुर्थपर्वणि तृतीयस्याक्षरस्योच्चम्।।

2
8.सुज्ञानम्- इन्द्रमच्छा।। सुज्ञानेनिधनमेकिने स्वरमिति। अस्यायमर्थः।। योनौ एकारस्यावृद्धिः। पाशब्दस्य नीचत्वम्। ऊहे सर्वत्र एकारस्य वृद्धिः। उपाशब्दस्योच्चत्वम्। एकारान्तास्सुज्ञाने इति। स्तौभिकानि सामान्तिकानि सामान्ते सर्वत्र इति। सामान्ते प्राप्ते अत्र पूर्वयोर्निधनैकदेशस्य नियमः। एकारान्ता इति। मदेष्वाकूलीय इति ष्वाशब्दोऽ विकृष्टः।।

4 30 4 50
9.तृतीयं क्रौञ्चम्-पुरोजिता।। पुरोजित्यस्मिन् शब्दे गतिर्भवति। इत्यत्र प्रथमायां गतिः। अयः पुरः क्रौञ्चे इति। अत्राद्यायां प्रस्तावादि नीचैः । जितियोदी । अत्र आद्ययोः प्रस्तावेतिशब्द दिशब्दयोरवृद्धयो -रपि हादौस्तोभेपरतः आभावविधानम्। क्रौध्यष्टम्भे इत्यादिना अत्र सर्वासु तृतीयपादादिभूतस्याक्षरस्य ऋक्स्वरवदुच्च नीचविधानम्। तृतीयोच्चान्त्यमित्यादिना तृतीयायां श्वशब्दस्य हादौ स्तोभे परतः दीर्घविधानम्।।

1
10.कावम्- प्रोवा। कावेभिधेन प्र। कावरथन्तरयोस्सर्वत्रेति सर्वत्र प्रस्तावाद्यस्य नीचे प्राप्ते अप्रोस्वो इति अत्र प्रथमायां प्रस्तावा-द्यस्योच्चम्। प्रो अयास्यां सप्तममिति कावेगीथषष्ठं सर्वत्रेति उद्गीथ-षष्ठस्य सर्वत्र वृद्धिप्राप्ते अत्र प्रथमायां सप्तमस्य वृद्धिविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

11.सत्रासाहीयम्- अ॒ग्ना॒ऽ34इम् ।। साहीयेनप्त्रे प्र। साहीये शता द्वितीयं सङ्कर्षादिति योनौ सर्वत्रासाहीये त्यमुव इत्यत्र त्य शब्दस्सङ्कृष्टत्वात् द्वितीयस्वरारम्भः। तथासर्वत्र स न्याय इति ऊहे सर्वत्र वर्णद्वयसद्भावेऽपि द्वितीयस्वरारम्भः। केचिद्वर्णद्वयसद्भावे शतावत् तृतीयारम्भ एवेति मन्यन्ते। मन्द्रश्चतुर्थमिति द्वितीयपर्वणि सर्वाण्यक्षराणि चतुर्थस्वरे भवन्ति इत्यर्थः।।

12.आश्वम्- प्रसोमासोऽ2विपश्चिताः। श्वेमहि प्र। आकूहविष इत्यादिनात्राद्ययोरुद्गीथादिर्नीचैः। इकारः प्रसोमाश्वे महिषा इत्यत्र इकारलोपः।।

13.पञ्रम्- प्रसोऽ4म।। जारान्तः प्रस्तावः। जारान्त इत्यादिना नवपूर्व पञ्रेत्यादिनात्र सर्वासु तृतीये पादे द्वितीयस्य वृद्धिः। योनावेव वृद्धिः। इवप्रीचप्रञ्ररन्ध्रपूर्वस्त्रौग्मतेष्विति। अत्र सर्वासु तृतीयपादे द्वितीयपर्वण्याद्यस्याक्षरस्या वृद्धिः। नयोनाविति। योनावेववृद्धिः।।

14.अभीवर्तः- तँवोऽ3दाऽ3स्मामृतीषहोवा। वर्तेभिर्न प्र। अतिमधुदस्ममिति। सौभराभीवर्तेत्यादिना तुरीयस्य दीर्घस्य वृद्धिविधानम्।।

15.सुज्ञानम्-पवतेहा।। सुज्ञाने निधनमेकिने स्वरमित्यत्रार्थं पूर्वोक्तम्।।

16.काशीतम्-पवतेहा।। पर्वप्रस्तावः। निर्विकारम्।।

17.गौरीवितम्- प्रसु-न्वानाऽ3-यअन्धसाः।। जारः प्रसुन्वान द्वितीयायां विते इति अस्तोभे सन्धिगाने पदगानविधानम्।।

18.औष्णिहमोकोनिधनम्-आजाऽ3मिरत्केअव्यता।। पाद-प्रस्तावः। दावसुनिधनेत्यादिनात्र तृतीयपादाद्युच्चम्। योनावेवनीचम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्साइबायामुपद्रव इति अत्र कर्षणवृद्धे न भवतः।।

1 20 0 1
19.औदलम्-सर्वारोदा।।दले त्रे सर्वत्र विवृत्तमकारप्रत्ययमिति प्र।।

5 2 40 5 4 5
20.साध्रम्- प्रसुन्वाऽ3नायअन्धसाः।। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादादिर्यथर्चमुच्चनीचम्। न भृ प्रसुन्वानायामित्यादिना भृ शब्दस्यात्र नाभावः।। इति प्रथमः।।1।।

==*==

।।द्वितीयो विंशः।।

20 0 0 0
1.हाविष्मतम्- हाउवृषापवस्वधारयाहाउ। पादप्रस्तावः।। हिन्वेष्मते प्र। ण्योस्तन्त्वाधर्तायां हाविष्मतसन्तनिनोः इति अत्र ण्योशब्दस्सङ्कृष्टः। नन्दायात्सिब्यकर्षणमिति अत्र कर्षणवृद्धे न भवतः।।

2 0 0 1 2
2.यौक्ताश्वोत्तरम्- वृषाऔहोहोहाइ।। द्व्यक्षरप्रस्तावः। यौक्तयोः स्वधाप्रत्यय इत्यगतिः। इलान्दवन्तीययौक्तेष्वौकार इति ओकारे परतः ह्रस्वस्य दीर्घविधानम्। नस्वे प्रत्यये इति,अस्यायमर्थः। स्वस्सर्वत्रेति स्वरित्यत्र स्वशब्दात्परस्य सर्वत्रातिहारे प्राप्ते स्वशब्दे प्रत्यये अत्रातिहारप्राप्तस्य विसर्जनीयस्य लोपः। यौक्तेचोत्तर इति लोपाधिकारे ग्रहणात् अनेन अपि लोपः। सर्वमवृद्धमित्यादिना सर्वासु आभावः। अत्र सर्वासूद्गीथद्वितीयस्य वृद्धकर्षणं पूर्वे यौक्ताश्वे तृतीयस्य।।

3 4050 0
3.माधुच्छन्दसम्- पारीतोषा[1]।। हविर्दच्छन्दसे प्र। षि परीतायाम्माधुच्छन्दस इति। षि शब्दस्यावृद्धस्य हादौ स्तोभे परतः आभावविधानम्। माधुच्छन्दस उपस्वसरं त्वयाभूषन्ति इत्यादिनात्र सुषावसो इत्यगतिः । क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादादिः

34050 0
1. ग- परीतोषा।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यथर्चमुच्चनीचम्। सुषावसो छन्दसद्वैगतयोरिति ओवौकारयोर नन्तर इत्यादिना आभावे प्राप्ते सुषावसो इत्यत्र सो शब्दस्यानाभावः।।

4.ऐडमायास्यम्- आइपराइ ।। नोविभिस्सुषावसोमायां सर्वत्रेति। अत्र विश्लेषः, आयास्ये तु प्रश्लेषः। चित्वाप्सुमदा इत्यत्र त्वाशब्दात्परस्य ऋचि प्रश्लिष्टस्य अकारस्य वृद्धाच्च सर्वत्रेति वृद्धात् त्वाशब्दात् परं सर्वत्र विश्लेषे प्राप्ते अत्र पुनः प्रश्लेषविधानम्। नर्यः परीतायामित्यादिनात्र र्यशब्दस्सङ्कृष्टः। अगतिः स्तोभस्य स्वरे प्रत्यये सन्धौ इति अत्र तृतीयायां प्रस्तावादौ अगतिः। आ, आदा इति। दधन्वाँ यस्सर्वत्रेति अस्तोभे सन्धिगाने प्राप्ते अत्र विधानम्।।

5.त्रिणिधनमायास्यम्- श्रीणन्तोगोभिरुहाउहोवा।। त्रिणिधनायास्ये इति अत्र प्रस्तावे हादौ स्तोभे परतः पूर्वस्य पादमध्यगतस्य रु शब्दस्य दीर्घविधानम्। आयास्यान्धान्तोऽसंयोगे इति प्राह्वां घं ह्वं चासंयोग इति सूत्रद्वयेनापि अत्र उद्गीथद्वितीयस्य संयोगपरत्वादवृद्धिः। त्रिणिधनायास्ये स्वान इति अत्र स्वशब्दस्य योनिवदुच्चप्राप्ते नीचविधानम्। क्रतुः परीताध्यास्यायामायस्ये । इति क्रतुरित्यत्र क्रतुशब्दात्परस्य विसर्जनीयस्य औहोवायां प्रत्यये लोपविधानम्। तृतीयादिन्यामौहोवायामित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अत्र तु शब्दस्यानाभावः।।

6.पार्थम्- औऽ3होऽ3होइ। वृषाशोणो ।। यानिसिष्ठे तानिपार्थे। प्र। स्तोभश्च सामाद्यः। अक्षरे द्वे पार्थे । पदान्ते काम्प, त्रिष्टुभिचोतायामित्यादि सामान्यमेव। अत्र विशेषो नास्ति।।

7.अभीवर्तः- अभाऽ3इप्राऽ3वस्सुराधसोवा।। वर्ते ह्रस्वे स्तावेणे। प्र। तृकारस्तु न सर्वेषुस्पर्शेष्वार्भवतीत्यादिना तृशब्दस्यानार्भावः। सौभराभीवर्तेत्यादिनात्र तुरीयस्य दीर्घस्य वृद्धिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

8.शङ्कु- पवस्वमा[1 2 10]।। शङ्कुनिमहि। प्र। शङ्कुन्यस्यप्येष सर्वः। इति अत्रास्येति नीचारम्भः। एकारे च नित्यं दीर्घत्वं शङ्कुनीति। शङ्कुन्येकारे, इति सूत्रद्वयेनापि अत्र एकारे परतः पूर्वस्य ह्रस्वस्य दीर्घविधानम्। मदशब्दः प्रथमस्वरः पवस्वशङ्कु द्वितीयायामिति अःकारोवृद्ध इत्यादिनात्र मध्यमायां पदगाने प्राप्ते मदो इति सन्धिगानविधानम्। स्वः सर्वत्रेति अत्र मध्यमायां स्वर्विद इत्य स्वशब्दात्परस्य पदान्तस्य वाचिसर्वमोभवतीति लोपप्राप्तस्य विसर्जनीयस्यातिहारः।।

9.गौरीवितम्- अयम्[5]- पूषा[30 2]ऽ3।। श्रवाय्यमित्यत्र द्वियकारस्य सङ्कृष्टग्रहणे अग्रहणात् विकृष्टमेव अत्रापि।।

10.उक्थामहीयवम्- अभ्रातृ[5 0 2]ऽ3व्योअनातुवाम्[40 50] ।। पीयन्त्य-भ्रातृव्यद्वितीयायामामहीयव इति यकारे च प्रत्यये इत्यादिना आभावे प्राप्ते पदमध्यगतस्य पिशब्दस्याइ भावविधानम्।।

11.आष्टादँष्ट्रोत्तरम्- इन्द्रंविश्वाअवीवृधन्त्रेयादौ[1 2 1 20 0 1 20 10] ।। दँष्ट्रे पतिंद्वे प्र। दँष्ट्रे चेति सर्वत्र प्रस्तावाद्यस्य नीचे प्राप्ते अनिन्द्रं तवात्वारं पर्यां प्रान्त्ययोरिति। अत्र प्रथमायां प्रस्तावाद्युच्चम्। गोष्ठप्रतोदेत्यादिनात्र सर्वसु पादादिः यथर्चमुच्चनीचम्। त्वामभिदँष्ट्रोत्तरे, इति अत्र त्वां शब्दः सङ्कृष्टः। धाउत्तरे दँष्ट्रे, इति। कौत्सदँष्ट्रेत्यादिना च। अत्र प्रथमायां रथीतमित्यत्र थी शब्दस्य वृद्धिः। अन्यत्र न भवति। अन्यत्र वृद्धिरित्यर्थः। नविदस्यन्त्यूतय इति अत्र त्यू शब्दस्य सङ्कृष्टग्रहणे अग्रहणात्। अत्र विकृष्टमेव।।

12.वैरूपम्- उच्चाते[2 10]ऽ234जा[5]।। रूपे तेजा प्र। सना द्वितीयं वैरूपे। इति सनइन्द्रायेत्यत्र न शब्दस्य वृद्धिविधानम्। वादिर्गीथादि-र्धनादिश्चरूपे इति। प्रस्तावोद्गीथनिधनेषु आदिभूतस्याक्षरस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीचविधानम्। सर्वत्र अव्यभिचारार्थमिदं सूत्रम्। अवृद्धादि पदान्तादित्यादिना व्यवधाने प्राप्ते द्व्यन्तस्थ परे तु लोप इति निशब्दात्परस्य यकारस्य लोपः।।

13.रौरवम्- अभिसोमासाऽ3आयाऽ234वाः।। मद्यद्विहिङ्कार हार इत्यादिनात्र मद्यशब्दस्सङ्कृष्टः। ऋगन्त इत्यादिनात्रोत्तरयो ऋगन्त-भूतस्य तकारस्यनाभावः।।

14.अग्नेस्त्रिणिधनम्[1]- प्रहिन्वानाः।। अग्नेस्त्रिणिधनेभिर्ये। प्र। ऋतमाउवा व्यवहितमित्यादिनात्र ऋतमित्यत्र मकारस्य पादान्तस्य लोपप्राप्तस्यातिहारः। ओष्ठ्यश्चान्तःपदिकोनाउ भवति सर्वत्रेति समुद्रीय इत्यत्र मु शब्दस्यनाभावः।।

15.अभीवर्तः- आत्वाऽ3साऽ3हस्रमाशतोवा।। सौभराभीवर्ते-त्यादिनात्र मध्यमायां तुरीयस्य दीर्घस्य वृद्धिः। पिबात्वस्यवर्ताभि निधनयोरिति पिबात्वस्य गिर्वण इत्यत्र तु शब्दात्परं व्यवधानप्राप्तस्य वकारस्य वृद्धात्परौ य्वौ लुप्ताविति लोप प्राप्ते अलोपविधानम्।।

16.क्षुल्लकवैष्टम्भम्- तिस्रोऽ5वा। येष्ठौहेतेष्ठम्भे प्र। क्षुष्टम्भे स्वादिष्ठाद्ययोरन्त्य इत्यत्र सर्वासु गतिः। शिशुं तिस्रोवाचायां सर्वत्रेति। ओवौकारयोरनन्तर इत्यादिना सर्वत्राभावे प्राप्ते उवर्णन्तु न सर्वत्रा भवतीति पुनरनाभाव उक्तः। पुनर्ग्रहणादाभवतीति प्रकरणेऽत्र दिव शिशुमित्यत्र शुशब्दस्य पुनराभावविधानम्। तिस्रोवाचायामिति विशेषग्रहणात्। अत्र शौक्तादिषु न भवति। उवर्णन्तु न सर्वत्राभवतीति अनाभाव एव।।

17.वाचस्साम- आसोतापा[2]।। वाचस्साम्न्यासोप्रियं देवाय-विकोशमिति। अत्र आसोप्रियं देवायेति अगतिः । चस्साम्नि च

ग-1. त्रिणिधनमाग्नेयम् ।।ख-2. आसोतापा ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयमिति अत्रोद्गीथ तृतीयस्य सर्वत्र निहतमिति। न वृद्धे इत्यस्यायमर्थः। अत्र मध्यमायां उद्गीथ चतुर्थस्य धारं वाचस्साम्नीति धाशब्दस्य वृद्धिः। वृद्धिभूत धाशब्दे परतः पूर्वस्य तृतीयस्य नीचत्वं न भवतीति स्रशब्दस्योच्चमित्यर्थः। वाचस्साम्निस्वासूत्तमायां तृतीय-पादादौ च दक्षसोतद्विषामिति अत्र तृतीयायां तृतीयपादादौ योनिदृष्टा च दक्षसा उतद्विषामापद्यत इति। च दक्षसो तद्विषयोर्भेद एतावत्। च दक्षसारुपं, प्रथमस्य वृद्धिः, द्वितीयस्याभिगीतिः, तृतीयस्य वृद्धिः, चतुर्थस्य कर्षणम्, उतद्विषा प्रथमस्यावृद्धिः। द्वितीयस्य वृद्धिः, तृतीयस्य प्रत्युत्क्रामः, चतुर्थस्य कर्षणमिति। जातोवाचस्साम्नि प्रियंदेवायामिति। अस्तोभे सन्धिगाने प्राप्ते पदगानविधानम्। वह्निस्तावे इति प्रकृतिभावविधानात् अत्र सर्वत्र हादौ स्तोभे परतः वृधापर्वान्त्यस्य वृद्धिरेव।।

2 0
18.सुज्ञानम्-सखायआ।। ओवौकारयोरित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्रेति भूशब्दस्यानाभाव इति। सुज्ञाने निधनमेकिने स्वरमिति पूर्वमेवोक्तम्।।

3 2
19.दैवोदासम्- सखाऽ31।। दासे समी प्र। द्वितीयात् कृष्टं तालव्यमित्यादिना श्रिये। इति ये शब्दस्य तालव्यस्य आभावः।

2 0 0 2
20.आन्धीगवम्- सुतासोमधुमाऽ1त्तामाः।। धीगवे वे पूर्वमिति प्र। अत्र सर्वासु निधनभूतवर्णानि ऋक्स्वरवद्गेयानि।। इति द्वितीयः।।2

==**==

।। तृतीयो विंशः।।

2 0 1 2
1.सामराजम्- पवीहोवा ।। वान्तः प्रस्तावः कावश्रौतकक्षे-त्यादिना। सामराजे सइत् वन्ति पवि धिरो मीरे प्र। सामराजे च पवि राजेस्तावात् गेष्णादिरवृद्धः। अत्र न भवति। अवन्त्यस्य सामराजे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति। अवन्त्यस्येत्यत्र तिशब्दात्परं व्यवधानप्राप्तस्य वृद्धात्परौ य्वौ लुप्ताविति लोपप्राप्ते अत्र यकारस्य लोपविधानम्। सामराजे पवित्रायामनाकृष्टः, इति अत्र सर्वासु अकृष्ट होशब्दस्यागतिः। संपवित्रायां सामराज इति। वहन्तस्समित्यत्र पदान्तभूतस्य मकारस्यात्रातिहारः। प्रकरश्निकारो इति अत्र शकारे परतः पृशब्दस्यैवाभीवः। नेतरेषामृवर्णानां । सर्वं जनित्रसंक्षाररथि राजेष्विति अत्र प्रथमायाम्महित्रीणा द्वितीयस्य ह्रस्वस्यापि दीर्घविधानम्।।

2.अदारसृत्- हा^{20}उपवस्वदा।। क्रोशौपगवेत्यादिनात्र सर्वासूद्गीथादिः नीचैः। योनावुच्चम्। त्साइबायामुपद्रव इति अत्र कर्षणवृद्धे न भवतः।।

3.पुश्नि[1]- एकर्चम्। प^{2}रा^{1}इतोऽ23षि^{4}ञ्चता^{0}सुतँहा^{5}उ।। पृश्निनिज्येष्ठ-मित्यादिनात्र सुषावसो अगतिः। अत्रोद्गीथाद्युच्चम्। लं विस्मिन्नित्या-दिनात्र विशब्दस्य ऋक्स्वरे उदात्तस्य पुनरुच्चविधानम्। अत्रोदात्तस्य पुनरुच्चविधानात् अन्यत्रोद्गीथाद्य पर्वान्त्यभूतस्योच्चस्य पुनरुच्च-विधानार्थम्। नर्यः परीतायामित्यादिनात्र नर्य शब्दो विकृष्टः। पृश्निन्यपादादिर्भात्। इति अत्र स्तोभात् परस्य नर्यशब्दस्य वृद्धिः। पृश्नितृतीयपादान्त्य इत्यादीनां सूत्राणां अर्थं योराजायामुक्तम्। अत इह नोक्तम्।।

4.आभीशवोत्तरम्- प^{2}री^{0}तो^{0}षिञ्चता^{0}सुतम्-ए-ए।। भीशवे सुते प्र। आभीशवे पुरूणि इत्यादिना श्रीणन्त इत्यगतिः। सञ्जयाभीशवेत्यादिना योनौ पर्वद्वयं प्रस्तावः। अन्यत्र एकं पर्वैव। भीशवेऽभिगीतादित्यादि पूर्वाभीशवे उक्तम्। अत इह नोच्यते।।

1-भरद्वाजस्य पृश्नि।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5.यौधाजयम्- श्री[30]णा[2]ऽ31- सौभरामहीयवेत्यादिना अत्र तुरीयस्य दीर्घाक्षरस्य वृद्धिः। अभरादियौधाजये सर्वमिति। अत्र गोभिरुत्तरमित्यत्र उशब्दस्य प्रस्तावषष्ठस्य वृद्धिः। परीताध्यास्यायां चेति अत्र स्वशब्दस्सङ्कृष्टः।।

6.वासिष्ठम्[1]- उहु[3]वा[2]इ - अ[3]स्या[2]ऽ34औ[30]हो[40]वा[5] ।। सस्तोभपद-विभाग्यम्। पूर्वेष्ठ उहुवाइ। इति अस्यायमर्थः।। अ[3]स्या[2]ऽ34औ[30]हो[40]वा[5]- उहुवाइ। अ[3]स्या[2]ऽ34औ[30]हो[40]वा[5] । हाइ - उहुवाइ - दे[30]वा[2]ऽ34औ[30]हो[40]वा[5] । हा[2]उ-होइ - सु[3]ता[2]ऽ34औ[30]हो[40]वा[5]। हा[2]- हाऔ[0]होइ - मि[3]ता[2]ऽ34औ[30]हो[40]वा[5] । इति पवमानसामानि। प्रतीकोपादानेनाधीतानि प्रकृतौ, ऊहे तेषां द्वितीय तृतीय षष्ठान्यधीतानि। ऊहे अधीतानां प्रथमे वासिष्ठे उहुवाइ शब्दो नीचः। न द्वितीय इत्यर्थः। द्वितीये द्वितीयारम्भ इव। उहुवाइ सिष्ठे हेमभिस्संपर्येति रेमन्ति क्षैतः। इति प्र। त्रिष्टुभिचोतायामिति वृद्धिः। पदान्ते काम्पा पदादौ च दीर्घे इति। पदान्तस्य पदादिभूतस्य दीर्घस्य च काम्पायां प्राप्तायां, नजागृविरित्यादिनात्र मध्यमायां जागृविरित्यत्र काम्पा प्रतिषेधः। तृतीयादिन्यामित्यादिना पदान्तानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अत्र तृतीयायामुशब्दस्यानाभावः । सा नौ शब्दश्च सर्वत्राकारे इति अत्र प्रथमाया मकारे परतः पूर्वस्य नौशब्दस्योभावः। मिते चेत्यत्रापदान्त्यस्य इकारस्याभावः। मधौ मतौ तस्थौ योनौ चेति पदमध्यवर्तिनां पदान्तानामुस्थसंज्ञिकानामौकाराणां प्रकृतिभावग्रहणात् अत्र मध्यमायान्देववीताविवत्यत्र तौ शब्दस्याउभावः।।

7.अभीवर्तः- यो[50]रा[4]ऽ3जा[2]ऽ3च[4]र्ष[50]णी[4]नो[5]वा।। सौभराभीवर्ते-त्यादिनात्र तृतीयायां तुरीयस्य दीर्घत्वात् वृद्धिः। वर्ते च तृतीयं विश्वसां

1-पूर्ववासिष्ठम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विश्वास्ते। इति अभीवर्ते सर्वत्र तृतीयपादे तुरीयस्य कर्षणप्राप्ते अत्र प्रथमायां तृतीयस्य कर्षणविधानम्।।

8.और्णायवाद्यम्- परिप्रियादिवःकार्वीः।। पूर्व और्णायवे कविश्शुचिर्येचोत्तरे। प्र। यवाख्ययोर्हितान्त इति। अस्यायमर्थः। त्रिपदा प्रभृतीनां च। प्रताशेषमाहेति निदनवचनात् ऋक्संहितायामवधान भूतस्य नप्त्योर्हित इत्यत्र तश्शब्दस्य ऊहगाने वृद्धिविधानम्। प्रकृतावववृद्धिरेव। नप्त्योरौर्णायवयोरिति प्त्यो शब्दस्सङ्क्रुष्टः। और्णायवयोस्त्वो भवतीति और्णायवयो रो भवति यकारे। इति सूत्रद्वयेनापि अत्र यकारे परतः सर्वासु ओभावविधानम्।।

9.सुज्ञानम्-सोमःपुना।। त्साइबायामुपद्रवे इति अत्र कर्षणवृद्धे न भवतः। योनावेव कर्षणवृद्धिः।।

10.ऊर्ध्वेडं त्वाष्ट्रीसाम- पुरोजितीवोअन्धसाः। शुद्धीये भिद्धे गिरिं पुरोजि प्र। त्वाष्ट्रयोश्च सर्वे। इति अत्राद्यायां प्रस्तावादिर्नीचैः। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादादिर्यथर्चमुच्चनीचम्।।

11.लौशाद्यम्- प्रोअयासीत्।। पदविभाग्यम्। लौशेनाति प्र। लौशयोः पूर्वे वारवन्ता तुविशुष्मामिति। प्रोअयासीत् इति प्रकृतौ वारे ऊहे तुविशुष्मामापद्यते इत्यर्थः। त्रिकद्रुके तुविशुष्मा। संवरणेषु प्रवोधियायां प्रवल्लौशसारथ्यपामीवास्विति। अत्र मध्यमायां संवरणेषु इत्यत्र षुशब्दात्परस्य व्यवधानप्राप्तस्य वशब्दस्य वृद्धात्पर इत्यादिना लोपप्राप्ते अलोपविधानम्।।

12.शुद्धाशुद्धीयम्- एतोन्विन्द्रँस्तवाऽ3मा । पादप्रस्तावः। शुद्धीये धेनशीर्वान् गहिरयिम्मद्धिरयिम्। प्र। इडाभिरैडानामिडान्त इति पूर्वयोनिधनैकदेश नियमः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 2
13.सन्तनि- अर्षाहाउ।। अच्छिद्राङ्गोरूपे इत्यादिना अत्र सर्वागति प्राप्ते न तालव्यात् परमतिहारमेक इति अत्र वने इत्यत्र ने शब्दस्य विष्णव इत्यत्र विशब्दस्य एतयोः परं गतिर्भवति। गोष्ठप्रतोदेत्यादिना अत्र पादादिः यथर्चमुच्चनीचम्। वनेष्वर्षासोमाया -मित्यादिना वृद्धात्परौ य्वौ लुप्ताविति लोपप्राप्तस्य वकारस्यालोपः।।

1 2 1 0 0 2 0 1 2 1
14.मानवोत्तरम्- होवाइ - अभिसोमासआयवः- होवाइ ।। नवेमन्द्राभिमत्ससुषा इति। अत्राद्ययोः प्रस्तावाद्यस्य नीचैः। नवेगीथादिः इति सर्वासूद्गीथाद्यस्य वृद्धिः। अयोनौ। मद्यं द्विहिङ्कारेत्यादिनामद्यशब्दस्सङ्कृष्टः। अन्यत्र शुर्मदायाः पूर्वस्याउवान्त्यं नीचमिति। अस्यायं अर्थः। अत्र सर्वासु तृतीयपादे तृतीयस्याक्षरस्य योनिवदुच्चप्राप्ते नीचविधानम्।।

1 2 1 2
15.आनूपंवाध्र्यश्वम्- अभीअभी । ध्र्यश्वेऽभि प्र। ध्र्यश्वत्वाष्ट्री-साम्नोश्च दक्षसा पतिःकवीमिति। अत्र सर्वासु योनिदृष्टा च दक्षसा पतिः कवीमापद्यते।।

4 3 0 40 5 0
16.वाम्रम्-अभीसोमासआ।।वाम्रेष्ट प्र। म्रेभि सोमाद्यस्यान्त्यम्। अत्राद्यायां स्तोत्रीयायां आद्यस्य पादस्यान्त्यमक्षरं दीर्घविधानम्। वाम्रेऽभिशसो द्वे। इति अत्राद्ययोः प्रस्तावादिर्नीचैः। वाम्रे होइ स्तोभस्योत्तरस्यागतिः, इति। वाम्रे सर्वत्र होइस्तोभस्योत्तरस्यागतिः। अभिसोमाद्यायामाद्यः स्तोभस्सगति प्राप्तो लुप्तगतिर्भवति। अत्राद्यायां पूर्वस्तोभस्याप्यगतिरित्यर्थः। न वाम्रे स्पर्शान्तं व्यञ्जेति। तृतीयोच्चान्त्यमित्यादिनात्र सर्वत्राद्यपर्वान्त्यस्य ह्रस्वस्य हादौ स्तोभे परतः दीर्घप्राप्त आद्यपर्वान्त्यभूतयोः तालव्यस्पर्शान्त्ययोः ह्रस्वयोः अदीर्घविधानम्। अत्रोत्तमायां स्पर्शान्त्यत्वात् ह्रस्वमेव। ऊर्मिणा वाम्र मैधातिथयोरिति, अस्य अयमर्थः। अत्र मध्यमायामूर्मिणेत्यत्र

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऊकारस्य आउवा व्यवहितमित्यादिना आभावप्राप्तस्य ओष्ठ्यश्चे-त्यादिना नाभावप्राप्तस्य पादमध्यगतस्य ओष्ठ्यसंज्ञकस्य पुनराभाव-विधानम्। त्साइबायामुपद्रवे इति अत्र कर्षणवृद्धे न भवतः।।

2 1 र 2 3Q 2 1 र 2 2
17.सम्पा-ओऽ3हाइ-ओऽ3हा-ओहा-इयाऽ2-ओऽ3हाऽ3ए।। सस्तोभपदविभाग्यम्। सम्पायां वाणीर्वारि नानि व्यूतिश्चीने रन्धी प्र। स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति सर्वत्र सामादौ सामान्ते च स्तोभः। न प्रतिस्तोत्रीयं न प्रतिपादम्।।

5 4 2 4 50 4 5
18.अभीवर्तः- तुवाऽ3माऽ3इन्द्रयशाअसोवा।। सौभराभीवर्ते-त्यादिनात्र सर्वासु तुरीयस्य ह्रस्वत्वादवृद्धिः। न प्रती निवर्त इति। प्रतीन्येक इत्यत्र निशब्दात्परं अवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य लोपविधानम्। वर्ते चेकाराभ्यासादिति। अत्र तृतीयायान्त इन्द इत्यत्र इकाराभ्यासः। हँस्यभीवर्त इति अत्र स्यशब्दः सङ्कृष्टः।।

1 0 2 1 0
19.गौषूक्तम्- असाव्यँशुमौं।। पादप्रस्तावः। गौषूक्तेर्यआ इति अत्र सर्वासु गतिः। षूक्तेशुभ्रमुच्चैनाया इति। अत्र मध्यमायां प्रस्तावाद्यस्य नीचः। थे षूक्ते द्वेसाव्याम्। इति अत्राद्ययोरुद्गीथाद्यस्य नीचविधानम्। असाव्यँशुस्सर्वत्रेति अत्र व्यशब्दः सङ्कृष्टः। षूक्ते चेति अत्र सर्वासु तृतीयपादाद्यस्य ऋक्स्वरवदुच्चनीचविधानम्। आयेभावश्च नेदानीं इति। गतेरेकारभाव प्राप्ताया एकारनिवृत्तिरिति। सूत्रद्वयेनापि ऊहे सर्वत्र स्तोभान्त्यभूतस्य गतेराये भावो न भवति। सर्वत्र आये भावो योनावेव।।

20 0
20.सुज्ञानम्- प्राणाशिशूः।। ते सर्वत्रेत्यादिना ते शब्दस्य द्विातासुज्ञाने इति। अत्र प्रथमायां द्विता इत्यत्र ताशब्दस्य अत्वविधानम्। पाष्योः क्रोशे। इति षोशब्दोऽत्र विकृष्टः। पृष्ठे सुज्ञाने

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति पृष्ठेष्वित्यत्र षुशब्दात्परं व्यवधानप्राप्तस्य वृद्धात्पर इत्यादिना लोपप्राप्तस्य वशब्दस्य पुनरलोपविधानम्। नन्दायात्सिब्यकर्षण-मित्यत्र कर्षणवृद्धे न भवतः योनावेव। एकारान्ता इत्यादि निधननियमः पूर्वमेवोक्तः। अत इह नोच्यते। इति तृतीयः।।3।।

*

।। चतुर्थो विंशः।।

1.दैवोदासम्- प्राणा(30 2)ऽ31-पदविभाग्यम्। दासे त्रीणि प्र।।

2.रयिष्ठम्- पवस्ववा (2)। रयिष्ठेर्मणि,पूर्वं प्र। पूर्वार्कपुष्परयिष्ठयोः स्तौभिकं पर्वानुपादं सामान्ते सर्वाणि। आर्चिकमकृष्टं सर्वत्र अयोनौ। अभ्यस्तान्तः पुष्पाद्यरयिष्ठयोः अच्छिद्ररयिष्ठयोश्च। एतेषां षण्णां अभीनोवायां उक्तार्थमेव नात्रार्थान्तरमस्ति। अत्रापि तृतीयपादे सर्वासु प्रतिहारात्परस्य अक्षरस्य कनीयस्यादितो लोप इति आदौ तु प्त्वा योनिवत्कर्षणमेव। न पूर्वोत्तरपादवत्। सुतउद्रियर्षिभिर्धयन्निति। अस्यायमर्थः। अत्राद्यायां द्वितीयपादान्त्यभूतस्य तशब्दस्य उदात्तस्य अन्तोदात्तं वृधेस्वरमिति वृधे स्वरे प्राप्ते न्यायादपेत प्रकरणे ग्रहणात् सम्प्रसारणविधानम्। त्वाँ स्त्विंद्याञ्चेत्यादिनात्र विकृष्टौ त्वां त्वं शब्दौ। जभ्रिसर्वत्रेति प्र। त्वनाद्ययुं श्रियेतिर्भाइति। अष्टेडरयिष्ठयोर्हित्वँ-न्दादिभिस्वरेति। सूत्रद्वयेनायमेव निर्वाहः। त्वना इत्यत्र निधनभूत-पर्वान्तभूतस्योदात्तस्य नाशब्दस्यात्र न्यायादपेतपक्षे सम्प्रसारणम्। विकल्पपक्षे वृधे स्वरमेवेति।।

3.द्विरभ्यासं लौशम् - असाविसोमोअरुषोवृषा (3 40 30 40 30 4 50) ।। पदविभाग्यम्। असाविमान्त्ये इति अत्रोत्तरयोः प्रस्तावादिर्नीचैः। द्व्यभ्या लौशे राजे प्र। उत्तरे चतुर्थोच्चं द्वितीयमिति। अस्यायमर्थः। योनावुत्तरेषु त्रिषु पादेषु यानि चतुर्थोच्चानि पर्वाणि तानि सर्वाण्यूह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गाने द्वितीयस्वरमेवेति। अत्येष्यवद्व्यभ्या लौशो इति अत्र ष्यत्ये इत्येतौ सङ्कृष्टौ। अत्रैव तृतीयायामत्य सर्वत्रेति। त्यशब्दोऽत्र सङ्कृष्टः।।

4

4.साध्यम्-याँऽ5जि।। पादप्रस्तावः। साध्ये श्रेष्ठ प्र। आकूहविषे-त्यादिनात्राद्ययोरुद्गीथादिर्नीचैः।।

2 30 4 5 0 0

5.आश्वसूक्तम्-आऔहोवाहाइ। इन्द्रायेन्दाउ।। चतुरक्षरप्रस्तावः। जारेत्यादिना द्व्यन्तस्थ परे तु लोपः। इति अत्र मध्यमायां सन्त्वामृजन्तीत्यत्र तिशब्दात्परं अवृद्धादित्यादिना व्यवधानप्राप्तस्य यकारस्य लोपः। नन्दायात्सिब्यकर्षणमिति अत्र कर्षणवृद्धे न भवतः।।

2 1 0 2 1 2 1

6.समन्तम्- मृज्यमानस्सुहस्तिया ।। मन्तेवारे प्र। वादौ मन्तेत्यादिनात्र प्रथमायां प्रस्तावादिः नीचैः। सुहस्त्यारन्ध्रोत्तरे इत्यादिनात्र त्यशब्दो विकृष्टः। मन्ते प्रत्नमित्यादिनात्र पवमानगोभि-रित्येतावगतौ। मकारः कार्तयशमन्तयोरिति ओवौकारयोरित्यादिनात्र आभावे प्राप्ते अत्राद्यन्तयोः पुरुस्पृहं निष्कृतमित्येतयोर्मकारयो-रनाभावः। अचिक्रमृज्यमानायां रन्ध्रोत्तरवाजजिन्मन्तेषु वृद्धमन्तः पदे तालव्यमित्यादिना अचि इत्यत्र चिशब्दस्य हादौ स्तोभे प्रत्यये परतः आभावे प्राप्ते आइभावविधानम्। यतइन्द्रायामुक्तम् । अत इह नोच्यते।।

2 0 0 0 1 2

7.त्रिणिधनमायास्यम्- मृज्यमानस्सुहाहाउहोवा ।। त्रिणिधने चायास्ये इति। अस्यायमर्थः। ऊहे सर्वत्र प्रस्तावे हादौ स्तोभे परतः पदमध्यगतस्य ह्रस्वस्य दीर्घविधानम्। अत्रोत्तमायां दत् शब्दस्य पदान्तत्वात् ह्रस्वमेव। वृषो चायास्ये इति तृतीयादिन्यामित्यादिना पदान्तभूतानां वर्णानामाभावे प्राप्ते अत्र मध्यमायां षो शब्दस्यानाभावः। वृषो अचिक्रायां च त्रिणिधनायास्ये । इति अत्र तृतीयायां नो अर्षसीत्यत्र नो शब्दस्यात्वविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

10 20 30 2 1 3 2 20 1
8. वासिष्ठम्- औहोवाहा३होइ - इहा - साकमुक्षो[1]।। सिष्ठेनुत्रीर्नक्षे धन्वेस्त्रियाभिस्सचते सुमेणन्ति। प्र। पदान्ते काम्पा। एकं सिष्ठे। त्रिष्टुभिचोतायामिति सामान्यमेवात्रापवादो नास्ति।।

5 4 2 4 5 4 5
9. अभीवर्तः - पिबा३सू३तस्यरसिनोवा ।। वर्तेदिये प्र। सौभराभीवर्तेत्यादिनात्र सर्वासु तुरीयस्य ह्रस्वत्वादवृद्धिः।।

2 0 1
10. ऐध्मवाहम्- परिसुवाइहा। चतुरक्षरप्रस्तावः। सोमसामेत्यादिना तकारः परिस्वानायां ऐध्मवाहे, इति ओवौकारयोरित्यादिना आभावे प्राप्ते अत्राद्यायां अक्षरादित्यत्र तकारस्यनाभावः। त्वं कविर्द्धितीये दन्वते। इत्यत्र विकृष्टः। समानोदर्क इत्यादिनात्र पूर्वयोरुद्धारः।।

2
11.सुज्ञानम्- तँवस्सखा।। अत्रापि कर्षणवृद्धे न भवतः। सुज्ञाने निधनमेकिनो स्वरमिति पूर्वमेवोक्तम्।।

2
12.काशीतम्-तँवस्सखा।।

1
13.मरुतांधेनु-त्रा२३४इः।।पादप्रस्तावः। मरुतांधेनुनि मनियदि नुषी प्र। मरुतांधेनुनि सर्वे इत्यगतिः। कौल्मलान्धीगवेत्यादिनात्राद्यायां उद्गीथादिः नीचैः।। मरुतां च चत्वारि इति। अत्राद्यायां चत्वारि शब्दो नीचादिः। केतवस्वासु मरुतामिति। केतवो स्वासु मरुतां इत्यत्र वशब्दात्परस्य प्रश्लिष्टस्य पादमध्यभूतस्या (गतस्य) कारस्य विश्लेषविधानम्। मृत्यवोमरुतामिति मृत्यव इत्यत्र मृशब्दस्यावृद्धस्याभार्वविधानम्। मरुतामिन्द्रं स्वासूत्तमायामिति। स्वासुमरुतां धेनुनि उत्तमायां प्रस्तावे इन्द्रामापद्यते । इन्द्रायसोमसुषुतः परिस्रव द्वितीयो मध्यमायां चतुर्थस्वरे एकमक्षरं कृष्यत इति विशेषः।।

102030 2 1 3 2 20 1
1.ख- औहो वाहा३होइ - इहा - सा कमुक्षो ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5 4 2 4 50 4 5
14.अभीवर्तः- प्रसोऽ3माऽ3देववीतयोवा।। वर्तेदेवगृविः सर्वत्र प्र।एकर्चम्।।

5 4 2 4 5 4 5
15.अभीवर्तः- उत्सोऽ3देऽ3वोहिरण्ययोवा ।। उत्सोदेवः।प्र।

5 2 4 5 4 0 5
16.कालेयम्- प्रत्नँसाऽ3धस्थमासदात्।। लेये यस्याच्छोत्तरयोः परिप्रत्नयां च। इति अस्यायमर्थः। कालेये सर्वत्र तृतीयपादे तृतीयं पर्व चतुर्थस्वरारम्भः। एवं सर्वत्र प्राप्ते यस्याच्छोत्तरयोः परीतोष्यां प्रत्नँसधस्थायां च एतेषु षट्सु तृतीयारम्भ इति अतः अत्र धरुणमित्यत्र रुशब्दस्य तृतीयारम्भः।।

5 4 2 4 50 4 5
17.अभीवर्तः- अभाऽ3इसोऽ3मासआयवोवा।।

5 2 40 5 4 5
18.कालेयम्- मत्सराऽ3सोमदच्युताः।।

5 4 2 4 50 4 5
19.अभीवर्तः- पराऽ3इधाऽ3इँरातिताइहोवा ।। अतिमधुदस्ममिति सौभराभीवर्तेत्यादिनात्र सर्वत्र तुरीयस्य दीर्घाक्षरस्य वृद्धिप्राप्ते अत्रातीत्यत्र अकारस्य ह्रस्वस्यापि वृद्धिविधानम्।।

5 0 2 4 5 40 5
20.कालेयम्- दुहान्नोऽ3बभ्रऊधनाइ।। अतिसूर्यमित्यादिनात्र र्यं शब्दोऽत्र विकृष्टः ।।इति चतुर्थः।।4।।

* *

।।पञ्चमो विंशः।।

20 1 20 1
1.जनित्रम्- हाउजनत् - सोमःपवा ।। सस्तोभपदविभाग्यम्।। हाउनित्रे वते तीनान्दवीः कवी ति मनी राणि प्र। स्तोभश्च सामाद्यस्सामान्ते यथा न्यायमिति। अत्र सामादौ सामान्ते च। सर्वस्तोभानां प्रवृत्तिः। न प्रतिपादं न प्रतिस्तोत्रीयम्। रहस्येतूद्धार इति। रहस्ये सर्वस्तोभानामुद्धारः। ऊहे सर्वत्र सामादौ सामान्ते च सर्वस्तोभानामुद्धार एव। न चेत्समान इत्यादि ब्राह्मणवचनेनात्र

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थोच्चपर्वणामुदूहो न भवति। नित्रे चेति वासिष्ठवत् पादादौ सर्वत्र एकाक्षरस्य नीच प्राप्ते जनितेति द्वे। अत्राद्यायां उत्तरेषु पादेषु आदौ द्व्यक्षरं नीचविधानम्। पदान्ते काम्पा, त्रिष्टुभिचेत्यादिनां सामान्यमेवात्रापवादो नास्ति।

3 2 30 5
2.लौशाद्यम्- प्रतआश्वि ।। लौशे यन्ति प्र। येत्वामृजन्ति लौशशैखण्डिनयोरिति। अवृद्धादि पदान्तादित्यादिना अत्राद्यायां मृजन्तीत्यत्र तिशब्दात्परं व्यवधानप्राप्तस्य यकारस्य लोपः। लौशयोः पूर्वे वारावन्तातुविशुष्मामिति । प्रोअयासीदिति प्रकृतौ वारा। ऊहे तुविशुष्मामापद्यते, इत्यर्थः।

5 4 2 4 50 4 5
3.अभीवर्तः- मन्द्राऽ3याऽ3यातिधारयोवा।।

50 0 2 40 5 4 5
4.कालेयम्- सोमोदूऽ3ग्धाभिरक्षाः।।

2 1 न 2 30 2 1 न 2 2
5.सम्पा- ओऽ3हाइ - ओऽ3 हा- ओहा - इयाऽ2 - ओऽ3हाऽ3ए

2 1 0
।। इन्दुर्वाजी।। सम्पायां वाजीरातिं तानि वते वान्त्सो रसेर्मणी प्र। पदान्ते काम्पा इत्यादिना सर्वासु पादमध्ये पदान्तस्य पदादिभूतस्य दीर्घाक्षरस्य काम्पाप्राप्ते न जागृविरित्यादिनात्र मध्यमायां देवोदेवस्येत्यत्र स्यशब्दस्य पदान्तस्य वृधन्ताविधानम्। स्तोभश्च सामाद्य इत्यादि।।

5 3 2 2 2
6.त्वाष्ट्रीसाम[1]- पव - स्ववाऽ3 - हाऽ3हा ।। पदविभाग्यम्। त्वाष्ट्रीसाम्नोश्च सर्वे इति सर्वत्रागति प्राप्ते न हरिं वत्सेत्यादिनात्र हरिः पवित्रे, वत्सं जातन्न पवमान विधर्मणि, पवमान महित्वना, एतेषु पदेषु अन्यत्र नेत्यर्थः।त्वाँ रित्वन्द्याञ्चेत्यादिनात्र त्वां शब्द त्वं शब्दौ विकृष्टौ । त्वाँ रिहन्तीत्यत्र च त्वाष्ट्री साम्नीति, अस्यायमर्थः। वृद्धमन्तः पदेत्यादिना पदमध्यवर्तिनां तालव्याक्षराणां हादौस्तोभेपरतः आभावे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राप्ते अत्र मध्यमायां पवित्रे इत्यत्र विशब्दस्य पदमध्यगतस्य हादौ स्तोभे आइभावविधानम्।।

40 3 4   3 4 5

7.द्विरभ्यासंलौशम् - गोविंत्पवस्ववसुविद्भिर। लौशे गोविच्छ्येनवत् इति, अस्यायमर्थः। अत्र श्येनवत् आद्यन्तयोः प्रस्तावाद्यस्य नीचविधानम्। ष्वर्पितो लौशे इति। अत्र ष्वशब्दस्सङ्क्रुष्टः। उत्तरे चतुर्थोच्च द्वितीयमिति। अस्यायमर्थः। योनौ यानि पर्वाणि उत्तरेषु पादेषु चतुर्थोच्चानि अत्र तानि सर्वाणि उद्गीथे द्वितीयस्वरे इति।।

5 4   2   4   5 4 5

8.अभीवर्तः-पवांऽ3माऽ3नाभिर्यर्षसोवां।।

5 0 2   4 5 4   5

9.कालेयम्- वृषोआऽ3चिक्रदद्धनाइ।।

10 20 30 2   1   3 2   2 10

10.वासिष्ठम्- औहोवाहाऽ3होइ - इहा - अयापवा ।। सिष्ठे न ए स्नेह श्नौष्टे च यानि प्र। पदान्ते काम्पा इत्यादिनात्र सर्वासु पदान्तस्य पदादौ च दीर्घस्य च काम्पायां प्राप्तायां न जागृविर्देवस्येत्यादिनात्राद्यायां चिशब्दस्य मध्यमायां क्वशब्दस्य पदान्तस्य वृधन्तैव।।

1   5 4 5   0 4 50

11.मरुतांधेनु-ज्योऽ234-तिर्यज्ञस्यपवतेमधौ।। मरुतामिन्द्रि प्र। मरुतां धेनौ सर्वे, इत्यगतिः। अभिक्रन्दायां धेनुवरुणयोरिति। वृद्धमृवर्णं सर्वमित्यादिनार्भावे प्राप्ते अत्र मध्यमायां मर्मृशब्दस्य अनार्भावविधानम्। स्वायुधोऽग्रे सिन्धूनां मरुतां धेनौ इति । अत्र तृतीयायां स्वायुध इत्यत्र स्वशब्दात् परस्य व्यवधानप्राप्तस्य वशब्दस्य वृद्धात्परौ य्वौ लुप्ताविति लोप प्राप्ते अलोपविधानम्।।

3 2

12.सत्रासाहीयम्- उच्चाऽ34।। साहीये शताद्द्वितीयमित्यादि पूर्वमेवोक्तम्। अत इह नोच्यते। नर्यस्साहीयेत्यादिना अत्र नर्यशब्दस्सङ्क्रुष्टः।।

1.द्विरभ्यासं त्वाष्ट्रीसाम ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

13.अभीवर्तः- पुनाऽ3नाऽ3स्सोमधारयोवा।। वर्तेदेवस्तावे प्र। सौभराभीवर्तेत्यादिनात्राद्यायां तुरीयस्य दीर्घस्य वृद्धिः। दीर्घवृद्धेत्यादिनात्राद्यायां वसानो अर्षसीत्यत्र सिशब्दात्परमकारे परतो विरामो भवति। विरामत्वादाइभूत इकारात्परं व्यवधाने प्राप्ते नो अर्षसि पुनानायां यथा गौङ्गवाभीवर्तयोरिति अत्राद्यायां इकारात्परं व्यवधानप्राप्तस्य यकारस्य लोपः।।

14.पार्थम्- ओऽ3होऽ3होइ- अभिवायूम्। पार्थेयुंवीधिरजरथे सूनिर्षेयं प्र। अभीन्द्रमभिवायुमित्यत्र पार्थे, इति अत्राद्यायां अभीन्द्रमित्यत्र ऋचि प्रश्लिष्टस्य इकारस्य विश्लेषविधानम्।।

15.मधुश्चुन्निधनम्- पुरोजितीवोअन्धसाऽ3ए।। मधुनिधनेन्त्य-वर्जं इत्यगतिः। यित्नवे पुरोजित्यत्राद्यायां मादयित्नवे इत्यत्र हादौ स्तोभे परतः पदान्त्यस्य वे शब्दस्याभावविधानम्।।

16.यज्ञायज्ञीयम्- पुरोऽ5जि।। ज्ञीयत्नवे प्र। जिह्व्यं न कृत्व्यश्च ज्ञीयस्योद्गीथे, इति अस्यायमर्थः। अत्रोद्गीथे सङ्कृष्टौ। ज्ञीये स्यन्दते इति । अत्र तेशब्दस्य हादौ स्तोभे परतः आभावविधानम्। पदान्तस्य आद्यायामन्यत्रेति आद्यायामुद्गीथाद्यस्य वृद्धिः।।

17.बृहदाग्नेयम्- पुरोजितीवोअन्धसः[1] - ईयइयाहाइ ।। बृहादाग्नेयेन्त्य इत्यत्र सर्वास्वन्त्यस्तोभस्यागतिः । आग्नेये पुरोज्यग्निमित्यत्राद्यायां प्रस्तावाद्यस्य नीचविधिः। अवकया इति प्रहूयसामित्यादिना प्रहूयस्य(साय) द्वितीयस्या संयोगाक्षरपरतः सर्वस्य वृद्धि प्राप्ते अत्र मध्यमायां पावक इत्यत्र अवशब्दस्यासंयोगे वृद्धिप्राप्ते अवृद्धिविधानम् । यज्ञायसन्तु सर्वत्रेति । अत्र तृतीयायां

1. ख-पुरोजितीवोअन्धसः ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्त्वित्यत्र तु शब्दात्परं व्यवधानप्राप्तस्य वृद्धात्परौ य्वौ लुप्ताविति लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्।।

5 2 40 5 40 5
18.गौङ्गवम्-अभिसोऽ3मासआयवाः।। गवे तृतीये गौङ्गवे सर्वत्र तृतीयपादादिभूतस्य नीचप्राप्ते नतरदर्षेति अत्र उत्तरयोः तृतीयपादादेः उच्चविधानम्। गवतृतीयदशमं कृष्टं सर्वत्रेति विकल्पपक्षे सर्वत्रतृतीयपादादेव दशमस्याक्षरस्य कर्षणविधानम्।।

3 2 2 4
19.यौधाजयम्- प्रहाऽ31इ - न्वाऽ3नः ।।

40 3
20.क्षुल्लकवैष्टम्भम्-स्वादाऽ5इष्ठ।। क्षुष्टम्भे स्वादिष्ठद्ययोरन्त्य इति अत्राद्ययोरन्त्यस्तोभस्यागतिः। अत्रापि कर्षणवृद्धे न भवतः। कनीयस्यादितो लोप इति। अत्रोत्तमायां लोपः।। इति पञ्चमः।।5।।

* * *

।।षष्ठो विंशः।।

50 0 3 2 30 4 5
1.गौतमम्-आजामिरत्केअव्यता।। सरद्गौतमे इति सरदित्यत्र तकारस्य ओवौकारयोरित्यादिना लोपप्राप्ते अतिहारः।।

4 4 5
2.ऐडंकावम्-एंऽ5- अभिप्रियाऽ2।। ऐडंकावेधि प्र। ओकारान्तः पदिको ग्रहणादाभवत्येकार हकारयोः प्रत्यययोः । कावयामवाम्रसोम सामस्विति। अत्र मध्यमायामधिरोचनमित्यत्र रोशब्दस्य पदमध्यगतस्य एकारे परत आभावविधानम्।।

1 20 10 2 10 2 1
3.समन्तम्- परीतोषिञ्चतासुताम् । मन्ते प्रत्नमित्यादिनात्र सुषावसो अदब्ध इत्येतावगतौ। वादौ मन्तेनीचैरित्यादिनात्र सुषावसो नीचारम्भः। षिबमन्तदुक्थयोर्वे, इत्यादिनात्र प्रथमायां प्रस्तावे ऋक्स्वरितभूतस्य उदात्ताच्चपरं उच्चैर्भवतीति। उच्चप्राप्तस्य षशब्दस्य परं नीचविधानम्। नर्यः परीतायामित्यादिना र्यशब्दोऽत्र विकृष्टः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नोविभिस्सुषावसोमायां सर्वत्रेति अत्र विश्लेषः। वृद्धाच्चसर्वत्रेति अत्र तृतीयायां त्वाशब्दात् परस्याक्षरस्य विश्लेषः।

1 0 2 1
4.आसिताद्यम्-यओजिष्ठस्तमा।। सितेरयिं प्र। हिष्ठीयासितयो-रयमिति अत्र प्रस्तावाद्युच्चम्। सितेस्वयातमापुरुसुतम्। अत्र प्रथमपर्वणि योनिवदन्त्याक्षरस्योच्चप्राप्ते उपान्त्यस्य वृद्धिविधानम्। द्वियकारसंयुक्तेत्यादिना श्रवाय्यमित्यत्र व्यञ्जनभूतस्य वृद्धस्य पूर्वयकारस्य आकारविधानम्।।

2 0 1
5.ऐडंयामम्- वृषामातीऽ23।। ऐडंयामे मतीसखी प्र। पूर्व्यो वृषामती द्वितीयायां ज्ञीये इति यश्शब्दोऽत्र सङ्कृष्टः।।

5 4 2 4 50 4 5
6.अभीवर्तः-वयाऽ3ङ्काऽ3त्वासुतावतोवा।। वर्तेस्वब्दीकण्वे प्र।।

1 0 20
7.सँहितम्- तिस्रोवाचउत्।। सँहिते हरिः प्र। सँह्यदाभ्यस्तिस्र-श्चेति उत्तरयोः प्रस्तावादिर्नीचैः। शिशुं तिस्रो हिते इति निधने हीषीस्थँ सर्वत्रेति शिशब्दस्य प्रकृतिभावे प्राप्ते आइभावविधानम्। सँहिते त्वा भवतीति कनि तिस्रोवाचायां सैन्धुक्षितौशनयोरिति कनिक्रददित्यत्र निशब्दस्य हादौ स्तोभे परतः आइभावप्राप्तस्य आभावविधानात् अत्रापि हादौ स्तोभे आइभावे प्राप्ते आभावविधानम्।।

1 2 2
8.स्वारंत्वाष्ट्रीसाम- सहस्रधाऽ3हा।। त्वाष्ट्रीसाम्नोश्च सर्वे इति सर्वस्तोभानामगति प्राप्ते हरिं वत्स इत्यादिनात्र सोमस्पतिस्सखेन्द्रस्ये-त्येतयोर्गतिः। सोमस्पतिप्रत्ययेत्यादिना अत्र स्पतिरित्यत्र तिशब्दस्य विसर्जनीयस्य स्तोभे परतः लोपविधानम्। दिवे त्वाष्ट्रीसाम्नो-स्सहस्रधारायामिति वृद्धमन्तः पदे तालव्यमित्यादिना हादौ स्तोभे परतः पदमध्यगतस्य तालव्यस्याभावे प्राप्ते। अत्र दिवे इत्यत्र वेशब्दस्य पदान्तस्याप्याभावविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

9.सत्रासाहीयम्- अस्या$^{3\ 2}$ऽ34।। साहीये शताद्वितीयमित्यादिनात्रापि सामान्यम्। अस्यप्रत्नायां अयँसूर्यस्सर्वत्रेति। अत्र सूर्यशब्दस्सङ्कृष्टः।।

10.उत्सेधः- तवाहँसोमरारण।। (3 40 3 40 5 0) सेधेपुनापरितवामन्तवत्। इति अत्रोत्तरयोः प्रस्तावादिर्नीचैः। पर उत्सेधे दुहानायां । इति पर इत्यत्र रः कारस्यात्वं। इवोत्सेधे दुहानायां इति। शकुनाइवेत्यत्र इकारस्यात्व विधानम्। सर्वत्रपादतृतीय तुरीयं वृद्धं। अन्यस्य चावृद्धमित्यभिव्यभिचारार्थम्।।

11.पृश्नि[1]-दुहानोऽ23बभ्रऊधनिहाउ[2]। (2 1 4 0 5) पृश्निनिज्येष्ठमित्यादिनात्र घृणाशब्दस्यागतिः। पृश्निन्येकर्चे, इति अत्रोद्गीथादिर्नीचैः। पृश्निनि तृतीयपादान्ते च दक्षसेत्यादिनामर्थमात्रापि समानम्। इवदुहानायापृश्निमन्तयोरिति। वृद्धमन्तःपदे तालव्यमित्यादिना शकुना इवेत्यत्र इशब्दस्य हादौ स्तोभे परतः आभावे प्राप्ते आइभावविधानम्।।

12.पार्थम्- औऽ3होऽ3होइ-शिशुंजज्ञा।। (2 2 2 1) पार्थेणेनतिदवीःकवि प्र। अयतीं युधातेदे इति त्रिष्टुभिचोतायामित्यादिना ऊतद्वितीय चतुर्थस्य दीर्घाक्षरस्य वृद्धिप्राप्ते अत्र तृतीयायां आयुधानीत्यत्र धाशब्दस्य वृद्धिः।।

13.सफम्- अभिद्यूऽ3म्नम्बृ।। (2 1 2 4 5) सफेदे प्र।।

14.श्रुध्यम्- प्राणाशिशूऽ2र्म (10 0) ।। क्रौध्यष्टम्भेत्यादिना तृतीयपादादिर्यथर्चमुच्चनीचम्। पाष्योः क्रोशे इति अत्र विकृष्टः।।

15.निषेधः-इन्दुरश्वोनाऽ3कृत्वियाः।। (2 0 2)

1.ग- भरद्वाजस्यपृश्नि।।ख-2. दुहानोऽ23बभ्रऊधनिहाउ ।। (2 1 4 50)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

16.कावम्- धर्[2]तो[1]वा ।। कावेदभ्रेमाही प्र। स्वःकावाभिक्रन्दयोः स्वशब्दस्सङ्कृष्टः। धर्तायां ज्ञीयकावाभिक्रन्देष्विति। अत्राद्यायां नृभिरित्यत्र नृशब्दस्यानार्भावः। धर्तायां कावावासिष्ठाभिक्रन्दार्केष्विति नदीष्वित्यत्र षुशब्दात्परस्य व्यवधानस्य वृद्धात्पर इत्यादिना लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्। जठरेषूद्धत्काववासिष्ठाभिक्रन्दार्केष्विति। उपदान्ताच्च वकारो विकर्षे सर्वत्रेति व्यवधानप्राप्तस्य जठरेष्वित्यत्र षुशब्दात्परस्य वकारस्य लोपः।।

17.महावैष्टम्भम्-इ[1]न्द्र[2]क्र[1]तोहाइ । ष्टम्भे मनि सर्वत्र प्र। वैष्टम्भे वयमित्यादिनात्र सर्वस्तोभानां गतिरेव। ष्टम्भे वयं प्रत्नँ राय आसुता इत्यत्र सर्वत्र प्रस्तावादिरुच्चैः। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादादिः यथर्चमुच्चनीचम्। क्रमुरिन्द्रक्रतुमित्यत्र ष्टम्भश्यैतनित्रेष्विति मध्यमायां अवक्रमुरित्यत्र मुशब्दात्परस्य विसर्जनीयस्य औहोवायां प्रत्यये लोपविधानम्। उवर्णन्तु न सर्वत्राभवतीति । ओवौकारयोरनन्तर इत्यादिना आभावे प्राप्ते अक्रमुरित्यत्र उकारस्य अनाभावः। माशिवासस्सर्वत्रेति । प्रकृत्यान्तः पादमव्यपर इति पाणिनीयसूत्रेण प्रश्लिष्टभूतस्य अवक्रमुरित्यत्र अकारस्य सर्व विश्लेषविधानम्। वाचि सर्वमोभवतीति सर्ववर्णानामोभावे प्राप्ते अनुस्थमिति अवक्रमुरित्यत्र मु शब्दस्य ओभावो न भवति। ष्टम्भे महा ओशसूपे, इति प्रवतश्शश्वतीरित्यत्र शशब्दस्य ऋक्स्वरे उदात्तस्य पुनरुच्चविधानम्। अत्र कर्षणवृद्धे न भवतः।।

18.पौष्कलम्- स[2]ख्वा[10]या[2]ऽ3आ[4]नि[5]।। ष्कलेनीषीश्रिये यवि प्र। सख्वातुरीयमिति। अत्र प्रस्तावतुरीयस्य अकारस्य वृद्धिविधानम्। अत्र प्रथमायां निधनान्त्यभूतस्य उदात्तस्य येशब्दस्य त्वनाद्ययुं श्रियेतिर्भा इत्यादिना न्यायादपेत प्रकरणे ग्रहणात् वृधे स्वरे प्राप्ते सम्प्रसारणमेव।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदिद्वोदात्तेत्यादिनात्र प्रथमायां ज्ञैरित्यत्र प्रत्युक्रामे प्राप्ते हितपौष्कलेत्यादिनात्राभिगानमेव।।

19.श्यैतम्- इन्द्रक्रतुन्नआ (4 3 4 5 0) ।। श्यैते द्वयोनावित्यादिनात्राद्ययोः प्रस्तावादिर्नीचैः। लं विस्मिन् सिच वरु पृश्नि श्यैत मद्रेष्विति। अत्र प्रथमायां अस्मिन् शब्दस्य ऋक्स्वरे उदात्तस्य पुनरुच्चविधानम्। ऋक्स्वरे उच्चस्य पुनरुच्चविधानात् अन्यत्र प्रशब्दादीनामुदात्ताना-मनुदात्त ज्ञापनार्थं। क्रौध्यष्टम्भेत्यादिना सर्वासु तृतीयपादादिभूतस्य ऋक्स्वरवदुच्चविधानम्। श्यैते हिम्माज्ञीयवदिति। आयोभावश्च नेदानीमिति। सूत्रद्वयेनापि ऊहे ऊहे यज्ञायज्ञीयवद्भवति। आयेभावो न भवतीत्यर्थः। माशिवासस्सर्वत्रेति विश्लेषः। क्रमुरिन्द्रक्रतु-मित्यादिनात्र औहोवायां प्रत्यये मुशब्दात्परस्य विसर्जनीयस्य लोपः। ओवौकारयोरित्यादिना तृतीयादिन्यामित्यादिना च वक्रमुरित्यत्र मुशब्दस्याभावे प्राप्ते उवर्णन्तु न सर्वत्रेति मुशब्दस्य प्रतिहारः।।

20.श्रुध्यम्- इन्द्रमच्छाऽ2सु (1)।। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादाद्यक्षरस्य ऋक्स्वरवदुच्चनीचप्राप्ते अश्रुष्ट आरत्नधानहीति अत्राद्यायां श्रुशब्दस्य ऋक्स्वरे नीचभूतस्य उच्चविधानम्। श्रुधीयान्तो श्रुध्य इति पूर्वयोः स्तोत्रीययोः सर्वत्र श्रुधीयान्ता भवति ।।इति षष्ठः।6।

==******==

।।सप्तमो विंशः।।

1.नौधसम्- आऽ234इ-द्रक्रतुन्नआ (1 5 4 5 0)।। धसे त्रेभि प्र। नौधस आइन्द्रान्तात्। अत्र सर्वासु आइन्द्रात्परस्य वृद्धिप्राप्ते अतं न पुण इति। अत्राद्यायां पूर्वाइन्द्रान्तात्परस्य णौ शब्दस्य अवृद्धिविधानम्। धसे वे कृष्टादभिस्तो। इत्यादिनात्र मध्यमायां प्रस्तावे वा ज्यो इत्येते उच्चैर्भवतः। आद्यन्तयोर्योनिवदिति। मान ऊर्ज इत्येतौ शब्दौ नौधसे,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति भक्त्यन्तः पदगीतिस्सर्वत्रेति पदगाने प्राप्ते अत्र मध्यमायां मानो इति सन्धिगानविधानम्। माशिवासस्सर्वत्रेत्यत्रापि विश्लेषः॥

2.पौष्कलम्- पवते॒ऽ3हर्या । ष्कलेवते प्र। दीर्घवृद्धोपहित इत्यादिना अभायर्षा इति यकारापत्तिः। आदिद्धोदात्तेत्यादिनात्र स्तोशब्दस्य प्रत्युत्क्रामे प्राप्ते हितपौष्कलेत्यादिनाभिगानविधानम्॥

3.आमहीयवम्- अस्यप्राऽ3त्नामनुद्युताम्॥ अस्यप्रत्नायामयँ सूर्यस्सर्वत्रेति। अत्र सूर्यशब्दस्सङ्कृष्टः। एतदेवोदाहरणं अयँसूर्याया-मित्यादिना दशब्दस्यानार्भावः। अत्रैव सूर्यायां न सूर्यो भ्राजे इत्यत्र विकृष्टः॥

4.कालेयम्- परीतोऽ3षिञ्चतासुताम्॥ एकस्याम्। नर्यः परीतायामित्यादिना नर्य शब्दोऽत्र विकृष्टः। लेयेयोच्चादिः यस्याच्छोत्तरयोः परिप्रत्नायां च। इत्यत्र तृतीयपादे तृतीयपर्व-तृतीयारम्भ इत्यर्थः। दधन्वाँ यस्सर्वत्रेति पदगानमेव॥

5.पार्थम्- ओऽ3होऽ3होइ - अयँसोमाः॥ पार्थेपाहियोजिरुणि-सूनिथाविट्। प्र अक्षरे द्वे, पदान्ते काम्पा, त्रिष्टुभिचोतायामिति। अत्र सामान्यमेव विशेषो नास्ति॥

6.सँहितम्- परिसुवानः॥ सँहिते सःपी प्र। स्वानः परिस्वानायामित्यादिना स्वाशब्दोऽत्र विकृष्टः। त्वं कविर्द्धितीये दन्वते । इति त्वं शब्दोऽत्र सङ्कृष्टः। दक्षसंहितयोः इत्यादिनात्र सर्वासु प्रस्तावाद्युच्चम्। समानोदर्केष्वित्यादिना पूर्वयोरुद्धारः॥

7.सत्रासाहीयम्- पवाऽ34 । स्वमधुमत्तमः। साहीयेशतेत्यादि पूर्वमेवोक्तम्। स्वस्सर्वत्रेति अत्र विसर्जनीयस्यातिहारः॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

8.वामदेव्यम्-पा॒ऽ5रि।। न्ववावितदेव्ययोरिति प्रधन्वेत्यत्र न्वशब्दस्य ह्रस्वस्य दीर्घविधानम्। विच्छन्दस्सु च देव्ये, विराट् पर्यू च देव्ये गीथस्तदादिरिति सूत्रद्वयस्यार्थः अग्निन्नरायामुक्तम्। अत इह नोच्यते, तरध्यै विते इति ध्याशब्दोऽत्र विकृष्टः। पुरमजीजनोहिदेव्ये अत्र मध्यमायां पुरमित्यत्र पादान्तस्य मकारस्य ओवौकारयोरित्यनेन लोपप्राप्तस्यातिहारः। स्तावोपान्त्यं देव्येदाखीसो इति अत्र तृतीयायां प्रस्तावोपान्त्यस्य सोशब्दस्य वृद्धिः। राज्येन्धीगवदेव्ययोरिति अत्र तृतीयायां ज्येशब्दस्सङ्कृष्टः।।

9.यद्वाहिष्ठीयोत्तरम्-इन्दुरश्वीनकृत्वियः[1]।।

10.वारवन्तीयम्-परिप्रधाऔहोहाइ। वन्तीयइन्द्रामहेस्यपे। सर्वमवृद्धमित्यादिना आभावे प्राप्ते नेन्द्रस्तेसो इत्यादिना इन्द्रस्तेसो इत्यत्र सोशब्दस्यानाभावः। शुर्मदायास्तुत्र्यक्षराया उपाद्यलोपे वारे इति कनीयस्यादितो लोप इति शुर्मदायाः प्रथमाक्षरलोपे प्राप्ते अत्र सर्वासु द्वितीयस्य लोपविधानम्। इलान्दवन्तीय यौक्तेष्वौकारे। इत्यत्र प्रथमायां प्रस्तावे ओकारे परतः पूर्वस्य यकारस्य दीर्घविधानम्। तृतीयादिन्यामित्यादिना पदान्तानामाभावे प्राप्ते व्यंचेति। अत्रोत्तमायां पदमध्यगतस्य देशब्दस्याप्याभावविधानम्। उवर्णन्तु न सर्वत्रेत्यत्र मध्यमायां युशब्दस्याप्यनाभावः।।

11.कावम्- सूर्योवा। कावेनेन्द्रानिक्तं प्र। एष एव शब्दस्सूर्यवतीष्वित्यत्र सूर्यशब्दस्सङ्कृष्टः।।

12.पौरुमीढम्-पवमा- वान्तःप्रस्तावः । कावश्रौतकक्षेत्यादिना मीढेमोच्चादिर्नीचैः । ढेच त्वमं सर्वासु । इन्द्रक्रमध्यमायां चेति। सूत्रत्रयस्यायमर्थः । त्वमङ्गप्रशँसायां सर्वासु इन्द्रकमध्यमायां च उद्गीथ

1.ख- नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीय पर्वाद्यस्य नीचविधानम्। योनावुच्चम्। द्व्युच्चं पितापवमानामाशिवासश्चेति पितापवमानो । माशिवास इति एतेषु त्रिषु पर्वसु योनिवदेकाक्षरप्राप्ते द्व्यक्षरोच्चविधानम्। मीढेव्यमिति अत्र तालव्यत्वात् उपद्रवद्वितीयस्यावृद्धिः।।

13.मानवाद्यम्- मन्द्रयाया।। पर्वप्रस्तावः। जारेत्यादिना नवे निहोता। इति विकल्पपक्षे सर्वत्र निहोतायां प्राप्तायां तिधातु वारा इति अत्र विकल्पपक्षे सर्वत्र निहोतायां प्राप्तायां तिधातुवारा इति। अत्र विकल्पपक्षे वाराविधानम्। वृद्धावृद्धप्रकरणेऽपि नवे च विकल्पे नैकर्चे। इति पूर्वोक्तस्यानुवादः। मानवयोः पूर्वे च दक्षसापतिः कवीमिति। योनौचदक्षसास्थाने अत्र पतिः कवीविधानम्। नवपूर्वपञ्चेत्यादिना योनौ तृतीयपादे देशब्दस्यवृद्धिः। शुर्मदाचैकर्चे लुप्ते पान्त्या भवति। कथम् योनौ ण्वाऋतजाऽ3। ण्वशब्दस्य वृद्धिः। ऋवर्णस्य अभिगीतिः। तशब्दस्यावृद्धिः। जाशब्दस्य कर्षणम्। अत्र कनीयस्य आदितो लोपः। इति गोमान् गो इत्यत्र गोशब्दस्य अभिगाने प्राप्ते गोशब्दस्य वृद्धिः। मान् शब्दस्याभिगीतिः। गोशब्दस्य कर्षणम्। योनावुपान्त्यभूतस्य तशब्दस्यात्र लोप इत्यर्थः। अत्रोपद्रवभक्तौ कनीयस्यादौ लुप्तौ। भाऽ2इराऽ234औहोवा । आऽ234क्षाः। सूत्रकारश्चाह। प्रस्ताव प्रतिहार निधनानां अक्षरपरिमाणं यथायोनि चिकीर्षे द्वैच्छन्दसेष्वनादेश इति अतः विच्छन्दस्सु प्रस्तावप्रतिहारनिधनेषु विध्यभावे लोपो न भवति। ऊहगाने सर्वत्र फुल्लकारेण गौषूक्तेतूच्चातायामून इत्याद्येवमादिभिः यत्र यत्र आदेशो विहितः तत्र तत्र आदेश प्रकारेण गानं कर्तव्यम्। अन्यत्र विच्छन्दस्सु कनीयस्य आदितो लोप इति न्यायेन लोपं कृत्वा गानं कर्तव्यम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5 2 4 5 40 5
14.जनित्रम्[1]- परिधाऽ3इँरातिताँइहाइ।। लेयप्रस्तावंसदृक् तुरीयं शिप्रमतिसुताद्ययोरिति अत्र प्रस्तावे तुरीयस्य अकारस्य वृद्धिः। पूर्वजनित्रे चदक्षसो तद्विषामापद्यते। वृद्धावृद्धप्रकरणे नित्रेगीथषष्ठ-मिति पूर्वसूत्रेणोक्तार्थमेव। नार्थान्तरं दावसुनिधनेत्यादिनात्र तृतीयपादाद्युच्चम्। पूर्वजनित्रेत्यादिनात्रान्त्यस्तोभस्यागतिः। अत्रापि कर्षण वृद्धे न भवतः।।

2 0
15.भारद्वाजम्- अभिसोमा ।। पर्वप्रस्तावः। मद्यं द्विहिङ्कारेत्यादि नात्र मद्यशब्दस्सङ्कृष्टः।।

3 40 0 30 4 5
16.इदावासिष्ठम्- उत्सोदेवोहिर ।। ष्ठे प्रयोनौ इति। प्रस्तावादिरुच्चैः । इदावासिष्ठे चेति, अस्यायमर्थः। योनौ मध्यम-पादयोरन्त्ये च योनावेवोपाय द्वितीयस्य वृद्धिः। अत्र न। हुवादिर्वासिष्ठे, इति अस्य साम्नः प्रस्तावान्त्यं हाइ इति।।

5 0 2 405 40 5
17.गौङ्ग्वम्- प्रसोमाऽ3देववीतयाइ।। एकस्यां गवे च तृतीय इत्यत्र तृतीयपादादिर्नीचैः। गवतृतीय दशमं कृष्टं सर्वत्रेति, विकल्पपक्षे तृतीयपादे दशमस्य कर्षणम् । गृविस्सर्वत्रेति प्र। वाचिसर्वमोभवतीति ओभावे प्राप्ते अनुस्थमिति धुशब्दस्य ओभावो न भवति।।

1 0 2 0 1 0 2 1
18.पदनिधनशुद्धाशुद्धीयम्- प्रसोमदेववीतयाइ[1]।। शुद्धीये ऽभिद्वेगिरिं इत्यादिनात्र प्रस्तावाद्युच्चम्। क्रौशौपगवेत्यादिनात्र उद्गीथाद्युच्चम्। योनावेवनीचम्। दावसुनिधनेत्यादिनात्र तृतीयपादा-द्युच्चम्। योनावेवनीचम्।।

ग-1.जनित्राद्यम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

18.पदनिधनशुद्धाशुद्धीयम्- प्रसोमदेववीतयाइ[1]।। शुद्धीये ऽभिद्वेगिरिं इत्यादिनात्र प्रस्तावाद्युच्चम्। क्रौशौपगवेत्यादिनात्र उद्गीथाद्युच्चम्। योनावेवनीचम्। दावसुनिधनेत्यादिनात्र तृतीयपादाद्युच्चम्। योनावेवनीचम्।।

19.पौरुमीढम्- इन्द्रक्र ।। मीढे ज्योतिः प्र। ढे च त्वमं सर्वासु इन्द्रक्रमध्यमाया च। मीढेमोच्चादिः नीचम्। द्युच्चं पितापवमानमाशि - वासश्च इति सूत्र चतुष्टयस्य अर्थ एकस्यामुक्तम्। अत इह नोच्यते। मीढेव्यमिति सर्व उपद्रव द्वितीयस्य शिशब्दस्य वृद्धिर्भवति। माशिवासस्सर्वत्रेति अत्र विश्लेषः।

20.श्रुध्यम्- तँवस्सखाऽ2यः। एकस्याम्। क्रौध्यष्टंभेत्यादिना अत्र तृतीयपादाद्यस्य ऋक्स्वरवदुच्चनीचम्।। इति सप्तमः।। 7।।

==*******==

।। अष्टमो विंशः।।

1.मानवाद्यम्- इन्द्रक्रतूम्।। नवे निहोता इति। अत्र सर्वासु उद्गीथाद्यं पर्व विकल्पपक्षे निहोता भवति। मानवयोः पूर्वे इत्यादिना योनिदृष्टा च दक्षसात्र सर्वासु पतिः कवीमापद्यते। नवपूर्व पत्रेत्यादिनात्र सर्वासु तृतीयपादे द्वितीयस्याक्षरस्यावृद्धिः। योनावेव वृद्धिः। नवे च तृतीये तृतीयमिति अत्र सर्वासु तृतीयपादे तृतीयस्य नीच प्राप्ते तुरीयमर्षापौशिक्षामाण इति। अत्राद्ययोस्तृतीय पादे तुरीयभूतयोरकारज्ञकारयोर्नीचविधिः।।

2.पौष्कलम्- प्राणाशाऽ3इशुः।। ष्कले धीतिं पत्रित्रित प्र। ऊने इति, सफपौष्कलयोर्वेहीष्यामित्यादिना सर्वत्र प्रस्तावे हीषीस्वरे परतः पूर्वस्य दीर्घाक्षरस्य वृद्धिप्राप्ते अत्र प्रथमायां प्रस्तावे हीषीस्वरे परतः

ख-1.प्रसोमदेववीतयाइ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मकारस्यापि वृद्धिविधानम्। अत्राद्ययोः निधनान्त्ययोः ता, यं, शब्दयोः उदात्तयोः अन्तोदात्तं वृधेस्वरमिति अनेन सामान्यसूत्रेण वृधेस्वरे प्राप्ते रयिं प्रियमहि द्विता इति न्यायादपेत प्रकरणे ग्रहणात्संप्रसारणविधानम्। उपशिपरिप्रधन्वसखाप्राणातृचयोरिति अत्र सर्वासूद्वीथ द्वितीयस्य वृद्धिः।।

3.जनित्रम्[1]- इन्द्रक्रा^{5}ऽ3तुन्न^{2}आभरा$^{4\,5\,40\,5}$।। पूर्वेजनित्रेत्यादिना अत्र सर्वासु अन्त्यस्य स्तोभस्यागतिः। पूर्वजनित्रे च दक्षस्तोतद्विषामिति अत्र सर्वसूतद्विषा भवति। नित्रे गीथषष्ठमिति पूर्वसूत्रेणोक्तार्थमेव। नार्थान्तरम्। सर्वं जनित्रेत्यादिना जनित्रे सर्वत्र महित्रीणा द्वितीयस्य ह्रस्वस्यापिवृद्धिः। माशिवासः प्रहिन्वान इति वृद्धमन्तःपद इत्यादिना आभावे प्राप्तेऽत्र मध्यमायां पदमध्यगतस्य शिशब्दस्य हादौ स्तोभे परतः आइभावविधानम्। उः कारस्येत्यादिनात्र मध्यमाया मुशब्दात्परस्य विसर्जनीयस्य लोपः। उवर्णन्तु न सर्वत्राभवतीति मुशब्दस्य उपद्रवे औहोवायां प्रत्यये अनाभावः। कर्षणेत्यादिनात्र कर्षणे वृद्धे न भवतः।।

4.श्रुध्यम्- सो^{10}मःपुनाऽ2नः।। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादादिः यथर्चम्।।

5.भारद्वाजम्- इ^{2}न्द्रक्रतूम्।। पुत्रेभ्यो भारद्वाजे, इत्यत्र भ्यशब्दः सङ्कृष्टः। माशिवासस्सर्वत्रेति विश्लेषः।।

6.मैधातिथम्- अ^{2}भिसो^{0}मो^{1}हा^{2}इ। मैधे क्थे प्रत्यये, इत्यत्र सर्वासु गतिः। पवन्तेऽभिसोमायां मैधातिथे इति हादौ स्तोभे परतः पवन्ते इत्यत्र तेशब्दस्य पदान्तस्याप्याभावविधानम्। मद्यमाउवाव्यवहितमित्यादिनात्र मद्यमित्यत्र पदान्तस्य मकारस्य आउवा व्यवहितमित्यादिना लोपप्राप्ते अतिहारः। ऊर्मिणा वाम्रमैधातिथयोरिति

ग-1.जनित्राद्यम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अत्र मध्यमायामूर्मिणेत्यत्र ऊकारस्य आउवा व्यवहितमित्यादिना आभावे प्राप्ते ओष्ठ्यश्चेत्यादिना पुनरनाभावप्राप्तस्य पुनराभावविधानम्। देवः पुनान द्वितीयायां मैधष्टम्भयो स्तावे, मत्सरासश्चेति, भक्तिमध्यः पादमध्यश्च स्तोभेत्यादिना पदगाने प्राप्ते अत्रोत्तरयोः प्रस्तावे मत्सरासो देवो इति च ऊभयोः सन्धिगानविधानम्। ऋतमाउवाव्यवहितमित्यादिनात्रोत्तमायामृतमित्यत्र मकारस्य आउवा व्यवहितमित्यादिनात्र लोपे प्राप्ते अतिहारः। मैधे चेति अत्र सर्वासु प्रस्तावे हकारे परतः ओभावविधानम्।।

7.बार्हदुक्थम्- परीतोषिञ्च (1 20 10 2)। हदुक्थे सुते प्र। षिवमन्तदुक्थयोर्वे, इति ऋक्स्वरवत्सामिकः। उदात्तात् परमुच्चैर्भवतीति ऋक्स्वरसंहितायां स्वरितभूतस्य साम्नि उच्चप्राप्ते आद्यायां प्रस्तावे षिशब्दस्य स्वरितत्वात् उच्चप्राप्ते पुनर्नीचविधानम्। मन्तवदुक्थे, इति अत्र मध्यमायां प्रस्तावादिर्नीचैः नोविभिरित्यादिना अत्र विश्लेषः। अवृद्धाच्च सर्वत्रेति अत्र तृतीयायां त्वाशब्दात्परं विश्लेषः। दुक्थेभिगीत क्रमयोः इति अत्र सर्वासु अभिगीत प्रत्युत्क्रामयोः परस्य वृद्धिः।।

8.अध्यर्धेडंसोमसाम- यस्तेमदोवरेणियाऽ3एं (2 0 0 0 2)।। कौल्मलान्धीगवेत्यादिनात्राद्यायां उद्गीथादिर्नीचैः। पवस्व यस्तेमदायां सर्वत्रेति अन्धस इत्यत्र अकारस्य सर्वत्रविश्लेषप्राप्ते सोमसामसाहीय शाम्मदेषु प्रश्लेष इत्यत्र प्रश्लेषः। यस्तेसोमसाम्निगोषातिः, इत्यगतिः। नयोनिंसोमसाम्नीति। आउवाव्यवहितमित्यादिना आभावप्राप्तस्य ओष्ठ्यश्चेत्यादिना अनाभाव प्राप्तस्य नयोनिमित्यत्र योशब्दस्य पुनराभावविधानम्।।

9.ऐडंमाण्डवम्- अदब्धस्सूऽ2 (1)।। पदविभाग्यम्।।

Digitized by Madhuban Trust, Delhi

2 1 2
10.जराबोधीयम्- अस्यप्रत्नोवा। गीथोपान्त्यं त्रीषु बोधीय इति सर्वासूद्गीथोपान्त्यस्य वृद्धिरत्र। बोधीये सर्वमेति। अत्र सर्वासु ह्रस्वस्यापि प्रत्युत्क्रामविधानम्। अस्यप्रत्नायामयँसूर्यस्सर्वत्रेति सूर्यशब्दः सङ्कृष्टः। एतदेवोदाहरणमयँसूर्यायामित्यादिना दृशब्दस्यानाभाविः। अत्रैव तृतीयायां नसूर्योभ्राजे इति र्यशब्दोऽत्र विकृष्टः।।

2 0 0 1 5
11.रौरवम्- परीतोषिञ्चाऽ3तासूऽ234ताम्।। रवेघं षष्ठमिति षष्ठस्य दीर्घस्य वृद्धिः। नर्यः परीतायामित्यादिनात्र र्यशब्दः सङ्कृष्टः। ऋगन्तीय इत्यादिनात्रान्त्यायामनाभार्विः। नोविभिस्सुषावसोमायामित्यादिनात्र विश्लेषः। सुरभिस्सुषाव सोमायां रौरव इति वृद्धमन्तःपद इत्यादिना आभावे प्राप्ते रभिन्तर इत्यत्र भिशब्दस्य हादौ स्तोभे परतः आइभावविधानम्। चित्वा नवे इति अत्र प्रश्लिष्टः।।

1 2 1 2 30 2 3 5 2
12.निहवः- आइहीऽ3 - आइही - एहिया - औऽ234वा - हाइ।। स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति। अत्राद्यन्तयोः स्तोभनियमः। अष्टमः।।8।।

।।संवत्सरस्समाप्तः।।

==********==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकाहप्रारम्भः

।।प्रथमो विंशः।।

1.नानदम् - [3 4 5 0 4 5 0] प्रत्यस्मैपिपी ।। पुरोनानद इति अत्र सर्वासु प्रस्तावाद्युच्चम्। न दे च स्वास्वाद्ययोरिति। अत्र आद्ययोः स्तोत्रीययोः प्रथमपर्वान्त्यमग्निमीस्वरमापद्यते। न दे च दुरो इति अत्र सर्वासु प्रस्तावे चतुर्थपर्वणि द्व्यक्षरमेवोच्चम्। हारद्धितीयं नदेपुरोजित्यामिति अत्र सर्वासु प्रतीहारद्धितीयस्यावृद्धिः। पुरः स्वासूत्तरयोश्चारङ्गमा नदे इति। अत्रोत्तरयोस्तृतीये पादे अरङ्गमाविकल्पे, पूर्वपक्षे पर्वादौ त्र्यक्षराणि तृतीयस्वरे। विकल्पपक्षे अरङ्गमैव त्र्यक्षराण्यादौ चतुर्थस्वरे इत्यर्थः।।

2.श्यैतम्- [30 40 3 40 5] आनोविश्वासु।। श्यैतेऽसि ईशा। प्र। श्यैते द्वे योनावित्यादिनात्र परमज्या नीचारम्भः। क्रौध्यष्टम्भेत्यादिना अत्र सर्वासु तृतीयपादादिः यथर्चमुच्चनीचम्। श्यैते हिम्माज्ञीयवदिति अत्र कर्षणनिवृत्तिः।।

3.औदलम्- [1 20 1] पुरोजिताइ।। योवृद्धाद्दी सर्वत्रेति अत्र दि शब्दस्य प्रकृतिः। श्वःकार्तयशौदलत्रासदस्यवेष्विति अत्रास्तोभे प्रत्यये सन्धिगाने प्राप्ते पदगानविधानम्। अवकयेति अत्र मध्यमायां पावक इत्यत्र वशब्दस्यासंयोगे परतोवृद्धि प्राप्ते अवृद्धिविधानम्।।

4.श्यैतम्- [40 30 4 30 4 50] स्वादोरित्थाविषू ।। श्यैते द्वे योनावित्यादिना अत्राद्यायां प्रस्तावादिः नीचैः। क्रौध्यष्टम्भे, इत्यादिना अत्र सर्वासु तृतीयपादादिः यथर्चमुच्चनीचम्। इन्द्रक्रत्वायां तृतीयपादे स्मिच्छब्दस्य उदात्तस्य पुनरुदात्तविधानम्। अत्राद्ययोस्तृतीयपादे यथर्चगीत-पर्वान्त्ययोः प्र, व इत्येतयोरुदात्तयोरनुदात्तमेव। पृकारश्चिकारे इति, अत्र प्रशब्दस्याभावः। श्यैते हिम्मा ज्ञीयवदिति कर्षणनिवृत्तिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समानोदर्क इत्यादिनात्र पूर्वयोरुद्धारः। व्रतान्यस्य श्यैतवाजीययो-रिति अत्र न्यशब्दः सङ्क्रुष्टः।।

20 0 1 2 4 2 3 5
5.इडानाँ संक्षारः-औहोइहुवाऽ3होइ-पवस्वमाऽ3धूऽ3मत्तमः[1]।। सर्वं जनित्रेत्यादिनात्र महित्रीणा द्वितीयस्य ह्रस्वस्यापि वृद्धिः।।

3 2
6.यौधाजयम्- प्रत्नाऽ31म्।। यौधादसी सर्वत्र पूषायां च न स्तोभे प्रत्यये यूथे प्र। अपीयूवा जेतीं षि इति सौभरेत्यादिना तुरीयस्य दीर्घाक्षरस्य सर्वत्र वृद्धि प्राप्ते अत्र पीयूषमिति यू शब्दस्यावृद्धिः। अभरादिर्यौधाजये सर्वमिति अत्रोत्तरयोः षष्ठस्य ह्रस्वस्य अपि वृद्धिः। महो,दिव,इत्येतौ शब्दौ प्रत्नं पीयूषायां यूथे, इति भक्त्यन्तः पदगीत-स्सर्वत्रेति भक्त्यन्तानां वृद्धानामकारान्तानां पदगाने प्राप्ते अत्राद्ययोः स्तोत्रीययोर्महोदिव इत्येतयोस्सन्धिगानविधानम्। दिव आ प्रत्नम्पीयू-षायां जयामहीयवोत्सेधेषु, इति अत्र आद्यायां दिव आ निरित्यत्रा-कारस्यात्वविधानम्। जयेहारादिति सर्वत्र प्रतिहारात् परस्याक्षरस्य वृद्धिप्राप्ते अविताषभोरिया चता इति अत्रोत्तरयोरवृद्धिः। चविप्रत्नं पी जये इति निधनेहीषीस्थँ सर्वत्रेति निधनभूतहीषीस्वरस्थस्य वृद्धस्य तालव्यस्य सर्वत्र प्रकृतिभावे प्राप्ते अत्रोत्तमायां च विश्वेत्यत्र विशब्दस्य पुनराइभावविधानम्।।

3
7.वामदेव्यम्- शाऽ5इशुम् ।। विच्छन्दस्सुच देव्ये, इति अस्यायमर्थः। विच्छन्दस्वधीतानां नवानां वामदेव्यानां सर्वासु स्तोत्रीयासु चतुर्थं पर्व योन्यां यथर्चगीतत्वादूहेऽपि यथर्चगाने प्राप्ते चतुर्थपर्वणि अन्त्यादक्षरात् प्राक् सर्वेषां वर्णानां उच्चविधानम्। अन्त्यस्य नीचमेव। ऋषिकृच्छिशुं देव्योद्वज्जोतिषेषु इति वृद्धमृवर्ण-मित्यादिना कृच्छब्दस्याभविे प्राप्ते अनाभावविधानम्।

---

2 4 2 3 5
ग-1.पवस्वमाऽ3धूऽ3मत्तमाः ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तुरीयं त्वा भवति शिशुं देव्य इति अस्यायमर्थः। ओवौकारयो-रित्यादिना आभावे प्राप्ते देव्येत्वनृगन्तीय इत्यादिना अनाभाव-प्राप्तस्यात्र तृतीयायां तुरीयमित्यत्र मकारस्य पुनराभावविधानम्। पवित्रमत्येज्ञीये इति अत्र विकृष्टः।।

8.स्वारँसौपर्णम्- क[2]या[0]नश्चित्रआ[0]भूऽ3वा[2]त्।। स्वारे पर्णे खीनां प्र। स्वारे योनावित्यादिनात्राद्यायामुद्गीथादिर्नीचैः। अन्धसः स्वारे पर्णे, इति, अनुस्वारस्पर्शेत्यादिनात्र मध्यमायां अन्धस इति अकारात् परस्य पदमध्यगतस्य स्तोभात्पूर्वं स्तोभेनासन्धीयमानस्य स्तोभात्परं विरामात्पूर्वमदृश्यमानस्य विरामात्परमतिहारप्राप्तस्य नकारस्य लोपविधानम्। तृतीयोच्चान्त्यमित्यादिनात्र सर्वासूद्गीथे आद्यपर्वान्त्या-कारस्य ह्रस्वस्य दीर्घविधानं हादौ स्तोभे । जरिस्वारे पर्णे, इति अवृद्धभूतस्य जरीत्यत्र रिशब्दस्य पूर्वसूत्रेण दीर्घप्राप्तस्य पदमध्यगतस्य तालव्यसंज्ञकस्य हादौ स्तोभे आभावविधानम्। वाचि सर्वमोभवतीति सर्ववर्णानामोभावे प्राप्ते अनुस्थमिति सि यूतय इति यूशब्दस्य ओभावो न भवति। स्वारे पर्णे योनाविति ।अत्र सर्वासूपद्रव द्वितीयस्यावृद्धिः। योनावेववृद्धिः।।

9.सफम्- प[2]रि[1]प्रा[2]ऽ3ध[5]।। सफइन्द्रा पूष्णे प्र। द्विपदायामिति, सफपौष्कलयोर्वेहीष्यामित्यनेन सर्वत्र प्रस्तावे हीषीस्वरे परतः पूर्वस्य दीर्घाक्षरस्य वृद्धिप्राप्ते अत्र ह्रस्वस्य न्वशब्दस्यापि वृद्धिविधानम्।।

10.स्वारँसौपर्णम्-उ[2]च्चा[0]र्ते[0]जा[0]तमन्धाऽ3सा[2]ः।। स्वारे योनावित्या-दिनात्राद्यन्तयोरुद्गीथाद्यस्य नीचविधानम्। नर्यस्साहीयेत्यादिनात्र नर्यशब्दः सङ्कृष्टः। तृतीयोच्चान्त्यमित्यादिनात्रोत्तरयोर्हादौ स्तोभे तृतीयोच्चान्त्यभूतयोः, रु,नू, इत्येतयोः ह्रस्वयोः दीर्घविधानम्। द्वितीयं सन्त इति अत्रोत्तमायां उपद्रव द्वितीयस्य सन्त इत्यत्र त शब्दस्य दीर्घविधिः। सत्पर्णे,इति । अत्राद्यायामुद्गीथाद्यपर्वणि सच्छब्दस्योच्च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधानम्। स्वारेपर्णे योनाविति अत्र सर्वासु उपद्रवद्धितीयस्य अवृद्धिः।।

11.शाक्वरवर्णम्- ऊ1च्चा2 । सद्भ्यं वर्णे इति। अत्र दिविसदिति सच्छब्दस्योच्चविधानम्, आउवा व्यवहितमित्यादिना सर्ववर्णाना-मःभावे प्राप्ते वर्णसदस्य प्रवदुत्सामराजेषु स्पर्शानामलोपो यथा इति। अत्र तृतीयायां मानुषाणामित्यत्र णकारात्परस्य मकारस्यालोपः। वोवित्सर्वत्रेति। प्र।।

12.महावैष्टम्भम्-पुनानस्सोहाइ[1]। वैष्टम्भे वयमन्त्य इत्यादि - नात्र मध्यमायां प्रत्नँ सधस्तोत्रीयान्ते अगतिः । न प्रस्तावोद्गीथयोः। ष्टम्भे वयं प्रत्नं राय आ सुता इति अत्रोत्तमायां प्रस्तावादिः नीचैः। सधष्टम्भे इति अत्रोत्तमायां प्रस्तावे सधस्थमिति सशब्दस्य ऋक्स्वरवन्नीच प्राप्ते उच्चविधानम्। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादाद्यभूतस्याक्षरस्य ऋक्स्वरवदुच्चनीचप्राप्ते अश्रुष्ट आरत्नधा नहीति अत्र प्रथमायामारत्नधा इति आकारस्य ऋक्स्वरवदुच्चप्राप्तस्य नीचविधानम्। ष्टम्भे महौश सूपे, इति ऋक्स्वरे उदात्तस्य पुनरुदात्तविधानात् महावैष्टम्भे सर्वत्र तृतीयपादे निगदवर्तिनां पर्वणां अन्त्यभूतस्योदात्तस्यानुदात्त ज्ञापनार्थं। दिव्यं जर्षसीत्यादिनात्र विकृष्टः। आपृच्छ्यमवृद्धँ सर्वत्रेति अत्र सङ्कृष्टः। नन्दायात्सिब्य-कर्षणमिति अत्र कर्षण वृद्धे न भवतः।।

13.कालेयम्- पुनानाऽउस्सोमधारया ।। थादेश्च परं, इति, कालेये सर्वत्रोद्गीथ द्वितीयस्य वृद्धिः। दीर्घवृद्धोपहित इत्यादिना विरतेऽपि गतिर्यकारश्च भवतीति। यारत्नधा इति। एकारे च यकारं यामोद्धतोर्गतिमाँश्च पदान्तस्सन्धौ यलोपो विरते इति अत्र विरते यकारस्य लोपवचनात् तत्र विरते सत्यपि अकाराकारयोः पूर्वगतिश्च

1.ख- नास्ति।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यकारश्च भवतीति सूत्रार्थः। लेये यस्याच्छोत्तरयोः परिप्रत्नयोश्चेति अत्र तृतीयायां तृतीयं पर्व तृतीयारम्भः पूर्वयोश्चतुर्थारम्भ एव।।

50 4 2 4 50 4 5
14.सौभरम्- श्रायाऽ3न्ताऽ3इवसूरियोवा।। सौभराभीवर्तेत्यादिनात्र सर्वासु तुरीयस्यावृद्धिः। गतिमान् पूर्वस्तोभ इत्यादिनात्र सर्वासु पूर्वस्तोभस्य अगतिः। उत्तरस्त्वगति इत्यादिनात्र मध्यमायां भद्राइन्द्रस्येत्यगतिः।आद्यन्तयोर्गतिरिरिति। नदीधिमः श्रायन्तायां सौभरे इति पादान्त्यात् परस्वरो विकृष्यत इति अनेन अलर्षीत्यत्र पादादि भूतस्याकारस्य विश्लेषे प्राप्ते पुनः प्रश्लेषविधानम्। विधतो भद्रा इन्द्रायां सौभरे इति, भक्तिमध्यः पादमध्य इत्यादिना अस्तोभे प्रत्यये सन्धिगाने प्राप्ते विधतो इत्यत्र तो शब्दस्य पदगानविधानम्, भरे स्थूरमेवा सर्वः इति अत्र सर्वासूद्गीथाद्युच्चम्। योनौ प्ररे चेति, अत्र सर्वासु प्रतिहाराद्युच्चम्। वृद्धमन्तःपदेत्यादिना अत्र पदमध्यगतस्य दीशब्दस्याभावविधानम्।।

2 0 0 0 1 2
15.वारवन्तीयम्- तरोभिर्वोऔहोहाइ।। सर्वमवृद्धमित्यादिनात्र सर्वास्वाभावः। लान्दवन्तीय यौक्तेष्वौकारे इति अत्र सर्वासु औकारे परतः पूर्वस्य ह्रस्वस्य दीर्घविधानम्। चरे वारे हत्यां सर्वत्र श्रुधीहवायामिति, अत्र सर्वासु चरसङ्घातो भवति। सर्वं बृहती-

2 0 1 5
कारत्वात्। त्रैशोके चराजासोऽ234हाइ। इति चरसङ्घातः, तृतीयपर्वान्त्यस्याक्षरस्य ओभाव इत्यर्थः। अना तृतीयं कृष्टं, अप्रत्युत्क्रान्तम्। आचतुर्थकृष्टं तु पादान्ते सर्वत्र श्रुधीहवायां च वारवन्तीये सर्वास्विति। अस्य सूत्रस्य पूर्वसूत्रेणोक्तार्थमेव, नार्थान्तरम्। तृतीयादिन्यामित्यादिना सर्वपादान्तानामाभावे प्राप्ते व्यञ्चेति अत्राद्यन्तयोः स्तोत्रीययोः रि, त्थी इत्येतयोः पदमध्यगतयोः वर्णयोः औहोवायां प्रत्यये आभावः। उवर्णन्तु न सर्वत्राभवतीति अत्र मध्यमायां मुर इत्यत्र मु शब्दस्य अनाभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

16.ऐडमायास्यम्- [1 2 1] आइन्द्राम्। अगति स्तोभस्य स्वरे प्रत्यये सन्धौ, इति अस्यायमर्थः । आइ इन्द्रामिति प्राप्ते पर्वमध्ये स्वरे पूर्वस्य स्तोभस्य गतेर्लोप, इति। आइन्द्रामिति इन्द्रमच्छायां द्व्यक्षरायामादि-रिति,अस्यायमर्थः। अन्यत्र कनीयस्यादितो लोप इति न्यायेन श्रुशब्दस्य अवृद्धिप्राप्ते वृद्धिविधानम्। सर्वत्र सोमं सोमायां तृतीयस्यावृद्धिः। अत्र [1 2] श्रुष्टाऽ31इ । अत्र श्रुशब्दस्यावृद्धि प्राप्ते अत्र वृद्धिविधानम्।।

17.ऐडमायास्यम्- [1 2 1] आइपुरा ।अत्र व्यञ्जनप्रत्ययत्वात् गतिरेव।।

18.जराबोधीयम्- [2 1 2] परिसुवोवा- बोधीये सःपी प्र। स्वानः परिस्वानायामित्यादिनात्र विकृष्टः। त्वं कविर्द्धितीये दन्वते इति विकृष्टः। गीथोपान्त्यं त्रीषु बोधीये, बोधीये सर्वं। ये च तृतीयाद्वेष्णात् तृतीयम्। समानोदर्के इत्यादिनामत्र सामान्यम्। विशेषो नास्ति।।

19.शाक्वरवर्णम्- [1 2] आइषाम्। सद्भ्यं वर्णे इत्यत्र भ्यं शब्दः उच्चैः, वर्णसदस्येत्यादिनात्र सहस्रिणमिति णं शब्दस्यानाभावः।।

20.वषट्कारणिधनम्- एकस्याम्। [4 0 3 40 30 4 50] पुनानस्सोमधारया। षडन्ते तृचयोर्द्धे, पुना च, इत्यादिनात्र प्रस्तावाद्यस्य नीचविधानम्।। इति प्रथमः।।1।।

।। द्वितीयो विंशः।।

1.औपगवम्- [2] इन्द्रमच्छा।। हिष्ठीयगवसितेष्वित्यादिनात्र सर्वासु चतुर्थपर्वणि अन्त्यस्याक्षरस्य वृद्धिः। योनाववृद्धिः। ऋक्समाः पगवयोः इति। निधनोपायान्ता स्तोत्रीयास्सर्वत्रेति सर्वासूपायान्ते प्राप्ते पूर्वयोः स्तोत्रीययोः ऋक्समैवेत्यर्थः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2.निषेधः- श्रा[20]यन्तइवा ऽ3सू[20]रियाम्।। एकस्याम्, इव सूर्यं कीर्त्ये, इति अत्र विकृष्टः।।

3.गायत्रपार्श्वम्- एकस्याम्। आ[1]या[2]।। पार्श्वे क्वभिः पूर्वं सीये प्र। स्यृक्वभिः पार्श्वे इति सङ्कृष्टः। दादिस्तनि पार्श्वयोर्यथर्चस्सर्वत्र । इति अत्र प्रस्तावोद्गीथप्रतिहारेषु आदिभूतस्याक्षरस्य ऋक्स्वरवदुच्चनीच-प्राप्ते अस्तावहारयोरवश्ये हिस्तोमसुमरा प्रमरजी च । इत्यत्र प्रस्तावादिभूतस्य अकारस्य ऋक्स्वरवन्नीचे प्राप्ते उच्चविधानम्। गोष्ठप्रतोदेत्यादिनात्र यथर्चविधानम्। व्यात्परमतिहारमेके इति, अत्राउवायाः परं गतिर्भवति।।

4.आमहीयवम्- एकस्याम्। इ[5]न्द्रा[0]या[2]ऽ3इ[40]न्दो[5]मरुत्वताइ।।

5.कालेयम्- प[5]वस्वा[2]ऽ3म[4]धु[5]म[4]त्त[5]माः।। लेये पीत्वास्तावे न ए, प्र। नोत्तरयोर्व्रात्ये थादेश्च परमिति सर्वत्र कालेये उद्गीथद्वितीयस्य वृद्धिप्राप्ते अत्रोत्तरयोरुद्गीथ द्वितीयस्य अवृद्धिविधानम्।।

6.यौधाजयम्- तु[3]वे[2]ऽ31।। यौधामहे तुवे तीया प्र। सौभराभीवर्तेत्यादिनात्रोत्तमायां तुरीयस्य वृद्धिः। अभरादिर्यौधाजये सर्वमिति अत्र ह्रस्वस्य षष्ठस्यापि वृद्धिः। हिषस्त्वे सोमजये इति अःकारो वृद्ध इत्यादिनात्र प्रथमायां बर्हिष इत्यत्र पदान्तभूतस्य षश्शब्दस्य पदगाने प्राप्ते सन्धिगानविधानम्। अवितषभोरियाचतेति जयेहारादिति सर्वत्र प्रतिहारात्परस्य अक्षरस्य वृद्धि प्राप्ते अत्र प्रथमायां प्रतीहारात्परस्य र्यशब्दस्यावृद्धिः। भिर्नत्वे सोमजये इति निधने हीषीस्थँ सर्वमिति भिर्न इत्यत्र भिशब्दस्य प्रकृतिभावे प्राप्ते आइभावविधानम्। भरमाणो भ्यभीहि यौधे इति। अत्रोत्तमायां भरमाणो इत्यत्र णो शब्दस्य अस्तोभे सन्धिगाने प्राप्ते पदगानविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2Q Q 0 Q 0 Q 0 Q 2
7.दैर्घश्रवसम्- त्वेसोमप्रथमावृदोहावृगोहाओहाऽ3ए ।।
त्वेसोमाभ्यभिहीत्येतौ शब्दौ दैर्घे इत्यत्र त्वे,भ्ये,त्येतौ शब्दौ सङ्कृष्टौ। त्वे सोमदैर्घे पराङ्गमित्यादिनात्र वृदोह इति पूर्वकल्पः। वृगो इति विकल्पः, विकल्प प्रकरणेऽपि त्वेसोम दैर्घे गकार इति । एतयोर्दैर्घे चैवमिति। अभिसोमयोनौमान्त्ये। यज्ञासर्वमिति। अत्र ग्रहणात् सर्वासूद्वीथाद्युच्चम्। दैर्घे व्रात्याग्निष्टुतोर्द्धितीय सप्तमे कृष्टे इति। अत्र सर्वासूद्वीथाद्यपर्वणि द्धितीयसप्तमयोः कर्षणविधानम्। पाजे इत्यादिना स्तोभे परतः पूर्वस्याक्षरस्य वृद्धिः। ततर्दिथो दैर्घे इति पादान्त्यात् परस्वरो विकृष्यत इत्यनेन अत्र मध्यमायां उत्सन्नकं दैर्घेभ्यभिहीत्यत्रेति । उत्सन्नकमित्यत्र मकारस्य लोपः। दैर्घे व्रात्योत्तरयोश्चथे इति अत्रोत्तरयोः स्तोत्रीययोरोस्तोभे परतः पूर्वयोः क, या, इत्येतयोर्दीर्घविधानम्। धर्म दैर्घ इत्यत्र अनुस्वारस्पर्शेत्यादिना धर्मन्नित्यत्र धकारात्परस्य रेफस्य लोपविधानम्।।

2 न 2 2
8.द्यौतानम्- हाऽ3 - ओऽ3हाऽ3 - (2) - हाइ ।। द्यौताने मई, यवीयाभिः ह्माणि दिवे पूर्वं युगे प्र। द्धितीयात्कृष्टं तालव्यं हाइ शब्दश्चाभवति। ओस्तोभे थमादौ प्रत्यये इति अत्र प्रथमस्वरस्थे ओकारे प्रत्यये पूर्वयोः द्धितीयात्कृष्टयोः हाइ शब्दयोराभावः। उत्तरयोर्हाइ शब्दयोरनाभाव एव। इदं सङ्घात इत्यादिना योनिवदिदं सङ्घाते प्राप्ते आज्यदोह द्यौतानयोर्जुहूसङ्घातमिति, जुहुसङ्घातः प्राप्तः। सुरुपकृत्नु तृतीये जुहूसङ्घातः। द्यौताने तृचमध्ये, इति अत्र आद्यन्तपादौ विना साममध्यगतेषु पादेषु महित्रीणा द्धितीयस्यापि वृद्धिविधानम्। अचतुरक्षरेति। साममध्ये महित्रीणा द्धितीयस्य ह्रस्वस्य सर्वत्र वृद्धि प्राप्ते चतुरक्षरयोरवृद्धिविधानम्। स्तोभश्च सामाद्यस्सामान्ते यथा न्यायमिति नियमः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

3
9.मारुतम्- एँऽ5न्दुमि ।। मारुते एन्दुं, धाँसि माहि, श्रुधि, आश्वि, जज्ञे, प्र। तेन किः, इति अत्रोत्तमायां तृतीयपादादिभूतस्य न शब्दस्य योनिवन्नीचप्राप्ते उच्चविधानम्।।

20 1 2
10.जराबोधीयम्- स्वादिष्ठयोवा ।। बोधीये योनिं प्र। गीथोपान्त्यं त्रीषु बोधीये, बोधीये सर्वमयोनौ, इत्येतयोः सूत्रयोः अत्रापि समानम्। बोधीये मघोनामेके इति अत्रोत्तमायां उपद्रवे ह्रस्वस्य मकारस्य दीर्घत्वं केचिदिच्छन्ति।।

1
11.श्रुध्यम्- नदँवओऽ2द।। घ्न्यानां श्रुध्ये, इति घ्न्या शब्दोऽत्र सङ्कृष्टः क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादादिः यथर्चम्।।

40 3
12.यज्ञायज्ञीयम्- देवोऽ5वः।। ज्ञीये सिञ्च प्रचे वह्निं प्र। ज्ञीय वयमूर्जस्तँ सिञ्चमातधीतिम्। अत्र प्रथमायाः कर्षणात् परमुच्चप्राप्ते सिञ्च इत्येते नीच भवतः। ज्ञीये स्वासु पुनादेव इति। अत्र सर्वासूद्गीथाद्यस्य वृद्धिः । थमोच्च द्वितीयं ज्ञीये सर्वत्रेति प्रथमोच्च द्वितीयस्य सर्वत्र कर्षणप्राप्ते तत्र ककुभिश्चतुर्थमिति। तत्रोत्तरयोः ककुभोः प्रथमोच्चस्वरस्य चतुर्थाक्षरस्य अकर्षणविधानम्। गणगीतीनामन्ते निधनमिति नात्र निधनम्।।

4 3
13.यज्ञायज्ञीयम्- अदाऽ5र्शि।। अदर्शिज्ञीये तानित्यानि प्र। जातमार्य ज्ञीये इति र्य शब्दस्सङ्कृष्टः। आद्यायामन्यत्रेति आद्यायामुद्गीथाद्यस्य वृद्धिः। उत्तरयोरवृद्धिः। ज्ञीये वयमूर्जस्तँसिञ्चमातधीतिं। इत्यादिनात्रोत्तमायां कृष्टात् परं मात इत्येते नीचे भवतः।।

5 0 2 4 0 5
14.आमहीयवम्- उत्तेबृऽ3हन्तोअर्चयाः।।

2 0 1 2
15.जराबोधीयम्- मन्द्रँहोतोवा ।। गीथोपान्त्यं इत्यादिना वृद्धिः ।बोधीये सर्वमिति प्रत्युत्क्रामः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

20 0 1 5
16.रौरवम्- पाहिनोअग्नाऽ3आइकाऽ234या ।। रवेघं षष्ठमिति प्रस्तावषष्ठस्य सर्वत्र दीर्घस्य वृद्धिप्राप्ते अनोवेति अत्र तृतीयायां प्रस्तावषष्ठस्य नो शब्दस्यावृद्धिः। पाह्यूत्वामिच्च रौरवे, इति अत्र ह्यू,त्वे, इत्येतौ सङ्कृष्टौ। तसृभिः पाहिरौरवे, इति अत्र मध्यमायां प्रस्तावे सृशब्दस्य आर्भावः। प्रस्मवाजेषु नस्सर्वत्रेति वाजेषुनो अव्येत्यत्रनो शब्दात्परस्य अकारस्य सर्वत्र विश्लेषे प्राप्ते। रवोद्गीथे तु प्रश्लेषः इति अत्र तृतीयायामुद्गीथे अकारस्य प्रश्लेषः।।

20 0 0 0 0 0 0 2
17.दैर्घश्रवसम्-एकस्याम्। पाहिनोअग्नएंकयाओहाओहाऽ3एं। एतयोर्दैर्घे चैवमिति। अभिसोमा योनौमान्त्ये। यज्ञा सर्व इति। एतेषु ग्रहणात्। अत्रोद्गीथाद्यस्योच्चम्। दैर्घे व्रात्याग्निष्टुतोर्गीथ द्वितीयसप्तमे कृष्टे। अत्र द्वितीयसप्तमयोः कर्षणम्। पाजे थे भे दैर्घे, परे सर्वत्र ।इति पूर्वस्तोभे प्रत्यये पूर्वस्य अक्षरस्यावृद्धिः।।

20 1 2 0 1 2 1
18.समन्तम्- पाहिविश्वस्माद्रक्षसाः[1]।। मन्तेर्द्धि प्र। वादौमन्तेत्या दिनात्र प्रस्तावादिर्नीचैः ।मन्तेप्रत्नमित्यादिनात्र गतिः। वैच्छन्दसे मन्ते दिवानक्तं प्रथममिति। अत्रोद्गीथाद्य पर्वणः सर्ववर्णानां प्रथमस्वर विधानम्। दान्त्यस्य तु वृद्धिर्विष्टारपङ्क्त्यामिति अराव्ण इत्यत्र णशब्दस्य पर्वमध्यगतस्य पादान्तभूतस्य वृद्धिविधानम्। प्रस्मवाजेषु नस्सर्वत्रेति अत्र विश्लेषः।। पाह्यूत्वामिच्च रौरवे, इति त्वां शब्दोऽ विकृष्टः। मन्ते च त्रीणि तृतीये । मन्ते राधाया अन्त्यानि वर्धन्ते सूत्रद्वयेनापि ऊहे सर्वत्र तृतीयपादे अन्त्यानि त्रीण्यक्षराणि वर्धन्ते। योनौ मध्यगतस्य वृद्धिः।।

30 2
19.यौधाजयम्-पाहाऽ31इ।। यौधामहे प्र। सौभरावर्तेत्यादिना सर्वत्र तुरीयस्य दीर्घाक्षरस्य वृद्धि प्राप्ते अपीयू वाजेष्वित्यत्र जेशब्दस्यावृद्धिविधानम्। अभरादिर्यौधाजये सर्वमिति मध्यमायां

20 1 2 0 1 2 1
1.ख- पाहिविश्वास्माद्रक्षसाः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रस्तावषष्ठस्य भिशब्दस्य वृद्धि प्रतिषेधः। जये हारादिति। सर्वत्र प्रतिहारात्परस्य अक्षरस्य वृद्धिप्राप्ते अविताषभोरियाचता, इति अत्र प्रथमायां प्रतिहारात्परस्य च शब्दस्य अवृद्धिः। प्रस्मवाजेषुनस्सर्वत्रेति अत्र विश्लेषः । प्रस्मवाजेषु न श्वेति षुनोव इत्यत्र नशब्दस्य तृतीयायां (उद्गीथे द्वितीयायां)उपद्रवे भक्त्यन्तः पदगीतस्सर्वत्रेति पदगाने प्राप्ते सन्धिगानविधानम्। बभ्रोरे,अतरो,वसो इति वसो इत्यत्र सोशब्दस्य अत्र मध्यमायां प्रस्तावान्ते आउभावः। उपद्रवे उद्गीथे च निधनत्वान्निधने हीषीस्थमिति प्रकृतिभावः।।

                    1 2
20.औशनम्- आइनाः।।शने दर्शतिरुशतिं सुभरेति वर्णैर्द्वितीयः प्र। शने राजन् प्लवते इति अत्र राजन्निति जकारास्य विकल्प पक्षे प्लुतविधानम्। अस्मिन्नर्थे वृद्धावृद्धप्रकरणेप्युक्तम् । इनोराद्यायां च विकल्पे, इति पदान्ते काम्पा इत्यादिना कर्षणम् । त्रिष्टुभिचोताया मित्यादिना वृद्धिः। अत्रापवादो नास्ति।।इति द्वितीयः।।2।।

।।तृतीयो विंशः।।

                    3   0 0 4   2   4   5
1.वामदेव्यम्- काऽ5या-तेआऽ3ग्नेऽ3अङ्गिराः।। देव्येग्ने प्र। विच्छन्दस्सुच देव्ये इति विच्छन्दसां विशेषविधानात् ।अत्र सच्छन्दसि सर्वासु ऊहगाने योनिवत्स्वराइति न्यायेन योनौ चतुर्थपर्वणि गीतिवत् न विशेषः। ओवौकारयोरनन्तर इत्यादिना आभावे प्राप्ते देव्येत्वनृग न्तीय इत्यादिनात्र ऋङ्मध्यभूतयोर्नामिविसर्जनीयस्पर्शयोरनाभावः।

                  1   50 40 5
2.नौधसम्- आऽ234 । ग्नआयाहिय[1]।। धसे ष्मतीबर्हिरन्ति केशमग्निम्। प्र। अग्निभिश्चरन्त्यस्तावे, इति अत्र विकृष्टः। धसे वेकृष्टाद्धिस्तो, इत्यादिनात्रोत्तरयोः कृष्टात्परं जिष्ठन्त इत्येतयोरुच्चम्। शिष्टानि पर्वशेषाणि नीचमित्यर्थः। अग्निष्टुन्नौधसे ध्यमायाम्मागाय-

      5 0 40   5
ख-1.ग्नआयाहिया ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तान्धामित्यादिनात्र मध्यमायां तृतीयपादे मागायतास्थाने हाइत्वा इति आन्धा भवति। असावि देव द्वितीये आन्धा, इन्द्रायसाम प्रथमे मागायता। जा स्वरोत्पत्तिश्च प्राक् प्रहूयसाया इति, अत्र मध्यमायां तृतीयपादे प्रहूयसायाः पूर्वं, सू इति जास्वरविधानम्। मान, ऊर्ज इत्येतौ शब्दौ नौधसे। भक्त्यन्तः पदगीतस्सर्वत्रेति भक्त्यन्तानां पदगाने प्राप्ते अत्र तृतीयायामूर्जो इति जोशब्दस्य उत्तमसादृश्यात्। पूर्वपदेष्विति न्यायेन भक्त्यन्तभूतस्य सन्धिगानविधानम्। वाचि सर्वमोभवतीति सर्ववर्णानामोभावे प्राप्ते अनुस्थमिति अत्रोत्तमायां पूर्वमिति पूर्वशब्दस्य नोभावः।।

5 0 2 4Q 5 4Q 5
3.कालेयम्- अच्छानाऽ3श्शीरशोचिषाम्।। लेये योच्चादिर्यस्या-च्छोत्तरयोः परिप्रत्नायां च, इति अत्रोत्तरयो स्तोत्रीययोस्तृतीयेपादे तृतीयं पर्वतृतीयात् आरम्भ एव।। प्रथमायां चतुर्थारम्भः। मर्त्येषु दानाय वार्यायां लेय श्रायन्तीययोरिति। वृद्धात्परौ य्वौ लुप्ताविति अनेन लोपप्राप्तस्य मर्त्येष्विति वकारस्य लोपः।।

1 0 2
4.सँहितम्- अदाभ्यःपुरः।। सँहितेऽग्निस्तूर्णी अग्निः प्र। सँह्यादाभ्यस्तिस्रश्चेति, अत्रोत्तरयोः प्रस्तावादिः नीचैः। सकारलोप श्रवस्तमस्साह्यान्विश्वायां सँहिते, इति अत्रोत्तमायां श्रवस्तम इति तकारात्पूर्वस्य सकारस्य लोपः।।

2 1Q 2 4 5
5.सफम्-भद्रोनोऽ3अग्निः।।

2 1Q 2 4 5
6.पौष्कलम्- अग्नेवाऽ3जस्य।। ष्कले योनावित्यादिनात्रोद्गीथ द्वितीयस्यावृद्धिः। हितपौष्कलेत्यादिनात्र तृतीयपादे जा शब्दस्य प्रत्युक्रामे प्राप्ते अभिगानविधानम्।।

1 Q 0
7.श्रुध्यम्- अग्नेवाजाऽ2स्य।। श्रुध्यमानवयोश्च द्वितीयं, श्रुध्ये च नौ, कौत्सदँष्ट्रेत्यादिना च, अत्र प्रथमायां तृतीयपादे द्वितीयस्य स्मे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शब्दस्य वृद्धिविधानम्। नान्यत्रेत्यर्थः। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादादिः यथर्चमुच्चनीचम्।।

8.श्यावाश्वम्- वि[3]शो[2]ऽ31।।एकस्याम्।वाश्वे दुरि प्र।श्यावाश्वे च तुरीयस्य दीर्घस्य वृद्धिः।।

9.आन्धीगवम्- वि[2]शो[0]विशो[0]वोऽ1अताइथा[2]इम्।। धीगवेस्ताव षष्ठं प्रत्युत्क्रामति सर्वत्रेति सर्वत्र प्रस्तावषष्ठस्य प्रत्युत्क्रामे प्राप्ते चमं योनाविति अनेन प्रथमायां प्रस्तावपञ्चमस्य प्रत्युत्क्रामविधानम्। कौल्मलान्धीगवेत्यादिनात्र उद्गीथाद्युच्चम्। ऋगन्तीयस्पर्श इत्यादिनात्रा द्ययोः स्तोत्रीययोर्नामि विसर्जनीयस्यानाभावः। प्रशँसन्ति विशीयान्धी गवयोरिति अनुस्वारस्पर्श इत्यादिना प्रशँसंतीत्यत्र शकारात्परस्य अनुस्वारस्यातिहारे प्राप्ते लोपविधानम्। दुर्यन्त्युद्यता चान्धीगवे, इति अत्राद्यन्तयो स्तोत्रीययोः यँ त्यु इत्येतयोः सङ्कृष्टविधानम्। हव्यान्यैरयदित्यत्र आइभूतनिशब्दात्परस्य दीर्घवृद्धोपहित इत्यादिना आइभूत आकारे परतः यकारमापद्यते। नायाइ इति।।

10.यज्ञायज्ञीयम्- वि[4]शो[3]ऽ5वि।। ज्ञीये प्रियं दुरि प्र। आद्यायामन्यत्रेति। अत्राद्यायामुद्गीथाद्यस्य वृद्धिः। उत्तरयोर्न। न्यैरयत् ज्ञीये, इति अत्रोत्तमायां न्यै शब्दः सङ्कृष्टः। उत्प्रशँसायां विशी-यज्ञीययोरिति। अत्रोत्तमायां उद्याता इति उकारात्परस्य पदादिभूतस्य तकारस्य पूर्वाङ्गे प्राप्ते अतिहारविधानम्। अविशोत्तमायां सोमाद्ययोश्चेति अस्यायमर्थः। दसे ज्ञीये हाराद्योनिवत्। इति वैच्छन्दसे यज्ञायज्ञीये सर्वत्र प्रतिहारात्परं योनिवदक्षरं भवति। अत्रोत्तमायां प्रतिहारात्परं सप्ताक्षरं भवतीत्यर्थः।।

11.यज्ञायज्ञीयम्- स[4]मा[3]ऽ5इद्धम्।। परेज्ञीये कविंजसी समीयत्ते प्र। ज्ञीये दान्त, इति अस्यायमर्थः। यत्र पादान्त्यस्य अक्षरस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रस्तावान्तत्वं सङ्घटते तत्र प्रस्तावोपान्त्यस्य वृद्धिः। अत्र तु मध्ये प्रस्तावान्तत्वात् अन्त्यस्य वृद्धिः। आद्यायामन्यत्रेति आद्यायामुद्गीथाद्यस्य वृद्धिः। ज्ञीये वयमूर्जस्तँसिञ्चमातधीतिमिति। अत्रोत्तमायां कृष्टात्परं धीतिमिति एतयोर्नीचविधानम्। त्वां दूतं ज्ञीये इति। अत्र मध्यमायां प्रस्तावे सङ्कृष्टः। महेज्ञीये इति वृणीमहे इत्यत्र एकारस्यात्वम्।।

12.कावम्-समोवा।। कावे कविंजसि प्र। कावेगीथषष्ठं सर्वत्रेति सर्वत्र उद्गीथषष्ठस्य वृद्धिप्राप्ते त्वां दूतोदपप्तयोश्चेति। अत्र मध्यमायामुद्गीथ सप्तस्य वृद्धिः। वाचि सर्वमोभवतीति सर्ववर्णाना मोभावे प्राप्ते अनुस्थमिति अत्रोत्तमायां भुशब्दस्य नो भावः।।

13.वारवन्तीयम्- उपत्वाजाऔहोहोहाइ।। वन्तीये भिः प्र। वन्तीय इन्द्रे सन्त्वित्यादिनात्र प्रथमान्त्ययोर्देदिशतिरनाधृष्टा वित्यत्रागतौ। लान्दतीय यौक्तेष्वौकारे, इति। अत्रोत्तमायां प्रस्तावे वकारस्य दीर्घविधानम्। आदिद्धोदातेत्यादिना के शब्दस्य प्रत्युत्क्रामे प्राप्ते हितपौष्कलेत्यादिना अत्राद्यायां केशब्दस्याभिगानविधानम्। तृतीयादिन्यामित्यादिना सर्वत्र पादान्त्यानामाभावे प्राप्ते व्यञ्जेति अत्र औहोवायां प्रत्यये स्थि, न्दि, इत्येतेषां तालव्यानां पदमध्यगतानां आभावः। इवोपदृगुपत्वाजा वारवन्तीये,इति अत्र तृतीयायां दृशब्दस्यानार्भावः।।

14.जराबोधीयम्-उच्चातेजोवा।। वोवित्सर्वत्रेति प्र। गीथोपान्त्यं त्रीषु बोधीये। बोधीये सर्वमिति, अत्रापि समानं विश्वान्यर्य आ, बोधीय पर्ण ऐटत ऋषभेष्विति। दीर्घवृद्धोपहित इत्यादिनात्र तृतीयायां विश्वानीत्यत्र निशब्दात्परं यकारव्यवधान प्राप्तेऽत्र यकारस्य लोपविधानम्। सिषासन्त इत्यत्र तशब्दस्य पदान्तत्वात् पदगानमेव।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2 0 1 2
15.जराबोधीयम - इषन्तोकोवा ।। गीथोपान्त्यमित्यादिना पूर्ववत् ।।

4 3 40 0 3 40 5 0
16.वषट्कारणिधनम्-अभित्वापूर्वपीतये ।। षडन्ते तृचयोर्द्वे द्वे, इति आद्ययोः प्रस्तावादिर्नीचैः। पादोऽभ्यस्तो वषडन्ताभ्यस्ताकूपार राजनपयसामिति । अत्र पादाभ्यासः प्रस्तावः।।

5 0 2 40 5 40 5
17.गौङ्गवम्- प्रसोमाऽ3देववीतयाइ।। गवेतृतीय इति अत्र सर्वासु तृतीय पादादिः नीचैः। वाचि सर्वमोभवतीति सर्ववर्णानामो भावे प्राप्ते अनुस्थमिति अत्राद्यायां धुशब्दस्याभावो न भवति। गवतृतीय दशमं कृष्टं सर्वत्रेति तृतीयपादे सर्वासु दशमस्याक्षरस्य विकल्पपक्षे कर्षणं भवति। प्रियस्सूनुर्द्वैगतगौङ्गव-योरिति। ओवौकारयोरित्यादिना सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अनाभावप्राप्तस्य नुशब्दस्य पुनराभावविधानम्। हिन्वन्त्यप इति आदिनात्रन्त्य शब्दः सङ्कृष्टः। गृविस्सर्वत्रेति प्र।।

1 0 0 0 1
18.हारायणम्- शग्ध्यूष्वौहोऽ2इशचीपताइ।। हारायणे नहि प्र। हारायणेन्द्रं पवमान इत्यादिनात्र सर्वासु गतिः। स्यपुरुकृच्छग्ध्यूहार मानवयोः । अत्र कृच्छब्दस्य अनाभावविधानम्। परिमर्धिषत् स्वासु हारायणे इति अत्रोत्तमायां मर्धिषदिति पदान्तस्य तकारस्य लोपः। शग्ध्यू हारमानवयोरिति। अत्राद्यायां शग्ध्यू शब्दः सङ्कृष्टः।।

5 4 2 40 50
19.कौल्मलबर्हिषम्- तुवाँऽ3हौऽ3एहिचेरवाइ।। कौल्मे स्त्राणि प्र। त्वँहि कौल्मे, इति हिशब्द स्सौभरामहीयव कौल्मलनामिति। सूत्रद्वयेनापि हिशब्दस्य ओभावविधानम्। आइ प्राप्तमोइ भवति। कथमाइ प्राप्तमिति आशंक्य तालव्यमाइ यद्वृद्धमिति आइभावे प्राप्ते सति आइ एही इति स्थिते गतिश्चान्तस्थमापद्यते। इकोयणचि, इकस्थाने यणादेशो भवति अचि परतः संहितायां विषये , किञ्च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्तस्थाकारतां प्राप्तोनि सन्धौ अचि परत इति सामतन्त्र वचनात् ,अन्तस्थां प्राप्नोति। यरलवा अन्तस्थाः। इक् स्थाने यणादेशो भवति यथासंख्यं, इकारस्य यकारः। अय् ए, इति स्थिते । असवर्णयोः स्वरयोर्मध्यगताया अन्तस्थाया लोपो भवति वचनात् । आ,ए,इति स्थिते त्वँहिकौल्मले इति हिशब्दस्सौभरामहीयव कौल्मलानामिति फुल्लकारेण सूत्रद्वयेनापि ओभावविधानम्। कौल्मलान्धीत्यादिनात्रा-द्यायामुद्गीथादिर्नीचैः। अन्यत्र न भवति। कौल्मलइष्टासिकृणुषा-मिति। योनौ चतुर्थोच्च पर्व ऊहे प्रथमोच्चमापद्यते। योनौ तृतीयपादाद्यं चतुर्थोच्चं पर्व ऊहे सर्वत्र द्वितीयादि प्रथमोच्चं भवतीत्यर्थः। कौल्मे स्तावे इति। उदिन्द्राश्वमिष्टयेत्यत्र प्रश्लिष्ट अकारः। प्रस्तावे विश्लिष्टः। उपद्रवोद्गीथयोः प्रश्लिष्ट एव। एतदेवोदाहरणं यूथादानायां कौल्मल-कण्वबृहतोरिति अत्र तृतीयायां कृशब्दस्यानार्भावः। गायन्तो यूथादानायां कण्वबृहतीति ।जम्भे चेति। अत्र तृतीयायां प्रश्लेषः।।

20.आशुभार्गवम्- प्रसोमासोम (1 Q 20 1Q)।। नाध्व तव प्रसो सनः, इति अत्र प्रस्तावाद्युच्चं, आशुभार्गवे त्रक्षरोद्धा इत्यत्र प्रस्तावाद्यं पर्व पञ्चाक्षरम्। योनौ चतुरक्षरम्।।इति तृतीयः।।3।।

==***==

।।चतुर्थो विंशः।।

1.सत्रासाहीयम्- प्रधाऽ34 (3 2) ।। साहीये शताद्वितीयमित्यादि सामान्यम्। स्वः सर्वत्रेति अत्र स्वशब्दात् परस्य विसर्जनीयस्य अतिहारः।।

2.श्यावाश्वम्- एकस्याम् ।। प्रसूऽ31 (3 2) । नभृप्रसुन्वानायामित्या-दिनात्र भृशब्दस्यानार्भावः।।

3.औदलम्- प्रसुन्वाना (1 2 0 1) ।। दलेत्के। त्रे सर्वत्रेतिच प्र। न भृ प्रसुन्वानायामिति पूर्ववत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

4.यज्ञायज्ञीयम्- प्र[4]दैं[3]ऽ5वः।। ज्ञीयेप्रदैत्यानि तानि प्र। ज्ञीये वयमूर्जेत्यादिनात्राद्यायां कृष्टात्परं मात इत्येतयोर्नीच विधानम्। शर्मणि प्रदै ज्ञीये इति, यकारे च प्रत्यये इत्यादिनात्र मध्यमायां प्रस्तावे णिशब्दस्य पदान्त्यस्याप्याइ भावे प्राप्ते आभावविधानम्। जातमार्य ज्ञीये इति ,र्यशब्दस्सङ्कृष्टः।।

5.दैर्घश्रवसम्- यौ[26]विश्वा[0]दयतें[0]वस्वौ[6]हा[0]औ[6]हाऽ3एँ[2] ।। त्वग्नये स्वासुदैर्घेमध्यमायामिति अत्र मध्यमायां त्वशब्दः सङ्कृष्टः। योनौ मान्त्ये इति। अत्रोत्तरयोरुद्गीथादिर्नीचैः। योनौ द्वितीय षष्ठे इति। प्रस्तोतृतीयं मर्मृचतुर्थमिति, अत्र प्रथमायामुद्गीथ द्वितीयषष्ठयो-र्मध्यमायां तृतीयस्य उत्तमायां चतुर्थस्य कर्षणविधानम्। मर्मृस्वासु दैर्घे इति अत्र मध्यमायां मृं शब्दस्यानार्भावः।।

6.अभीवर्तः- शं[5]ग्धा[4]ऽ3ऊँ[2]ऽ3षुशा[4]ची[50]पतो[4]वा[5] ।। वर्ते देवस्तवे प्र। सौभराभीवर्तेत्यादिनात्र सर्वासु तुरीयस्य ह्रस्वत्वादवृद्धिः।।

7.हाविष्कृतम्- स्वा[20]दिष्ठया[0]मदा[0]हा[0]उष्ठा[1]या[2] ।। मदिन्तमदिष्ठ नोगि हाविष्कृते, इति। अत्र प्रथमायाम्मदिष्ठयेत्यत्र अवृद्धस्य दिशब्दस्य हादौ स्तोभे परतः आभावविधानम्। कृते चापदान्त इति। अत्राद्ययोः पदमध्यगतस्य ह्रस्वस्य हादौ स्तोभे दीर्घविधिः। स्वादि प्रथमायां चेति। अत्र प्रथमायामगतिः। द्रोणे सर्वत्रेति प्र। पर्षि हाविष्कृते वरिवोधायामिति। हादौ स्तोभे परतः पर्षीत्यत्र षिशब्दस्य पदान्तस्यापि आभावविधानम्। कर्षणेत्वित्यादिना कर्षणवृद्धे न भवतः।।

8.हाविष्मतम्-हाँ[20]वस्यप्रत्ना[0]मनुद्युतँहाउ।।

9.सँहितम्- य[1]स्ते[0]म[2]दो[0]व । सँहितेस्थाभिः प्र। दक्षसंहितयो स्वादिमान्त्ययोरित्यादिनात्र सर्वासु प्रस्तावाद्युच्चम् । श्येन-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्सम्मिश्लायां सँहिते इति अस्तोभे सन्धिगाने प्राप्ते श्येन इति नोशब्दस्य पदगानविधानम्। निमायस्ते हिते इति। निधने हीषीस्थँ सर्वत्रेति सर्वत्र प्रकृति प्राप्ते अत्रोत्तमायां निशब्दस्याइभावविधानम्।।

10.श्यावाश्वम्- अयाऽ31म्।। (3 2) वाश्वे प्रियाषणीः प्र। अयावास्वासोमधा इति। श्यावाश्वे चेति। अत्र सर्वत्र तुरीयस्य दीर्घाक्षरस्य वृद्धि प्राप्ते अत्र मध्यमायां तुरीयस्य याशब्दस्यावृद्धिः।।

11.आशुभार्गवम्- प्रसोमासोवि।। (1 Q 20 10) आशुचेति। ऊहे सर्व प्रस्तावाद्यस्य नीचप्राप्ते नाध्वतवप्रसोसनः इति। अत्राद्यायां प्रस्तावाद्युच्चम्। आशुभार्गवे (त्र्यक्षरोद्धा)पञ्चाक्षरोद्धा इति। अत्र सर्वासु प्रस्तावाद्यपर्व पञ्चाक्षरम् ।योनौ चतुरक्षरम्।।

12.यौक्तस्रुचम्- इन्द्रमिद्दे वता (1 2 1 20 1) । स्रुचेन्द्रे ह न्द्रे, स्वा,प्र। स्रुचे मन्द्रेति। अत्र सर्वासु प्रस्तावाद्युच्चम्। प्रयत्यकीर्त्ये,इति अत्र विकृष्टः। समीमस्रुचे इति अत्राद्यायां समी इति वर्णद्वयस्य नीचविधिः। मध्यमायां मह्नारोदसी इत्यत्र मकारस्य च। इन्द्रस्सूर्य स्रुचनैप-कीर्त्येष्विति। अत्र र्यशब्दस्सङ्कृष्टः।।

13.गौतमम्- प्रसुन्वानायअन्धसाः।। (5 30 20 3 4 5) न भृ प्रसुन्वानायामित्या दिनात्र भृशब्दस्यानार्भावः। विभाषा प्रसुन्वाना द्वितीयायां च रथन्तरे इति। अत्र ण्योशब्दः सर्वत्र विकृष्टः। सरद्गौतमे इति, ओवौकारयोरनन्तर इत्यादिना आभावप्राप्तस्य सरदित्यत्र तकारस्यातिहारः। प्रसुन्वानायां सर्वत्रेति विश्लेषः। अत्र सर्वासु निधनभूतपर्वणां आदिभूतस्याक्षरस्य ऋक्स्वरवदुच्च नीचम्।।

14.आजिगम्- वृषापावा।। (1 2) जिगेहिन्वे प्र। वृषाजिगे प्र, इति अत्राद्यायामुद्गीथादिः नीचैः। आजिगसुरुपाणां चेति, अत्र सर्वासु उपद्रवद्वितीयस्य प्रतिषेधः । योनावेववृद्धिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

15.स्वारँसौपर्णम्-वृषापवस्वधाराऽ3या ।। स्वारे योनावित्या-दिना अत्राद्यायामुद्गीथादिः नीचैः । तृतीयोच्चान्त्यँ हिस्तोभे दीर्घी भवति, इति अत्राद्ययोः स्तोत्रीययोः उच्चान्त्यस्य ह्रस्वस्य हादौ स्तोभे दीर्घविधानम्। स्वस्सर्वत्रेति अत्र मध्यमायां स्वशब्दात्परस्य विसर्जनीयस्य पूर्वाङ्गप्राप्तस्यातिहारः। स्वारे पर्णे योनाविति। अत्र सर्वासूपद्रवद्धितीयस्यावृद्धिः।।

16.दैर्घश्रवसम्-पुनानस्सोमधारयाओहाओहाऽ3ए।। एतयोर्दैर्घे चैवमिति अत्राद्ययोरुद्गीथादिर्नीचैः। नीचात्परः षष्षेध मैधदैर्घवैयश्च पृश्निकौल्मलमद्रस्थानेष्विति असँहितस्य सिशब्दस्य पौरुमद्गे उच्चविधानम्। पृश्निदैर्घयोर्नीचविधानम्।।

17.सुरुपोत्तरम्- यस्तेमदौहोऽ2 - इया ।। पवस्वयस्ते मदायाँ सर्वत्रेति विश्लेषः। आजिगसुरूपाणां चेति। अत्र सर्वासूपद्रव द्वितीयस्यावृद्धिः। सम्मिश्लस्सुरुपे पदगीत ओष्ठ्य, इति सम्मिश्ल औहोऽ2, इति ओष्ठ्य परतः पदगीतो भवति।।

18.शङ्कु- तुवँहिया[1]।। शङ्कुन्यस्यप्येष सर्वः इति। अत्र सर्वासु प्रस्तावाद्युच्चम्। एकारे च नित्यं दीर्घत्वं शङ्कुनि, शङ्कुन्येकारे,इति सूत्रद्वयेनापि सर्वत्र णककारे परतः पूर्वस्य ह्रस्वस्य दीर्घविधिः । त्वँह्य च सौपर्णे इति। त्वँह्य, इत्येतौ शब्दौ विकृष्टौ। त्वङ्गदा शङ्कुनि, त्वँह्यङ्गदैव्येत्यत्र दैशब्दस्याभावः।।

19.सुज्ञानम्- पवस्वदा ।। सोमसुज्ञाने इति, ओवौकारयोरनन्तर इत्यादिना आभावे प्राप्ते अत्राद्यायां सोम इति सो शब्दस्यानाभावः।

---

1. ख-तुवँहिया ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पवस्वदा सुज्ञाने, इति तालव्यमाङ्यद्वृद्धं इत्यनेन आङ्भावे प्राप्ते पवस्वदेति देशब्दस्य आभावविधानम्। त्वां देवासोरित्येतौ शब्दौ वैश्वमनसश्रुध्ययोरिति अत्र विकृष्टौ। सुज्ञाने निधनमेकिने स्वरं। नन्दायात्सिब्यकर्षणं इति सूत्रद्वयस्यार्थं पूर्वमेवोक्तम्। नार्थान्तरमस्ति।।

20.आसिताद्यम्- अयम्पूषारयाङः।। (2 1 20 0 1) सिते रयिँ प्र। हिष्ठीयासितयोरयमिति आद्यायां प्रस्तावादिः नीचैः। षासिते इति। अत्राद्यायां प्रस्तावे उदात्तस्य षाशब्दस्य नीचविधानम्। सिते स्वयातमापुरुसुतमिति अत्र तृतीयायां प्रस्तावोपान्त्यस्य तशब्दस्योच्चविधानम्। अत्र उच्चस्य पुनरुच्चविधानात् अन्यत्र प्रस्तावोपान्त्यस्योच्चस्यानुच्च ज्ञापकार्थं। हिष्ठीय गवसितेत्यादिनात्र सर्वासु पञ्चमपर्वान्त्यस्य वृद्धिः। योनौ न द्वियकारस्संयुक्तेत्यादिना श्रवाय्यमित्यत्र व्यञ्जनभूतस्य वृद्धस्य पूर्वयकारस्यात्राकारादेशविधानम्।। इति चतुर्थः।।4।।

==****==

।।पञ्चमो विंशः।।

1.ऋषभःपावमानः- हाहाउच्चातेजा।। (20 0 0 0) षभे ददे प्र। कौल्मलान्धीग वेत्यादिनात्राद्यायां उद्गीथादिः नीचैः। विश्वान्यर्यआ पर्णैटतकूलीय ऋषभेष्विति। दीर्घवृद्धोपहित इत्यादिना विश्वानीति निशब्दात्परं व्यवधानप्राप्तस्य यकारस्य लोपविधानम्। वोवित्सर्वत्रेति प्र।।

2.गौषूक्तम- उच्चातेजातमौ।। (2 10 0 20 1 0) गौषूक्तेर्यआ, इति र्यआ प्रत्यये अगतिः। षूक्ते शुभ्रमुच्चैनाया, इति अत्र आद्यन्तयोः प्रस्तावादिः नीचैः। स्तोभव्यवहिते त्वलोपो यथोच्चान्त्यायामाभीकषूक्तयोरिति, अस्यायमर्थः। अत्र तृतीयायां विश्वानीति निशब्दात्परं अवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य द्व्यन्तस्थ परेतु लोप इति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लोपप्राप्तस्य यकारस्य स्तोभव्यवहिते लोप इति पुनरलोपविधानम्। थे षूक्ते द्वे साव्यामिति। अत्र सर्वासूद्गीथाद्युच्चम्। षूक्ते चेति गौषूक्ते सर्वत्र तृतीयपादादिभूतस्य यथर्चमुच्चनीचप्राप्ते अपरिप्रिवृषामोच्चा द्वयोरिति अत्राद्ययोः स्तोत्रीययोः पादादिभूतस्य ऋक्स्वरवदुच्चनीच प्राप्ते प्रतिषेधः । गते रेकारभावप्राप्ताया एकार निवृत्तिरिति। प्रकृतौ एकारप्राप्ताया गतेरूहे सर्वत्र एकारनिवृत्तिः। अत्र त्सिबापराभावात् कर्षणस्य न निवृत्तिः। गौषूक्ते तूच्चान्त्यायामूने षाशब्दाभ्यासात् सम्प्राप्तिरिति। मानुषाणामित्यत्र षकाराभ्यासः।।

3.उत्सेधः- अभिसोमासआयवाः (4 3 0 40 5 0 4 5)।। प्रत्नं प्र। पिबाभिसोद्वे श्रीरिति, अत्राद्ययोः प्रस्तावादिः नीचैः। सेधेभिसोमाद्ययोरिति अत्राद्ययोः स्तोत्रीययोः आद्यपर्वान्त्यग्निमीस्वरं भवतीति। मद्यद्विहि-ङ्कारेत्यादिनात्र मद्यशब्दो विकृष्टः। सेधे हाद्वितीयं यथर्चं भवतीति। उत्सेधे सर्वत्रोत्तरे हादौ स्तोभे परतः पूर्वाक्षरमृग्वध्रस्वं भवति। अषिणोदन इति सेधे षिणोदन इति सूत्रद्वयेनापि अत्र प्रथमायां णशब्दस्य दीर्घविधानम्। सर्वत्र पादतृतीय तुरीयं वृद्धम्। अन्त्यस्य चावृद्धमिति, सूत्रद्वयं सर्वत्राभिचारार्थम्। उवर्णन्तु न सर्वत्राभवतीति अत्र औहोवायां प्रत्यये मध्यमायाम्मु शब्दस्यानाभावः।।

4.वारवन्तीयम्- परिसुवाऔहोहाइ (2 0 0 1 2)।। लान्दतीययौक्ते ष्वौकारे, इति औकारे परतः पूर्वस्य ह्रस्वस्य दीर्घविधानम्। स्वानः परिस्वानायामित्यादिनात्र स्वाशब्दो विकृष्टः। त्वंकविर्द्वितीये दन्वते इति त्वं शब्दोऽत्र विकृष्टः। वन्तीये कविरिति प्र। वन्तीयइन्द्रे सन्तु इत्यत्र द्वितीयायां मधुप्रजा अगतिः।।

5.श्रुध्यम्- प्राणाशिशूऽ2र्म (10 0)।। पाष्योः क्रोशे इत्यत्र विकृष्टः। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीय पादादिः यथर्चम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2 0 0 2
6.निषेधः- पुरोजितीवो़ऽ3अन्धसाः।।[1]

2
7.वाजदावर्यः- परिप्रधा।।यानिवारे तानिवरीषु क्रत्वे च प्र।।

5 2 4 5
8.आमहीयवम्- पवमाऽ3नस्यर्जिघ्नताः।।

2 2 2 2 0 1
9.पार्थम्- औऽ3होऽ3होइ ।। साकमुक्षो ।। यानि सिष्ठे तानि पार्थो अक्षरे द्वे पार्थे। त्रिष्टुभिचोतायामित्यादि सामान्यमेव। अत्र विशेषो नास्ति।।

4 3 0 4 0 5 0
10.श्यैतम्- इमाउत्वापुरु ।। श्यैते द्वे योनावित्यादिनात्र सर्वासु प्रस्तावादिर्नीचैः। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादादिः यथर्चमुच्चनीचम्। शुचय इमाउत्वायां श्यैते इति अस्तोभे सन्धिगाने प्राप्ते पदगानविधानम्। ग्रहणानि श्यैते योनौ प्ररे इति। अत्र सर्वासु प्रतिहाराद्युच्चम्। योनावेव नीचम्। श्यैते हिम्मा ज्ञीयवदिति। अत्र योनिवदाये भावो न भवति। समुद्रः प्रथमस्वर इमाउत्वायां श्यैतनौधसयोरिति अत्र मध्यमायां समुद्र इत्यत्र प्रथमस्वरे प्रत्यये आकारस्यात्वम्।।

5 0 2 4 5 0 4 5
11.कालेयम्- यस्यायाऽ3म्.विश्वाअर्याः ।। लेये र्ये तुभ्येत् ज्यते अस्मे प्र। आर्यः कालेये । इति अत्र आकारस्य अत्वविधानम्। अत्वे कालेये । इति विश्व इति श्वशब्दस्य ह्रस्वस्य दीर्घविधिः। आर्यः कालेये इति र्यशब्दः सङ्कृष्टः। लेये यस्याच्छोत्तरयोः परिप्रत्नयोश्च। अत्रोत्तरयो स्तोत्रीययोस्तृतीयपादे तृतीयं पर्वतृतीयारम्भ एव। प्रथमायां चतुर्थारम्भः। ओकारस्य कृतलेययोरत्वमिति। अत्राद्ययोः स्तोत्रीययोः प्रतिहारे सोशब्दयोरत्वविधानम्। पदगीतस्त्वसिद्धित्वादिति।।

ख-1. नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 20 0
12.सँहितम्- पवमानोअ।। सँहिते ज्योतिः ज्योतिः प्र। संह्यदाभ्यस्तिस्रश्च,इति अत्र सर्वासु प्रस्तावाद्युच्चम्। स्वस्सर्वत्रेति स्वर्दृशेइति स्वशब्दात् परस्य पदान्तस्य विसर्जनीस्यातिहारः।।

20 10 2 4 5
13.सफम्- आसोताऽ3परि।। सफेदेव प्र, सफपौष्कलयो-र्वेहीष्यां, इति प्रस्तावे हीषीप्रत्यये ह्रस्वत्वादवृद्धिः। प्र-तृ-जा-प्लुतोवलोपश्च द्वि-त्रि-त-नीचः फे। इति आसोता तृतीयायामृतेन योनिवन्मध्ये जा प्लुतः प्रान्त्ययर्योर्वलोपश्च आद्य उच्चैस्तकारः। वशब्दस्सफे प्रियं देवायां प्रथमतृतीययोर्विकल्पयोरिति सूत्रत्रयस्या-प्ययमर्थः। अत्रोत्तमायां ऋते नयऋतजातोविवावृधे, इति अत्र प्रथमपक्षे जकारः प्लुतः । वकारस्यलोपः। तकारस्योच्चम्। द्वितीये तशब्दस्य नीचत्वम्। वकारस्य लोपः। तृतीये विकल्पे तशब्दो नीचः। जाप्लुतो वकारलोपश्चेति।।

10 0
14.श्रुध्यम्- गोमन्नाऽ2इन्दो।। अकारो गोमन्नश्रुध्ये इति। गोमन्नित्यत्र विसर्जनीयाकारयोर्लोपः। गोमन्नश्चेति। श्रुध्ये स्तावे तुरीये ष्यते सर्वत्रेति सर्वत्र प्रस्तावे तुरीयस्य कर्षणे प्राप्ते अत्र प्रथमायां तृतीयस्य कर्षणविधानम्। क्रौध्यष्टम्भेत्यादिना सर्वासु तृतीयपादादिः यथर्चं उच्चनीचम्। एष एव शब्दस्सङ्कृष्टोगोमन्नष्कले इति। अत्र मध्यमायां नर्य इति र्य शब्दो विकृष्टः। अकारो सनोमित्वायामदेवँ श्रुध्यत्रैतष्कलेष्विति। अत्रोत्तमायामस्मदा अदेवमिति अकारस्य लोपः।।

3 2 2 40
15.श्यावाश्वम्- अभाऽ31इ - नोऽ3वा ।। अयावास्वासोमधीति, श्यावाश्वे चेति अत्र सर्वत्र तुरीयस्य दीर्घस्य वृद्धि प्राप्ते अत्राद्यन्तयो स्तोत्रीययोः प्रस्तावतुरीयस्यावृद्धिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2 0 0 0 2
16.आन्धीगवम्- अभीनोवाजसाऽ1तामाम्।। ते सर्वत्रेति प्र। ऋगन्तीयस्पर्शेत्यादिनात्राद्यन्तयोस्पर्शानामिविसर्जनीययोरनाभावः।

2 1
17.कावम्- अञ्ञोवा।। गीथाद्यं कावेते । इत्यत्र प्रथमायां उद्गीथाद्यस्य वृद्धिः । नान्यत्र, महीनधारागोराजा च कावे । इति अत्रोत्तरयोः स्तोत्रीययोः धारा राजा शब्दयोः परस्य ऋचि प्रश्लिष्टाकारस्य विश्लेषविधानम्। अञ्ञ प्रपञ्चममिति कावे गीथ षष्ठं सर्वत्रेति उद्गीथषष्ठस्य सर्वत्र वृद्धि प्राप्ते प्रथमायामुद्गीथ पञ्चमस्य वृद्धिविधानम्।।

12010 2 0 1 020 10
18.आष्टादँष्ट्रोत्तरम्- परीतोषिञ्चतासुतमैयादौ ।। दँष्ट्रे चेति। सर्वत्र प्रस्तावाद्यस्य नीचे प्राप्ते अनिन्द्रं तवात्वारं पर्यां प्रान्त्ययोरिति। अत्र प्रथमान्त्ययोः प्रस्तावाद्युच्चम्। द्रिदँष्ट्रे, ममद्रिभिरित्यत्र ऋक्स्वरे स्वरितस्य साम्नि उदात्तात्परं उच्चैर्भवतीति उच्चप्राप्तस्य पुनर्नीचविधानम्। गोष्ठप्रतोदेत्यादिनात्र पादादिर्यथर्च उच्चनीचम् । नर्यः परीतायामित्यादिना र्य शब्दः सङ्कृष्टः। आष्टादँष्ट्रार्कपुष्प सङ्कृति यशस्सुप्रश्लेषः। इति, नोऽविभिस्सुषावसोमायां सर्वत्रेति सर्वत्र विश्लेषे प्राप्ते अत्र नो शब्दात्परस्य अकारस्य पुनः प्रश्लेषविधानम्। चित्वा नवे इति ।अत्र प्रश्लेषः।।

20 10 20 10 2 1
19.कण्वरथन्तरम्- आभित्वाशूर नोनुमाः।। ण्वतरइन्द्र नोद्गीथे प्र। स्तावाद्यं कण्वतरे, इति सर्वासु प्रस्तावाद्यस्य ह्रस्वस्य दीर्घविधानम्। चमन्न जातोदब्धस्सुदेवोव इति ण्वतरे तुरीयं नीचं सर्वत्रेति। सर्वत्र प्रस्तावतुरीयस्य नीचप्राप्ते अत्रोत्तमायां प्रस्तावे पञ्चमस्य नीचविधानम्। ओष्ठ्यश्चान्तःपदिको नाउभवति सर्वत्रेति अत्र पदमध्यभूतस्य सुस्थुष इत्यत्र सुशब्दस्यानाभावः। ईशानकण्वतरे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तावे। इति तालव्यमाइयद्वृद्धमित्यनेन वृद्धस्य तालव्यस्य आइभावे प्राप्ते ईशानमिन्द्रेत्यत्र वृद्धस्य ईकारस्याइभावविधानम्।।

20 0 0 0 0 0 2
20.सदोविशीयम्- आनोविश्वासुहव्यमोहोओहाऽ3एँ ।। सदोविशीये स्तावहारोपायावान्ता इति। ऊहे सर्वत्र प्रस्ताव प्रतिहारोपद्रवेषु अत्र स्तोभावकारा भवन्ति। थादौ पूर्वौ हान्तौ इति, उद्गीथे पूर्वहान्तौ भवतः। गोष्ठप्रतोदेत्यादिनात्र पदादिभूतानां वर्णानां ऋक्स्वरवदुच्चनीचप्राप्ते सदोविनरे परमज्याः पुत्रस्य मत्सरास इति अत्राद्ययोः स्तोत्रीययोः प्रतिहारपादादिभूतयोः पशब्द प्रशब्दयो रनुदात्तविधानम्। शीये च नकृदँहदिति। अत्रोत्तमायां कृच्छब्दस्योच्च विधानम्। ऋक्स्वरे उदात्तस्य पुनरुच्चविधानात् अन्यत्र यथर्चगीत पर्वान्त्यस्यानुच्च ज्ञापनार्थं। युज्यादोविशीये इति ज्याशब्दस्सङ्कृष्टः। त्साइबायामुपद्रव इति कर्षण वृद्धे न भवतः।। इति पञ्चमः।।5।।

==*****==

।। षष्ठो विंशः।।

3 2
1.श्यावाश्वम्-पराऽ31इ।। स्वयवाश्वे इति, स्वयशसमित्यत्र स्वशब्दस्य मन्द्रस्वरविधानम्। अन्यत्र चतुर्थ एकं। मन्द्र एकं। अत्रोभयमपि मन्द्रे, इत्यर्थः। अयावास्वासोमधा इति श्यावाश्वे चेति तुरीयस्य दीर्घस्य वृद्धि प्राप्ते अत्र तृतीयायामिन्द्राय सोम इत्यत्र सोशब्दस्यावृद्धिविधानम्। केवलसोशब्दग्रहणे ते पूतासो सुष्वाणासो इत्यत्र चावृद्धि प्रसङ्गस्सम्भवति। तन्निवृत्यर्थं सोम इति द्व्यक्षरग्रहणम्।।

2 2
2.आन्धीगवम्- परित्यँहर्यताँऽ1हाराइम्।। धीगवे स्तावषष्ठं प्रत्युत्क्रामति इत्यादिना कौल्मलान्धीत्यादि आन्धीगवे च द्वितीयमित्यादि सामान्यमेव। न विशेषः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

3.कावम्- पवोवा।। कावेस इत् प्र। व्यस्थिरन्षडिडे, इति अत्र विकृष्टः। अवन्त्यस्य स्वारकावज्ञीययोः इति अत्र अवन्त्य शब्दस्सङ्कृष्टः। वाचिसर्वमोभवतीति सर्ववर्णानामोभावे प्राप्ते अनुस्थमित्यत्र तृतीयायां प्रस्तावे रु शब्दस्य ओभावो न भवति। पृकारः श्निकारे,इति। श्निकारे परतः प्रशब्दस्यार्भावः। नान्येषां वर्णानाम्।।

4.दक्षणिधनंमौक्षम्- स्वादिष्ठयामदिष्ठया-औहोवा। मौक्षे योनिं प्र। दक्षसंहितयोः स्वादिमान्त्ययोरिति। अत्र मध्यमान्त्ययोः प्रस्तावादिर्नीचैः। दक्षणिधने गोषातिरिन्द्रायद्रोणे, इति अत्राद्ययोः स्तोत्रीययोरिन्द्रायपातवे द्रोणेसधस्थमित्यगतिः।।

5.विशोविशीयम्- यज्ञायज्ञाहिम्.वोऽ3अग्नयाइ।। विशीयेवाजे प्र। हिन्वविशीयोत्तरयोरन्त्यौ योनौ चान्ते इति अत्र सर्वत्र गतिः। ज्ञीयर्क्षु विशीये प्र। इति अत्र प्रथमायां उद्गीथादिर्नीचैः। ज्ञीयर्क्ष्वाद्यायां ज्ञीयवदिति अत्र प्रथमायां पञ्चम पर्वाद्यस्याक्षरस्य वृद्धिः। उत्तरयोः पर्वलोपः। चतुर्थपर्वाद्यस्याक्षरस्यावृद्धिः। अन्यत्रेति अत्रोत्तरयो-स्तृतीयपर्वणि वर्णत्रयस्याप्युच्चविधानम्। विशीये च पूर्वे, इति अत्रोत्तमायां प्रस्तावे हादौ स्तोभे परतः पूर्वस्य पदमध्यगतस्य ह शब्दस्य ह्रस्वस्य दीर्घविधानम्। अत्र मध्यमायां प्रस्तावे तृं शब्दस्य पदान्तत्वात् ह्रस्वमेव। ष्वविता दाशेमहायां ज्ञीय विशीय वारमहामित्र तरेषु इति अत्रष्वशब्दस्सङ्कृष्टः। ज्ञीयर्क्ष्यु विशीयान्त्यायां स्यामान्माभयोरेकत्वान्माभा संपूर्यते। इति योनौ स्याऽ3माऽ3-न्माऽ234भाइः। इति पर्वद्वयम्। अत्र अन्त्यायां ताऽ3नूऽ31234नाम्। इति एकं पर्वविधानम्। थे स्वरे विराममेके, इति चतुर्थस्वरे एके विरामं मन्यन्ते। तनूऽ31234नाम्।। इति।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

6.वारवन्तीयम्- तुवन्नश्वाऔहोहाइ।। वन्तीयेत्वभिरन्त्यः प्र। सामान्तभूत भि शब्दस्येत्यर्थः। न साम मध्यगतस्य । वन्तीय इन्द्रे सन्त्वित्यत्र मध्यमायां पर्षितोकमुत्तरे विकल्पे इत्यगतिः। चरे वारे हत्यां सर्वत्र श्रुधी हवायां इति अत्रोत्तरयोः बृहतिकारपक्षे ओभावः। तृतीयादिन्यामित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अत्र तुष्टु इत्येतयोः अनाभावः। सर्वमवृद्धमित्यादिना त्रौकारे परतः पूर्वस्य ह्रस्वस्य दीर्घविधानम्। त्वन्नोवारे इत्यादिना अत्रोत्तरयोः ककुभोः विकल्पः। वारे सर्वत्रान्तः पदन्नाभवतीति अत्र हेडाँसीत्यत्र हेशब्दस्य हादौ स्तोभे परतः आइभावविधानम्।।

7.सैन्धुक्षितम्- उच्चातेजातमन्धासाः ।। द्व्यन्तस्थ परेतु लोप इति अवृद्धादि पदान्तादित्यादिनात्र विश्वानीति निशब्दात्परं व्यवधाने प्राप्ते द्व्यन्तस्थ परत्वात् यकारस्य लोपः। वोवित्सर्वत्रेति प्रकृतिभावः।।

8.वरुणसाम- परीतोषिञ्चतासुतोवा।। रुणसाम्नि सुते प्र। वरुणसाम्नि नर्योप्सुमदाधरुणमिति। अत्र नर्यो अप्सुमदा एतावगतौ। विभाषारुणसाम्नीति। अत्र र्यशब्दः सङ्कृष्टः मन्यन्ते। सुषाश्रीण प्रत्नं रुण साम्नीति अत्राद्यन्तयोस्सुषाश्रीणन्त इत्येतौ नीचारम्भौ नोविभिरित्यादिना विश्लेषः। वृद्धाच्चसर्वत्रेति अत्र त्वाशब्दात्परस्य अकारस्य विश्लेषः।।

9.काक्षीवतम्- यस्तेमाऽ3दोवरेणियाः[1]।। काक्षीवत उच्चावत्। लेयप्रस्ताव सदृशेष्वविकार इति । अत्र योनिवत् प्रस्तावस्वरे प्राप्ते ऊहे सर्वत्र प्रस्तावः आमहीयवप्रस्तावस्वरवदित्यर्थः। क्षीवते द्वितीयपादान्त्यमद्वितीयस्वरमिति योनौ द्वितीय पादान्त्यस्यमक्षरं द्वितीयादिकर्षणम्। ऊहे सर्वत्र प्रथमादिकर्षणम्। एतावान्विशेषः।

1.ख- यस्तेमाऽ3दोवरेणियाः ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पवस्व यस्तेमदायां सर्वत्रेति विश्लेषः। आये भावश्च नेदानीमिति गतेरत्र आयेभावो नास्ति।।

10.दैवोदासम्- इन्द्रा(3 2)ऽ31म्।। दास्ये स्येत् प्र। द्वितीयात्, कृष्टं तालव्यमित्यादिनात्र मध्यमायां प्रथमस्वरे प्रत्यये देशब्दस्याभाव-विधानम्। मदेष्वस्येदिन्द्रायां ष्कलदासयोरिति। वृद्धात्परौ ख्यौ लुप्ताविति लोपप्राप्ते अत्र द्वितीयायां मदेष्वित्यत्र षुशब्दात्परस्य लोपविधिः। अप्सुजित्सर्वत्रेति प्र।।

11.आनूपंवाध्र्यश्वम्- पुराःपुराः (1 2 1 2)।। ध्र्यश्वत्वाष्ट्रीसाम्नोश्चदक्षसा-पतिःकवीमिति। योनिदृष्टा चदक्षसा पतिःकवीमापद्यते। यज्ञायसन्तु सर्वत्रेति अत्र तृतीयायां तुशब्दात् परस्य वकारस्या लोपविधिः। योवृद्धाद्दीसर्वत्रेति प्र।।

12.वैतहव्यम्- पूँऽ5रोजि (3 0)।। होहव्ये इति. अत्र सर्वासु प्रस्तावोपान्त्यस्यावृद्धिः। हव्ये चेति। अत्र सर्वासूद्गीथ द्वितीयस्या - वृद्धिः। योनावेववृद्धिः। अपुरोजिप्रान्त्ययोरिति। हव्येहारद्वितीयमित्य-नेन सर्वत्र प्रतीहारद्वितीयस्य नीचत्व प्राप्ते अत्र प्रथमान्त्ययोस्तृतीय स्याक्षरस्य नीचविधिः। हव्ये त्सिबायामिति। अत्र सर्वासु त्सिबायां प्रत्यये पूर्वस्याक्षरस्य वृद्धिः। हितपौष्कले-त्यादिनात्र मध्यमायां पावक इति पाशब्दस्य प्रत्युत्क्रामे प्राप्ते अभिगानविधानम्।।

13.सोमसाम- पुरोजिताऽ2इवोअन्धसाः (1 0 0 1)।। न कार्तयशोपद्रवे-त्यादिनात्र योवृद्धाद्दी सर्वत्रेति दिशब्दस्य सर्वत्र प्रकृतिभावे प्राप्ते अत्र आइभावविधानम्। सोमसाम्नि चेति अत्र मध्यमायां पावक इति पूर्वापरवत् पाशब्दस्यैव नीचप्राप्ते वशब्दस्यापि नीचविधानम्।।

14.त्रासदस्यवम् - पूऽ234 - रः (1) ।। क्रौञ्चाभिनिधनादिरादिनात्र सर्वासु वृण्यादिभूतस्य ह्रस्वस्यापि दीर्घविधानम्। श्वः कार्तयशौदल

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रासदस्यवेष्विति अत्र श्वः शब्दः प्रस्तावे उपद्रवे च अस्तोभे सन्धिगाने प्राप्ते पदगानविधानम्। वर्ण सदस्यव प्रवदुत्सामराजेष्विति स्पर्शानामलोपो यथा। इति च अत्र प्रथमायां जिह्व्यमिति मकारस्य आउवा व्यवहितमित्यादिना लोपप्राप्ते अलोपविधानम्। धारयाद्धिमन्द्रा त्रासदे,इति अस्यायमर्थः। योधारयेत्यत्र रया इति वर्णद्वयस्य पूर्वापरवत् चतुर्थ मन्द्रस्वरयोः प्राप्ते मन्द्रस्वरविधिः। वकयाच द्धि नीचेति। पावक इति द्व्यक्षरस्य पूर्वापरवत् पाशब्दस्यैव नीचप्राप्ते वशब्दस्य नीचविधिः। उगत्यन्ताः प्रवदुद्धत्सामराजेष्विति विशेष वचनादत्र पूर्वयोरुगत्यन्ता भवति। वान्ता न भवति।।

15.सत्रासाहीयम्- अ^{3}ग्ना^{2}ऽ34इ।। साहीये शताद्धितीयमित्यादि सूत्रचतुष्टयस्य विवरणं पूर्वमेवोक्तम्। अत इह नोच्यते। साहीयेऽग्ने त्वं सर्व इति। अत्र सर्वासु स्तोत्रीयाषु उद्गीथाद्यस्य नीचविधिः। साहीय गूर्द पुत्रेषु चेति रयिन्दा इति यिशब्दात्परमोकारागमः। आ^{1}ऽ234इन्दो^{5}ऽ6 हा^{5} इ।।

16.सदोविशीयम्- अ^{2}भिसो^{0}मा^{0}सआ^{0}यवओ^{0}हा^{0}ओ^{0}हाऽ3ए^{2} ।। दोविशीये स्तावहारोपायावान्तास्थे दौ पूर्वौ हान्तौ। इति अत्र सर्वासु प्रस्तावप्रतिहारोपद्रवेषु वाकारान्ता स्तोभा भवन्ति। उद्गीथे पूर्वौ स्तोभौ हान्तौ भवतः, इत्यर्थः। गोष्ठ प्रतोदेत्यादिनात्र सर्वासु पादादि भूतस्याक्षरस्य ऋक्स्वरवदुच्चनीच प्राप्ते सदोविनरे परमज्याः पुत्रस्य मत्सरास इति प्रतिहारभक्तेरादिभूतस्य मकारस्य ऋक्स्वरवदुच्चनीच प्राप्ते उच्चविधिः। मद्यं द्विहिङ्कारेत्यादिना मद्यशब्दोऽत्र विकृष्टः। शीयेनाकृद्दँहदिति अत्राद्ययोः मदमित्यत्र दं शब्दस्य बृहदित्यत्र हच्छब्दस्य च उच्चविधानम्। ऋक्स्वरोच्चस्य पुनरुच्चविधानम्। अधयदिमायां यथर्च पर्वान्त्यस्य उच्चविशब्दस्यानुच्च ज्ञापनार्थम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऊसदोविशीयाष्टेडरुपेष्विति। अत्र मध्यमायामूर्मिणेति ऊकारस्य ऋक्स्वरे अनुच्चस्य उच्चविधानम्।।

2 0 0 1 2
17.वारवन्तीयम्- अश्वन्नत्वाऔहोहाइ। वन्तीयेमोभिः प्र। वन्तीय इन्द्रे सन्त्वित्यादिनात्र पृथुप्रगाम इत्यगतिः। ग्निस्वीवारे इति अत्र प्रथमायां अग्निन्नमोभिरिति ग्निशब्दस्य वृद्धिः। ध्यै नौ वारोत्तरे इति अत्राद्यायां हादौ स्तोभे परतः पदान्तस्य ध्यैशब्दस्याप्याभावः। ओकारोन्तःपदिको ग्रहणादाभवति। मोघो इति, तृतीयादिन्यामित्यादिना सर्वपदान्तानामाभावे प्राप्ते नमोभिरिति मोभिरित्योकारस्य पदमध्यगतस्याभावविधिः। सर्वमवृद्धमित्यादिनात्र सर्वास्वाभावः। व्यञ्जेति, तृतीयादिन्यामित्यादिना पदान्तानामाभावे प्राप्ते पदमध्यगतस्य सुशेव इति शेशब्दस्याभावविधानम्। बभूयादिति भूशब्दस्य उवर्णन्तु न सर्वत्राभवतीति अत्रौहोवायां प्रत्यये अनाभावः। चासाद्वन्तीयोत्तम तृतीयायामिति दूराच्चासाच्चेति प्रश्लिष्टस्य च आसादिति आकारस्य विश्लेषविधिः। चासाद्वन्तीयोत्तमे आसादिति विश्लिष्टस्याकारस्यात्वविधानम्। नासाद्दधीन् मुन्निन्द्रस्वब्दी चर्कृत्या निष्यते णिमृद्धमिति वारानिहोतयोश्चेति असंयोगे वृद्धिप्राप्तस्याकारस्यात्वप्राप्तस्य अकारस्यावृद्धिविधानम्। वारे सर्वत्रान्तः पदं नाभवतीति हादौ स्तोभे परतः । पदमध्यवर्तिनां तालव्याक्षराणां आभावे प्राप्ते स्वास्वा भवति निमर्त्यादिति निशब्दस्य पुनराभावविधानम्।।

5 4 2 4 50 4 5
18.अभीवर्तः- तुवाऽ3माऽ3इन्द्रप्रतूर्तिष्वोवा।। वर्तेयदि प्र। ईयतुस्त्वमिन्द्रप्रतूर्तिष्वित्यत्राभीवर्तमध्यमायां ईयतुरिति ईकारस्य यकारे परतः आभावे प्राप्ते आइभावविधानम्। प्रतूर्तिष्विति षुशब्दस्य वाचिसर्वमोभवतीति ओभावे प्राप्ते अनुस्थमिति ओभावो न भवति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वर्ते च तृतीयं विश्वासां विश्वास्ते ,इति अत्र तृतीयायां तृतीयपादे योनिवत् चतुर्थस्य वृ शब्दस्य कर्षणप्राप्ते तृतीयस्य कर्षणविधानम्।।

20 0
19.ऋषभःपवमानः- हाहावस्यप्रत्नाम्।। अस्यप्रत्नायामयँसूर्य स्सर्वत्रेति सङ्कृष्टः। एतदेवोदाहरणमित्यादिनात्र ऋशब्दस्यनार्भावः। अत्र तृतीयायां सूर्य इति सूशब्दस्य वाचिसर्वमित्यादिना ओभावे प्राप्ते अनुस्थमिति ओभावो न भवति।।

3 40 30 4 30 4 5 0
20.उत्सेधः- परीतोषिञ्चतासुतम्। सोमः।। सेधे पुना परी तवा मन्तवदिति सुषावसो नीचारम्भः। अत्राद्यन्तयोः प्रस्तावे उवर्ण सुवर्णयोः उवर्णन्तु न सर्वत्राभवति औहोवायां प्रत्यये आभावे प्राप्ते अनाभावः। अत्र मध्यमायां प्रस्तावे सोममिति ओकारस्यान्तःपदिकस्य ओकारान्तःपदिको ग्रहणादो भवतीति मोघो इति तत्र ग्रहणात् अत्रौहोवायां प्रत्यये सो शब्दस्यानाभावः।। सर्वत्र पादतृतीयतुरीयं वृद्धम्। अन्त्यस्यावृद्धमिति अत्राप्यभिचारार्थं वृद्धाच्च सर्वत्रेति त्वा शब्दात्परस्य विश्लेषः।।इति षष्ठः।।6।।

==*****==

।।सप्तमो विंशः।।

40 3 40 30 4 3 45
21.उत्सेधः- श्रीणन्तोगोभिरुत्तरम्।। पिबाभिसो द्वे श्रीरिति अत्र प्रस्तावाद्यस्य नीचारम्भः। सेधे हा द्वितीये यथर्चं भवतीति द्वितीय हकारे परतः पूर्वाक्षरस्य ऋग्वत् ह्रस्वदीर्घ प्राप्ते अषिणोदन इति अत्र नकारस्य ह्रस्वत्वं न भवति। ह्रस्वदीर्घ प्रकरणेऽपि सेधेषिणोदन इति नकारस्य दीर्घविधानम्।।

2 0 20
1.विशोविशीयम्- इन्द्रमच्छहिम्(स्थि)सूऽ3ताइमाइ।। विशीये च पूर्वे इति विशोविशीये सर्वत्र पूर्वहादौ स्तोभे परतः पदमध्यगतस्य ह्रस्वस्य दीर्घविधानात् अत्राद्यायां पदान्तभूतस्यच्च शब्दस्य दीर्घत्वं न

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवति। अन्यदुच्चमिति। अत्र सर्वासु तृतीयपर्वणि सर्वाण्यक्षराणि उच्चैः भवतीति हिन्वविशीये ताइभ्यामादिः योनौ चेति अत्र सर्वासु चतुर्थ पर्वाद्यस्यावृद्धिः। हिन्व विशीयोत्तरयोरन्त्यः, योनौ चान्ते । इति अत्र सर्वासु गतिः। अप्सुजित्सर्वत्रेति प्र।।

2.निषेधः- 2 0 0 2 अयम्पूषाराऽ3यिर्भगाः। षेधे रयिं प्र। पूषायां चेति। दसीति सीशब्दस्यापि प्रकृतिभावः।।

3.अर्कपुष्पाद्यम्- 1 2120 1 2 1 इन्दुरश्वोनकृत्वियः-हुवेऽ23।। गोष्ठप्रतोदे-त्यादिना पादादिः यथर्चम्। पूर्वार्कपुष्परयिष्ठयो स्तौभिकं पर्वानुपाद-मिति। अत्र पाद त्रयेषु स्तोभानामाद्यं पर्व सामान्ते सर्वाणीति सर्वस्तोभपर्वाणि सामान्त एव। विश्वाच्याश्विनो व्रतेत्यादिनात्र च्याशब्दः सङ्कृष्टः। त्वद्रयश्चैतेष्विति अत्र त्वशब्दश्च सङ्कृष्टः। आर्चिकमकृष्टं सर्वत्रेति अत्राकृष्टं, योनावेवकृष्टम्। जिह्व्यन्नकृत्व्यश्च ज्ञीयस्योद्गीथे भवति। अत्र त्व्यशब्दो विकृष्टः।।

4.च्यावनम्- 3 पवाऽ234। 5 स्वमं।। वनेहारादिरिति। प्रतिहार-द्वयस्य आदिभूतस्य सर्वत्र वृद्धि प्राप्ते अनेकर्चे दादौ इति अत्र पूर्वप्रतिहारादिः न वृद्धः। पवस्वमधुमायां चेति अत्रापि पासदृश स्वरस्य स्तोभे प्रत्यये पदगाने प्राप्ते सन्धिगानविधानम्। उद्घेदभि तृतीये 1 पाऽ234 5 साम्।।

5.जनित्रम्[1]- 5 0 2 4 5 40 5 तँवोदाऽ3स्ममृतीषहाम्।। नित्रे गीथषष्ठमिति। सर्वत्र उद्गीथ षष्ठस्य वृद्धि प्राप्ते रूपञ्चममिति अत्र तृतीयायां पञ्चमस्याक्षरस्य वृद्धिः। पूर्वे जनित्रे चदक्षसोतद्विषामिति। अतंवस्तृतीयायामिति। सूत्रद्वयेन पूर्वसूत्रोक्तार्थानुवादः। नार्थान्तरं, पूर्वजनित्रेऽन्त्यस्य स्तोभस्यागतिरिति । अत्र सर्वासु अन्त्यस्य

1. ग- जनित्राद्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तोभस्यागतिः। दावसुनिधनेत्यादिना योनावेवद्वितीय पादाद्यस्य नीचम्। नोहगाने, सर्वं जनित्रेत्यादिना महित्रीणा द्वितीयस्य ह्रस्वस्यापि वृद्धिः। कर्षणेत्यादिना कर्षणवृद्धे न भवतः। नित्रे चेति ह्रस्वस्यापि प्रत्युत्क्रान्तविधिः।।

4 30 4 50 0
6.उत्तरजनित्रम्[1]- पुरोजितीवोआ[2]।। उत्तरे जनित्रेऽभि प्र। पुरोजिगिरिं जनित्रे। अत्राद्यायां नीचारम्भः। उत्तरे जनित्रे पुर उत्तरयोरन्त्य इति। अत्रोत्तरयोः स्तोत्रीययोः अन्त्यस्य स्तोभस्यागतिः। नित्रे पुरोजिमध्यमायां चेति। अत्र मध्यमायां प्रतिहारद्वितीयस्य नीचविधानम्। आद्यन्तयोस्तृतीयस्यैव। षं जनित्रे इति अत्र तृतीयायामुद्गीथाद्यस्य ह्रस्वस्य दीर्घविधानम्। उत्तरे जनित्रे पुरोजित्या-मुद्गीथाद्यस्य दीर्घत्वमिति। पूर्वसूत्रेणोक्तार्थस्य अनुवादसूत्रम्। नार्थान्तरं, गतेरेकारभाव प्राप्ताया एकारनिवृत्तिरिति एकारस्य निवृत्तिः।।

2 0 1 2
7.मैधातिथम्- पुनानस्सोहाइ।। मैधे क्थाप्रत्यये इति सर्वासु गतिः। नस्सौमैधे इति योनिवत् वर्णत्रयस्य नीचत्वे प्राप्ते अत्र न शब्दस्योच्चविधिः। नीचात्पर इत्यादेस्सूत्रस्य विवरणं पूर्वमेव वैयश्व प्रसङ्गे उक्तम्। अत इह नोच्यते। देवः पुनाऽभिसोमयोर्मैधष्टम्भयोस्तावे इति अत्र प्रथमायां प्रस्तावे देवोशब्दस्य स्तोभे परतः पदगाने प्राप्ते सन्धिगानविधिः। मैधे चेति सर्वत्र प्रस्तावे हादौ स्तोभे परतः पूर्वस्याक्षरस्य ओभावविधिः।।

1 0 2 1 20 1
8.पदनिधनशुद्धाशुद्धीयम्- तँवोदस्ममृतीषहाम्।। शुद्धीयेभिद्धे गिरिं पुरोजि प्र। इत्यत्र तृतीयायां प्रस्तावादिः नीचैः। क्रौशौपगवेत्यादिना सर्वत्रोद्गीथाद्यस्य उच्चम्। योनावेवनीचम्। दावसुनिधनेत्यादिना ऊहे सर्वत्र तृतीयपादाद्युच्चम्। योनावेवनीचम्।।

4 30 4 0 50
1.ग- जनित्रोत्तरम्।। 2.ख- पुरोजितीवोआ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

10 2 0 1 0
9.गौषूक्तम्- स्वादिष्ठयामदौ ।। षूक्ते शुभ्रमुचैनाया इति अत्र प्रस्तावाद्युच्चम्। थे षूक्ते द्वे साव्यामिति। अत्रोद्गीथाद्युच्चम्। षूक्ते चेति अत्र तृतीयपादादिः यथर्चमुच्चनीचम्।।

2 30 4 5
10.आश्वसूक्तम्- आऔहोवाहाइ- इन्द्रमच्छा।। त्वाइयामुपद्रवे इत्यत्र कर्षण वृद्धे न भवतः।।

2 0 0 0 1 2
11.वारवन्तीयम्- यज्ञायज्ञाऔहोहाइ।। वन्तीय इन्द्रे सन्त्वित्यादिनात्र ऊर्जोनभुवद्वाजेष्वित्येतावगतौ। चरे वारे हत्यां सर्वत्रेत्यादिनात्र प्रथमायां बृहत्याञ्चरसङ्घातविधानम्। सर्वमवृद्धमाभवतीत्यादिना मित्रमिति त्रंशब्दस्याभावः। व्यञ्चेति शँसिषमिति सिशब्दस्य पदमध्यगतस्य तालव्यसंज्ञकस्याभावः। लान्दवन्तीय यौक्तेष्वाकारे इति अत्रोत्तरयोः प्रस्तावे औकारे परतः ह्रस्वस्य दीर्घविधिः। ष्वविता दाशेत्यादिनात्र ष्वशब्दस्सङ्कृष्टः। शुर्मदायास्तु त्र्यक्षराया उपाद्यञ्चलोपो वारे इति अत्रोत्तमायां तनूनामिति ताशब्दस्य कनीयस्यादितो लोप इति न्यायेनाभिगाने प्राप्ते शुर्मदाया आद्यक्षरगतावृद्धिरिति। गिरागिरा प्रप्र, नशँसिषं तस्थुषश्चेति अनुब्राह्मणं स्वाध्याये इति। न केवलं कर्मकाले ब्राह्मणविहितानामिराइरादीनां प्रवृत्तिः। ऊहाध्ययन समयेऽपितातनू इति, उवर्णन्तु न सर्वत्राभवतीति अनाभावः।।

20 0 0 0 1 2
12.वारवन्तीयम्- एहियूषाऔहोहाइ।। एह्यूवारेन्दुभिः प्र। एह्यूकमश्वे, इत्यत्र ह्यूशब्दोऽत्र विकृष्टः। वन्तीय इन्द्रेसन्त्वित्यादिनात्र दक्षं दधस इत्यगतिः। वृद्धमन्तः पद इत्यादिना हादौ स्तोभे पदमध्यवर्तिनां तालव्याक्षराणा माभावे प्राप्ते वरे सर्वत्रान्तः पदं न भवतीति अत्र इत्थेति इकारस्य नेमानामिति नेशब्दस्य च पदमध्यगतस्य पुनराइभावविधानम्। व्यञ्चेति गिर इति पदमध्यगतस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गिशब्दस्य औहोवायां प्रत्यये आभावः। इन्दुभिरिति, न्दुशब्दस्य उवर्णन्तु न सर्वत्राभवतीति अनाभावः। सर्वमवृद्धमित्यादिना आभावे प्राप्ते नहिते पू इति पूशब्दस्यानाभावः। वारेथादुव एह्यूतृतीयायां इति वशब्दस्य भक्त्यन्तः पदगीतस्सर्वत्रेति पदगाने प्राप्ते सन्धिगानविधिः।।

13.वारवन्तीयम्- तन्तेमदाऔहोहाइ (2 0 0 0 1 2)।। तन्तेवारेऽषिपत्नीः, प्र। वन्तीय इन्द्रे सन्त्वित्यादिनात्रानुवष्टुवन्तीत्यगतिः। ककृतन्तेमदायां हारिभरवारेष्विति अत्र ककृदिति कृच्छब्दस्यानार्भावः । त्नुमद्रिवश्च बर्हिषश्च तन्तेमदायां इति भक्त्यन्तः पदगीतस्सर्वत्रेति पदगाने प्राप्ते अत्राद्ययोः प्रतिहारान्त्यस्य वशब्दस्य षशब्दस्य च सन्धिगानविधानम्। व्यञ्जेति अत्राद्यायां श्रिशब्दस्य उत्तमायां दिशब्दस्य च पदमध्यगतस्य औहोवां प्रत्यये आभावविधिः। सर्वमवृद्धेत्यादिना आभावः। ज्योतींषिवृषन्नदर्शि वारे इति। अनुस्वारस्पर्शेत्यादिनात्र मध्यमायां ज्योतँषीति तिशब्दात्परस्यातिहारे प्राप्ते लोपविधिः। चित्तदद्यायां वन्तीय इति तदद्याचित्त इति चि शब्दात्परस्य सर्वमवृद्धमित्याभाव प्राप्तस्य पदान्तस्य तकारस्यातिहारः।।

14.वारवन्तीयम्-श्रुधीहवाऔहोहाइ (2 0 0 0 1 2)।। श्रुधीहवायां नपिप्युषीं प्र। चरेवारेहत्यामित्यादिनात्र सर्वासु तृतीयं पर्व चरास्वरवदो भावो भवति। चराजासोऽ234हाइ (2 0 1 5), इतिवत्। श्रुधीहवायां च वारवन्तीये सर्वास्विति अनेनाव्योभावविधानम्। पर्जन्यलक्षणप्रवृत्तिन्यायेन । व्यञ्जेति अत्रोत्तरयोः चिशब्दस्य सि शब्दस्य च पदमध्यगतस्य तालव्यस्याभावविधिः। सिषासन्तश्रुधीहवायामिति। अत्रोत्तमायां सिषासन्त इति तशब्दस्य भक्त्यन्तत्वात् पदगाने प्राप्ते सन्धिगानविधिः। अत्र मध्यमायामप्युशब्दस्य आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अनाभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

4 30 4 3 4 5 4 5
15.उत्सेधः- पिबासुतस्यरसिनः।। पिबाभिद्वेश्री इति । अत्राद्ययोः प्रस्तावादिः नीचैः व्यञ्चेति, इन्द्र इति। इकारस्य औहोवायां प्रत्यये आभावविधिः। आपिर्नोबो उत्सेधे इति। ओवौकारयोरित्यादिना आभावे प्राप्ते अत्राद्यायां बोधीत्यत्र बोशब्दस्यानाभावः। धियो सेधे इति। अत्र मध्यमायामस्माँ अवन्त्विति पादादिभूतस्य अकारस्य पादान्त्यात्परस्वरो विकृष्यते इत्यनेन विश्लेषे प्राप्ते प्रश्लेषविधिः। सर्वत्र पादतृतीयतुरीयं वृद्धम्। अन्त्यस्यावृद्धमिति सूत्रद्वयमव्यभिचारार्थं अन्कारो वृद्धोऽनुनासिकस्सर्वत्रेति अत्रास्माँ अव इत्यनुनासिकमेव।

2 0 2
16.निषेधः- पिबासुतस्याऽ3रसिनाः । षेधेभि । प्र । मानस्तरभीत्यत्र जमवर्तनिषेधयोरिति वृद्धमन्तः पद इत्यादिना पदमध्यगतस्य तालव्यस्याभावे प्राप्ते अत्रोत्तमायां सुम्नेष्विति, अत्र म्नेशब्दस्य पुनराइभावविधिः ।अत्राप्यान् कारोऽनुनासिक एव।।

2 0 0 1 2
17.ऐडँसौपर्णम्- उच्चातंजोवा।। वोवित्सर्वत्रेति प्र। विश्वान्यर्य आपर्णैटतबोधीयर्षभेष्विति, दीर्घवृद्धोपहित इत्यादिना व्यवधान प्राप्तस्य यकारस्य लोपविधिः। नैडे इति न्यर्य शब्दोऽत्र सङ्क्रुष्टः।।

20 102 1 2 1
18.समन्तम्- दुहानऊधर्दिवियाम्।। वादौमन्ते इत्यादिनात्र प्रस्तावादिर्नीचैः । वैच्छन्दसे मन्ते दिवानक्ता प्रथममिति, अत्रोद्गीथाद्य पर्वणि सर्वाण्यक्षराणि प्रथमस्वरे भवन्ति। दान्त्यस्य तु वृद्धिर्विष्टारपङ्क्त्यामिति। मधुप्रियमिति पदान्तभूतस्य यंशब्दस्य वृद्धिः।।

2 0 0 0 1 2 1 2
19.वरुणसाम- पुनानस्सोमधारयोवा। ओवा।। वरुणसाम्नि नृभिः प्र। वरुणसाम्नि नर्योप्सुमदाधरुणमिति। अत्र धरुणं वाज्यर्षसीत्यगतिः। दीर्घवृद्धोपहित इत्यादिनात्राद्यायां अर्षसीत्यत्र विरामत्वादाइभूत इगतेः परं यकारस्य व्यवधानो भवति। लं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विस्मिन्नित्यादिना लं शब्दस्योदात्तस्य पुनरुदात्तविधानात् अत्राद्ययोः तत्स्थानगतयो' तकारयकारयोः अनुदात्तमेव । दीर्घवृद्ध इत्यादिनात्राद्यन्तयोस्सीदसीति भ्यर्षसीति च [1]स्तौ.... अकाराकारयोः अविशेष ग्रहणात्, नृभिः प्रत्नँसधस्थेत्यादिनात्र नृ शब्दस्यानार्भावः। सुषाश्री प्रत्नंरुणसाम्नीति। अत्र मध्यमायां प्रत्नमिति नीचारम्भः। दिव्यं ज्यर्षसीत्यादिना व्यज्य इत्येतौ विकृष्टौ।।इति सप्तमः।7।

==*******==

।।अष्टमो विंशः।।

1.समन्तम्- तवाहंसोमरारणा (1 20 1 20 10 2 1) ।। मन्ते प्रत्नमित्यादिना दुहान इत्यगतिः। वादौ मन्तेत्यादिनात्रोत्तरयोः प्रस्तावादिः नीचैः। मन्ते राधाया अन्त्यानि वर्धन्ते। मन्ते च त्रीणि तृतीये,योनौ मध्यममिति, सूत्रद्वयस्यार्थः। ऊहे सर्वत्र तृतीयपादे त्रीण्यक्षराणि वर्धन्ते। योनौ तृतीयपादे अन्त्येषु त्रिषु मध्यमस्य वृद्धिः, आद्यन्तयोरवृद्धिः। षिबमन्तदुक्थयोर्वे, इति अत्रोत्तमायां प्रस्तावे बभ्रो इति बशब्दस्य ऋक्स्वरितभूतस्य उदात्ताच्चपरमुच्चैर्भवतीति अनेन उच्चप्राप्तस्य पुनर्नीचविधानम्। इवदुहानायां पृश्निमन्तयोरिति अत्र तृतीयायां शकुना इवेति इकारस्य पदमध्यगतस्य हादौ स्तोभे परतः आभावप्राप्तस्य आइभावविधानम्।।

2.यौधाजयम्- तवाऽ31 (3 2)।। यौधापर्यूद्गीथे प्र। सौभराभीवर्तेत्यादिनात्राद्यायायां तुरीयस्य वृद्धिः। अभरादिर्यौधाजये सर्वमित्यादिनात्र प्रस्तावषष्ठस्य रेफस्यावृद्धिप्राप्तस्य अरारणेति अत्राद्यायां प्रस्तावषष्ठस्य रेफस्य वृद्धिविधिः। अतिसूर्यमित्यादिनात्र विकृष्टः। अन् कारो वृद्धो अनुनासिकस्सर्वत्रेति । अत्र सर्वात्रानुनासिकमेव, निधने हीषीस्थँ सर्वत्रेति प्रकृतिः।।

ख-1.त्रुटितः,क-कीटभक्षितः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

3.वामदेव्यम्- रे[3]ऽ5व।। स्तावोपान्त्यमित्यादिनात्र सर्वासु प्रस्तावोपान्त्यस्यावृद्धिः। विच्छन्दस्सुच देव्ये ,इति अनेन विच्छन्दसां विशेषविधानात् अत्र सर्वासु चतुर्थपर्वणि योनिवदुदात्तानुदात्तमेव। अन् कारो वृद्धोऽनुनासिकः, इत्यादिनात्र त्वां च्छब्दस्यानुनासिकमेव। दान्तेयहोध्रिगोस्तावेमिन्दो इति परिसंख्यानरूपेण प्रकृतिभाव ग्रहणादत्र तृतीयायां पदान्तभूतस्य तोशब्दस्याउभावः। देव्येत्वनृगंतीय इत्यादिनात्र तृतीयायां ऋङ्मध्यभूतस्य स्पर्शस्य अनाभावः।।

4.सत्रासाहीयम्- त्या[2]ऽ34म्।। साहीयेशताद्धितीयं सङ्कर्षादिति। अत्र त्यशब्दःसङ्कृष्टत्वात् द्धितीयस्वरे आरम्भः। तथा सर्वत्र सन्याय इति । ऊहे सर्वत्र द्धितीयस्वरे आरम्भः। शताद्धितीयमित्युक्तत्वात्। केचिद्यत्र यत्र वाक्द्धयं विद्यते तत्र तत्र तृतीयस्वरे आरम्भ इति मन्यन्ते। मन्द्रश्चतुर्थमिति ऊहे सर्वत्र द्धितीयपर्वणि सर्वाण्यक्षराणि चतुर्थस्वरे भवति। योनौ न भवति। स्वासुसाहीयेचोत्तमायामिति शिक्षाण इति णकारस्य विरामे नत्वे प्राप्ते पुनर्णत्वविधानम्।।

5.सौभरम्- त[5]वा[4]ऽ3त्या[2]ऽ3दि[4]न्द्रिय[5]म्बृहो[4]वा[5]।। तवत्यदिन्द्रियां सर्वास्विति। अत्र सर्वासु स्तोत्रीयासु पूर्वस्तोभो गतिमान् भवति। उत्तरस्त्वगतो भद्राइन्द्रस्येतिमदत्यनुमादेवत्रा हव्यं प्रेमध्वराय इति। अत्रोत्तमायाम्मदत्य इत्यगतिः। न हिन्वि तवद्यौरिन्द्रायां सौभरे इति। वृद्धमन्तःपदे इत्याभावे प्राप्ते अत्र मध्यमायां हिन्विरे इत्यत्र हिशब्दस्य पदमध्यगतस्य हादौ स्तोभे परतः पुनराइभावविधानम्।।

6.जागतंसोमसाम- पु[5]रो[0]जा[2]ऽ3इती वो[40]अ[50]न्ध[4]सा[5]ः।। त्वद्रयश्चैतेषु, वैधनेचेति अत्रत्वच्छब्दः सङ्कृष्टः। जिह्व्यं न कृत्व्यश्च ज्ञीयस्योद्गीथे, इत्यत्र विकृष्टः। वैधने कृष्ट वृद्धयोर्मध्ये, इति । अत्राद्यन्तयोः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तोत्रीययोः कर्षणवृद्धयोर्मध्यगतस्य दकारस्य अकारस्य च दीर्घविधिः।।

7.आमहीयवम्- प्रत्नम्पीऽ3यूषम्पूर्वियाम्।। पीयू सर्वत्रेति प्र। दिव आ प्रत्नमित्यादिनात्र दिव आनिरिति आकारस्यत्वविधिः। प्रत्नामहीयवे चेति अत्रात्वापन्न आकारे परतः पूर्वस्य वश्शब्दस्य दीर्घविधिः।।

8.ऐडँसौपर्णम्- इन्द्रमभोवा।। हितपौष्कलेत्यादिनात्रादिमिति आकारस्य प्रत्युत्क्रामे प्राप्ते अभिगानविधानम्। ऋगन्तीयस्पर्श इत्यादिना अनाभावः।।

9.सत्रासाहीयम्- वसूऽ34।। रुचोदिव्यांअ । वसुरुचायामेवा-द्यस्य लोप इति ओवा इति ओकारस्य लोपः। वा इति स्थिते वाशब्दे च नित्यमोत्वमिति वाशब्दे परतः पूर्वभूतस्य भिशब्दस्य ओभावो भवति। रुचोदिव्यांआ-भोऽ6वा। इति निर्णयः।।

10.सदोविशीयम्- अधयदिमेपवमाओहाओहाऽ3ए।। दोविशी-येत्यादिनात्र प्रस्तावप्रतिहारोपद्रवेषु स्तोभावान्ता भवन्ति। उद्गीथे पूर्वौ हान्तौ भवतः। गोष्ठप्रतोदेत्यादिना अत्र प्रथमोच्चाद्यस्य यथर्चविधानम्। अस्थाधा यदिमायां सदोविशीय इति अत्र प्रतिहारादि भूतस्य स्थ शब्दस्य योनिवत् सर्वत्रोच्चप्राप्ते नीचविधानम्। शीयेनाकृद्दँहदिति उच्चस्यपुनरुच्चविधानात् विश्वेत्यत्र विशब्दस्य अनुच्च ज्ञापनार्थम्। निष्ठा अधयदिमायां सदोविशीयोत्सेधयोरिति निष्ठेत्यत्र निशब्दात्परस्य पदान्तस्य विसर्जनीयस्य पूर्वाङ्ग प्राप्ते अतिहारः। विशीयेऽधयदिमायां भे प्रत्यये प्रथमोच्चान्त्यस्य वृद्धिरिति। अत्रोद्गीथे स्तोभे परतः प्रथमोच्चान्त्यस्याक्षरस्य वृद्धिः। उतद्विषापतिःकवीम्। सदोविशीये सर्वत्र उतद्विषा। अत्र पतिः कवीमापद्यते, इति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीचारम्भः। एतावान्विशेषः । त्साइबायामुपद्रव इति, अत्र कर्षणवृद्धे न भवतः। योनावेव कर्षणवृद्धिः।।

11.उत्सेधः- प्रत्नम्पी यूषम्पूर्व्ययदु[1]।। प्रत्नं प्रेति अत्राद्यायां प्रस्तावादिर्नीचैः। सेधे तु प्रत्नं पीयूषाद्यायां सत्राद्यस्य लोपः। सेधे प्रत्नम्पीयूषाद्यायां श्यैतवत्। सूत्रद्धयेनापि अत्राद्यायां एकपर्वत्व-विधानम्। अत्र योनिवत् पर्वभेदो नास्ति, इत्यर्थः। पूर्व्यमुत्सेधे इति, अत्र पूर्व्यशब्दः सङ्कृष्टः। वसुरुच उत्सेधे इति अत्र मध्यमायां रुच इत्यत्र च शब्दस्य स्तोभे परतः पदगाने प्राप्ते सन्धिगानविधानम्। च व्यधयदिमायामुत्सेध इति अत्र तृतीयायां विश्वेत्यत्र विशब्दस्य पदमध्यगतस्य हादौ स्तोभे परतः आभावे प्राप्ते आइभावविधानम्। निष्ठाऽधयदिमायां सदोविशीयोत्सेधयोरिति निष्ठेत्यत्र निशब्दात् परस्य पदान्तस्य पूर्वाङ्गप्राप्तस्य विसर्जनीयस्यातिहारः। सेधेहा-द्वितीये यथर्चं भवतीति अत्र सर्वासु द्वितीयहादौ स्तोभे परतः पूर्वस्याक्षरस्य ऋग्वध्रस्वविधानम्। सर्वत्र पाद तृतीयतुरीयं वृद्धम्। अन्त्यस्यचावृद्धमिति। सूत्र द्वयमत्राव्यभिचारार्थम्।।

12.श्यैतम्- तदिदासभुवं।। श्यैते द्वेयोनावित्यादिनात्र मध्यमायां प्रस्तावादिर्नीचैः । तृतीयादिन्यामित्यादिना। आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अत्राद्ययोः त्युशब्द षुशब्दयोः औहोवायां प्रत्यये अनाभावः। न तदि प्रान्त्ययोरिति। श्यैते तृतीयादिन्या औहोवायाः परं तृतीय, इति तृतीयस्याक्षरस्य सर्वत्र नीचत्वे प्राप्ते अत्र प्रथमतृतीययोः स्तोत्रीययोः द्वितीयस्याक्षरस्य नीचविधानम्। त्यूमाः पूर्वं व्यनद्धे त्वेक्रतुमिति एते शब्दाः श्यैते इति। अत्राद्यायां त्यूशब्दस्य मध्यमायां व्यनत् द्वयस्य उत्तमायां त्वे शब्दस्य च सङ्कृष्टः।। क्रौध्यष्टम्भेत्यादिना सर्वासु तृतीयपादादिः यथर्चमुच्चनीचम्।

ख-1. प्रत्नम्पीयूषम्पूर्व्ययदु ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लंविस्मिन् इत्यादिनात्र तृतीयपादादिभूतस्य पर्वान्त्यस्यानुदात्त-विधिः। ओवौकारयोरित्यादिनात्र आभावे प्राप्ते उवर्णन्तु न सर्वत्रेति। अत्राद्यायां मदेष्विति षुशब्दस्यानाभावः।। अभिश्यैते तदिदास तृतीयायामिति, वृद्धमन्तःपदे तालव्यमित्यादिना आभावे प्राप्ते अत्र तृतीयायां भि शब्दस्य हादौ स्तोभे परतः पदान्तस्याभावविधानम्।।

2 0 10 1

13.सुरुपोत्तरम्- रक्षौहावौहोऽ2-इया।। आजिगसुरुपाणां चेति अत्र उपद्रव द्वितीयस्यावृद्धिः।।

20 0 1 2

14.वारवन्तीयम्- साऔहोहाइ।। वारेरन्तिगह्यभि प्र। सर्वमवृद्धमित्याभावः। ग्निस्वीवारे, इति । अत्राद्यायां चतुर्थपर्वादि भूतस्य स्विशब्दस्य वृद्धिः। वृषन्वारे इति। वृद्धमृवर्णमित्यादिना वृद्धभूतस्य ऋवर्णस्य आभावे प्राप्ते अत्र मध्यमायां प्रस्तावे अवृद्धस्य वृशब्दस्याप्याभावविधिः। ज्योतींषि वृषन्नदर्शिवारे, इति अनुस्वारस्पर्शेत्यादिना अत्र मध्यमायां प्रस्तावे वृषन्नित्यत्र वृद्धाभावोत्पन्नस्य पदमध्यगतस्य रेफस्यातिहारे प्राप्ते लोपविधानम्। वन्तीय इन्द्रे संवित्यादिनात्र इमौ भद्र मध्य आपस्येत्येतौ अगतौ मुद्रन्नद्रस्वब्दी चर्कृत्या निष्यते णिमृढ्वं,इति। अत्रोत्तमायां मृढ्वमिति मृशब्दस्य वारानिहोतयोश्चेति अनेन संयोगपरत्वात् अवृद्धिप्राप्ते वृद्धिविधानम्।।

2 0 0 0 2

15.वैयश्वम्- पुनानस्सोमधारयाऽ3एँ[1]।। अपोवैयश्वेति। अत्रोद्गीथादिर्नीचैः। एकर्चेष्टमं,गीथ चतुर्थं च अत्र तृतीयपादे अष्टमाक्षरस्य उद्गीथ चतुर्थस्य साशब्दस्य कर्षणविधिः। नीचात्पर इत्यादि सूत्रे वैयश्वग्रहणं किं प्रयोजनम्? उच्यते ।अपोवसानो अर्षसी त्यत्र षकारस्य योनिवद्भावात् नीचपूर्वोच्चत्वमस्ति। नीचात्परष्ष इति उच्चविधानप्रकरणे अग्रहणात् अत्र नीचपूर्वोच्चस्य षकारस्यानुच्चत्वं

2 0 0 0 0 2

ख-1. पुनानस्सोमधारयाऽ3एँ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रसज्यते। तन्निवृत्यर्थं वैयश्वग्रहणम्। क्रौध्यष्टम्भेत्यादिनात्र आरत्नधा इत्यत्राकारस्य ऋक्स्वरवदुच्चप्राप्ते अश्रुष्ट आरत्नधा नहीति पुनरुच्चत्वं विहितम्। आरत्नधावैयश्वेति अत्राकारस्य ऋक्स्वरवदुच्चम्। एकर्चे द्वे नीचं श्वे ते तृतीय पञ्चम परे, इति तृतीयषष्ठसप्तमाक्षराणां नीचप्राप्ते अत्र तृतीयषष्ठयोर्नीचविधिः। सनयाभीशवेत्यादिनात्र योनिवत् सो इति पर्वभेदो नास्ति। प्ररेवैयश्वेनौ इति अत्र प्रतिहाराद्युच्चम्। योनावेव नीचम्। वैयश्वे पुनानायामन्त्य इति, अत्रान्त्यस्तोभस्यागतिः।।

16.वषट्कारणिधनम्-उत्सोदेवोहिरण्ययः (3 40 0 30 4 5)[1]। वषडन्ते तृचयोर्द्वे। पुना च इति अत्र प्रस्तावाद्युच्चम्। दिव्यं जर्षसीत्यादिनात्र विकृष्टः।।

17.सत्रासाहीयम्- यस्तेऽ34 (3 2)।। साहीयेयस्ते प्र। साहीये शताद्धियीयमित्यादीनां विवरणं पूर्वमेवोक्तम् । अत इह नोच्यते। पवस्वयस्तेमदायां सर्वत्रेति सर्वत्र विश्लेषप्राप्ते सोमसाम साहीयशाम्मदेषु प्रश्लेष इति अत्र पवस्वान्धसा इति प्रश्लेषः।।

18.प्रतीचीनेडंकाशीतम्- पवस्वमधु (1 2)[2]। काशीत नए प्र। अस्य पीत्वा काशीते इति अत्र तृतीयायां प्रस्तावादिर्नीचैः।।

एकाहः समाप्तः

==********==

ख-1. उत्सोदेवोरण्ययः (3 40 0)।। ख-2. नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अहीनः प्रारम्भः

।।प्रथमो विंशः।।

1.श्रौतकक्षम्- पन्यंपन्यमित्सोतारः- पन्यम्पन्योवा।। कक्षेमदि नारे ऊतिः प्र । कक्षे सर्वे । नेन्द्रं सुत इन्द्रङ्गीर्भिराघागमन्नियमते। इत्यत्र आघागमन्नियमते इन्द्रङ्गीर्भिरित्येतेषु गतिरेव। ब्रह्मयुजा कक्षे। इति पादान्त्यात्परस्वरो विकृष्यत इति विश्लेषप्राप्ते ब्रह्मयुजा इत्यत्र जाशब्दात्परस्य अभ्यासभूतस्यादिभूतस्य एकारस्य प्रश्लेषविधानम्।।

2.आष्टादँष्ट्रंपूर्वम्- आत्वाविशन्त्विन्दवः।। दँष्ट्रे च। अनिन्द्रं तवात्वारं पर्या प्रान्त्ययोः । इत्यत्र प्रथमान्त्ययोः प्रस्तावाद्युच्चम्।।

3.सुरुपोत्तरम् - परिसुवौहोऽ2।। त्वं कविर्द्धितीये दन्वते। इति त्वं शब्दोऽत्र विकृष्टः। आजिरासुरुपाणां चेति अत्र उपद्रव द्धितीयस्यावृद्धिः।।

4.स्वर्निधनं सौहविषम्- (स्व) पारीऽ3होइ[1]।। स्वर्निधने परिपूष्णे महे पेयात् क्रत्वे श्वे च प्र। स्वर्निधन इन्द्राय सशुक्र इन्द्रस्ते सुतस्येति। इन्द्राऽ3हो। य। सशूऽ3हो। ते। सुताऽ3हो। एते स्तोभा अगताः।।

5.जराबोधीयम्- स्व।। जराबोधोवा।। बोधीये रेशे धि ये प्र।। गीथोपान्त्यं त्रीषु बोधीये। इति। ऊहगीतौ गायत्रीषु बोधीयेषु उद्गीथोपान्त्यस्य वृद्धिः। नयोनौ। बोधीये सर्वमिति। तृतीयपाद तृतीयस्य ह्रस्वस्यापि प्रत्युत्क्राममेव। अयोनाविति। योनावभिगीतमेव। ये च तृतीयात् गेष्णात्तृतीयमिति। अत्र चतुरक्षरपर्वणि तृतीयाक्षरस्य उच्चं भवति।।

ग-1. पारीऽ3होइ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2 0 1 2
6.मार्गीयवम्- स्व।। तद्वौहोवा।। मार्गीयवे किने प्र। अरसं दोषं प्र। यवे मह्यामिति मार्गीयवे सर्वत्र महित्रीणा द्वितीयस्य वृद्धिप्राप्ते प्रहिव्रजमित्यत्र प्रशब्दात्परस्य हिशब्दस्यावृद्धिविधानम्। कुवित्स्वासु मार्गीयवे । इति। कुविदित्यत्र विशब्दात्परस्य पादान्त्यस्य ओवौकारयोरेकीभावे लोप प्राप्तस्य तकारस्यातिहारः।।

2 0 0 1 2
7.वारवन्तीयम्- इदँविष्णाऔहोहाइ।। वन्तीयइन्द्रे सन्त्वित्यादि नात्र विष्णुर्गोपायतो व्रतानीत्येतौ अगतौ। सर्वमवृद्धमित्यादिनाभावः। तृतीयादिन्यामित्यादिनाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति पांसुल इत्यत्र सुशब्दस्यानाभावः। व्यञ्जेति। अदाभ्य इत्यत्र पदमध्यगतस्य तालव्यस्य भिशब्दस्याभावविधानम्।।

1 2
8.धुरां साकमश्वम्- पवस्वमाऽ3।। स्वरे तु गतिर्भवतीति। अन्यत्र प्रथमतृतीय पञ्चमा इत्यगतिः। द्वितीय चतुर्थ षष्ठेषु गतिः।।

5 2 40 5 40 5
9.पूर्वजनित्रम्[1]- अभिसोऽ3मासआयवाः।। नित्रेगीथषष्ठमिति। उद्गीथ षष्ठस्य वृद्धिः। दावसुनिधनेत्यादिना योनावेव तृतीयपादादिः नीचैः। पूर्वजनित्र च दक्षसोतद्विषाविधानं। पूर्वजनित्रेऽन्त्यस्य स्तोभस्यागतिः। अगतिरन्त्यस्य स्तोभस्य । सर्वं जनित्रेत्यादिना योनौ महित्रीणा द्वितीयस्य ह्रस्वस्यापि वृद्धिः। माशिवासः प्रहिन्वान इति च। पूर्वजनित्रे प्रहिन्वान इति च हि शब्दस्य पदमध्यगतस्य तालव्यस्य हादौ स्तोभे प्रत्यये आइभाव विधानम्। नन्दाया त्सिब्यकर्षणमिति कर्षणवृद्धे न भवतः।।

3 40 3 4 50
10.जनित्रोत्तरम्- तवोदस्ममृती।। उत्तरे जनित्रे पुर उत्तरयोरन्त्य इति गतिरेव। पुरोगिरि जनित्रे। इति अत्र गिरिशब्दस्य नीचारम्भः। नित्रे पुरोजिमध्यमायां । प्रतिहार द्वितीयस्य नीचविधानात् अत्र

ग-1. जनित्राद्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रतिहारद्वितीयस्यानीचत्वम्। मन्दानं गीर्भिर्जनित्रे, इति। अनुस्वारस्पर्शेत्यादिनात्र मकारात्परस्य नकारस्य गीर्भिरित्यत्र गीशब्दात्परस्य उभयोः पदमध्यगतयोः अतिहार प्राप्तयोर्लोप विधानम्। आयेभावश्च नेदानीं इति कर्षणं नास्त्यत्र।।

11.जराबोधीयम्- इन्द्रमच्छोवा ।। ये च तृतीयाद्द्रेष्णातृतीयमिति अत्र सर्वासु स्तोत्रीयासु चतुर्थतृतीयमित्यत्र सर्वासु स्तोत्रीयासु चतुर्थपर्वणि तृतीयस्याक्षरस्य उच्चत्वम्। गीथोपान्त्यं त्रीषु बोधीये इत्यत्र उद्गीथोपान्त्यस्यावृद्धिः। बोधीये सर्वमिति तृतीयपाद तृतीयस्य ह्रस्वस्यापि प्रत्युत्क्रामविधानम्।।

12.जराबोधीयम्- प्रसोमासोवा।

13.सोमसाम- प्रसोमासाः।।

14.रोहितकूलीयम्- प्रसोमासोविपाः ।। लीयेऽयाभिसुता दिवःपी । इत्यत्र उत्तरयोः स्तोत्रीययोः प्रस्तावादिर्नीचैः। वृषालीये- मरुदिति। अत्र सर्वासु स्तोत्रीयासु द्वितीयपादाद्युच्चम्।।

15.आक्षारान्तं यौधाजयम्- प्रसोऽ31।। जयेऽक्षारान्ते देव प्र। सौभरेत्यादिनात्र प्रथमायां तुरीयस्य दीर्घत्वाद्वृद्धिः। उत्तरयो ह्रस्वत्वादवृद्धिः। एकाक्षरणिधने च जये शताद्वितीयमित्यत्र एकाक्षरणिधनानि संप्रभूतीनि द्व्यक्षरणिधनवत् तृतीयस्वरे आरम्भे प्राप्ते द्वितीयस्वरेऽत्र आरम्भविधानम्। अभरादिर्यौधाजये सर्वमिति प्रस्तावषष्ठस्य ह्रस्वस्यापि वृद्धिविधानम्। नदीषु प्रियस्सूनायां यौधाजयद्वैगण्वतरेष्विति। नदीष्वित्यत्र षुशब्दात्परमवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य वकारस्य वृद्धात्परौ य्वौ लुप्ताविति लोपप्राप्तस्य पुनरलोपविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

16.स्वारंसौपर्णम्-उद्घेदभिश्रुतामाऽ3घाम्।। स्वारे पर्णे योनावाद्ययोरित्यादिनात्राद्ययो स्तोत्रीययोरुद्गीथादि नीचैः। तृतीयोच्चान्त्यं हि स्तोभे दीर्घी भवति तृतीयायां गोमद्यवदित्यत्र द्यशब्दस्य ह्रस्वस्य हिस्तोभे दीर्घविधानम्। वाचि सर्वमोभवतीति अनेनोभाव प्राप्ते अनुस्थमिति षिसू शब्दस्य ओभावो न भवति। अर्हिंस्वारे पर्णे इति। अर्हिं चेत्यत्र हिशब्दात्परस्य आउवा व्यवहितमित्यादिनाभाव प्राप्तस्य मकारस्य पादान्त्यस्यातिहारः।।

17.आक्षारम्- इन्द्रम्।।

18.वैखानसम्- अभिप्रीऽ3याणिपवताइ।। वैखानसे प्रिया। प्र। आन्कारोवृद्धोऽनुनासिकः सर्वत्रावद्युतानः कलशामिति वृद्धपूर्वे अनुनासिके प्राप्ते अरे वैखानससन्तनिष्विति कलशानितिवृद्धः। अखानसे। इति भक्यन्तः पदगीतस्सर्वत्रेति पदगाने प्राप्ते उषसो इति सन्धिगानविधानम्।।

19.आशुभार्गवम्- अस्यप्रत्नाम[1]।। आशुचेति सर्वत्र प्रस्तावादिर्नीचैः। नाध्व तव प्रसो सनः इत्यत्र सर्वासु स्तोत्रीयासु प्रस्तावादिर्नीचैः। आशुभार्गवे पञ्चाक्षरोच्चाद्ययोः इति। आशुभार्गवे सर्वत्र आरम्भपर्वणि पञ्चाक्षराणीत्यर्थः। त्र्यक्षरोच्चाद्ययोरिति सर्वत्र पञ्चाक्षरे प्राप्ते उच्चाते इत्यत्राद्ययोः स्तोत्रीययोराद्यपर्वणि त्र्यक्षराणि। योनिवदस्य ध्यमायां। इति। अत्र मध्यमायां योनिवच्चतुराक्षरमित्यर्थः। दुह्रेसर्वत्रेति अस्य प्रत्नामयं सूर्यस्सर्वत्रेति सूर्यशब्दस्सङ्कृष्टः। एतदेवोदाहरणं अयँसूर्यायामित्यादिनात्र शब्दस्यानाभावः। अत्रैव तृतीयायां न सूर्यो भ्राजे इति। अत्र विकृष्टः।।

1.ख- स्वररहितं पर्व।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

20.मार्गीयवम्- अस्यौहोवा।। यवेमह्यामिति। महित्रीणा द्वितीयस्य वृद्धिरित्यत्र। मार्गी द्वितीये प्रसो प्रास्य द्वे । इति। अत्राद्ययोः स्तोत्रीययोर्द्वितीयपादादिर्नीचैः। अस्य प्र आद्ययोश्च। पूर्वसूत्रार्थमेव। एतदेवोदाहरणं अयमित्यादिनात्र द्रशब्दस्यार्भावः। ओवौकारयो रित्यादिनाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति न सूर्यमित्यत्र सूर्यशब्दस्यानाभावः।।इति प्रथमः।।1।।

==*==

।। द्वितीयो विंशः।।

1.सोमित्रम्- अस्यप्रत्नामनुद्युताऽ3मे।। मित्रेदि विद्युम्नास्यद्वे । इति अत्राद्ययोः स्तोत्रीययोरुद्गीथादिर्नीचैः। एतदेवोदाहरण-मित्यादिनात्र दृशब्दस्यानार्भाव। वाशब्दे च नित्यमोत्वं । इत्योभाव प्राप्ते अनुस्थमिति सूर्य शब्दस्य ओभावो न भवति।।

2.ऐटतम्-अस्य-एंआस्य[1]।। ओवौकारयोरित्यादिना सर्ववर्णानां आभावे प्राप्ते अनुस्थमिति नुशब्दस्य नसूर्यमिति सूर्यशब्दस्य च। उवर्णन्तु नसर्वत्र आभवतीति अनाभावः। ऐटतसारथिनोरविगीत इति। निहोता द्वितीयस्य अत्र संयोगे प्रत्ययेऽपि वृद्धिविधानम्। स्रसामैटतेऽभ्यासे प्रत्यये। इति। अत्र सहस्रसामिति सा शब्दात्परस्य मकारस्य अभ्यासे परतः लोपविधानम्। अयंसूर्यस्सर्वत्रेति र्यशब्द-स्सङ्कृष्टः। उपदृगयँसूर्यायामैटते, इति । उपदृगित्यत्र। न्यत्र उकारस्य लोपः। एतदेवेत्यादिना दृशब्दस्यानार्भावः। भुवनो, ऐटते, इति। ओवौकारयोरित्यादिनाभावे प्राप्ते भुवनो इति नोशब्दस्यानाभाव-विधानम्।।

1.ख- स्वररहितं पर्व।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

3.धुरासाकमश्वम्[1]- अस्यप्रत्नाऽ3म्।। अन्यत्र प्रथमतृतीय-पञ्चमाः इति प्रथमतृतीय पञ्चमेष्वगतिः। अत्र प्रथमद्वितीययोः प्रथमस्वरे तु गतिर्भवतीति न्यायेन गतिरेव। प्रतिस्तोत्रीयं बोधीय-धुरासाकमश्वयोरिति अत्र प्रतिस्तोत्रीयं निधनं भवति। न सामान्ते । एतदेवेत्यादिना दृशब्दस्यानाभावः। अयँसूर्यस्सङ्कृष्टः।।

4.विलम्बसौपर्णम्- अस्यप्रत्नामनुद्युतम्- पर्णे चेत्यत्र सर्वासु स्तोत्रीयासु प्रस्तावादिर्नीचैः। पर्णे इत्यत्र सर्वासु चतुर्थे उद्गीथ स्वरारम्भः। तृतीये लम्बे सोममिन्द्राय शुक्रं दुदुह्ले । इति अत्र शुक्रं दुदुह्ले इत्यगतिः।।

5.दैर्घश्रवसम्-अभिसोमासआयवओहाओहाऽ3ए। अभिसोमा इत्यत्र मध्यमायामुद्गीथाद्यस्य नीचविधानम्। पाजेथेभे दैर्घे, इति । अत्र पूर्व स्तोभे प्रत्यये अवृद्धिः। परे सर्वत्रेति। उत्तरे स्तोभे प्रत्यये वृद्धिरत्र दैर्घे व्रात्याग्निष्टुतोर्गीथर्द्धितीय इत्यादिना विशेषविधानात् अयोनिवत् कर्षणं नास्ति।।

6.द्विहिङ्कारवामदेव्यम्- प्रहिन्वाऽ23नंऋतम्बृहात्।।

7.सन्तनि- अभीहाउ।। तनिन्यभि प्र। गोष्ठप्रतोदेत्यादिना पादादिः ऋक्स्वरवदुच्चनीचम्। दादिस्तनि पार्श्वयोर्यथर्चस्सर्वत्रेति सन्तनि गायत्रपार्श्वयोस्सर्वत्र पादादिर्यथर्चमुच्चनीच प्राप्ते अस्तावहा-रयोरवश्ये हिस्तोमसुमरा प्रम रजी च। इत्यत्र प्रस्तावप्रतिहारयो रभीत्यत्राकारस्य मत्सरासश्च इत्यत्र मकारस्यायथर्चविधानम्। ऊसदोविशीयाष्टेडरुपेषु इत्यत्रादौर्मिणेत्युकारस्य यथा ऋक्स्वरमेव। ऋतमाउवाव्यवहितं पार्श्वसन्तन्यच्छिद्रमैधाञ्ओवैरुपाग्ने स्त्रिणिधने-ष्विति। अत्र ऋतमिति ऋवर्णद्वयात् परस्य आउवा व्यवहितमिति

ख-1. धुराँ साकमश्वम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लोपप्राप्तस्य मकारस्य पदान्तस्यातिहारः। हिन्वाभिसोमायां तनिभीशवयोरिति। वृद्धमन्तः पदेत्यादिना पदमध्यगतस्य हिन्वान इत्यत्र हिशब्दस्य तालव्यस्य हादौ स्तोभे परत आभाव प्राप्तस्याइभाव विधानम्।।

8.पौरुहन्मनम्- प्रहिन्वाऽ3नऋतम्बृहात्[1]।। हन्मने स्तोत्राना-मागायताम्। योनौ तृतीयपादे स्तोत्रानामागायता भवति। जास्वरोत्पत्तिरेव प्राक् तरुताया इति। योनौ तरुतायाः प्राक् जास्वरो नास्ति। अत्र तरुतायाः पूर्वं जा स्वरो भवतीत्यर्थः। स्वरं पूर्वमुक्तम्। प्राह्वां घं ह्नं चासंयोगे, इत्यत्र प्रहूयसाया द्वितीयस्य संयोगपरत्वाद वृद्धिरेव। योनावसंयोगे परत्वाद्वृद्धिः।।

9.गायत्रपार्श्वम्- मोषु ।। पार्श्वेऽगहि। घतः पार्श्वेमोषुत्वायामिति मोषुत्वावाघतश्चनेत्यत्र तशब्दात् परस्याइभावस्य आउवा व्यवहितमित्यादिना लोपप्राप्तस्य विसर्जनीयस्य पदान्तस्यातिहारः। गोष्ठप्रतोदेत्यादिनात्र पादादिभूत वर्णानामृक्स्वरवदुच्चनीचविधानम्। मोषुत्वा पार्श्वे श्रुधिशब्दोऽभ्यासे। इत्यत्र इहवासन्तुपश्रुधीति शब्दात्परस्य इमे हितेत्यत्र इकारस्य पादादिभूतस्याकस्सवर्णेदीर्घ इत्यनेन विश्लेष प्राप्तस्य पुनः प्रश्लेषविधानम्।।

10.सन्तनि- अस्ताहाउ।। निधने ह्रीषीस्थमिति प्रकृतिः। आउवाव्यवहितमित्यादिना आभावे प्राप्ते ओष्ठ्यश्चान्तःपदिको नाउभवति सर्वत्रेति अत्र पूर्वमिति पूशब्दस्य सूर्यमिति सूशब्दस्य चान्तः पदिकस्यानाभावः। गोष्ठप्रतोदेत्यादिनात्र पादादि वर्णानामृक् स्वररवदुच्चनीचविधानम्। समुसूर्य सन्तनिनि यथर्चगीते पर्वणीत्यत्र निधनभूत ऋक् स्वरेगीते पर्वणि सूर्यशब्दः सङ्कृष्टः। पञ्चसु भक्तिषु ऋक्

ख-1. प्रहिन्वाऽ3नऋतम्बृहात्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वरगीतिषु ऋक् स्वरापवादसूत्राणि विचिन्त्य ऋक् स्वराबाधेन गेयं सर्वत्र।।

11.सुरुपाद्यम्- यस्तेमदाःऽ2।। पवस्व यस्तेमदायां सर्वत्रेति विश्लेषः। आजिगसुरुपाणां चेति अत्र उपद्रव द्वितीयस्यावृद्धिरेव। स्थाभिर्यस्ते सुरुपे। इति। सूपस्थाभिरित्यत्राइभूतभिशब्दात्परस्य विसर्जनीयस्य इयां इति स्तौभिकस्वरे परतः लोपविधानम्।।

12.भासम्- यस्ते-माऽ3दो।। भासेक्रतुवित्तेनापवस्व मँहिष्ठ इत्यत्र तेनापवस्वेत्यगतिः। मासे चनौ । योनावेवप्रतिहारादेः वृद्धिः। नोहगीतौ। आर्चिकं निधनं न्यायेत्यादिनान्याक्षरस्यात्रश्वसा असीति सिशब्दस्य निहतस्य सम्प्रसारणे प्राप्ते न्यायादपेतप्रकरणे मणाजनं सदद्धोनामाविशासि विदेऽप्सुजित् ग्रहणात् षड्भासेत्यत्र सि शब्दस्य सम्प्रसारण प्राप्तस्य वृधेस्वरविधानम्।।

13.गायत्रीसामासितम्[1]- यस्तेमदोवरे ।। सितेन्नित्यत्र सर्वासु स्तोत्रीयासु प्रस्तावाद्युच्चम्। सितेथे द्वितीयमिति उद्गीथ द्वितीयस्य वृद्धिः। पवस्व यस्तेमदायां सर्वत्रेति अत्र विश्लेषः।।

14.वाचस्साम- अभिद्युम्नाम्- वाचस्साम्निदी द्वितीयं देव वह्निः स्तावे स्वरी। प्र। वाचस्साम्न्या सोप्रियन्देवाय । विकोशमित्यत्र विकोशमित्यगतिः। चस्साम्निच इत्यत्र उद्गीथतृतीयस्य नीचारम्भ विधानम्। श्पतिरभिद्युम्नतृतीयायां वाचस्साम्नीति । अत्र स्तौभिक-स्वरे परतः श्पतिरितिशब्दात् परस्य च विसर्जनीयस्य लोपः। नाविश्पताइ ए इति स्थिते गतिश्चान्तस्थामापद्यत इति सन्धौ विषये अचि परत इति सामतन्त्रवचनात्। अन्तस्था प्राप्ते नविश्पताया ए इति स्थिते अमध्ये इति। असवर्णयोर्मध्यगताया अन्तस्था लोपो भवतीति

1 वासिष्ठमासितम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वचनात्। असवर्णयोर्मध्यगतस्ययकारस्य लोपो भवतीति नविश्पताए। एवं भवति। आदिद्धोदा तस्येत्यादिना ह्रस्वस्याभिगाने प्राप्ते अपोजिन्वन् गविष्टये इत्यत्राकारस्य चन्वन् शब्दस्य च प्रत्युक्राम विधानम्। विष्टया वाचस्साम्नीति गतिष्ठयेत्यत्र तालव्यस्य येशब्दस्य तालव्यमाइयद्धृद्धमिति अनेन सूत्रेणाइभाव प्राप्ते आभावविधानम्।।

15.शौक्तम्- 5 0 सखा । शौक्तेश्रीये। तकारस्तु न सर्वेषु स्पर्शेष्वार्भवतीति अत्र तृशब्दस्यानार्भावः। ओवौकारयोरित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति सर्वत्र उवर्णस्यानाभावः प्राप्तः पुनः ग्रहणात् आभवतीति प्रकरणे शिशुं तिस्रोवाचायां सर्वत्रेति दिवश्शिशुमिति शिशुशब्दस्याभावविधानात् अत्र शिशुन्न इति शिशुशब्दस्य उवर्णन्तु न सर्वत्राभवतीति अनेनाभाव एव। आर्चिकं निधनं न्यायेत्यादिना निधनभूतपर्वमन्तर्वर्णयोरुदात्तानुदात्तयोर्वृधे स्वरस्य सम्प्रसारणे प्राप्ते जसावसन्तमार्मणीति न्यायादपेत प्रकरणे ग्रहणात् विशवसमिति संशब्दस्य शन्तममित्यत्र मंशब्दस्य चोभयोर्वृधेस्वर एव।।

16.आसिताद्यम्- 1 0 2 0 1 इन्द्रायसोमपा-तवाइ[1]।। सिते मने मदे प्र। हिष्ठीयासितयोरयमिति। अत्र सर्वासु प्रस्तावाद्युच्चम्। सिते स्वया तमा पुरु सुतमिति। अत्र मध्यमायामाद्यपर्वणि योनिवदन्त्याक्षरस्य उच्चत्वे प्राप्ते उपान्त्यस्य प्रशब्दस्यापि उच्चविधानम्। अयोनावेकोच्चमेव। हिष्ठीयगवसितेषु सचप वृत्सर्वत्रान्त्यमयोनौ, इति। अत्र पञ्चमपर्वान्त्यस्य वृद्धिः। योनाववृद्धिरेव। अत्रे नरे,ण सर्वत्र प्र।।

17.ऐडँकौत्सम्- 3 0 2 0 2 इन्द्राहीयाऽ23 ।। कौत्सेऽभितृतीयायां उभौस्तोभाविन्द्रायपूषाद्ययोरिति। स्वादि प्रथमायां चेति। आद्यायां

ख-1. तयाइ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तोत्रीयायां स्तोभद्वयस्यागतिः। उत्तरस्तँसखायः परित्यँरक्षः इति। अत्र द्वितीयतृतीययोरुत्तरस्तोभस्यागतिः। कौत्से हिशब्दो वृद्धः प्रकृतौ, ऊहे दीर्घस्सर्वत्र । संयोगे ह्रस्वः। इत्यत्र तृतीयायां त्यशब्दे प्रत्यये हिशब्दस्य ह्रस्वमेव। कौत्सेचेकारोकारौ,इति। अत्र हिस्तोभे परतः परीति रि शब्दस्य दीर्घविधानम्। तमित्यत्र सकारस्य ह्रस्वमेव। मन्द्रश्चतुर्थमनुवर्तते। ऐडं कौत्से चेति योनौ द्वितीयपर्वणि यान्यक्षराणि मन्द्रस्वरे भवन्ति तानि ऊहगीतौ चतुर्थस्वर इत्यर्थः। पूर्व सूत्रेण द्वितीयपर्वान्त्यस्य मन्द्रस्वरे प्राप्ते कौत्से वे सूष्वा चतुर्थमेकोना, इति। द्वितीयपर्वणि योनिद्रष्टा सूष्वाऽन्त्यमेकाक्षरं विना चतुर्थस्वरे भवति। त्से रयिमिन्द्रासर्वोऽभियो। इत्यत्र सर्वासु स्तोत्रीयासु उद्गीथाद्यस्य नीचविधानम्। कौत्स दँष्ट्रोत्तराकूपारश्रुध्य इत्यादिना अत्र पञ्चमपर्वणि द्वितीयाक्षरस्य वृद्धिरेव। योनाववृद्धिः।।

18.पदनिधनशुद्धाशुद्धीयम्- 1 0 2 0 1 0 2 1 इन्द्रायसोमपातवाइ।। शुद्धीयेऽभिद्वे गिरिं पुरोजि प्र। अत्र सर्वासु प्रस्तावाद्युच्चम्। क्रोशौपगवेत्यादिनात्र सर्वासु स्तोत्रीयासु उद्गीथाद्युच्चम्। योनावेव नीचम्। दावसुनिधन पूर्व नित्र जम्भेत्यादिनात्र सर्वासु तृतीय पादाद्यक्षरस्योच्चम्। योनौ नीचमेव।।

19.क्रौञ्चाद्यम्- 2 0 1 0 इन्द्रायसोहो । क्रौञ्चाभिनिधन सप्तह पयोत्तर धर्तोद्वत्रासदस्यवेषु वृण्यादिरिति। अनेन वृण्यादि भूतस्य ह्रस्वस्यापि दीर्घविधानम्। देच ङित् प्रथमोच्चमित्यनेन अत्र पादषष्ठस्योच्चमेव।।

20.रयिष्ठम्- 2 0 इन्द्रायसो।। पूर्वार्कपुष्परयिष्ठयो स्तौभिकं पर्वानुपादमिति। अत्र स्तोभानामाद्यं पर्वानुपादं भवति। सामान्ते सर्वाणीति। सामान्ते सर्वाणि स्तोभपर्वाणि भवन्ति। आर्चिकमकृष्टं सर्वत्रेति योनिवत् ऋगक्षर कर्षणं ऊहे सर्वत्र न भवति। योनावेव। अत्र तृतीयपादे प्रतिहारात् परं योनिवत्प्राप्ते अनुष्टुभत्वात् पर्वणां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सङ्घातानां चेत्यत्र पर्वद्वयस्य लोपः। अनन्तर पर्वण आद्यस्याक्षरस्य योनिवत् कर्षणमेव। अच्छिद्ररयिष्ठयोश्चेति अत्र सर्वपादादिभूतानां ऋक्स्वरवदुदात्तानुदात्ते प्राप्ते अनश्या,सनेमेत्यत्र अश्वामेत्यत्राकारस्य सनेमेत्यत्र सकारस्य चानुदात्तस्य उदात्तविधानम्।। इति द्वितीयः। 2।।

==**==

।। तृतीयो विंशः।।

4 3
21.यज्ञायज्ञीयम्- इन्द्राऽ5य ।। ज्ञीये परिनन्ति प्र। ज्ञीये दान्त्ये इति स्तावोपान्त्यस्य वृद्धिः। आद्यायामन्यत्रेति उद्गीथाद्यस्य वृद्धिः। थमोच्चद्वितीयं ज्ञीये सर्वत्रेति। द्वितीयस्य कर्षणं सर्वत्रेति। द्विहिङ्कारज्ञीययोस्समिन्द्र परित्ययोरिति। अत्र इत्परी, इकारात्परस्य तकारस्य लोपविधानम्। ज्ञीये स्यन्दते कृण्वते चर्षणीरधी विश्वँ इदित्यत्र इदिति पदान्तस्य हाउस्तोभे परतः आभावविधानम्। गणगीतीनामन्ते निधनमिति। अत्र गणगीत मध्ये, न, निधन प्रवृत्तिः।।

4 3
1.यज्ञायज्ञीयम्- पवाऽ5इत्रम्।। परेज्ञीयेषिसइत् प्र। ज्ञीये दान्त्ये इति पदान्त वर्णस्य प्रस्तावान्तम्। यत्र घटते तत्र प्रस्तावोपान्त्यस्य वृद्धिः। अत्र पादमध्ये प्रस्तावान्त्यस्याक्षरस्य विद्यमानत्वात् उपान्त्यस्य वृद्धिर्नभवति। दिवस्पदे तपोष्पवित्रायां ज्ञीय इति। दिवस्पदे इत्यत्र देशब्दात्परस्यार्चन्त इत्यत्र पादादिभूतस्याकारस्य पादान्त्यात् परः स्वरो विकृष्यत इति अनेन विश्लेष प्राप्ते प्रश्लेषविधानम्। अवन्त्यस्य स्वारकावज्ञीययोः इति त्यशब्दः सङ्कृष्टः।।

2 0 0 0 2
2.विशोविशीयम्- विंशोविशोहिम्.वोऽ3अतिथाइम्।। विशीये प्रियँसन्ति। प्र। ज्ञीयर्क्षुविशीये प्र। इत्यत्रोद्गीथाद्युच्चम्। विशीयेमोच्चादि-र्नीचो नौ। इत्यत्र प्रथमायां तृतीयपादादिर्नीचैः। हिन्वाविशीयोऽ ताइथ्यामादिः अयोनौ च इति अत्र अताइथ्ये सदृशस्य वृद्धिविधानम्। उत्तरयोर्नास्ति। योनौ चान्ते। इति अत्र योनावेव उत्तरस्तोभस्यागतिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तरयोर्गतिः। भिःस्वासुविशीये। इत्यत्र स्तौभिकस्वरे परतः भिशब्दात्परस्य विसर्जनीयस्य लोपः। मन्मभिः प्रशस्तभिरित्यत्र उभयोरस्त्येवेत्यर्थः। विशीये च पूर्वे नशूष। इति पादमध्यगतस्य ह्रस्वमेव। सङ्कृष्टं च तृतीये नौ। द्वितीयमुत्तरयोरिति अत्र प्रथमायां चतुर्थपर्वणि अन्त्यस्याक्षरस्य सङ्कृष्टात्सङ्कर्षणामित्यर्थः। उत्तरयोरुपान्त्यस्ये वेत्यर्थः। प्रशँसन्ति विशीयान्धीगवयोरिति शँसन्तीत्यत्र शकारात्परस्यातिहारप्राप्तस्यानुस्वरस्य लोपविधानम्। उत्प्रशँसायां विशीयज्ञीययोरिति उद्यता इत्यत्र उकारात्परस्य पूर्वाङ्गप्राप्तस्य तकारस्यातिहारः। हव्याविशीय इति। हव्यानीत्यत्र व्याइत्यत्राकारस्यात्वविधानम्। हव्यान्यैरयद्दिवीत्यत्र हव्यानि ऐरयदिति स्थिते वृद्धमन्तः पदे तालव्यमित्यादिना पदमध्यगतस्याकारस्याइभाव प्राप्तिः। हीषीस्वरादिभूतस्य नीचाद्यस्य तालव्यमाइयद्वृद्ध मित्यनेनाइ भावप्राप्तः नाइ अ इति स्थिते दीर्घवृद्धोपहित इत्यादिना यकारापत्तिः। ओ-हुवाइ-नाया। इत्येवं नुवा।

3.सुरुपोत्तरम्[1]- उच्चातेजौहोऽ2। अवृद्धादिपदान्त्येत्यादिना न्यर्यत इत्यत्र यकारस्य व्यवधाने प्राप्ते द्व्यन्तस्थ परेतु लोप इति द्व्यन्तस्थ परत्वात् अत्र लोपः। आजिगसुरुपाणां चेति। अत्र उपद्रव द्वितीयस्य वृद्धिः।।

4.अदारसृत्- हाउच्चातेजा।। क्रोशौपगवेत्यादिनात्र सर्वासु स्तोत्रीयासु उद्गीथाद्यनुच्चम्। योनावेवोच्चम्। नि अर्यआ इत्यत्र द्व्यन्तस्थ परेतु लोप इति व्यवधान यकारस्य लोपः।।

5.इडानाँ संक्षारः-औहोइहुवाऽ3होइ-उच्चातेजाऽ3ताऽ3मन्धसः। संक्षारे भूमिश्वानि। प्र। संक्षार वैश्वज्योतिष गोराङ्गिरसेषु नियान्त इति नियान्ता वर्धन्ते। इहेवशृण्व इत्यत्र नियामञ्चीऽ3त्राऽ3मञ्चताइ, इति

1. ख- सुरोपोत्तरम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नियान्तः। अदेज्यवे अद्रिरिति। अददे ज्यवे इति देवे शब्दयोर्वृद्धिः। अभूम्युच्चासंक्षार इति अवृद्धादित्यादिना मिशब्दात्परस्य व्यवधान-प्राप्तस्य पुनः वृद्धात्परौ ख्वौ लुप्ताविति लोपप्राप्तस्यात्र लोपविधानम्। सर्वं जनित्रसंक्षाररथिराजेषु, इति अत्र महित्रीणा द्वितीयस्यापि वृद्धिविधानम्।।

2 1 4 0 5
6.भरद्वाजस्यपृश्नि- पराइतोऽ23षिञ्चताँसुतँहाउ।। पृश्निनिज्येष्ठ मित्यादिनात्र सुषावसो अदब्धस्सु एतावगतौ। पर्याम्म इति अत्र सुषावसो इत्यत्र उद्गीथादिः नीचः। लं विस्मिन्नित्यादि सूत्रैः ऋक्स्वरे उच्चस्थ विशब्दस्य पुनरुच्चग्रहणात् अन्यत्रोद्गीथान्त्य पर्वान्त्यास्य उदात्तस्य नीचत्वमेव। [1].....र्हत्येत्यादिना उद्गीथ द्वितीयस्य योनौ वृद्धिः। नोहगाने। पृश्निन्यपादादिः भात्। इति स्तोभात्परस्य पदमध्यगतस्याक्षरस्य सर्वत्रवृद्धि प्राप्ते अत्र अनो वि भि रित्यत्र नो शब्दस्याप्सु इत्यत्र अकाररस्य चावृद्धिः। पृश्निनि तृतीय पादान्ते च दक्षसा पतिः कविमिति योनौ तृतीयपादान्ते च दक्षसा पतिः कवीमापद्यते। पृतनातूतद्विषामिति। पृतनानामित्यत्र पूर्वसूत्रेण पतिः कवीस्वरुप प्राप्तस्य उतद्विषाविधानम्। पतिः कव्युत्तमे च। इति योनौ उत्तमपादे पतिः कविः। सा चात्र ऊहगाने उतद्विषामापद्यत इत्यर्थः। पतिः कविरुतद्विषयोर्भेदः द्वितीयः प्रथमारम्भमात्रमेव। नर्यः परीतायामित्यादिनार्यः विकृष्टः। आद्यादित्यनेन प्रस्तावद्वितीयस्यात्र सर्वत्र वृद्धिः। नोविभिरित्यादिनात्र विश्लेषः। इडाभिरैडानामिडान्ताः। इति अत्र पूर्वयोर्निधननियमः।।

20 1 40 5
7.भरद्वाजस्यपृश्नि- श्रीणान्तोऽ23गोभिरुत्तरँहाउ।। पृश्निनि ज्येष्ठमित्यादिनात्र सर्वत्रगतिः। पृश्निन्येकर्च इति अत्र उद्गीथाद्यस्य नीचत्वम्। इतरत्सर्वत्र सामान्यमुक्तम्।।

1.कीटभक्षितम्। द्रष्टव्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

20 0 0 0
8.हाविष्मतम्- हाउपरिस्वानोगिरिष्ठाहाउ।। ष्मते सःपी प्र। स्वानः परिस्वानायां वैदन्वत हाविष्मत रेवतीषु। अत्र स्वशब्दः सङ्कृष्टः। त्वङ्कविर्द्धितीयेदन्वते त्वं शब्दोऽत्र विकृष्टः। समानोदर्केषु पूर्वयोरुद्धारः। कर्षणेतु निवर्तेते। इत्यादिनात्र कर्षणवृद्धे न भवतः।।

3 4 5 0 0
9.शाम्मदम्- परिसुवानऐ[1]।। स्वानः परिस्वानायां इत्यादिना स्वात्र विकृष्टः। रिष्ठाश्शाम्मदे । रिष्ठा शब्दोऽत्र वृद्धिः। अन्यत्रोद्गीथ तृतीयस्यावृद्धिरेव।।

2 1 40 0 5
10.दावसुनिधनम्- परिसुवाऽ23नोगिरिष्ठाहाउ।। दावसुनिधने त्वँ सोमान्त्यस्सर्वासु मदेषुगोषातिरित्यत्रा गतिः। स्वान इत्यादिना स्वाशब्दः विकृष्टः। दावसुनिधनेत्यादिना तृतीयपादाद्युच्चम्। योनौ नीचम्। कर्षणे तु निवर्तेते इत्यादिना कर्षणवृद्धे न भवतः।।

1 2 0
11.प्रतीचीनेडंकाशीतम्- परिसुवानः। अस्यपीत्वाकाशीते। इत्यत्र सर्वासु स्तोत्रीयासु प्रस्तावाद्युच्चम्। स्वानः त्वं कविः एतौ विकृष्टौ। समानोदर्केष्वित्यादिना पूर्वयोरुद्धारः।।

2 0 0 0 0 1 2
12.हाविष्कृतम्- परिसुवानोगाहाउराइष्ठाः।। हाविष्कृते त्वं सोमाद्यान्त्ययोः स्वादिः प्रथमायां चेति अगतिः। स्वशब्द स्त्वं शब्दावत्र विकृष्टौ। मदिन्त मदिष्ठ नोगि हाविष्कृते। इति अत्र गिरिष्ठा इति गिशब्दस्य हादौस्तोभे परतः तालव्यस्याभावविधानम्। कृते चापदान्त इति । त्वं कविरित्यत्र त्वंशब्दस्य ह्रस्वस्य पदान्तत्वाद्दीर्घत्वं न भवति। कृते थे तुरीयं सर्वत्रेति वृद्धिः। षष्ठञ्च ध्वक्षयोरिति। अक्षरादित्यत्र षष्ठस्याकारस्य क्ष शब्दे प्रत्यये वृद्धिविधानम्। ज्ञीये चर्षणी र्य ओजिष्ठायामिति अत्र हिशब्दात्परस्य पूर्वाङ्ग प्राप्तस्य पदान्तस्य व्यञ्जनभूतस्य लुप्तस्य पूर्व यकारस्य अक्षरविधानम्।।

3 4 50
1.ख- परिसुवानऐ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

4 3 0
13.यज्ञायज्ञीयम्- अयाऽ5म्पू।।

2 1 20 10 2 1 2
14.यद्वाहिष्ठीयोत्तरम्- अयम्पूषारयिर्भगः[1]।। हिष्ठीयासितयो रयमिति अत्र प्रथमायां प्रस्तावादिर्नीचः। षासिते, इति षा शब्दस्यासिते अनुच्चविधानात् अत्र ऋक्स्वरवदुच्चमेव। हिष्ठीयगवसि तेषु सच पवृत्सर्वत्रात्यनित्यत्र सप्तमपर्वण्यन्त्याक्षरस्य वृद्धिविधानम्। योनौ वृद्धिर्भवति। र्यशब्दस्तत्र सङ्कृष्टग्रहणमित्यादिना सङ्कृष्टग्रहण प्रकरणे अग्रहणात् अत्र विकृष्ट एव। त्वद्रयिरिति योनौ प्रथमस्वरत्वादत्रापि योनिवत्स्वर एव। आसिताद्यनीचारम्भः।।

4 3
15.यज्ञायज्ञीयम्- धर्ताऽ5दि।। धर्ताज्ञीये त्वीयोमादि प्र। अत्योगभस्त्योः स्वः शब्दश्च ज्ञीये कावाभि क्रन्देष्विति। अत्राद्यायां भृशब्दस्यानाभविः।।

2 1 40 5
16.आकूपारम्- प्रसुन्वाऽ23नाय।। नभृ प्रसुन्वानायेत्यादिना भृशब्दस्यानाभविः।।

2 10 0
17.क्रौञ्चाद्यम्- अयम्पूषौहो।। क्रौञ्चाभिनिधनेत्यादिनात्र वृण्यादिभूतस्य दीर्घविधानम्। क्रौञ्चे दे सर्वत्र चमात्प्रथमोच्च मित्यत्र सर्वत्र पादषष्ठस्योच्चविधानम्। क्रौञ्चयोः पर्याकूपारे चागताः स्तोभाः। इति सर्वत्र सर्वस्योभावमगति प्राप्तः।।

3
18.वामदेव्यम्- काऽ5स्तम्।। देव्ये येद प्रिया। प्र। पार्ये हर्यशब्दश्च देव्ये इति सङ्कृष्टः। विच्छन्दस्सु च देव्ये। इति अत्र सर्वासु चतुर्थपर्वणि अन्त्याक्षरात्प्राक् सर्वेषां वर्णानां उच्चविधानम्। देव्ये त्वनृगन्तीयस्पर्शेत्यादिना तृतीयायां ऋङ्मध्यगतस्य नामि विसर्जनीयस्य अनाभावः। मदुरितायेददति देव्ये। इत्यत्र तृतीयायां दुरितेत्यत्र दुशब्दात्परस्य ओवौकारयोरेकीभावे लोप इति

---

2 1 20 0 1 2
1.ख- अयम्पूषारयिर्भगः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लोपप्राप्तस्य पदान्त विसर्जनीयस्यातिहारः। अपदान्तः। समानञ्चेति उस्थाक्षराणां सर्वत्र प्रकृतिभावे प्राप्ते न स्वे विकल्पे प्रियावसु सिसीदतु भूरिते वसु। इति अत्र तृतीयायां प्रस्तावे वस्वित्यत्र सुशब्दस्य आउभावविधानम्।।

1 0 20 1
19.ऐडंसैन्धुक्षितम्- तिस्रोवाचो ।हाइ।। सैन्धुक्षितेतिस्रोवाचो - त्तमायामन्त्य इत्यत्र उत्तमायामन्त्यस्तोभस्य अगतिः। कनि तिस्रोवाचायां सैन्धुक्षितौशनयोरिति कनिक्रददित्यत्र निशब्दस्य पदमध्यगतस्य तालव्य संज्ञकस्य वृद्धमन्तःपदे तालव्यमित्यादिना भावे प्राप्ते आइभावविधानम्। ओवौकारयोरित्यादिना आभावे प्राप्ते ऋगन्तस्पर्शेत्यादिनात्र पूर्वयोरनाभावः।। इति तृतीयः।।3।।

==***==

।।चतुर्थो विंशः।।

1 0 0 2 2
1.स्वारंत्वाष्ट्रीसाम- सुतासोमाऽ3हा।। त्वाष्ट्रीसाम्नोश्च सर्व इति सर्वस्तोभानामगति प्राप्ते न हरिं वत्समित्यादिना वाचस्पतिस्सोम-स्पतिस्सखेन्द्र इत्येतेषां गतिः। भे प्रत्यये सहस्रधारायां त्वाष्ट्रीसाम्नोः स्वर प्रथमे च इति सोमस्पतिरित्यत्र ति शब्दात्परस्य विसर्जनीयस्य स्तोभे परतः पदान्तस्याप्याभावविधानम्।।

5 0 30 2
2.द्विरभ्यासं त्वाष्ट्रीसाम- सुता-सोमाऽ3।। पूर्वसाम्नि यदुक्तं तदत्रापि समानम्। न विशेषोऽस्ति।।

2 1 40 0 0 5
3.भरद्वाजस्यपृश्नि[1]-पुनानाऽ23स्सोमधारयाहाउ।। पृश्निनि ज्येष्ठमित्यादिनात्र प्रत्नँसधस्थमित्यगतिः। पुनानायाम्मन्तवदिति । अत्राद्यन्तयोरुद्गीथादिर्नीचैः। नीचात्परःषष्षेध इत्यादिनात्राद्यायां उद्गीथाद्यपर्वणि अर्षसीत्यत्र नीचपूर्वषकारस्याप्युच्चविधानम्।

1. ग- पृश्नि।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पृश्निन्यपादादिर्भात्। इत्यत्र सर्वासु स्तोभात्परस्य पादमध्यगतस्याक्षरस्य वृद्धिविधानम्। योनौ वृद्धिर्नास्ति। आद्यादिति अत्र सर्वासु प्रस्तावद्वितीयस्य वृद्धिप्राप्ते अनुत्से। यस्येति अत्र मध्यमायां उत्सो इति त्सो शब्दस्यावृद्धिः। सनिहितमसँहितं पृश्निदैर्घयोरिति। अत्राद्यायामुद्गीथान्त्यपर्वान्त्यस्य सिशब्दस्य। लंविस्मिन् इत्यादिना पौरुमद्गे सिशब्दस्योच्च विधानात् अत्र सिशब्दस्य नीचविधानम्। दिव्यंज्यर्षसीत्यादिनात्र विकृष्टः। पृश्निनितृतीयपादान्त इत्यादिनात्र सूत्रद्वयस्य पूर्वमेवोक्तार्थः। अत इह नोच्यते।।

2 0 0 0 0
4.आभीशवोत्तरम्- पुनानस्सोमधारयाए-ए।। भीशवे सीदनृभिः प्र। पुनानायामाद्यस्सर्वास्विति अत्र सर्वासु पूर्व स्तोभस्यागतिः। भीशवेऽभिगीतात्। इति अत्र सर्वासु अभिगीतात्परस्य वृद्धिप्राप्ते अद्रिनो अर्षण्य। अत्राद्ययोर्नो अर्षसीत्यत्र षकारस्य हिरण्यय इत्यत्र णिशब्दस्य च अभिगीतात्परस्य वृद्धिविधानम्। तस्माच्चेति अभिगीतात्परस्य पदान्तभूतस्य सर्वत्र वृद्धिप्राप्ते। अवीर्यंदंतोर इत्यत्र मध्यमायां प्रियमित्यत्र यंशब्दस्य अवृद्धिविधानम्। नो अर्षसि पुनानायां गौङ्गवाभीशवयोरिति। गौङ्गवाभीशवयोरपवाद दर्शनात्। आभीशवादिषु दीर्घवृद्ध इत्यादिना गतेः परं यकारस्य व्यवधानमेव। दिव्यं ज्यर्षसीत्यादिनात्र विकृष्टः। आपृच्छमवृद्धँ सर्वत्रेति सङ्कृष्टः। नृभिः प्रत्नँसधस्थमित्यादिनात्र नृशब्दस्यानार्भावः। सञ्जयाभीशवेत्यादिना प्रस्तावे पर्वभेदो नास्ति। पर्वभेदः प्रकृतावेव।।

10 20 0 1 3 2 2 1 0
5.वासिष्ठम्- औहोवाहाऽ3होइ[1]- इहा-अयँसोमाः।। यानि पार्थे तानिसिष्ठे प्र। एकं सिष्ठे त्रिष्टुभिचोतायां शने च द्वितीय चतुर्थस्थम्। पदान्ते काम्पा पदादौ च दीर्घे। स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति। एतेषां सामान्यमेव। अत्रापवादो नास्ति।।

---

10 20 30 1
1. ग- औहोवाहाऽ3होइ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

6.वामदेव्यम्[1]- ए३ऽ5दु।। देव्ये एदु प्रस्तावोपान्त्यं देव्ये दास्वीसो इत्यत्र सर्वासु प्रस्तावोपान्त्यस्य वृद्धिर्न भवति। विच्छन्दस्सु च देव्य इति अत्र सर्वासु चतुर्थपर्वणि अन्त्याक्षरात्प्राक् सर्वेषां वर्णानां उच्चविधानम्। अनँश देव्य इति। उदानँ शश इत्यत्र नकारात् परस्यानुस्वारस्य अनुस्वारस्पर्शेत्यादिना अतिहारे प्राप्ते पुनः प्रश्लेषविधानम्। श्रवस्यवो देव्य इत्यत्र तृतीयायां श्रवस्यवो प्रायुभिरित्यत्र वशब्दात्परस्य पादादिभूतस्याकारस्य पादान्त्यात्परस्वर इत्यादिना विश्लेषे प्राप्ते पुनः प्रश्लेषविधानम्। वावृधे न्यं च देव्य इत्यत्र तृतीयायां न्यशब्दः सङ्कृष्टः। देव्य आकाराकारयकाराभ्यास एनातंवोऽग्निमिति। वावृधेन्यमित्यत्र न्यं शब्दात्परतः अकारागम विधानम्। ओवौकारयोरित्यनेनाभावे प्राप्ते देव्येत्वनृगन्तीयस्पर्श इत्यादिना प्रायुभिरित्यत्र नामि विसर्जनीयस्य नाभावः। अनवर्णस्त्व चेता मि न त्र्यक्षर पादाह्वयाः अवर्ण व्यतिरिक्तानामचां नामि न त्र्यक्षरमिति।।

7.गौषूक्तम्- परि1सु2वा0नो10गौ0 ।। गौषूक्ते र्यआ इत्यगतिः। षूक्ते शुभ्रमुच्चैनाया। इति अत्र सर्वासु प्रस्तावाद्युच्चम्। थे षूक्ते द्वे साव्यामिति। अत्र सर्वासूद्गीथाद्युच्चम्। स्वानः परिस्वानायामित्यादिना स्वा शब्दोऽत्र विकृष्टः। षूक्ते चेत्यत्र तृतीयपादे तृतीयपादादिः यथर्चमुच्चनीचम्। समानोदर्कत्वात् पूर्वयोरुद्धारः।।

8.वारवन्तीयम्- प्रा20णा0शिशा0औ0हो1हाइ2।। वन्तीय इन्द्रे सन्त्वित्यादिनात्राद्ययोः हिन्वनृताभक्त इत्येतावगतौ। तृतीयादिन्यामित्यादिना पादान्तानामाभावे प्राप्ते व्यञ्च इत्यत्राद्ययोः द्वि, प्रि, इत्येतयोः पदमध्यगतयोराभावविधानम्। सर्वं वृद्धमित्यादिनात्र आद्यायां शुशब्दस्य चाभावः। इलान्दवन्तीय यौक्तेष्वौकारे। इत्यत्रोत्तरयोरौकारे परतः पूर्वस्य तशब्दस्य ह्रस्वस्य दीर्घविधानम्।।

1.ग- महावामदेव्यम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

9.सत्रासाहीयम्- पवा३234[1]-स्वदक्षसाधनः।। साहीये दे प्र। साहीये शताद्धितीयमित्यादि सूत्र चतुष्टयस्य पूर्वमेवोक्तम्। विस्तरभयादिह नोच्यते।।

10.बृहद्धारद्धाजम्- परिप्रिया।। बृहद्धारेमहि प्र। वृधाबृहद्धार-द्धाजे । ऋतावृधेत्यत्र याशब्दस्यात्वविधानम्। ते सर्वत्र विवृतमकार-प्रत्ययमित्यत्र ते शब्दस्य प्रकृतिः। इडाभिरैडानामिडान्ताः। इत्यत्र पूर्वयोरिडान्तैव। नप्त्योरौर्णायवयोः परिप्रियायाम्मार्गीयवे चेति प्त्यो शब्दोऽत्र विकृष्टः।।

11.क्रोशम्-सोमाः ।। क्रोशे धीभिः प्र। क्रौशौपगवेत्यादिनात्र सर्वासु उद्गीथाद्युच्चम्। योनावेवनीचम्।।

12.वाम्रम्- परीतोषिञ्चता ।। वाम्रेऽभिसोद्वे, मान्यत्रेति। अत्र मध्यमायां प्रस्तावादिर्नीचैः। वाम्र होइस्तोभस्योत्तरस्या गतिः। सर्वत्रोहगाने योनौ च उत्तरस्तोभस्यागतिः। वाम्रे च परीतायामित्यत्र आद्यायां नर्यः परीतायामित्यादिना विकृष्टभूतस्य रिशब्दस्य यकारे च प्रत्यये, इत्यादिना आभावे प्राप्ते आइभावविधानम्। म्रेतृतीये वार्धस्व तन्वा इति योनौ तृतीयपादे वार्धस्व तन्वा इति योनौ तृतीयपादे वार्धस्वतन्वा इति, आराता इति, शता इति, त्रीणि पर्वाणि सन्ति। अदब्धायायान्त्वान्धामध्ये मान्गोच मागायतोपहिता इति। अत्रोत्तमायां मन्द्रयायां च योनिद्रष्टयोवाधीरातयो स्थाने । मागयता पूर्वा अन्धा भवतीति। वार्धस्वतन्वा एकाक्षरोच्चा। आरातेः त्र्यक्षरा। आन्धाद्व्यक्षरा एतावान्विशेषः। मागायता आरातेः अन्धाः। सोमो वाम्रे। अत्राद्यायां सोमेति मशब्दस्य वृद्धस्य स्तोभे परतः पदगाने प्राप्ते सन्धिगानविधानम्। न वाम्रे स्पर्शान्तं व्यञ्जेति। तृतीयोच्चमित्यादिना

1.ग- पवा३34।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हादौ स्तोभे परतः पूर्वस्य ह्रस्वस्य दीर्घे प्राप्ते वाम्रे सर्वत्र स्पर्श परस्य तालव्यस्य ह्रस्वस्य दीर्घत्वं न भवति। अतोऽत्र तृतीयायां भि शब्दस्य ह्रस्वमेव। अत्र ममद्रिभिरित्यत्र मकारस्य दीर्घः। मोविभिरित्यादिनात्र विश्लेषः। कर्षणेत्यादिना कर्षणवृद्धे न भवतः। ओकारान्तः पदिकोग्रहणादाभवति एकारहकारयोः प्रत्यययोः काव याम वत्सोमस्यामस्विति। सुषावसो इत्यत्र सोशब्दस्य अन्तःपदिकस्य हकारे परत आभावविधानम्।।

13.मानवोत्तरम्- होवाइ-परीतोषिञ्चतासुतम्[1]।। नवेमन्द्राभि सोमत्ससुषा इति। अत्र मध्यमायां प्रस्तावादिर्नीचैः। नवेगीथादिरिति। ऊहे सर्वत्रवृद्धाः। अयोनौ । योनाववृद्धिः। नर्यः परीतायामित्यादिना र्यः विकृष्टः। अत्र शुर्मदायाः पूर्वस्या उवान्त्यस्य नीचमित्यत्र सर्वासु तृतीयपादे प्रथमपर्वान्त्ये द्वे अक्षरे नीचैर्भवतः। योनावेव नीचम्। अत्राद्यायां निधने हीषीस्थ सर्वत्रेति प्रकृतिभावे प्राप्ते पुनराभावविधानम्। षिबमन्तदुक्थयोर्वे। द्रिदँष्ट्रे इति । उदात्तात्पर-मुच्चैर्भवतीति उच्चप्राप्तस्य पदमध्यगतस्य तत्र नीचविधानात् अत्रोदात्तात्परमुच्चैर्भवतीति उच्चमेव। चित्वानवे। चित्वाप्सु इत्यत्र त्वाशब्दात्परस्य अकस्सवर्णे दीर्घ इति प्रश्लिष्टस्यात्र विश्लेष-विधानम्। हितपौष्कलेत्यादिनात्र तृतीयान्तमोइ इत्येतयोः आदिद्वोदाइत्यादिना प्रत्युत्क्रामे प्राप्ते अभिगानविधानम्। ओवौकारयोरित्यादिनात्र आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अन्त्योकारस्यानाभावः।।

14.आनूपंवाध्र्यश्वम्- पराइपराइ ।। ध्र्यश्वत्वाष्ट्री साम्नोश्वदक्षसा पतिः कविमिति अत्र च दक्षसा स्थाने पतिः कविर्भवति। नर्यः परीतायामित्यादिना नर्यशब्दस्सङ्कृष्टः। नोऽविभिरित्यादिनात्र

1.ख- परीतोषिञ्चतासुतम् ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विश्लेषः। वृद्धाच्च सर्वत्रत्यत्रोकारस्य विश्लेषः। दधन्वाँ यस्सर्वत्रेति। अत्र पदगानमेव।।

15.अग्नेस्त्रिणिधनम्- श्रीणन्तोगो (20, 0) । ओष्ठ्यश्चान्तःपदिकोनाउ भवति सर्वत्रेति उकारस्यनाभावः। निहोताणस्सो पम्मघ ज्ञैः परिक्रतुरिमान्गो, इत्यत्र योनिवद्धारे प्राप्ते क्रतुशब्दस्य निहोता विधानम्।।

16.श्यावाश्वम्- सोमाऽ31 (3Q 2)।। श्यावाश्वे चेति प्रस्तावतुरीयस्य च वृद्धिः। दधियज्ञीयक्रौञ्चयोरिति। दीर्घवृद्ध इत्यादिनात्र व्यवधान प्राप्तस्य यकारस्य ज्ञीयक्रौञ्चयोर्लोपविधानात् अत्राइ भूतस्य गतेः परं व्यवधानो भवति।।

17.आन्धीगवम्-सोमाःपवन्तआऽ1इन्दावाः (2Q, 2)।। धीगवषेधयो - र्धियः ।प्र। धीगवेस्तावषष्ठमिति प्रस्तावषष्ठस्य प्रत्युत्क्रामः। स्वाध्यः सोमाः पवन्तायं वित मधु निधनान्धीगवषेधज्ञीयेष्विति। स्वाध्य इत्यत्र सुशब्दात् परं व्यवधानप्राप्तस्य वकारस्य वृद्धात्परौ इत्यादिना लोपप्राप्तस्य वकारस्य अलोपविधानम्।। दीर्घवृद्धोपहित इत्यादिना व्यवधानप्राप्तस्य यकारस्य ज्ञीयक्रौञ्चयोर्लोपविधानादत्र दधाया इत्यलोपः। सुष्वाणायाञ्चान्धीगव इत्यत्र तृतीयायां अधित्वचीत्यत्र धिशब्दस्य इ पदान्तस्यापि हादौ स्तोभे परतः आभावविधानम्। त्वचि सुष्वाणायाञ्चान्धीगव इति, त्वचीष इत्यत्र चिशब्दात्परस्य पादादिभूतस्य इकारस्य पादान्त्यात्परस्वरो विकृष्यते इत्यनेन अत्र विश्लेषप्राप्तस्य प्रश्लेषविधानम्। त्वाँरित्वंद्याञ्च गवाष्टेडसिमासु इति त्वं त्वं शब्दावत्र सङ्कृष्टौ कौल्मलान्धीगवेत्यादिना उद्गीथादिर्नीचैः। अत्रोच्चम्। आन्धीगवे च द्वितीयमिति अत्र सर्वत्रोपद्रव द्वितीयस्य वृद्धिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

18.निषेधः- सोमाःपवन्ताऽ3इन्दवाः ।। धीगवषेधयोर्धिया प्र। स्वाध्य इत्यत्र सुशब्दात् परस्य वकारस्यात्र पूर्वसामवत् अलोपः। मित्रास्स्वानास्सर्वत्रेति अत्र स्वशब्दस्सङ्क्रुष्टः। व्यद्रिभिर्ज्ञीय इति अत्र विकृष्टः।।

19.श्यावाश्वम्- पवाऽ31 ।। ज्ञीये चातिसर्वत्र तिशब्दस्य सर्वत्र प्रकृतिभावे प्राप्ते नवाश्वान्धीगवयोरिति अत्राति शब्दस्याइभावः। श्यावाश्वे चितिप्रस्तावतुरीयस्य दीर्घस्य वृद्धिप्राप्ते अयावास्वासोमधा इति अत्राद्यायां प्रस्तावतुरीयस्य वृद्धिर्न भवति।। अत्र सर्वत्र विवृतमकारप्रत्ययमिति अत्र त्रेशब्दस्य प्रकृतिः। त्वाँ रित्वंद्याञ्चेत्यादिनात्र त्वां त्वां शब्दावत्रविकृष्टौ ।।

20.आन्धीगवम्-पवस्ववाजसाऽ1तायाइ ।। धीगवे स्ताव षष्ठमित्यादिना षष्ठस्य प्रत्युत्क्रमे प्राप्ते चमं योनौ पर्यूषु विशस्त्वाँ रित्वंद्याञ्च इत्यनेन उत्तरयोः प्रस्ताव पञ्चमस्य प्रत्युत्क्रमं विधानं। ज्ञीये चाति सर्वत्र इति तीशब्दस्य सर्वत्र प्रकृतिः। अत्राइभावः। दीर्घवृद्ध इत्यादिना दधाया इति व्यवधानप्राप्तस्य यकारस्य लोपविधानम्। जिगत्नवस्ते पूतायां कौञ्चाद्य इत्यादिना भक्त्यन्तः पदगीतस्सर्वत्रेति पदगाने प्राप्ते सन्धिगानविधानम्। व्यद्रिभिर्ज्ञीय इति अत्र सङ्क्रुष्टः।। इति चतुर्थः।।4।।

==****==

।।पञ्चमो विंशः।।

21.आकूपारम्-पवस्वाऽ23वाज।।स्पष्टम्।।

1. क्रौञ्चाद्यम्- सोमाःपवौहो ।। पवन्ते क्रौञ्चेति। तालव्यमाइयद्वृद्धमिति तालव्याक्षराणां वृद्धानामाइ भावे प्राप्ते अवृद्धमप्याइ भवतीति पवन्ते इत्यत्रावृद्धस्य तेशब्दस्य आइभावविधानम्। क्रौञ्चे दे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च मात्प्रथमोच्चम् इति। क्रौञ्चे सर्वत्र पादषष्ठाक्षरस्य उच्चप्राप्ते असूरास इत्यत्र मध्यमायां तृतीयपादे सप्तस्याक्षरस्योच्चविधानम्। क्रौञ्चाभिनिधनेत्यादिना सर्वत्र वृण्यादिभूतस्याक्षरस्य दीर्घत्वे प्राप्ते क्रौञ्चे त्व संयोग इति। अत्र मध्यमायां तृतीयपादे दर्श इत्यत्र, दर्श शब्दस्य ह्रस्वस्य संयोगपरत्वान्नभवति। दधियज्ञीयक्रौञ्चयोः पादान्त-मित्यादिना विश्लेषे प्राप्ते प्रश्लेषविधानम्।।

2 10 2Q 1 2 1
2.ऊर्ध्वेडंत्वाष्ट्रीसाम- सुतासोमधुमत्तमाः ।। सुता च प्रान्त्ययोरिति अत्र प्रथमान्त्ययोः प्रस्तावादिर्नीचैः। क्रौध्यष्टम्भे-त्यादिनात्र तृतीयपादादिः यथर्चम्।।

2 10 20 Q 1 2 1
3.पदनिधनशुद्धाशुद्धीयम्-पुरोजितीवोअन्धसाः।। शुद्धीयेऽभि द्वेगिरिं पुरोजि प्र। अत्राद्यायां प्रस्तावादिः नीचैः। क्रोशौपगवे-त्यादिनाऽत्र उद्गीथाद्युच्चम्। योनौ नीचम्। दावसुनिधनेत्यादिनाऽत्र तृतीयपादाद्युच्चम्। योनौ नीचम्। बृहद्वात्सप्रशुद्धीयपदनिधनवैराज-वर्जमिति। अस्यायमर्थः। अवृद्धादि पदान्तेत्यादिना व्यवधानप्राप्तस्य वृद्धात्परौ य्वौ लुप्ताविति लोपप्राप्तस्य यज्ञायसन्तु सर्वत्रेति पुनर्व्यवधानप्राप्तस्य सन्त्वित्यत्र वकारस्यात्र पुनर्लोपविधानम्। योवृद्धाद्दी सर्वत्रेति दीशब्दः प्रकृतिः।।

1 0 2 1
4.ऐडँसैन्धुक्षितम्[1]- असाव्यँशो-हाइ।। क्षितेशुभ्रं रायस्सम्। इति। अत्र मध्यमायां प्रस्तावादिर्नीचैः। क्षिते चेति सर्वत्रोद्गीथादेः नीचे प्राप्ते अमदायेति अत्र प्रथमायामुद्गीथाद्युच्चम्। क्षिते च हाशब्द इति। हाशब्दे परतः पूर्वस्याक्षरस्य ओभावविधानं सर्वत्र । योनौ नास्ति। असाव्यँशुस्सर्वत्रेति व्यशब्दस्सङ्क्रुष्टः। सैन्धुक्षिते तिस्रोवाचोत्तमाया-मन्त्यस्य इति। पवस्वाद्यायां च इति। अत्र सर्वत्र गतिः। ओवौकारयो-रित्यादिनात्र आभावे प्राप्ते ऋगन्तीयस्पर्शे इत्यादिनाद्ययो ऋगन्त-

1.ग- सैन्धुक्षितम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूतयोः स्पर्श नामि विसर्जनीययोरनाभावः। अत्र चौहो वाशब्दः प्रथमात्कृष्यते।।

3 2
5.यौधाजयम्- पराऽ31इ।। सौभराभीवर्त इत्यादिना तुरीयस्य दीर्घस्य वृद्धिः। अभरादिर्यौधाजये सर्वमिति। अत्र तृतीयायां प्रस्तावतुरीयस्यावृद्धिः। दधन्वाँ यस्सर्वत्रेति। अस्तोभे सन्धिगाने प्राप्ते पदगानविधानम्। जयेहारादिति। प्रतिहारात्परस्यात्र सर्वासु वृद्धिः। ममद्रि परीतायाम्मानवजययोरिति। अत्र निधने हीषीस्थँ सर्वत्रेति प्रकृतिभावे प्राप्ते निधनद्वयेऽद्रि शब्दस्याइभावविधानम्। नोऽविभिस्सुषावसोमायां सर्वत्रेति अत्र विश्लेषः। वृद्धाच्च सर्वत्रेति त्वाशब्दात्-परस्य अकारस्य विश्लेषः । नर्यः परीतायामित्यादिनात्र र्यशब्दस्सङ्कृष्टः।।

5 0 2 4 5 40 5
6.द्वैगतम्- परीतोऽ3षिञ्चतासुता ।। द्वैगतेऽभिगीतादिति। अत्र सर्वसूद्गीतात्परस्या अभिगीतात्परस्य वृद्धिः। सुषावसो छन्दस द्वैगतयोरिति। ओवौकारयोरित्यादिनाभावे प्राप्ते अत्राद्यायां वसो इत्यत्र सोशब्दस्याभावः। तोगो द्वैगत इत्यत्र तृतीयायां गोशब्दस्याना-भावः। उवर्णन्तु न सर्वत्राभवतीति मध्यमायां सुशब्दस्य चानाभावः। नोऽविभिरित्यादिना विश्लेषः। चित्वानवेति अत्र प्रश्लेषः। नर्यः परीतायामित्यादिनात्र र्यशब्दस्सङ्कृष्टः।।

50 2 40 5 4 5
7.पौरुहन्मनम्- श्रीणन्तोऽ3गोभिरुत्तरा ।। पौरुहन्मने स्तोत्रामागायतां जास्वरोत्पत्तिश्च प्राक्तरुतायाः । इति सूत्रद्वयस्य पूर्वमेवोक्तम्।।

2 10 40 5
8.आकूपारम्- पुरोजाऽ23इतीवः।। योवृद्धाद्दी सर्वत्रेति दीशब्दस्य प्रकृतिभावः। यज्ञायसन्तु सर्वत्रेति वृद्धात्परौ इत्यादिना लोपप्राप्ते तुशब्दात्परस्य वकारस्यालोपविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

9.साध्रम्- पुरोजाऽ3इतीवोअन्धसाः।। सञ्जयाभीशवेत्या - दिना ऊहे त्वन्तर्निधने योनिवत्पर्वभेदो नास्ति। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादादिः यथर्चमुच्चनीचम्। योवृद्धाद्दीसर्वत्रेति अत्रादि शब्दस्य प्रकृतिभावे प्राप्ते न कार्तयश इत्यादिना दीशब्दस्य प्रकृति-भावो न भवति। इन्दुर्गौतमसाध्रयोरिति ओवौकारयोरित्यादिनाऽऽ भावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अनाभ्रावप्राप्तस्य पुनराभावविधानम्।।

10.आत्रेयम्- पवस्ववा ।। त्रेये देवे प्र। जभ्री सर्वत्रेति च । त्वाँरित्वन्धाञ्चेत्यादिना त्वां त्वं शब्दौ विकृष्टौ। त्रेयानिधनयोरिति। आदिद्वोदेत्यादिना दीर्घस्य प्रत्युत्क्रामे प्राप्ते मध्यमायाम्मातर इत्यत्र माशब्दस्य दीर्घस्यभिगानविधानम्।।

11.गौषूक्तम्- परिप्रियादिवो । एकस्याम्। गौषूक्ते र्यआ इति गतिः। थे षूक्ते द्वेऽसाव्यां इति। अत्रोद्दीथाद्युच्चम्। षूक्ते चेति प्त्या शब्दोऽत्र विकृष्टः। नप्त्योः परिप्रियायां षूक्तौर्णायवयोरिति। अत्र यो शब्दात्परस्य लोपप्राप्तस्य विसर्जनीयस्यातिहारः। आये भावश्चनेदानीं इति अत्र योनिवदाभावे प्राप्ते न भवति।।

12.गौरीवितम्- प्रति - अस्माऽ3इ - पिपीषताइ ।।

13.दाढर्यच्युतम्- इन्द्रा ।। अवृद्धादिपदान्त्यादित्यादिना सन्त्वामृजन्त्यायव इति इकारात्परस्य व्यवधान प्राप्ते द्व्यन्तस्थ परे तु लोप इति यकारस्य लोपः।।

14.एडन्दैवोदासम्[1]- प्राऽ4सुन्वाना ।। दैवोदाक्षारयोरित्यगतिः। नभृप्रसुन्वानायामित्यादिनार्भावः। प्रसुन्वानायां सर्वत्रेति विश्लेषः।।

1.ग.- दैवोदासोत्तरम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

15.यज्ञायज्ञीयम्- अभा5इप्रि।। ज्ञीयेभितृतीयायां प्र। ज्ञीयेदान्त इति। यत्र पादान्त्यस्याक्षरस्य प्रस्तावान्तत्वं घटते तत्रैवान्त्यस्य वृद्धिः। अत्र पादमध्ये प्रस्तावान्तत्वात् उपान्त्यस्य वृद्धिर्नभवति। आद्यायामन्यत्रेति आद्यायामुद्गीथाद्यस्य वृद्धिः। सूर्यस्याभिप्रियाणीत्यत्र स्वारकावज्ञीययोरिति अत्र सूर्यशब्दस्सङ्कृष्टः। अभिप्रिज्ञीये चोक्त इति तृतीयायां धीशब्दस्य हादौ स्तोभे परतः पादान्त्यस्याप्याभावविधानम्। तृकारस्तु न सर्वेष्वार्भवतीति सर्वेषु स्पर्शाक्षरेषु परतः तृशब्दस्यानाभावे प्राप्ते तृकारस्तर्षयोः प्रत्यययोरार्भवतीति अत्र तशब्दे प्रत्यये तृ शब्दस्यार्भाव विधानम्। तृतीयायां ऋतस्य जिह्वायां न भवति सर्वत्रेति तिशब्दस्य यकारे परतः अनाभावे प्राप्ते ज्ञीये त्वाभवतीति अत्र तिशब्दस्याभावः।।

16.जराबोधीयम्- नमस्तओवा ।। बोधीये देवसंवे प्र। गीथोपान्त्यं त्रीषुबोधीये। इत्यत्र गीथोपान्त्यस्य वृद्धिः। योनाववृद्धिः। बोधीये सर्वमिति अत्र ह्रस्वस्यापि प्रत्युत्क्रामविधानम्। उरुकृदुकुवित्सुनायां बोधीय इति। मध्यमायां कुविच्छन्दस्यानाभावः। नकारश्च भवति सन्ध्यगीतः कुवित्सुनायां बोधीये, इति। अत्र उरुजस्कृधीत्यत्र उरुनः इति विरामे नकार प्राप्तस्य पुनः णकारविधानम्।।

17.यज्ञायज्ञीयम्- वृषा5म।। ज्ञीये दीये प्र। अभिप्रियाणिवदुपान्त्यस्य प्रस्तावोऽपि न वृद्धिविधानम्। पादमध्ये प्रस्तावान्तत्वात् आन् कारो वृद्ध इत्यादि नात्र कलशमिति अत्र अनुनासिकविधानम्। ष्टुभि ज्ञीये तृतीयान्त्यमाइन्द्रादिः त्रिष्टुभि यज्ञायज्ञीये सर्वत्र तृतीयपादान्त्याक्षरं हिङ्कारात्पूर्वस्याइन्द्रास्वरस्य आदिर्भवति। अयं पुनानायां ज्ञीय इति। अत्र तृतीयायां कृशब्दस्यानार्भावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5 4 2 4 5 4 5
18.सौभरम्-तङ्गू5उर्धो5उयासुवर्णरोवा।। सौभरेत्यादिनात्र तुरीयस्य दीर्घस्य वृद्धिः। भरेस्थूरमेवासर्वः। योनौ प्रे चेति। चशब्दादत्र प्रथमायामुद्गीथ प्रतिहारयोः आद्यस्य नीचविधानम्। सौभरे सनोयुवातवत्यदिन्द्रियायां सर्वासु तंवोदस्माद्यायां च, इति। अत्र सर्वासु पूर्वस्तोभस्यागतिः। उत्तरस्त्वगतिमान् भद्राइन्द्रस्य मदत्यनुमादेवत्रा हव्यं प्रेमध्वराय इति। अत्र एतावगतौ। स्वासुभरे यन्तुरे लोप इति अत्र मध्यमायां यन्तुररमित्यत्र यकारात्परस्य नकारस्यानुस्वारस्पर्शेत्यादिना अतिहारप्राप्ते लोपविधानम्।

1 नु 2 2
पूर्वाङ्गमेति केचिदलोपं मन्यन्ते ष्वयाँ5उहा5उइ।।

20 0 0 2
19.सौमित्रम्-एनाविश्वान्यर्यआ5उए।। न्यर्यस्साहीय पर्ण वर्ण मित्र विलम्बेष्विति अत्र न्यर्यस्सङ्क्रुष्टः। मित्रे दिविद्युम्नास्य द्वे। इत्यत्र उद्गीथादिर्नीचैः।।इति पञ्चमः।।5।।

==*****==

।।षष्ठो विंशः।।

2
1.त्वाष्ट्रीसाम[1]- पंवस्वदा ।।त्वाष्ट्रीयवे प्र।ध्व्रश्वत्वाष्ट्रीसाम्नोश्च दक्षसा पतिः कविमिति। उपासत इत्यत्र योनि द्रष्टा च दक्षसा (क्षसाधन इति) अत्र पतिः कवीमापद्यते।।

2 1 0 0 2 0 1 2 10 20 10
2.आष्ट्रादँष्ट्रोत्तरम्- अभिसोमासआयवऐयादौ ।दँष्ट्रे चेत्यत्र प्रस्तावादिर्नीचैः। गोष्ठप्रतोदेत्यादिनात्र पादादि भूतानां वर्णानां यथर्चविधानम्।।

2 0 0 0
3.आभीशवोत्तरम्- अभिसोमासआयवए-ए।। भीशवेमनी प्र। आभीशवे पुरुणीत्यादिनात्र समुद्रस्येतिगतिः। आभीशवेऽभिगीता-दित्यत्र अभिगीतात्परस्य सर्वत्रवृद्धिः।प्रत्युत्क्रान्तात्परस्य सर्वत्रावृद्धिः।

1.ख- वैधनंत्वाष्ट्रीसाम।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(स्माच्चेति) अभिगीतात्परस्य पादान्तभूतस्य सर्वत्रवृद्धि प्राप्ते अविर्यंदंतोर इति अत्राद्ययोः ममद्रिभिरित्यत्र दंशब्दस्य च्युत इत्यत्र तशब्दस्य चावृद्धिः। हिन्वाभिसोमायां तनिभीशवयोरित्यत्र तृतीयायां हिन्वान इत्यत्र भिशब्दस्य पदमध्यगतस्य हादौ स्तोभे आभावे प्राप्ते आइभावविधानम्। सञ्ज्ञयाभीशव इत्यादिना ऊहे दीर्घः सर्वत्र प्रस्तावे पर्वभेदो नास्ति। योनौ पर्वभेदः।।

4.इदावासिष्ठम्-वयमेनमिदा[1]।। सिष्ठेमथीगही प्र। ष्ठे प्रयोनौ। इत्याद्यायां प्रस्तावादिर्नीचैः। इदावासिष्ठे चेति। अत्राद्यायाम्मध्यम-पादयोरन्ते चदक्षसात्र उत्तरयोरेकर्चायां च उतद्विषामापद्यते। अत्रैव तृतीयायां अष्टमं वृद्धं प्रथमायां, इति । अत्र प्रथमायां तु तृतीयपादे अष्टममक्षरं वृद्धं भवति। उत्तरयोरवृद्धिः। सिष्ठे तद्विविद्वाया अन्तः अयोनौ। पूर्वसूत्रे उक्तार्थमेव। नार्थान्तरमस्ति। सिष्ठे चेति। प्रथमायामुपद्रवस्य वृद्धिः। नोत्तरयोः। वयुनावासिष्ठ इति अत्र मध्यमायां वयुनेष्विति अत्र नेशब्दस्याइ भावे प्राप्ते आभावविधानम्।।

5.स्वःपृष्ठमाङ्गिरसम्[2] - प्रहाऽ2इन्वानाऽ34। स्वःपृष्ठे सर्वे, इति सर्वेषामगति प्राप्ते नाभिसोमाध्यास्यायां विचे प्रत्यये इत्यत्र विचे प्रत्यये गतिः। ओवौकारयोरित्यादिना भावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अत्र मुशब्दस्यानाभावः।।

6.क्षुल्लककालेयम्- पुरोजितीवोऽ1न्धासाः।। अन्धसः क्षुल्लका-न्धीगवयोरिति। अन्धस इत्यत्राकारस्य प्रस्तावे लोपविधानम्। अगतिः स्तोभस्य स्वरे प्रत्यये सन्धाविति अत्र मध्यमायां इन्दुर्होआऽ23श्वाः। आकारे परतः होशब्दात् परस्य गतेर्लोपः। इडाभिरैडानामिडान्ताः इत्यत्र पूर्वयोः इडान्तैव।।

ग-1. वयमेनमिदा ।। ग-2.स्वपृष्ठम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

7.द्विहिङ्कारवामदेव्यम्- तुवमाऽ23इन्द्रयशाअसाइ[1]।। त्वं वृत्राणिहँस्येत्येतौ शब्दौ द्विहिँकारदेव्य इति सङ्कृष्टौ । प्रतीनिद्विहिँकारदेव्य इति प्रतीनीत्यत्र नीशब्दस्यात्वविधानम्। ऋगन्तीयस्पर्श इत्यादिनात्र आद्यान्त्ययोः नामि विसर्जनीयस्पर्शयोः ऋगन्तभूतयोः ओवौकारयोरित्यादिनात्राभावे प्राप्ते अनाभावविधानम्।।

8.वार्शम्- प्राणाशिशूः।। वार्शे प्रिया प्र। योनौ प्र। शनवार्शयोरिति अत्रोत्तरयोरुद्गीथादिर्नीचैः। शिशुर्महीत्यत्र प्रथमाया-मूनपादत्वात् उद्गीथाद्युच्चम्। तद्विविद्धाप्राणासर्वास्विति। योनौवह्नि-मद्यास्थाने अत्रसर्वासु तद्विविद्धामापद्यते। जराबोधीये तद्विविद्धा। ष्वैरय त्रैत क्रोश वार्शोष्विति अत्र ष्वैशब्दस्सङ्कृष्टः। त्रीणि त्रितायां वार्श इति। सुक्रतुरित्यत्र तुशब्दात्परस्य विसर्जनीयस्य औहोवायां प्रत्यये लोपविधानम्। उवर्णन्तु न सर्वत्राभवतीति अत्र तु तृतीयायां तुशब्दस्य लुप्तविसर्जनीयस्य औहोवायां प्रत्यये अनाभावविधानम्। कर्षणेत्वित्यादिनात्र कर्षणवृद्धे न भवतः। ते सर्वत्र विवृतमकार प्रत्ययमिति तेशब्दस्यात्र प्रकृतिः।।

9.यज्ञायज्ञीयम्- पवाऽ5स्व।। ज्ञीये चातिसर्वत्र । जभ्री सर्वत्रेति प्रकृतिः। ते सर्वत्र विवृतं पूर्ववत्। ज्ञीये दान्त इति स्तावोपान्त्यस्य वृद्धिः। अत्राद्यायामन्यत्रेति प्रथमायामुद्गीथाद्यस्य वृद्धिः। थमोच्चद्वितीयं ज्ञीये सर्वत्रेति अत्र सर्वासु प्रथमोच्चद्वितीयस्य सङ्कर्षणम्। विशेषो नास्ति।।

10.बृहदाग्नेयम्- अग्निन्नरोदीधितिभिः ।। बृहदाग्नेये दूरे प्र। बृहदाग्नेयेऽन्त्यः। इति सर्वास्वन्त्यस्यागतिः। आग्नेये पुरोज्यग्निं। इत्यत्र प्रथमायां प्रस्तावादिर्नीचैः । विच्छन्दस्वाग्नेये, इति। योनिवदुद्गीथ द्वितीयस्य वृद्धिप्राप्तेऽत्र सर्वासूद्गीथाद्वितीयस्यावृद्धि

1.ग- तुवमाऽ23इन्द्रयशाअसाइ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधानम्। जास्वरोवृद्धाद्य, इति अत्र विच्छन्दसि आद्यस्य जास्वरस्यावृद्धिः। सच्छन्दसि पुरोजित्यामाद्यस्य जास्वरस्य योनावद्वृद्धिः। प्रहूयसायाश्चाद्यन्तयोस्सर्वासु इति। अत्र सर्वासु स्तोत्रीयासु आद्यायाः प्रहूयसायाः आद्यस्याप्यक्षरस्यापि योनौ वृद्धिः। आग्नेये जास्वरं वृद्धम्। न विच्छन्दस्विति। विच्छन्दसि योनौ च आद्यस्य जास्वरस्य वृद्धिर्नभवति। प्रहूयसायाश्चद्व्यक्षरमवृदिति। अत्र सर्वासु आद्यायाः प्रहूयसायाः आद्यस्यैवाक्षरस्य प्रहूयसायाश्चाद्य-माद्यायास्सर्वास्विति। अनेन वृद्धिप्राप्ते द्वितीयस्याप्यवृद्धिविधानम्। ऋण्वन् देव्य हदाग्नेययो ऋवर्णं प्राप्तमकारिः क्रियते। ऋण्वन् दक्षाय्य इत्येतौशब्दौ मराये। इत्यत्र विकृष्टः। नि अरा इति स्थिते विच्छन्द स्वाग्नेये,इत्यनेन निशब्दस्य वृद्धि प्राप्ते दीर्घ वृद्धोपहित इत्यादिना यकारे परतः यकारस्य व्यवधानो भवति। नायण्र्वन् इत्यर्थः। सनित्यस्सर्वत्रेति अत्र त्यशब्दस्सङ्कृष्टः।।

11.प्रतोदः- हाउहाउहाउवा-श्रीणन्तोगोभिरुत्तरम्।। गोष्ठप्रतोदे-त्यादिना पादादिभूतानां वर्णानां यथर्चविधानम्।।

12.पृष्ठम्-पिबाऽ3सुतस्यरसिनाः। वृधेऽस्मान् पिबासुतायां पृष्ठजमदग्न्योरिति। अत्र वृधेऽत्यत्र धे शब्दस्य च पादान्त्यस्य च हादौ स्तोभे परत आभावविधानम्। पृष्ठे चेति। योनावुपद्रव द्वितीयस्य वृद्धिः। ऊहे न भवति।।

13.ऐडँसौपर्णम्- अध्वर्यओवा । भिस्सुशत्रवे धृष्णुसोम इत्यत्राद्यायां भिस्सु इत्यत्र सुशब्दस्य प्रहूयसायामित्यादिना संयोगपरत्वादवृद्धि प्राप्तस्य पुनर्वृद्धिविधानम्। वाचि सर्वमोभवतीति ओभावे प्राप्ते अनुस्थमिति पीयूषमित्यत्र यूशब्दस्योभावो न भवति। ऋगन्तीयस्पर्श इत्यादिनात्र तृतीयायामृगन्ते भूतस्य स्पर्शस्यानाभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 2 0 1 2 1
14.रोहितकूलीयम्- अध्वर्योअद्रिभाइः ।। लीयेऽयाभिसुता- दिवःपी । इत्यत्र तृतीयायां प्रस्तावादिः नीचैः। वृषालीयेमरु इत्यत्र सर्वासु द्वितीयपादाद्युच्चम्।।

5 0 2 40 5 40 5
15.पौरुहन्मनम्- तवाहाऽ3ङ्सोमरारणा ।। पौरुहन्मने स्तोत्रामागायता इति। योनिद्रष्टा स्तोत्रामागायता मापद्यते। जास्वरोत्पत्तिरेव प्राक्तरुतायाः। इति योनौ प्राक् तरुतायाः जास्वरो नास्ति। ऊहे सर्वत्र तरुतायाः प्राक् जास्वरो भवति। लेये प्रस्तावमिति । अत्र मध्यमायां प्रस्तावतुरीयस्याकारस्य वृद्धिः।।

5 0 2 40 5 40 5
16.द्वैगतम्- तवाहाऽ3ङ्सोमरारणा ।। गते तेदि प्र। द्वैगतेऽभिस्पितादिति अत्र प्रथमायां अभिगीतात् परस्य वृद्धिः। तव मध्यमायां च तृतीय इति अत्र मध्यमायां तृतीयपादे दशमस्य मकाराक्षरस्य वृद्धिविधानम्। आन् कारो वृद्ध इत्यादिनानुनासिक- मान् कारस्य । लेय प्रस्तावेत्यादिनात्र मध्यमायां प्रस्तावतुरीयस्या कारस्य वृद्धिः। तवतृतीयायां भीशवद्वैगतयोरिति। मध्यमायां तवाहमित्यत्र वशब्दात्परस्य ऋचि प्रश्लिष्टस्याकारस्य विश्लेष- विधानम्।।

5 0 2 40 5 40 5
17.गौङ्गवम्-तवाहाऽ3ङ्सोमरारणा ।। गौङ्गवे दिवेपूर्व परिप्र। गवे तृतीय इत्यत्र सर्वासु तृतीयपादाद्यस्य नीचविधानम्। गव तृतीय दशमं कृष्टं सर्वत्रेति अत्र सर्वासु तृतीयपादे दशमस्याक्षरस्य विकल्पपक्षे कर्षणविधानम्। लेय प्रस्तावेत्यादिनात्र द्वितीयायां प्रस्तावतुरीयस्याक्षरस्य वृद्धिविधानम्। वाचि सर्वमोभवतीत्योभावे प्राप्ते अनुस्थमिति ऊधनी इत्यत्र ओभावो न भवति।।

3 40 3 40 5 0
18.साप्तमिकमायास्यम्- तवाहँसोमरारण।। आयास्ये परि उद्गीथे दिवि प्र। साप्तमिक आयास्य इति सर्वत्र प्रस्तावाद्यस्य नीचे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राप्ते असुत्सस्तवेति अत्राद्यायां प्रस्तावाद्युच्चम्। माँ सूर्य यास्ये साप्तमिके तवायां इति मामवेत्यत्र पदान्तस्य मकारस्य सूर्यमित्यत्र मकारस्य च लोपविधानम्। आन् कारो वृद्धोऽनुनासिकस्सर्वत्रेति तानीत्यत्र वृद्धस्यानकारस्यानुनासिकविधानम्। उवर्णन्तु न सर्वत्राभवतीति अत्र तृतीयायां कुशब्दस्यनाभावः।।

20 0 1 2 10
19.वारहम्- हाउहाउ-हुप्-प्रकावियाम्।। यानि पार्थे तानि वाराहे प्र। वाराहे शुचि बावृधन्तातरुतामिति रहिनौ तृतीयेदेवृधन्तातरुतामिति। सूत्रद्धयेन योनौ तृतीयपादे (बदुदा)शुचिता तरुतामापद्यते। पदान्ते काम्पा, त्रिष्टुभिचोतायामिति द्वौ सामान्यमेव। अत्र विशेषो नास्ति। पाशब्दः प्रकाव्यायां पार्थवाराह कुत्सस्याधिरथीयेषु पावक इत्यत्र पाशब्दस्य दीर्घस्यापि ह्रस्वविधानम्।।

2 0 0
20.वार्शम्- कईवेदा ।। वार्शेशि प्र। वार्शे मध्यपादयोरन्त्यानि त्रीणि इति। ऊहे सर्वत्र मध्यपादयोरन्त्यानि त्रीण्यक्षराणि वर्धन्ते। चत्वारि पिबन्तमयन्तँहि,इति योनौ मध्यमपादयोस्तँहिस्वराजमिति अत्र एतेषु त्रिषु पादेषु चत्वार्यक्षराणि वर्धन्ते। अन्यत्र त्रीण्यक्षराणि वर्धन्त इत्यर्थः। वाशे मध्यमपादयोश्च दक्षसोतद्धिषामिति। ऊहे सर्वत्र मध्यमपादयोर्योनिद्रष्टा चदक्षसा उदद्धिषामापद्यते। तँहिस्वराजन्तमित्यत्र उतद्धिषा न भवति। योनिवच्च दक्षसैवेत्यर्थः। वाशे चेति अत्र सर्वासु तृतीयपादादि भूतस्य यथर्चमुच्चनीचविधानम्। महाँश्चरस्यो वाश इति। ओवौकारयोरित्यादिनाभावे प्राप्ते ओजसेत्यत्र ओकारस्यानाभावविधानम्। सत्राच्या नकिष्टायोषात्या च वाश इति अत्र त्रयाणां वर्णानां सङ्क्रुष्टः।। इति षष्ठः।।6।।

==******==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

।।सप्तमो विंशः।।

1.ऐडँसैन्धुक्षितम्[1]-पवस्वदो । हाइ।। पवस्वाद्यायान्तेति। अत्राद्यायामन्त्यस्य स्तोभस्यागतिः। क्षिते चेत्यत्र सर्वासूद्गीथादिर्नीचैः। क्षिते च हाशब्दे इति ऊहे हाशब्दे परतः पूर्वाक्षरस्योभावविधानम्। द्वियकार संयुक्तेत्यादिना श्रवाय्यमित्यत्र पूर्व यकारस्य आकार विधानम्। ऋगन्तीयस्पर्श इत्यादिनात्र तृतीयायां ऋगन्तीयस्पर्शस्या-नाभावः। क्षिते शुभ्रं रायस्समिति अत्र सर्वासु प्रस्तावाद्युच्चम्।।

2.त्रैतम्- गोमन्नइन्दोअश्वावा ।। नर्यस्सनोहरीणायामित्यत्र त्रैत इति नर्य इत्यत्र रिशब्दस्य पदमध्यगतस्य तालव्यस्य यकारे च प्रत्यये आभाव प्राप्ते आइभावविधानम्। अकारस्सनेमित्वायामदेवं श्रुध्य त्रैत ष्कलेष्विति। अत्र तृतीयायां देवमित्यत्र अकारस्य लोपविधानम्। त्रैताश्वव्रतशौक्तेष्वित्यादिना तृतीयायां निधनभूतस्य युशब्दस्य उदात्तस्य वृधेस्वरे प्राप्ते सम्प्रसारणविधानम्। पूर्वयोः स्तोत्रीययोः प्रचयत्वात्सम्प्रसारणमेव।।

3.क्रौञ्चाद्यम्- पुरोजितौहोइ।। क्रौञ्चाभिनिधनेत्यादिना अत्र वृण्यादिभूतस्य दीर्घविधानम्। क्रौञ्चे दे सर्वत्र चमात् प्रथमोच्चमिति। अत्र सर्वत्र पादषष्ठस्योच्चविधानम्। क्रौञ्चयोः पर्याकूपारे चागतास्तोभाः। इत्यत्र सर्वस्तोभानामगतिप्राप्ते पुरोजितीत्यस्मिन्शब्दे गतिर्भवतीति। अत्र पुरोजिती शब्दात्परस्य स्तोभस्य गतिः। क्रौञ्चाष्टमिकेश्वो विभाष्यत इति। क्रौञ्चे भक्त्यन्तः पदगीतस्सर्वत्रेति पदगाने प्राप्ते इन्दुरश्वो नकृत्विय इति अत्र श्वशब्दस्य सन्धिगान-विधानम्। केचित् पदगानं मन्यन्ते। यज्ञायसन्तु सर्वत्रेति अत्रोत्तमायां सन्त्वित्यत्र तु शब्दात्परं व्यवधानप्राप्तस्य वृद्धात्परावित्यादिना लोपप्राप्ते अलोपविधानम्।।

1.ग- सैन्धुक्षितम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5 0 3 20 30 4 5
4.गौतमम्- पुरोजि तीवो अन्धसः[1]।। इन्दुर्गौतमसाध्रयोरिति। ओवौकारयोरित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अनाभावप्राप्तस्य पुनराभावविधानम्। अत्र सर्वासु निगदवतिना-मन्तर्निधनानामृक् स्वरवदुच्चनीचारम्भः।।

30 2 3 5
5.यज्ञसारथि- प्रोआयाऽ234सीत् ।। सारथिनियासीत् प्रमि इव वतिधीयोधेन तंपिते त्रिः प्र।। सर्व जनित्र संक्षाररथि राजेष्विति। अत्र महित्रीणा द्वितीयस्य ह्रस्वस्यापि वृद्धिविधानम्। ऐटतसारथिनो-रविगीता इति। अस्यायमर्थः। योनौ चतुर्थपादे वारा। अत्र निहोता भवति निहोता इत्यधिकारात्। किञ्च निहोतायास्संयोगेऽपि द्वितीयस्य वृद्धि विधानम्। संवरणेषु प्रवोधियायां प्रवल्लौशसारथ्यपामीवेषु इत्यत्र मध्यमायां संवरणेष्वित्यत्र षुशब्दात् परस्य व्यवधानप्राप्तस्य वकारस्य वृद्धात्परावित्यादिना लोपप्राप्ते अलोपविधानम्।।

1 0 5 0
6.स्रौग्मतम्-आऽ234-तेअग्नयधी[1] ।। स्रौग्मतेपनीयसीमिद्दी प्र। इवप्रीया च पञ्चरन्ध्र पूर्वस्रौग्मतेष्विति अत्रोत्तरयोस्तृतीयपादे द्वितीयं पर्व इवप्री भवति। योनौ पनीयसीत्यत्र पशब्दस्यावृद्धिः। उत्तरयोर्नभवतीत्यर्थः। देवाजरमाते अग्न इत्यत्र विश्लेषः। समानोदर्केष्वित्यादिनात्र पूर्वयोरुद्धारः।।

2 3 2 30 40 5
7.पूर्ववासिष्ठम्[2]- हाइ-उहुवाइ-शिशाऽ34औहोवा ।। यानि पार्थे तानि सिष्ठे प्र। पूर्वेष्ठ उहुवाइ। इत्यत्र उहुवाइशब्दो द्वितीयस्वरः। तृतीयादिन्यामित्यादिना सर्वपदान्तानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति शिशुमित्यत्र शुँ शब्दस्य तुरीयमित्यत्र विशब्दस्य तुरीयमित्यत्र रिशब्दस्य च पदमध्यगतस्य तालव्यस्याभावविधानम्। उवर्णन्तु न सर्वत्राभवतीति चमू इत्यत्र मूशब्दस्यानाभावः।

---

5 0 3 2030 4 5
1.ग- पुरोजितीवोअन्धसाः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विन्दुस्सिष्ठे, इति। अनुस्वारस्पर्शेत्यादिनातिहारप्राप्तस्य गोविन्दुरित्यत्र विशब्दात्परस्य नकारस्य लोपविधानम्। अयतीं युधाते दे, इत्यत्र त्रिष्टुभिचोतायामित्यादिना वृद्धिप्राप्तस्य आयुधानीत्यत्र धाशब्दस्य वृद्धिविधानम्। स्तोभश्चेत्यादिना सामादौ सामान्ते च स्तोभ नियमः।।

1 2 1 2 1 2 1
8.ऊर्ध्वेडंत्वाष्ट्रीसाम- परित्यँहर्यतँहराइम् ।। त्वाष्ट्र्योश्च। सुता च प्रान्त्ययोरिति। अत्र प्रस्तावाद्युच्चम्। क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादादिर्यथर्चमुच्चनीचम्।।

4 3
9.यज्ञायज्ञीयम्-पराऽ5इत्यम्।।ज्ञीयेतिवाद्रिसपरि।प्र। ज्ञीयेदान्त्य इति। प्रस्तावोपान्त्यस्य वृद्धिः। द्विर्हिंकार ज्ञी ययोरिति अत्राद्यायां इकारात्परस्य सर्वासु तकारस्य लोपः। ज्ञीये स्यन्दते कृण्वते चर्षणीरधीत् इति। अत्राद्यायां विशां इत्यत्र लुप्ततकारस्य हादौ स्तोभे परत आभावविधानम्।।

2 0 1 20 10 20
10.पौरुमद्रम्- पुनानस्सोमधारया । मद्रे प्रत्नमित्यगतिः। मद्रे चेति सर्वत्र प्रस्तावाद्यस्य नीचप्राप्ते अनुत्सोराजा इति अत्र मध्यमायां प्रस्तावादिरुच्चैः । मद्रे प्रथमोच्चं चतुरक्षरमाद्यं पिबासोमा-मिति परं योनिवदिति। अस्यायमर्थः। योनावुद्गीथाद्यं पर्व ऋक्स्वरव-दुच्चनीचम्। ऊहे सर्वत्र उत्तरा ऋक्स्वरवदुच्चनीचे प्राप्ते आद्यं चतुरक्षरं पिबासोमामापद्यते, इति उत्तरं चतुरक्षरं योनिवदुच्चनीचं भवति। वसानो अर्षसीत्यत्र प्रचयभूतस्य षकारस्य परं योनिवदित्यनेन नीचात्पर इत्यादिना उच्चविधानम्। लं विस्मिन् सिचेत्यादिना वसानो अर्षसीत्यत्र सिशब्दस्य योनिवन्नीचे प्राप्ते उच्चविधानम्।।

---

1 0 5 0
1.ग- आऽ234-तेअग्नइधी ।। ग-2. वासिष्ठम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5 0 2 40 50 4 5
11.आष्कारणिधनं काण्वम्- पुनानाऽ3स्सोमधारया ॥ आष्कारे नृभिः प्र। नृभिः प्रत्नँसधस्थमित्यादिना नृशब्दस्या नार्भावः॥

2 0 0 0 20
12.निषेधः-अभिनोवाजाऽ3सातमाम् ॥ षेधेनीने प्र। अपदान्त स्समानश्चेति वृद्धाक्षराणां सर्वत्र प्रकृतिभावे प्राप्ते अयेन्दो, बभ्रोरे, अतरे, वसो, अवसोनि,इति अत्र मध्यमायां वसोशब्दस्याउभावः। दान्ते यहो ध्रिगो स्तावे इति गोशब्दस्य प्रस्तावे प्रकृति भावग्रहणादत्राउ भावः॥

5 0 2 40 5 40 5
13.साध्रम्- अभीनोऽ3वाजसातमा ॥ क्रौध्यष्टम्भेत्यादिना तृतीयपादादिः यथर्चमुच्चनीचम्। सञ्जयाभीशवेत्यादिना योनौ तृतीय पादान्ते कइत्पुरु इति पर्वद्वयमस्ति। ऊहे सर्वत्र पर्वद्वयं न भवति॥

4 3
14.यज्ञायज्ञीयम्- अभाऽ5इनः॥ ज्ञीयेनिने प्र। अध्रिगोस्तावे-त्यादिना पदान्तस्य गोशब्दस्य प्रकृतिभावः। गोपा इति अन्यत्राउ-भावः। ज्ञीयेदान्त्ये इति स्तावोपान्त्यस्य वृद्धिः। आद्यायामन्यत्रेति आद्यायामुद्गीथाद्यस्य वृद्धिः। थमोच्चद्वितीयं ज्ञीये सर्वत्रेति प्रथमोच्च द्वितीयस्य कर्षणम्॥

2 1 0 2 1 2 0 0 1 0 2 1
15.समन्तम्- इमँस्तोममर्हतेजातवेदसाइ ॥ मन्तेदित्याम् । वादौमन्तेत्यादिना प्रथमोत्तमयोः प्रस्तावादिर्नीचैः।वैच्छन्दसे दिवानक्तं प्रथममिति। अत्रोद्गीथाद्यपर्वणः प्रथमस्वरविधानम्। न योनिवत्। सँसद्यत्वे देवा दन्त्यो दित्यान् द्युश्मस्य मन्ते, इति सङ्कृष्टः। समानोदर्के-षूदर्कस्योद्धारः पूर्वयोः पादयोरुद्धारे प्राप्ते इमँस्तोमसमन्ते च सँसृष्ट-त्वादिति अत्र पूर्वयोः स्तोत्रीययोः संसृष्टत्वात् द्व्यक्षरस्यानुद्धारः। मन्ते राधाया अन्त्यानि वर्धन्ते इति वृद्धिः। अत्र न योनिवत्। धियोग्ने-भरामेध्मायामन्त इत्यग्ने सख्ये इत्यत्राकारस्य पदादि भूतस्य पादान्त्या -त्स्वरो विकृष्यते। इत्यनेन विश्लेषप्राप्तस्य पुनः प्रश्लेषविधानम्॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 0 0 1
16.विच्छन्दस्यँसोमसाम[1]- पुनानस्सोऽ2मधारया । सोमसाम्नि च षसि दसि प्र। दिव्यंज्यर्षसीत्यादिनात्र विकृष्टः।।

2 0
17.आत्रेयम्- पुरोजिताइ।। योवृद्धादीसर्वत्रेतिदीशब्दस्य प्रकृतिभावः। त्रेये रया इति। अत्र मध्यमायां योधारयेत्यत्र पर्वान्त्यभूतस्य धाशब्दस्य नीचविधानम्। अन्यत्र योनिवदुच्चम्। श्रेयानिधनयोरिति आदिद्धोदातस्येत्यादिनात्र दीर्घाक्षरस्य प्रत्युत्क्रामे प्राप्ते तुतोऽदब्धाशब्दयोश्चाभिगीतविधानम्।।

3 2 3 2 30 40 5
18.पूर्ववासिष्ठम्- उहुवाइ। शिशाऽ34औहोवा ।। यानि पार्थे तानि सिष्ठे प्र। पूर्वेष्ठ उहुवाइ। इत्यत्र उहुवाइ शब्दो नीचारम्भः। उत्तरे द्वितीयस्वरः। अन्यत् सर्वमुत्तरेण समानम्।।

2 0 0 0 20
19.स्वारं कौत्सम्- अभीनोवाजाऽ3सातमाम् ।। अध्रिगोस्तावे इति प्रस्तावे प्रकृतिभावग्रहणात् अत्र पादान्त्यस्य गोशब्दस्याउभावः।।

1 2
20.शार्ङ्गम्- हाउधार्ता ।। शार्ङ्गे हरिः प्र। सस्तोभ पदविभाग्यम्। यथेतच्चतुर्थमन्द्रेत्यादिना उदूहप्राप्ते न चेत्समानपुरुषवचने तृतीय-प्रभृतीनामुदात्ततमः कश्चित्स्वरो भवति। अस्यार्थः- प्रस्तावोद्गीथ-प्रतिहारेषु भक्तिषु तृतीयस्वर प्रभृति उदात्तस्वरो न भवति न चेत्तत्रोदूहो भवति। अस्ति चेत् उदूहो न भवति। ब्राह्मणे अपवाद वचनात्। अत्र सहोदैर्घतमसवदुदूहो न भवति। अत्यो गभस्त्यो स्वविदेत्येते शब्दा-स्त्रयश्शार्ङेति। अत्र त्रयश्शब्दास्सङ्कृष्टाः। शार्ङे चेति । अत्र दक्षशूरावित्येतौ शब्दौ पदगीतावित्यर्थः। तथा शार्ङे तृतीयोच्चमिति। योनौ तृतीयोच्चानि पर्वाणि अत्र तत्स्थानभूतानि पर्वाणि सर्वाणि द्वितीयस्वरे, इति ।। इति सप्तमः।। 7।।

==*******==

1.ग- सोमसाम।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

।।अष्टमो विंशः।।

1.वासिष्ठम्- हाइ[1] - उहुवाइ -अक्राऽ34औहोवा।। अक्रान् वासिष्ठे थमे सेनः देवान् वृणीत देवान् द्रेव ज्योतिः प्र। पूर्वेष्ठ उहुवाइ। इत्यत्र उहुवाइ शब्दो द्वितीयस्वरः। पदान्ते काम्पा पदादौ च दीर्घ इति पदान्तस्य पदादी दीर्घाक्षरस्य काम्पायां प्राप्तायां अत्र न जागृविरित्य नेन वावृधे इत्यत्र पाशब्दस्य मान्तेदिमा शब्दस्य सूर्येति सूर्यशब्दस्य च पादान्तभूतस्य दीर्घस्य च वृधन्ताविधानम्। सानौ शब्दश्च सर्वात्राकार इति अधिसानौ इत्यत्र नौ शब्दस्याकारे परतः ओभावविधानम्। महदक्रान् वासिष्ठ इति महत्तत्सोम इति अत्र महदिति पदान्तस्य तकारस्य तृतीयादिन्यामित्यादिनात्र लोपप्राप्तस्यातिहारविधानम्। गर्भो महत्तत्सोमायां सर्वत्रेति गोशब्दात्परस्याकारस्य ऋचिप्रश्लिष्टस्य विश्लेषविधानम्।।

2.आसितोत्तरम्-पराइत्याऽ23इ्हर्यतँहरिँहाउ।। सिते मदे प्र। रेणसर्वत्रेति।।

3.द्विरभ्यस्तमाकूपारम्- इन्द्रायसोमपातवे ।। क्रौञ्चयोः पर्याकूपारे चागतस्तोभाः। सर्वस्तोभस्य अगतिः। पुरोयज्ञावृत्र वीरापारे इति।अत्र द्वितीय चतुर्थ पादादिभूतस्य नीचविधानम्।।

4.ऐडंयामम्- असावाइसोऽ23।। यामे एषि एषि प्र। एकारे च यकारं यामोद्धतोर्गति माँश्च पदान्तस्सन्धौ यलोपो विरते। अस्यायमर्थः अत्येष्वित्यत्र तिशब्दस्य परियेषीत्यत्ररिशब्दस्य एतयोः पादान्तयोराइ भूतयोरिकारे परतः यकारव्यवधानो भवति सन्धौ विषये विरामे यकारस्य लोपः। रमताइयेऽ23। स्यापराइयेऽ23। इति ओकारान्तः पदिको ग्रहणादाभवतीत्यादिना दुरितासोमेत्यत्र सो शब्दस्य एकारे परतः आभावविधानम्।।

1- हाउ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5.औशनम्- आ[1]जा[2]।। शनेसूरे विष ऊतीषावित् प्र। अध्वर्यवस्स्वर्विद इत्येतौ शब्दौ आजागृविरित्यत्रौशने। इति भक्त्यन्तः पदगीतस्सर्वत्रेति पदगाने प्राप्ते उभयतः प्रतिहारान्त्यस्य सन्धिगानविधानम्। पदान्ते काम्पेत्यादिना काम्पागाने प्राप्ते न जागृविरित्यादिना कारिणेत्यत्र काशब्दस्य वृधन्तागानम्। आन् कारो वृद्ध इत्यादिना मीढ्वाँ इत्यत्रानुनासिकमेव।।

6.वाजजित्- प[1]रिप्रधन्वा।। पर्वणां सङ्घातानां च इति अत्र ऊनत्वात् पर्वद्वयस्य लोपम्। प्रतिपाद द्विपदासु वाजिजिग्गीति अत्र वृणीस्वरस्य प्रथमस्वरविधानम्।।

==********==

।।अहीनं समाप्तम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सत्रं प्रारभ्यते

।।प्रथमो विंशः।।

1.गौरीवितम्- विशः-विशोऽ3-वोअतिथाइम्।।एकस्याम्।।

2.श्रुध्यम्- तँवस्सखाऽ2यः।। श्रुध्ये स्तावे तुरीये ष्येते सर्वत्रेति सर्वत्र प्रस्तावतुरीयस्य कर्षण प्राप्ते संवत्सायां तृतीयेत्विति अत्र मध्यमायां प्रस्तावतृतीयस्य कर्षणविधानम्। क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादादिर्यथर्चमुच्चनीचम्।।

3.ऐध्मवाहम् - याजिष्ठन्त्वाववृमाहाइ ।। वाहेस्तृणन्ति देवमपान्नेति अत्रदेव।।

4.ऐडँसौपर्णम्- पवमानोवा ।। ओवौकारयोरित्यादिना लोपप्राप्ते ऋगन्तीयस्पर्श इत्यादिना तृतीयायां ऋगन्त भूतस्य तकारस्य लोपः।।

5.रोहितकूलीयम्- पवमानस्यजाइ।। लीयेऽयाभिसुतादिवःपी इत्यत्र सर्वासु प्रस्तावाद्युच्चम्।मरुत्पवमानो रथीतमायां कूलीय सन्तन्यृषभेष्विति अत्र मध्यमायां मरुदित्यत्र तकार पूर्वाङ्ग प्राप्ते अतिहारविधानम्।। वाचि सर्वमोभवतीत्योभाव प्राप्ते अनुस्थमिति मरुदित्यत्र रेफात्परस्य उकारस्य ओकारो न भवति। वृषालीये मरु इति अत्र सर्वासु द्वितीयपादादि भूतस्योच्चम्।।

6.सन्तनि- पवाहाउ।। अच्छिद्राङ्गौवैरूपसन्तनिपार्श्वानामाउवा सर्वत्रेति अत्र सर्वत्रागति प्राप्ते तालव्यादित्यादिना ज़िशब्द विशब्दयोः परं गतिर्भवति। ओष्ठ्यश्चान्तःपदिको नाउभवति सर्वत्रेति अजिरशोचिष इत्यत्र शो शब्दस्य पदमध्यगतस्यानाउभावः। आउवाव्यवहितमित्यादिनाभावे प्राप्ते मरुच्चेति मरुच्छब्दस्य पादान्तस्याप्यनाभाव विधानम्। मरुत्पवमानो रथीतमायां कूलीय

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्तन्यृषभेषु इत्यत्र मरुच्छब्दात्परस्य पदान्तस्याक्षरस्य पूर्वाङ्गे प्राप्ते अतिहारविधानम्। गोष्ठप्रतोतेद्यादिना पादादि भूतानां वर्णानां यथर्चमुच्चनीचे प्राप्ते अस्तावहारयोरित्यादि नात्र प्रतिहारादिभूतस्य जीशब्दस्य नीचस्य उच्चविधानम्।।

7.बार्हदुक्थम्- पुनानस्सोम- (2 0 1 20) मन्तवदुक्थे। इति अत्राद्यन्तयोः प्रस्तावादिर्नीचैः। दीर्घवृद्धेत्यादिनात्रारत्नधा इति गतेः परं यकारमापद्यते। दुक्थेभिगीथक्रमयोरित्यत्राभिगीते प्राप्ते प्रत्युत्क्रामात्परस्याक्षरस्य वृद्धम्।।

8.जराबोधीयम्- पवमानोवा।। (2 0 1 2) गीथोपान्त्यमित्यादिनात्र वृद्धिः। बोधीये सर्वमित्यत्र ह्रस्वस्यापि प्रत्युत्क्रामविधानम्।

9.सौश्रवसम्- पवमाऽ3नोअजीजनात्।। (5 2 40 50) क्रोशौपगवेत्यादिनात्र उद्गीथाद्युच्चम्। योनावेव नीचम्। ज्योतिरौपगवे पवमानो अजीजनायामिति ज्योतिरित्यत्र तिशब्दात्परस्य ओवौकारयोरेकीभावे प्राप्ते लोप इति अनेन लोपप्राप्तस्य विसर्जनीयस्य अतिहारः। ऋक्समौपगवयोरिति पूर्वयोः स्तोत्रीययोः प्रतिहारान्तमेव। आयेभावश्चनेदानीम्। कर्षणे तु निवर्तते इत्यनेन नोभयत्र कर्षणावो भावौ न भवतः।।

10.कार्तयशम्- अभीहाहाउ।। (2 0 0) कार्तयशे सर्वे। सर्वे स्तोभा अगता भवन्ति। न तु विवसो स्याम सुम्ने एषु चतुर्षु गतिर्भवति। मकारः कार्तयशमन्तयोरिति ओवौकारयोरित्यादिना भावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति इन्दुरस्वेत्यत्र दुशब्दस्यानाभावः। ओकारः पादमध्येत्यनेन पादमध्यभूतानां पदान्तानामोकाराणां परिसंख्यानरुपेण प्रकृतिभावे प्राप्ते अयेन्दो, बभ्रोरे, अतरे, वसो, अवसूनीति अत्र मध्यमायां वसो सो इत्यत्र उत्तरस्य सो शब्दस्याउभावविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

11.मार्गीयवम्- प्रसौहोवा।। मार्गीद्वितीये प्रसोमप्रास्येत्यत्र प्रथमायां द्वितीयपादादिर्नीचैः। मार्गीयवे मागायता प्रथमोच्चम् प्रसोमप्रथमायां अस्य प्रत्नाद्ययोश्चेति पूर्वसूत्रेण उत्कर्थस्यानुवादः इदं सूत्रम्। नार्थान्तरमस्ति। यवेमह्यमिति अत्र सर्वासु महित्रीणा द्वितीयस्य वृद्धिः।।

12.द्वैगतम्- प्रसोमाऽ3देववीतयाइ।। गतहन्मनयोरत्के प्र। द्वैगतेऽभिगीतादिति अत्र मध्यमायां अभिगीतात्परस्य वृद्धिः। वमाच्च प्रसोमप्रान्त्ययोरित्यत्र प्रथमान्त्ययोः स्तोत्रीययोः तृतीयपादे दशमाक्षरस्य वृद्धिः। अन्यत्र न। अगृरमीस्निर्दन्वन्नयोक्षाश्चेति अत्र प्रथमतृतीययोः स्तोत्रीययोः तृतीये पादे गृशब्दरशब्दयोरभिगीत-प्राप्तयोः प्रत्युत्क्रामविधानम्। प्रियस्सूनुर्द्वैगतगौङ्गवयोरिति ओवौकारयोरित्यादिनाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अनाभावप्राप्तस्य नुशब्दस्य पुनराभाव विधानम्। हिन्वन्त्यपसो द्विहिँकारगौङ्गव द्वैगततरेष्विति अत्र त्यशब्दः सङ्कृष्टः। नदीषु प्रियस्सूनायामित्यादिना षुशब्दात्परस्य व्यवधानप्राप्तस्य वकारस्य वृद्धात्परावित्यादिना लोपप्राप्ते अलोपविधानम्।।

13.पौरुहन्मनम्- प्रसोमाऽ3देववीतयाइ ।। गतहन्मनयोरत्के प्र। अभ्यासे चेति अतिहारविध्यङ्गभूतस्य पूर्वस्वराङ्गस्य व्यञ्जनस्याभ्यास प्रत्यये लोपप्राप्ते नोर्मयोर्णसोर्जुन ऋभ्वस एवामृताचार्के। इति अत्र अर्णसार्जुन इत्येतयोरभ्यासे परतः रेफस्य लोपविधानम्। पौरुहन्मने स्तोत्रामागायतामिति। योनिद्रष्टा स्तोत्रामागायता मापद्यते। जास्वरोत्पत्तिरेव प्राक्तरुतायाया इति। अत्र सर्वासु तरुतायाः प्राक् मागायतायाः परं जास्वरोत्पत्तिश्च भवति। दीर्घवृद्ध इत्यादिनात्र हिन्वन्तीति शब्दादाइभूतां जास्वरात् इकारमापद्यते। नाइ यपसो। अभ्यासविषये यकारलोपः। सोशब्दस्य पूर्वत्वात्। णी जनित्रेति जनित्रे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रस्तावोपान्त्यस्य वृद्धिविधानात् योनौ पौरुहन्मने प्रस्तावोपान्त्यस्य वृद्धिर्नभवति।।

1 2 0 0 1

14.हारायणम्- प्रसोमदीहोऽ2इववीतयाइ।। हारायणेन्द्रं पवमानस्य वरुण सामदिरोऽर्जुनो इति अत्र सामदिरोऽर्जुनो इति एतावगतौ। पादान्तात्परस्वरो विकृष्यत इत्यनेन पादान्तादक्षरात्परस्य पदादि भूतस्य ऋचिप्रश्लिष्टस्य स्वरस्य सर्वत्र विश्लेषप्राप्ते अँशोरित्यस्य शब्दस्यावृद्धात्परस्य प्रश्लेषं सर्वत्रेति अर्णसेन्यत्र साशब्दादवृद्धात्परस्य पादादिभूतस्याकारस्य पुनः प्रश्लेषविधानम्। वाचि सर्वमोभवतीत्योभाव प्राप्ते अनुस्थमिति प्रतिषेधेन ओवान्त्योभवतीति मधुतमित्यत्र धुशब्दस्य पुनरोभावविधानम्। गृविस्सर्वत्रेत्यत्र विशब्दस्य प्रकृतिभावो विसर्जनीयः।।

50 2 40 5

15.काक्षीवतम्- स्वादिष्ठाऽ3यामदिष्ठया ।। काक्षीवत उच्चावदिति योनौ कालेयवत् प्रस्तावः। ऊहे आमहीयववत् प्रस्ताव-सदृश इत्यर्थः। योनौ द्वितीयपादान्त्यस्याक्षरस्य द्वितीयादिकर्षणम्। ऊहे प्रथमादि। एतावान्विशेषः। गतेरेकारभावप्राप्ताया एकार निवृत्तिरिति। अत्र मध्यमायामेकारो न भवति। प्राणास्सर्वत्रेति ऊनत्वादत्रोत्तमायां प्रतिहारादलोपः।।

50 2 4 5

16.भासम्- स्वादि - ष्ठाऽ3या - मा।। भासेक्रतुवित्तेना मँहिष्ठ इत्यगतिः। भासे चनौ। अत्र सर्वासु प्रतिहारादिरवृद्धिः । आचिकं निधनं न्यायेत्यादिनात्रोत्तरयोः स्तोत्रीययोः निधनाक्षरस्यानुदात्तत्वात् सम्प्रसारणे प्राप्ते मणाञ्जनं सदद्घोनां इति न्यायादपेतप्रकरणे ग्रहणादनामित्येतयोरनुदात्तयोर्वृधे स्वरमेव। द्रोणे सर्वत्रेति णे शब्दस्य प्रकृतिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 20 0 1 2 1
17.पदनिधनशुद्धाशुद्धीयम्- प्रसुन्वानायअन्धसाः ।। शुद्धीयेऽभिद्वेगिरिं पुरोजि प्र। इति सर्वासु प्रस्तावाद्युच्चम्। क्रोशौपगवेत्यादिनात्र सर्वासूद्गीथाद्युच्चम्। दावसुनिधनेत्यादिनात्र सर्वासु तृतीयपादाद्युच्चम्।।

2 0 1
18.सुरुपोत्तरम्- वृषापवौहोऽ2 ।। आजिरासुरुपाणां चेति सर्वासूपद्रव द्वितीयस्यावृद्धिः।।

2 0 0
19.ऋषभःपावमानः- हाहाउवृषापवा[1]।।

5 4 2 30 4 0 5
20.पृष्ठम्- पुनाऽ3नस्सोमधारया[2]।। पृष्ठे चेत्यत्र सर्वसूपद्रव द्वितीयस्यावृद्धिः। योनौ वृद्धिः। दिव्यं ज्यर्षसीत्यादिनात्र विकृष्टः।। इति प्रथमः।।1।।

==*==

।। द्वितीयो विंशः।।

5 4 2 40 50
21.कौल्मलबर्हिषम्-पुनाऽ3नाऽ3स्सोमधारया।। कौल्मलान्धी गवेत्यादिनात्र इति उद्गीथाद्युच्चम् सर्वासु। योनावेव नीचम्। दीर्घवृद्धेत्यादिनात्र यकारमापद्यते। यारत्नधा इति। कौल्मल इष्टासि कृणुषामिति। अस्यार्थः। योनो उद्धावृषस्वेति चतुर्थोच्चं पर्व ऊहे सर्व तत्स्थाने प्रथमोच्चमिति उदूहस्या प्राप्तत्वादित्यभिप्रायः। आपृच्छ्यमवृद्धँ सर्वत्रेति सङ्कृष्टः। नीचात्पर इत्यादेस्सूत्रस्यार्थ दशरात्रे वैयश्व प्रसङ्गे उक्तम्। अत इह नोच्यते।।

20 1 0 1
1.शङ्कु- एषस्यधा-एऽ2-रया।। शङ्कुनिवर्मी प्र। शङ्कुन्यस्य प्रेष सर्व इत्यत्र प्रस्तावादिः सर्वासु नीचैः। शङ्कुन्येकारे। एकारे च नित्यदीर्घत्वम् ।शङ्कुनि सूत्रद्वयेनापि एकारे परतः पूर्वस्य ह्रस्वस्य

---

20 0 0 5 4 2 40 50
1.ग- हाहा उवृषापवा ।। 2. ख-पुनाऽ3नाऽ3सोमधारया।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दीर्घविधानम्। शङ्कुन्येषस्य मध्यमायां अकाराभ्यास इति । क्रौड न्नूर्मिराएऽ2- अपम् -इवा। इत्यकाराभ्यासविधानम्। कृन्तच्छङ्कुनीत्यत्र कृशब्दस्यावृद्धस्यार्भावविधानम्।।

2.आष्कारणिधनं काण्वम्- अभिसोऽ3मासआयवाः।।

3.वाशम्- पुनानस्सो।। वाशे मध्यमपादयोरन्त्यानि त्रीणीति। अत्र सर्वासु स्तोत्रीयासु मध्यमपादयोरन्त्यानि त्रीणि अक्षराणि वर्धन्त इत्यर्थः। वाशेमध्यमपादयोश्चदक्षसो तद्विषामिति। अत्र सर्वासु मध्यमपादयोर्योनि द्रष्टा च दक्षसा उतद्विषामापद्यत इत्यर्थः। दीर्घ वृद्धोप इत्यादिनात्र विकृष्टः। वाशे चेति। अत्र सर्वासु तृतीयपादादि भूतस्य ऋक्स्वरवदुच्चनीचे प्राप्ते अपुनामान्त्ययोरुभयं प्रान्त्ययोरिति अत्रोत्तरयोस्तृतीयपादादि भूतस्या गथर्चविधानम्।।

4.औशनम्- साकाम्।। यानिपार्थे तान्यौशने, इति। शने च स्वास्विति। अत्रोद्गीथद्वितीयस्यावृद्धिः। स्वासुशने द्वितीयपाद द्वितीयमिति। अत्र सर्वासु द्वितीयपाद द्वितीयस्यावृद्धिः।।

5.नौधसम्- आऽ234इ। माउत्वापुरु ।। धसेवेकृष्टादीत्यादिना-त्रोत्तरयोः भिस्ते,मुद्र,इत्येतौ शब्दौ चतुर्थस्वरे भवतः। पर्वशेषाणि मन्द्रस्वरे इत्यर्थः। धसे चतुर्थोच्चान्त्ययोनिवदिति। अत्राद्यायां कृष्टात्परं योनिवद्भवति। योनिवत्स्वर इत्यनेन वाचिसर्वमिति ओभावे प्राप्ते अनुस्थमिति नुशब्दस्य ओभावो नभवति। समुद्रः प्रथमस्वर इमा उत्वायां श्यैतनौधसयोरिति समुद्र इवेत्यत्र अःकारस्य लोपः। प्रथमस्वरे दान्ते यहो ध्र्यगो स्तावे मिन्दो इति परि सङ्ख्यान रूपेण प्रकृतिभाव-ग्रहणादत्राद्यायां वसो इत्यत्र सोशब्दस्य पदान्तभूतस्याउभावः।।

6.पौष्कलम्- गोमन्नाऽ3इन्दो ।। ष्कले नेमिप्र। ऊने इति । सफपौष्कलयोर्वेहीष्यामित्यनेन प्रस्तावे हीषीस्वरे परतः पूर्वस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृद्धिप्राप्ते सनेमित्वा इत्यत्र ह्रस्वस्य वशब्दस्य ऊनपादत्वाद्वृद्धि विधानम्। अपद्वयुमित्यत्र युंशब्दस्योदात्तस्य निधन न्यायेन वृधे स्वरे प्राप्ते त्वनाद्वयुं श्रियेतिर्भा इति न्यायादपेत प्रकरणे ग्रहणात् अत्र युं शब्दस्य सम्प्रसारणमेव। अकारस्सनेमित्वायां अदेवं श्रुध्यत्रैत ष्कलेष्विति अत्रोत्तमायां अदेवमित्यत्र अकारस्य लोपविधानम्। एष एव शब्द सङ्कृष्टे गोमन्नष्कले इत्यत्र र्यशब्दस्सङ्कृष्टः।।

7.वाशम्- उ॒भयँशा।। वाशे षणे प्र। वाशे चेति। अत्र सर्वासु तृतीयपादाद्यस्य ऋक्स्वरवदुच्चनीचे प्राप्ते अपुनामान्त्ययोरुभयं प्रान्त्ययोरिति अत्र प्रथमान्त्ययोः स्तोत्रीययोः तृतीयपादाद्यस्य यथर्चविधानम्। वाशे मध्यमपादयोश्चदक्षसो तद्विषामिति अत्र सर्वासु स्तोत्रीयासु मध्यमपादयोर्योनिद्रष्टा चदक्षसा उतद्विषायां प्राप्तायां अतँहीति अत्र मध्यमायां तँहिस्वरानमित्यत्र योनिद्रष्टा च दक्षसैवेत्यर्थः। सत्राच्या नकिष्ट्वायोषात्याच वाशे इति अत्र सत्राच्या शब्दस्सङ्कृष्टः।।

8.मानवोत्तरम्- हो॑वाइ-त्वा॑मिदा॑ह्योन॑रः-हो॑वाइ।। नवेमन्द्राभि सोमत्ससुषा अत्र सर्वासु प्रस्तावाद्युच्चम्। इदाह्योमानवे,इति। ह्यो शब्दस्सङ्कृष्टः। शुर्मदायाः पूर्वस्योपान्त्यस्यनीचमिति,अस्यार्थः। योनौ दाइदेऽ1थर्क।। ण्वाऋतजाऽ31। इति।। शुर्मया नास्ति। ऊहगाने सर्वत्र तयोः पूर्वायाः उपान्त्यस्यापि नीचविधानम्। योधाशब्दस्योच्चमेव। मानव प्र। हितं कौल्मलेत्यादिनात्र स्वासु शि प्र न्निति स्वाशब्दस्य हशब्दस्य प्रत्युत्क्राम प्राप्ते अभिगीतविधानम्। गिर्वणस्त्वया भूषन्ति मानवे, इति। गिर्वण इत्यत्र गिशब्दात्परस्य पदान्तस्य ओवौकारयो-रित्यादिना लोप प्राप्ते अतिहारः। नवे गीथादिः। ऊहे सर्वत्र गीथाद्यस्य वृद्धिः। योनौ न भवति। सुतेषु त्वया भूषायां माधुच्छन्दस

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मानवयोरिति। सुतेष्वित्यत्र षुशब्दात्परस्य व्यवधानप्राप्तस्य वृद्धात्परौ इत्यादिना लोप प्राप्ते अलोपविधानम्।।

9.आष्कारणिधनंकाण्वम् - कईवेऽ3दसुतेसचा (5 2 4 50 4 5) ।। आष्कारे वेद नेन्दः प्र। अवृद्धादि पदान्तादित्यादिनात्र यकारस्य व्यवधानम्। नेन्द्रः कईवेदायां आष्कारणिधने काण्वे, इति। भक्त्यन्तः पदगीतस्सर्वत्रेति। पदगानप्राप्ते सन्धिगानविधानम्। नेन्द्र इति।।

10.मानवाद्यम- अभिसोमा (2 0)।। नवेनिहोतेति,अस्यायमर्थः। योनौ द्वितीयस्याक्षरस्यवृद्धिः। नवेनिहोता द्वितीयस्य वृद्धिः। तस्माद्विकल्प-पक्षे सर्वत्र निहोता भवति। मानवयोः पूर्वे च दक्षसा पतिः कवीमिति। योनौ द्वितीयपादे च दक्षसात्र पतिः कवीमापद्यतेत्यर्थः। नवे च तृतीयमिति। ऊहे सर्वत्र तृतीयपादे तृतीयाक्षरस्य नीचप्राप्ते तुरीय-मर्षापौशिक्षामान इति अत्र तृतीयायामर्षामित्रस्य इत्यत्र त्रिशब्दस्य नीचविधानम्।।

11.मानवाद्यम्- शग्ध्यूषू (2 0)।। शग्ध्यूमानवहारयोरिति अत्र शग्ध्यू शब्दस्सङ्कृष्टः। नवति निहोता मानवयोः पूर्वे च दक्षसा पतिः कविमिति सूत्र द्वयस्य पूर्ववत् प्रक्रिया। नवे च तृतीये तृतीयमिति। सर्वत्र तृतीयपादे तृतीयस्याक्षरस्य नीचप्राप्ते तुरीयमर्षा पौशिक्षमान इति अत्र मध्यमायां पौरो अश्वस्येत्यत्र श्वशब्दस्य नीच विधानम्। स्य पुरुकृच्छग्ध्यूहारमानवयोरिति कृशब्दस्यानाभविः।।

12.भारद्वाजम्- आत्वासहा (20 0)।। शेप्या भारद्वाजे। प्या शब्दस्सङ्कृष्टः। ब्रह्मयुजो भारद्वाजे, इत्यत्रा स्तोभेपरतस्सन्धिगाने प्राप्ते पदगानं विधानम्।।

13.पूर्वजनित्रम्- योराजाऽ3चर्षणाइनाम् (50 0 2 4 5 4 5)।। नित्रेर्द्धस्य प्र। णी जनित्रे इति। णीशब्दस्य वृद्धिः। योनौ परुहन्मने उपान्त्यस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृद्धिर्नभवति ग्रहणात्। पूर्वे जनित्रेऽन्त्यस्य स्तोभस्यागतिः। सर्वे अन्त्यस्तोभस्यागति प्राप्ते यस्यद्धितेत्यत्रान्त्यस्यापि गतिः। नित्रे गीथषष्ठमिति। अत्र सर्वासु उद्गीथ षष्ठस्याक्षरस्य वृद्धिः। योनौ पञ्चमस्य वृद्धिः। पूर्वेजनित्रे च दक्षसोतद्धिषामिति अत्र सर्वासु स्तोत्रीयासु योनिदृष्टा च दक्षसा उतद्धिषामापद्यते। चदक्षसाद्यस्य वृद्धिः, द्वितीयस्याभिगीतिः, तृतीयस्य वृद्धिः, चतुर्थस्य कर्षणम्, उतद्धिषारूपम्। ह्रस्ववृद्धिः प्रत्युत्क्रामकर्षणं एतावान्विशेषः। नित्रेचपूर्वे, इति। ऊहे सर्वत्र प्रतिहाराद्यस्यावृद्धिः। योनावेववृद्धिः। सर्व जनित्र संक्षार रथिराजेष्विति। सर्वत्र महित्रीणा द्वितीयस्य ह्रस्वस्यापि वृद्धिविधानम्।। दावसुनिधनेत्यादिना योनावेव तृतीयपादादिः नीचैः। ऊहे न भवति। कर्षणेत्वित्यादिनात्र कर्षण वृद्धे न भवति।।

14.इन्द्रस्य यशः- त्वमिन्द्रा (1 2 1) ।। इन्द्रस्य यशसि त्राण्येकः। प्र। त्वमिन्द्रत्वंवृत्राणि इन्द्रस्य यशसि,इति अत्र त्वं शब्दौ सङ्कृष्टौ। इन्द्रस्य यशस्य नुत्तइति प्रथमायां अगतीति। यशस्युत्तरयोरग्निन्दूतास्तावे। अत्रोत्तरयोः प्रस्ताव विकल्पपक्षे अग्निन्दूता स्वरो नभवति। यशस्युत्तमायामुत्तरातयानन्दाम्। इत्यत्रोत्तमायां स्तोत्रीयायां उत्तरातया नन्दामापद्यते। हो इति यशसि कृष्टादेकम्। अत्रसर्वासु तृतीयपादे आद्य पर्वणि कृष्टात्परं द्वितीयस्वरे एकाक्षरं प्राप्ते मध्यमायां तु मकारो द्वितीयामिति। अत्र मध्यमायामकृष्टात्परं मकारस्यापि द्वितीयस्वरविधानम्।।

15.सत्रासाहीयम् - अग्नाऽ34इः (3 4) - मूर्धादिवःककुत् (0 0) ।। साहीये। शताद्वितीयं सङ्कर्षात्। तथा सर्वत्र सन्याय इति। मन्द्रश्चतुर्थमिति सूत्रत्रयं पूर्वमेवोक्तम्। साहीये अग्ने त्वं सर्व इति। अत्र सर्वासु उद्गीथाद्युच्चम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

16.जमदग्नेरभीवर्तः - पि[2]बा[0]सुतस्यरसिनो[0]मत्स्वा[0]हाउ ।। हाउ कारान्तस्सन्तनिनीत्यादिना प्रस्तावः। जमवर्तेतुते प्र। वृधेऽस्मान् पिबासुतायां पृष्ठजमवर्तयोरिति। अत्राद्यायां हादौ स्तोभे परतः पदान्तस्य योशब्दस्याप्याभावविधानम्। जमवर्ते चेति, अस्य अर्थः।। धियश्शब्दात्परस्य प्रगाथत्वादभ्यासभूतस्य पादाद्यस्य एङः पदान्तादित्यादिना प्रश्लेषप्राप्तस्य पादान्त्यात्परस्वरो विकृष्यत इति अनेन विश्लेष प्राप्तस्याकारस्य पुनः प्रश्लेषविधानम्। जमवर्ते मध्यमायां रनोनुमा च दक्षसामिति अत्र मध्यमायां तृतीयपादे योनिदृष्टा च दक्षसामापद्यते। अभित्वाशू प्रथमे रनोनुमा। मानस्तरभि जमवर्ते थादौ लोपः। पराङ्गं वेति। नस्तर इत्यत्र सकारस्य लोपः अभाइति। पराङ्ग पक्षे स्ताः। अभाइति। सुम्नेषुमानस्तरभीत्यत्र जमवर्त निषेधयोः वृद्धमन्तः पदे तालव्यमित्यादिना भावप्राप्तस्य मोशब्दस्याइ भावविधानम्। माद्ये पृष्ठ इति द्वे शब्दोऽत्र विकृष्टः।।

17.अभिनिधनं काण्वम्- औ[20]हो[1]होहा[2]इ। आ[1]इही[2] । आ[1]मा[2] ।। अभ्यन्ते मन्द्रैर्याहि चित् येमुः इत् अति धन्वेहारी (गम्भीसन्धे प्र) कण्वाभिनिधनेत्यादिनात्र वृण्यादिभूतस्य दीर्घविधानम्। पुरान्दर्म इत्यत्र अभिनिधने काण्वे ,इति। दर्मो अपामीत्यत्र स्तोभे प्रत्यये सन्धिगाने प्राप्ते पदगानविधानम्। नासाद्दधीन् मुद्रन्नद्रस्वब्दी चर्कृत्या निष्यतेणिमृढ्वं, इति वारानिहोतयोश्चेत्यादिना संयोगाक्षरे परतः वाराद्वितीयस्य वृद्धि प्राप्ते अत्र धीरतीत्यत्र युशब्दस्य संयोगे अवृद्धिविधानम्।।

18.गौतमस्यमनाज्यम्-य[2]था[10]गौऽ23री[40]अपा[50]कृताम्।। मनाद्येगहि कण्वेदेय प्र। मनाद्येवादिरापि । रारन्त्यं ज्ये चेति, अस्यार्थः।। अत्र सर्वासु प्रस्तावाद्यस्य उत्तरयोः प्रतिहाराद्यस्य पीत्यत्राकारस्य नीच विधानम्। मनाद्ये त्लुमूतया वायोरनीकामुत्तरयोरिति। अत्र योनि -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दृष्टा त्नु मूतयातत्रोत्तरयोर्वायोरनीमापद्यते ।उपत्वाजा प्रथमे ।।

19.पौरुमीढम्- तुवम।। मीढे ब्रवी प्र। ढेचमं सर्वास्विति। अत्र सर्वासु द्वितीय पादाद्युद्गीथादिः नीचैः। मीढेमोच्चादिर्नीचैः। इदमपि पूर्वसूत्रार्थमेव। मीढे व्यमिति। अत्राद्यन्तयोरुपद्रव द्वितीयस्य वृद्धिः। मध्यमायां युतालब्यत्वाद वृद्धिः।। इति द्वितीयः।।2।।

==**==

।।तृतीयो विंशः।।

1.उद्वँशीयम्- आत्वाविशन्त्विन्दवआ ।। शीयेविव्ययुंक्षेत्यत्राद्यनयोः प्रस्तावाद्युच्चम्। मध्यमायां नीचम्। उद्वँशीय इन्द्र सुतायामुत्तरयोरिति अत्र सर्वासुगतिः। द्व्यक्षरेऽन्यत्रेति योनिदृष्टा ब्रह्मणस्त्वा शतक्रताद्धावप्यत्र त्र्यक्षरे भवतः। वँसीयेति उपद्रवाद्यस्य सर्वत्र वृद्धिप्राप्ते यभ्यः इति तृतीयायां उपद्रवाद्यस्यावृद्धिः। इन्दव उद्वँशीय इति, इन्दव इत्यत्र इकारात्परस्य नकारस्य पदमध्यगतस्यानुस्वारस्पर्शेत्यादिना अतिहारप्राप्तस्य लोपविधानम्।।

2.उद्वँशीयम्-इन्द्रसुतेषुसोमेष्वा।।उद्वँशीय इन्द्रसुतायामुत्तरयोरिति अत्रोत्तरयोः स्तोत्रीययोरगतिः। विदइन्द्रसुतायामुद्वँशीय इति। विदेऽपि वृधस्येत्यत्र पदान्तस्य देशब्दस्य हादौ स्तोभे परतः आभावविधानम्। व्योमनीन्द्र सुतायामुद्वंशीयो इति अत्र व्योशब्दस्सङ्कृष्टः। अप्सुजित्सर्वत्रेति जशब्दस्य प्रकृतिभावे प्राप्ते नोद्वँशीय इत्यादिनात्र अन्त्यस्य जिशब्दस्य प्रकृतिभावो न भवति। अन्यत् सर्वं पूर्ववत्।।

3.जराबोधीयम्- प्रतिष्यासोवा ।। बोधीयेच्छन्तीदर्शि प्र। वाचिसर्वमित्योभावे प्राप्ते अनुस्थमिति प्रतिष्यासू इत्यत्र सूशब्दस्य ओभावो न भवति। स्यश्विनोर्बोधीये, इति। दीर्घवृद्धोपहित इत्यादिना

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अश्विनोरित्यत्र सिशब्दात्परं व्यवधानप्राप्तस्य यकारस्य लोपविधानम्। गीथोपान्त्यं त्रीषुबोधीये,इति। बोधीये सर्वमिति सूत्र द्वयस्य पूर्वमेवोक्तम्। प्रतिस्तोत्रीयं बोधीय धुराँ साकमश्वयोरिति प्रतिस्तोत्रीयं निधनम्। न सामान्ते। बोधीयनिधने च घोषे इति। निधनात्परं घोषसंज्ञके इकारे परतः ताशब्दादीनामोभावविधानम्।।

4.जराबोधीयम्- एषोउषोवा।। (20 0 1 2) परे बोधीयेच्छति प्र। पच्यन्तेवामित्यत्र स्वरागमादिति, अस्यार्थः। वामित्यत्र मकारात्परं स्वरागमविधानम्। वां ओवाइति। यद्वाँ रथोबोधीये इति भक्त्यन्तः पदगीतस्सर्वत्रेति थोशब्दस्य पदगाने प्राप्ते सन्धिगानविधानम्। अन्यत्सर्वं पूर्ववत्।।

5.श्रध्यम्- उषस्तच्चाऽ2इत्रम् (1) ।। श्रुध्येद्येह प्र। क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादादि भूतस्य ऋक्स्वरवदुच्चनीचविधानम्।।

6.श्रुध्यम्- अश्विनावाऽ2र्तिः[1] (1 0)।। क्रौध्यष्टम्भेत्यादिनात्र पूर्ववत् विशेषो नास्ति।।

7.वैश्वज्योतिषम्- प्रतुद्रवा (2 1)।। वैश्वज्योतिषे एषिधेनावेद प्र। त्रिष्टुभि चोतायामित्यादिना ऊताया द्वितीय चतुर्थ स्वरे प्राप्तस्य वृद्धि प्राप्ते अयतीं युधा,ते, देव, इति अत्र मध्यमायां देव इन्दुरित्यत्र दे शब्दस्यावृद्धिविधानम्।।

8.औशनम्- आबो (1 2) ।। शनेयदीयन्ती प्र। त्रिष्टुभि चोतायामित्यादिनात्र द्वितीय स्वरस्य दीर्घाक्षरस्य वृद्धि प्राप्ते अयतीं युधाते दे इत्यत्राद्यायां अयतीमित्यत्र तिशब्दस्यावृद्धिविधानम्।शने च स्वास्विति उद्गीथ द्वितीयस्य स्वास्वेव वृद्धिः अन्यत्र न।।

9.औशनम्-आइदाम् (1 2)।। परेशने श्वेति चीद्या देवसुमे।।

1.ख- अश्विनाऽ2इव (1)।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

10.औशनम्- आ[1]भा[2]।। औशने देवरथ्येतेहतमे प्र। पदान्ते काम्पेत्यादिनात्र उत्तरयोर्दाति शब्दयोर्वृधन्तैव।।

11.आशुभार्गवम्- उ[2]च्चा[10]र्ते । गवे मनानि प्र। अत्र सर्वत्र प्रस्तावाद्यस्य नीचविधानं नाध्व तव प्रसो सन इति। अत्र मध्यमायां प्रस्तावाद्युच्चम्। आशुभार्गवे पञ्चाक्षरोदय इति। ऊहे सर्वत्र प्रस्तावाद्युच्चं पञ्चाक्षरं भवति। एवं सर्वत्र प्राप्ते त्र्यक्षरोद्वाद्ययोरिति। अत्राद्ययोः स्तोत्रीययोः प्रस्तावाद्यं पर्वत्र्यक्षरमेव भवति। अवृद्धादि पदान्ता-दित्यादिना विश्वानीत्यत्र निशब्दात्परं यकार व्यवधाने प्राप्ते द्व्यन्तस्थ परे तु लोप इति यकारस्य लोपः।।

12.सत्रासाहीयम्- तु[3]वा[2]ऽ34म्।। साहीये शतायास्तत्वा इति। अत्र मध्यमायां द्वितीयपर्वाद्यस्य ह्रस्वस्य शतशब्दस्य दीर्घविधानम्। साहीये शता द्वितीयं संकर्षात् तथा सर्वत्र स न्याय इति मन्द्रश्चतुर्थमिति सूत्रत्रयस्य पूर्वमेवोक्तम्।।

13.श्रुध्यम्- प[1]वस्वदाऽ2इव।। क्रोध्यष्टम्भेत्यादिनात्र सर्वत्र तृतीयपादादिर्यथर्चः। त्वां देवासोरीत्यापि इत्येतौ शब्दौ वैश्वमनस श्रुध्ययोरिति अत्र त्वाशब्दौ सङ्कृष्टौ।।

14.वैधृतंवासिष्ठम्- अ[2]भि[1]प्रियाणीऽ2।। वैधृतवासिष्ठेयाणी धिया इति । प्र। वैधृतसिष्ठे नौ थे रे च द्वितीयमिति। अत्रोद्गीथ प्रतिहारयोः द्वितीयस्याक्षरस्यावृद्धिः। योनावेववृद्धिः। घं वैधृते। अत्र महित्रीणा द्वितीयस्य दीर्घाक्षरस्य वृद्धिविधानम्। अचीति। अचिक्रददादित्यत्र चिशब्दस्य ह्रस्वस्यापि ग्रहणाद्वृद्धिविधानम्। तृतीयमृतस्य जिह्वायां ना भवति सर्वत्रेति यकारे तिच प्रत्यये वृद्धमन्तः पदे तालव्यमाभवतीत्यादिना पदमध्यगतानां तालव्यानां यकारे च प्रत्यये सर्वात्राभावे प्राप्ते तृतीयमित्यत्र तृतीयशब्दस्य च यकारे परतः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वत्रानाभावविधानम्। आन् कारो वृद्धस्सर्वत्रानुनासिक इति कलशाँ अनुनासिकमेव।।

15.कावम्- जनोवा [2 1] ।। गृविस्सर्वत्रेति विशब्दस्य सर्वत्र प्रकृतिभावे प्राप्ते नाजावितज्ञीययोर्जनकावे इत्यत्र विशब्दस्याइभावः। कौल्मलान्धीत्यादिनात्र योनावेवोद्गीथादिर्नीचैः। कावरथन्तरयोस्सर्वत्रेति अत्र प्रस्तावादिर्नीचैः। गीथाद्यं कावे अञ्जते इत्यत्र ते शब्दस्य वृद्धिः। अन्यत्र कावे जातिषु उद्गीथाद्यस्यावृद्धिरेव।।

16.कावम्- एतोवा [20 1]।। एताकावे श्वेदा। प्र। कावपर्णकूलीयानां ओभवतीति सर्वत्र ओभावे प्राप्ते अनुत्कावे, इति। उदपप्तन्नित्यत्र प्रस्ताव द्वितीयस्याकारस्य ओभावो न भवति। कावे गीथ षष्ठं सर्वत्रेति। सर्वत्रोद्गीथ षष्ठस्य वृद्धि प्राप्ते त्वान्दूत उदपप्तायोश्वेति अत्र मध्यमायां गीथसप्तमस्य वृद्धिः।।

17.कावम्- आबोवा [2 1]।। परे कावे वीद्दे प्र। व्यूषाः कावे, इति। अत्र व्यूशब्दस्सङ्कृष्टः। वाचिसर्वमित्योभावे प्राप्ते अनुस्थमिति यूथे इत्यत्र यु शब्दस्य ओभावो न भवति। अर्वाङ् त्रि लोपमेते काव इति अर्वामित्यत्र पदान्तस्य वाचि सर्वमोभवतीति लोप प्राप्तस्य मकारस्यातिहारः। केचिल्लोपं मन्यन्ते।।

18.कण्वरथन्तरम्- पारितोषिञ्चतासुताम् [20 010 2 1021]।। स्तावाद्यं कण्वतरे, इति। अत्र प्रस्तावाद्यस्य ह्रस्वस्यापि दीर्घविधानम्। ण्वतरे तुरीयं नीचं सर्वत्रेति तुरीयनीचप्राप्ते चमनं जातोदब्धस्सु देवोवः इति अदब्धस्सुरभिन्तर इत्यत्र पञ्चमस्य रेफस्य नीचविधानम्। नर्यः परीतायामित्यादिनात्रर्यशब्दस्सङ्कृष्टः। नोविभिस्सुषावसोमायां सर्वत्रेति अत्र विश्लेषः। चित्वानवे, इति अत्र प्रश्लेषः। ओष्ठ्यश्चान्तः पदिकोनाउ भवति सर्वत्रेति उत्तरमित्युकारस्यानाभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

19.सौभरम्- तन्ताऽ3इमाऽ3दंगृणीमसोवा ।। सौभरे पत्नीपूर्वे पूर्वं प्र। सौभराभीवर्तेत्यादिना तुरीयस्य दीर्घस्य वृद्धिप्राप्ते अपीयूवाजेतीं षीति अत्र मध्यमायां ज्योतींषीत्यत्र तीशब्दस्य दीर्घाक्षरस्यावृद्धिः। अत्र सर्वासु पूर्वस्तोभस्यागतिः। तन्तेमदायां हारिभरवारेषु इत्यत्र कृशब्दस्यानाभावः। तीषियायवेत्यत्र व्यवधानप्राप्तस्य यकारस्य द्व्यन्तस्थ परे तु लोपः।।

20.माधुच्छन्दसम्-पुनानस्सो।। माधुच्छन्दस उपस्वसरमित्यादि -नात्र पुनानस्सो इत्यगतिः। क्रौध्यष्टम्भेत्यादिना तृतीयपादादिभूतस्य ऋक्स्वरवदुच्चनीचप्राप्ते अश्रुष्ट आरत्नधानहीति अकारस्योदात्तस्य यथर्चविधानम्। दीर्घ वृद्धोपहित इत्यादिना प्राप्तस्य यकारस्य नार्षसि पुनानायां यथा गौङ्गवाभीवर्तयोरिति विरामविषये अपवाददर्शनात् विरामात् परं माधुच्छन्दस वाश समन्त कालेयादिषु यकारस्यालोप एव।। इति तृतीयः।।3।।

==***==

।। चतुर्थो विंशः।।

1.भरद्वाजस्यपृश्निः- तवाहाँऽ23सोमरारणहाउ।। पृश्निनिज्येष्ठ-मित्यादिनात्र पुरुणीत्यगतिः। पृश्निनेकर्चे इति अत्रोद्गीथाद्यस्य नीचविधानम्। पृश्निन्यपादादिर्भात्। इति अपादमध्यगतश्च स्तोभात्परस्य भ्रो शब्दस्य वृद्धिः। योनौ वृद्धिर्नभवति। पृश्निनि तृतीयपादान्ते च दक्षसा पतिः कवीमिति। पृतनातूतद्धिषाम् । पतिःकव्युत्तमे चेति सूत्रद्धयस्य पूर्वमेवोक्तम्।।

2.मार्गीयवम्- अप्सौहोवा।। यवे मह्यामिति। महित्रीणा द्धितीयस्य वृद्धिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

3.अग्नेस्त्रिणिधनम्- अनूपेगो।। अग्नेस्त्रिणिधने मन्दी । प्र। निहोता णस्सो पम्म धज्ञैः परि क्रतुरिमान्गो इति अत्र वारा प्रकृतिभूतस्य मान्गोभूतस्य निहोताविधानम्। अग्नेस्त्रिणिधन उष्वायां द्वितीयपाद द्वितीयं वृद्धमिति योनौ द्वितीयपादे द्वितीयादिषु अक्षरे वृद्धिः। सोमउष्वा द्वितीयस्य वृद्धिः। न तृतीयचतुर्थयोः। मान्गोवत्याञ्च आनीकयामाद्यमिति, अस्यार्थः। योनौ तृतीयपादे द्वितीयपर्वणि तृतीयस्यवृद्धिः। मन्द्रयायां तृतीयपादे द्वितीयपर्वण्याद्यास्य वृद्धिः। नयोनिवत् तृतीयस्येत्यर्थः। अत्रोभयत्रावृद्धिरेव। मुद्रन्निद्रस्वब्दी चर्कृत्या निष्यते णिमृढ्वं, इति वारानिहोतयोश्चेति असंयोगे परतः वाराद्वितीयस्य वृद्धिप्राप्ते मुद्रन्नित्यत्र मुशब्दस्य संयोगे प्रत्ययेऽपि वृद्धिविधानम्। आउवाव्यवहितमित्यादिना सर्ववर्णानामाभावे प्राप्ते ओष्ठ्यश्चान्तःपादिकोनाउ भवति सर्वत्रेति मदायतो इत्यत्र तोशब्दस्य अन्तःपदिकस्यानाउभावः।।

4.सन्तनि- इन्द्रोहाउ।। इन्द्रश्श्येनस्सन्तनिनीति स्तोभे प्रत्यये पदगाने प्राप्ते सन्धिगानम्। भे शब्दस्य गोष्ठप्रतोदेत्यादिनात्र पादादि भूतानामृक्स्वरवदुच्चनीचविधानम्। जुषुसन्तनि इति आजिषूतिमर्भे इति षुशब्दात्परस्य पादादिभूतस्य अकस्सवर्णे दीर्घ इति प्रश्लेष-प्राप्तस्य पादान्त्यात्परस्वरो विकृष्यत इति अनेन विश्लेषप्राप्तस्य इकारस्य पुनः प्रश्लेषविधानम्। षु प्रनस्सन्तनि नि इति। आउवा व्यवहितमित्यादिना सर्ववर्णानामाभावे प्राप्ते षु प्रनो इत्यत्र नोशब्दस्य नाभावविधानम्। विषदिन्द्रोमदायां सन्तनिनीति तालव्यस्याइभावे प्राप्ते निधने हीषीस्थं सर्वत्रेति प्रकृतिभावप्राप्तस्य पुनराइभाव-विधानम्। सेन्योसि बार्हिद्गिरसन्तनिनोरिति। विरसेन्यो इत्यत्र न्यशब्दात् परस्य पादादि भूतस्य एङः पदान्तादित्यादिना प्रश्लेष-प्राप्तस्य पादान्त्यादित्यादिना विश्लेषप्राप्तस्याकारस्य प्रश्लेष-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधानम्। अच्छिद्राङ्गोवैरुप सन्तनीत्यादिना अगति प्राप्तस्य न तालव्यमित्यनेन भूरितेवस्वादित्यत्र ते शब्दात् तालव्यात् परस्य स्तोभस्य गतिः। वसु इत्यत्र वसु शब्दस्य वसुसीदतु भूरितेवसु इत्यनेनाइभावे प्राप्ते न सन्तनिनि निधनत्वादित्यत्र अनेन वसू इत्यत्र सूशब्दस्य प्रकृतिभावः। आन् कारो वृद्धोनुनासिकस्सर्वत्रेति वृद्धस्यान्कारस्यात्रानुनासिके प्राप्ते अरेववैखानससन्तनिषु इति अस्मान् इन्द्रो इत्यत्रान् कार एव।।

5.गोष्ठः[1]- हाउहाउहाउवा- पुनानोवारे पवमानोअव्यये ।।
(स्वराङ्काः: 2 / 2 0 10 0201 20 0 1 20)
गोष्ठप्रतोदेत्यादिना पादादि भूतानामृक्स्वरवदुच्चनीचविधानम्।।

6.मार्गीयवम्- तन्त्वौहोवा ।। यवेमह्यामिति महित्रीणा द्वितीयस्य अवृद्धिः।।
(स्वराङ्काः: 2 0 1 2)

7.सन्तनि- वयाँहाउ।। गोष्ठप्रतोदेत्यादिनात्र पादादिभूतानां वर्णानां यथर्चविधानम्। अवाजमिति ऋग्ग्रथ पर्वसु सर्वेषु ऋक्स्वर-वत्सामिकः। उदात्ताच्च परमुच्चैर्भवतीति न्यायेन प्राप्ते अवाजन्दर्षीत्यत्र वाशब्दस्योदात्तस्य नीचविधानम्। तालव्यादित्यनेनात्र आमायां मिशब्दात् परस्य स्तोभस्यगतिः। दादिस्तनि पार्श्वयोर्यथर्चस्सर्वत्रेति सन्तनि गायत्रपार्श्वयोः सर्वेषां पादानां आद्यस्याक्षरस्य ऋक्स्वर-वदुदात्तानुदात्ते प्राप्ते अस्तावहारयोरवश्ये हि स्तोमसु मरा प्रमराजी चेति अत्र प्रस्तावे नीचभूतस्य वशब्दस्य प्रतिहारे मक्षू इत्यत्र मकारस्य चा यथर्चविधानम्।।
(स्वराङ्काः: 1 2)

8.अच्छिद्रम्- प्रहिन्वानाः।। ऋतमाउवा व्यवहितमित्यादिना पार्श्वसन्तन्यच्छिद्रमैधाङ्गोवैरुपाग्ने स्त्रिणिधनेष्विति। ऋतमित्यत्र पदान्तस्य मकारस्य आउवाव्यवहितमित्यादिना लोपप्राप्तस्य -
(स्वराङ्काः: 2 0)

---

1. ग- अङ्गिरसां गोष्ठः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उभयत्रातिहारविधानम्। अच्छिद्ररयिष्ठयोश्चेति निधनभूतपादादि भूतानां वर्णानामृक्स्वरवदुच्चनीच विधानम्। अच्छिद्रैकर्चे णो नीचः। योनौ तृतीयपादे प्रतिहारात् पर्वणि त्रीण्यक्षराणि इत्युच्चम्। अत्र पर्वादि भूतस्य णोशब्दस्य नीचविधानम्। तशब्दश्चावृद्धोऽपि विचे प्रत्यये, इति योनौ नर्यो इति अकारस्य वृद्धिः। अत्र तत्स्थानगतस्य तशब्दस्यावृद्धिरित्यर्थः। समुद्र इत्यत्र ऋति सङ्कृष्टस्य सामनि सर्वत्र विकृष्टस्य स्वरितभूतस्य यकारस्यार्चिकं निधनं न्यायेत्यादिना सम्प्रसारणे प्राप्ते सुत उद्यस्यतर्धयन्निति न्यायादपेतप्रकरणे ग्रहणम्। अत्र यकारस्य वृधेस्वरमेव। आउवा व्यवहितमित्यादिना सर्ववर्णाना-माउभावे प्राप्ते ओष्ठ्यश्चेत्यादिना समुद्रइत्यत्र मुशब्दस्यानाभाव विधानम्।।

9.त्र्यन्तं त्वाष्ट्रीसाम- अ[2]भी[0]नो[0]वा। एकस्याम्।। रश्च्ये च। त्र्यन्ते च त्वाष्ट्री साम्नि। अत्र प्रतीहाराद्यस्य अक्षरस्य वृद्धिः। योनावेवावृद्धिः।।

10.इडानांसंक्षारः- औ[20]हो[0]इहुवाऽ3हो[1]इ । हि[2]न्वन्तिसूऽ3रा[4]ऽ3मु[2] स्त्रि[3]यः[5]।। संक्षारे देवे देवे प्र। संक्षारे वैश्वज्योतिष गोराङ्गिरसेषु नियान्त इति। नियान्तस्याकारस्य वृद्धिविधानम्। नियामञ्चेति हेवायां। सर्वं जनित्रेत्यादिना महित्रीणा द्वितीयस्य ह्रस्वस्यापि वृद्धिः। स्तोभश्च सामाद्य इत्यादि स्तोभनियमः।।

11.प्रतीचीनेडँकाशीतम्- उ[1]पो[0]षु[2]जा[0]तम्।। अस्य पीत्वा काशीते । इत्यत्र सर्वासु प्रस्तावाद्युच्चम्। ओवौकारयोरनन्तर इत्यादिना सर्ववर्णानामाभावे प्राप्ते ऋगन्तीयस्पर्श इत्यादिनात्राद्ययोः स्तोत्रीययो ऋगन्तभूतस्य नामिविसर्जनीयस्य अनाभावः। तत्र चौहोवाशब्दः प्रथमादारभ्य कृष्यते।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

12.गौरीवितम्-उ[5]त्सः-दे[30 2]वोऽ3।।देवोदिव्यं ज्यर्षसीत्यादिनात्र विकृष्टः।।

13.यज्ञायज्ञीयम्- आ[40]जा[3]ऽ5गृ।। ज्ञीये सुरि ज्योतिषात् प्र।। ज्ञीये दान्त्ये इत्यनेन यत्र पादान्त्यस्याक्षरस्या सावाने दप्राप्तः तत्र प्रस्तावोपान्त्यस्याक्षरस्य वृद्धिविधानात् अत्र प्रस्तावोपान्त्यस्याक्षरस्य वृद्धिविधानात् अत्र पादमध्ये प्रस्तावान्त्यत्वात् उपान्त्यस्याक्षरस्य वृद्धिर्न भवति। आद्यायामन्यत्रेति। अत्र प्रथमायां उद्गीथाद्यस्याक्षरस्य वृद्धिः।।

14.कण्वरथन्तरम् - पा[20]व[10]मा[20]नाभियर्ष[1 2]साइ[1]।। स्तावाद्यं कण्वतरे, इति। प्रस्तावाद्यं ह्रस्वस्यापि दीर्घः। ण्वतरे तुरीयं नीचं सर्वत्रेति अत्र प्रस्ताव तुरीयस्य नीचविधानम्। अचिक्रदत्पवमानाभ्यर्षसीति अत्र ण्वतरेति अचिक्रददित्यत्र दशब्दात्परस्याउवा व्यवहितमित्यादिना सर्ववर्णानां आभावप्राप्तस्य पदान्तस्य तकारस्यातिहारः।।

15.आभीकम्- प्रा[1]ऽ234-सो[0]मा[0]सोऽ5।। भीके विप इति विप इत्यत्र पशब्दात्परस्य पूर्वाङ्गप्राप्तस्य पदान्तस्य विसर्जनीयस्यातिहारः। कौल्मलान्धीगवेत्यादिनात्र उद्गीथाद्युच्चम्। अत्र उत्तमायां विष्ण इत्यत्र विशब्दात्परस्य स्तोभस्य तालव्यात्परमतिहारमेके इत्यनेनागतिः।।

16.ऐडँसौपर्णम्- प्र[2]सो[0]मा[0]सो[1]वा[2]।। ओवौकारयोरित्यादिनात्र आभावे प्राप्ते अत्र मध्यमायां ऋगन्तीयस्पर्श इत्यादिना ऋगन्तीय तकारस्य अनाभावविधानम्।।

17.द्विर्हिंकारवामदेव्यम्- प्र[2]सो[10]माऽ23दे[40]व[50]वीतयाइ।। अँशोरि-त्यत्र साशब्दादवृद्धात्परस्य पादादि भूतस्य अत्र अकस्सवर्णेदीर्घ इत्यत्रानेन प्रश्लेषस्य प्रादान्त्यात्परस्वरो विकृष्यत इत्यन्तेन विश्लेष प्राप्तस्याकारस्य पुनः विश्लेष प्राप्तस्याकारस्य पुनः प्रश्लेषविधानम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भुविस्सर्वत्रेति विशब्दस्य प्रकृतिः। हिसत्यपस इत्यादिनात्र त्य शब्दः सङ्कृष्टः। ओवौकारयोरित्यादिनात्र आभावे प्राप्ते ऋगन्तीय स्पर्श इत्यादिनात्र प्रथमान्त्ययो ऋगन्तभूत स्पर्शनामि विसर्जनीययो-रनाभावविधानम्।।

20 0 1 2
18.शैशवम्- स्वादिष्ठयामदिष्ठाया ।। शवे इत्यत्र सर्वासूद्वीथादिर्नीचैः।।

3 4 0 0 3 4 5
19.वैश्वामित्रम्- प्रासुन्वानायअन्धसः[1]।। अत्र सरज्जार इत्यगतिः। अत्र सर्वासु पत् स्वरवत् प्रस्तावाद्यस्योच्चारम्भः। वैश्वामित्रे च सर्वास्विति। योनौ द्वितीयपादे वारासर्वत्र सर्वासु निहोता भवति। चशब्दात् संयोगे प्रत्ययेऽपि निहोताद्वितीयस्य वृद्धिविधानम्। त्रे वैश्वामित्रे इति। योनौ तृतीयपादे द्वितीयपर्वण्याद्यस्याक्षरस्य अवृद्धिः। अत्र तृतीयायां तृतीयपादे योनिवदवृद्धि प्राप्ते त्रे शब्दस्य वृद्धिविधानम्। नभूप्रसुन्वानायामित्यादिना भूशब्दस्यानार्भावः। वैश्वामित्रे प्रसुन्वान द्वितीयायां प्रसुन्वानार्यां सर्वत्रेति अन्धस इत्यत्राकारस्य सर्वत्र विश्लेषः।।

2 0 0 2
20.स्वारंकौत्सम्- प्रसुन्वानायाऽ3अन्धसाः।। दावसु निधनेत्यादिनात्र सर्वासु तृतीयपादाद्युच्चम्। योनावेव नीचम्। प्रसुन्वानाया सर्वत्रेति अन्धस इत्यत्र विश्लेषः।। इति चतुर्थः।।4।।

==****==

।।पञ्चमो विंशः।।

1 20 0 1 2 1
21.औरुक्षयम्- प्रसुन्वानायअन्धसाः ।।

1 20 1 2 10 20
1.हरिश्रीनिधनम्- वृषापवस्वधारया ।। अया हरिश्री इत्यत्र तृतीयायां प्रस्तावादिर्नीचैः । ण्योस्तन्त्वा धर्तायां हाविष्मत

---

3 4 0 0 3 4 5
1. ग- प्रासुन्वानायअन्धसः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्तनिनोरिति। ण्योशब्दोऽत्र विकृष्टः। श्रीनिधने हिन्वे प्र। स्वस्सर्वत्रेति स्वशमित्यत्र स्वशब्दात्परस्य पूर्वाङ्गप्राप्तस्य पदान्तस्य विसर्जनीयस्यातिहारः।। कर्षणेत्वित्यादिना कर्षणवृद्धो न भवतः।।

3 4र 5 र र
2.शाम्मदम्- यस्तेमदोवऐ ।। रिष्ठाश्शाम्मदे । इत्यत्र सर्वास्ववृद्धिः। पवस्व यस्ते मदायाँ सर्वत्रेति सर्वत्र विश्लेष प्राप्ते सोमसाहीयशाम्मदेषु प्रश्लेष इति अन्धस इत्यत्राकारस्य प्रश्लेषः।।

5 र 2 4र र 5
3.दावसुनिधनम्- यस्तेमाऽ3दोवरेणियोहाउ[1]।। दावसुनिधने त्वँ सोमान्त्यस्सर्वासु। मदेषु गोषातिः। अत्र गोषातिरित्यत्रागतिः। दावसुनिधनेत्यादिना सर्वासु तृतीयपादाद्युच्चम्। योनावेव नीचम्। पवस्व यस्तेमदायाँ सर्वत्रेति विश्लेषः। कर्षणेत्यादिनात्र कर्षणवृद्धे न भवतः।।

2 3र 4 5 र
4.आश्वसूक्तम्- आऔहोवाहाइ - यस्तेमदाः ।। अत्राप्यकारस्य विश्लेषः । अत्रापि कर्षणवृद्धे न भवतः।।

3 2र 1
5.ऐडंकौत्सम्- अयँहीपूऽ23।। कौत्से प्रियाः रयिँ प्र कौत्सेऽभि तृतीयायां इत्यादिनात्राद्ययोः स्तोत्रीययोः उभौ स्तोभावगतौ । उत्तरस्तँ सखायः परित्यं रक्ष। अत्र तृतीयायां उभौ स्तोभौगतिरेव। कौत्सदँष्ट्रेत्यादिना योनावेव प्राप्तस्य प्रस्तावाद्यं वृद्धिः। कौत्से हिशब्दो वृद्धः प्रकृतौ। अत्र मध्यमायां त शब्दस्य संयोगपरत्वात् ह्रस्वमेव । कौत्से वकाराविति। अत्र मध्यमायां हिशब्दे प्रत्यये मुशब्दस्य दीर्घविधानम्। त्से रयिमिन्द्रासर्वोभियोरित्यत्र सर्वासु उद्गीथाद्युच्चं। कौत्सेवेसूष्वा चतुर्थमेकोना,इति। ऐडं कौत्से चेत्यनेन द्वितीयपर्वणि सत्रासाहीयवत् सर्व वर्णानां चतुर्थस्वरे प्राप्ते ऊहे सर्वत्र द्वितीयपर्वणि अन्त्याक्षरस्य मन्द्रस्वरविधानम्।।

---

2 10 4र र र 5
1.ग-यस्तेमाऽ23दोवरेणियोहाउ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2 0 0 2

6.सौमित्रम्-उच्चातेजातमन्धसाऽ3ए[1]।। मित्रे दिविद्युम्नास्य द्वे। अत्र प्रथमान्त्ययोः स्तोत्रीययोरुद्गीथादिः नीचैः। वोवित्सनइन्द्रायाँ सौमित्रे, इत्यत्र विश्ब्दात्परस्य तकारस्य लोपविधानम्। वोवित् सर्वत्रेति विच्छन्दस्य प्रकृतिप्राप्ते नामरुपेत्यादिनात्र प्रकृतिभावो न भवति। वोवाइ ओ इति प्राप्ते गतिश्चान्तस्थामापद्यते। अत्र सवर्णस्वर-योर्मध्यगताया अन्तस्था लोपो भवतीति फुल्लभाष्यकारोणोदितः। अन्तः वोवा ओइति प्राप्ते मन्यायस्साहीयेत्यादिना न्यशब्दस्सङ्कृष्टः।।

1 2 1 2

7.ऐटतम्- उच्च-एऊच्चा।। ऐटतेम्नानि प्र। एनैटत एकारे प्रत्यये इति। उच्चा इत्यत्र आकारस्य च उभयत्रात्वविधानम्। ऐटत सारथिनोरभिगीता इति । अत्र निहोता द्वितीयस्य संयोगेऽपि वृद्धिविधानम्। ओवौकारयोरित्यादिना सर्ववर्णानामाभावे उवर्णन्तु न सर्वत्राभवतीति रुशब्दयोरनाभावविधानम्।।

1 0 0 2

8.धुराँसाकमश्वम्- उच्चातेजाऽ3।। साकमश्व उच्चायां आद्यस्सर्वास्विति सर्वासु स्तोत्रीयासु आद्यस्तोभस्य अगतिः। इतरेषां गतिरेव। साकमश्वे च पूर्व इति योनौ प्रतिहारादिर्नीचैः। ऊहे सर्वत्र उच्चमित्यर्थः। वोवित्सर्वत्रेति विच्छन्दस्य प्र। नि अर्य इत्यत्र द्व्यन्तस्थ परत्वात् व्यवधानलोपः। स्तौभिकानि सामान्तिकानि सामान्ते सर्वत्रेति अत्र डा शब्दस्य अत्र चान्त प्राप्ते प्रतिस्तोत्रीयं बोधीय धुराँसाकमश्वयोरिति सर्वेषु साकमश्वेषु प्रतिस्तोत्रीयं निधनविधानम्।

2 10 0 20 1 2

9.विलम्बसौपर्णम्- उच्चातेजातमन्धसः[2]।। पर्णे चेति। आशुभार्गवान्मध्यमायां प्रस्तावाद्युच्चम्। पर्णेचेति सर्वत्र उद्गीथाद्यस्य नीच प्राप्ते असोम वरुणेति अत्र मध्यमायां अत्र उद्गीथादेर्नीचैर्न भवति। सत् पर्णे इति । सच्छब्दस्य तृतीयस्वरविधानम्। तृतीयेलम्बे

---

2 0 0 0   2   2 10 0 20 1 2

1. ग- उच्चातेजातमन्धसाऽ3ए।। 2. ग- उच्चातेजातमन्धसः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोममिन्द्राय शुक्रं दुदुह्रे इत्यत्र सर्वासु गतिः। नर्यस्साहीय पर्णेत्यादिनात्र नर्यस्सङ्क्रुष्टः। वोवित्सर्वत्रेति विच्छन्दस्य प्रकृतिभावे प्राप्ते नामरूपेत्यादिनात्र प्रकृतिभावो नभवति।।

1 20 0 1
10.गायत्रीसामौशनम्[1]- तिस्रोवाचाः ।। शने यन्ती प्र। अत्र प्रथमपर्वणि तृतीयस्याक्षरस्य नीचविधानम्। शनवार्शयोरित्यादिना सर्वासूद्गीथादिर्नीचैः। कनि तिस्रोवाचायां सैन्धुक्षितौशनयोरिति कनिक्रादित्यादिनादि शब्दस्य पदमध्यगतस्य तालव्यस्य हादौ स्तोभे परत आभावे प्राप्ते अभाव विधानम्।।

2 10 5
11.वैरुपम्- तिस्रोवाऽ234चाः।। रूपेधेन ब्रह्मीः प्र। वादिर्गीथादिर्धनादिश्चरूप इति । अत्र प्रस्तावोद्गीथ निधनेषु आद्याक्षरस्य नीचविधानम्।।

5 0 2 4 5 4 5
12.साध्रम्- सुतासोऽ3माधुमत्तमाः।। साध्रेदिवे पूर्व। लेये प्रस्तावसदृक् तुरीयमित्यादिनात्राद्ययो स्तोत्रीययोः प्रस्तावतुरीयस्य वृद्धिविधानम्। क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादाद्यस्य ऋक्स्वरवदुच्च नीचविधानम्। सञ्जयाभीशवेत्यादिना योनौ तृतीयपादे पर्वद्वयमस्ति। ऊहे सर्वत्र पर्वभेदो नास्तीत्यर्थः।।

3 2 2 4
13.श्यावाश्वम्- सुताऽ31-सोऽ3मा।। वाश्वे तीरवे पूर्व प्र। श्यावाश्वे चेत्यनेन तुरीयस्य दीर्घस्य वृद्धि प्राप्ते सहस्रधा इत्यत्र तुरीयस्य धाशब्दस्याप्यवृद्धिविधानम्। तमाः श्यावाश्वे इति। धुमन्तमा इत्यत्र माकारस्य अत्वविधानम्। अयावास्वासोमधा। इति श्यावाश्वे चेत्यनेन तुरीयस्य दीर्घस्य वृद्धिप्राप्ते सहस्रधा इत्यत्र तुरीयस्य धाशब्दस्याप्यवृद्धिविधानम्।।

---

1 0 20 1
1.ग- औशनम्।। तिस्रोवाचाः ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 201 20 0

14.अर्कपुष्यम्- तवाहँसोमरारण ।। पूर्वार्कपुष्परयिष्ठयोः- स्तौभिकं पर्वानुपादमिति। अत्र योनि दृष्टानां पञ्चानां स्तोभानां आद्यस्स्तोभः प्रतिपादं भवति। सामान्ते सर्वाणीति सामान्ते निधनात् पूर्वं सर्वाणि भवन्ति। आर्चिकमकृष्टं सर्वत्रेति । अयोनौ विद्यमाना-मार्चिकं कर्षणस्वरमान्न भवति। अभ्यस्तान्ताः पुष्पाद्यःसर्वत्र रयिष्ठयोः, अस्यार्थः। निधनोपायान्तास्तोत्रीया इति अनेन सर्वासु स्तोत्रीयासु उपायान्ते प्राप्ते पूर्वयोः स्तोत्रीययो अभ्यस्तान्ता इत्यर्थः। अतिसूर्यं पुष्पमरायकीर्त्येषु । अत्र सूर्यस्सङ्कृष्टः। गोष्ठप्रतोदेत्यादिनात्र सर्वासु पादादयेर्यथर्चविधानम्। भ्राजकीर्त्ययसस्सँसर्पेषु इति । एतेषुप्रस्तावान्तेष्वेवान्तस्थाक्षराणां यथर्चविधानम्। अत्र चतुर्षु भक्तिषु पादान्तभूतानामन्तस्थाक्षराणां ऋक्स्वरवदुच्चनीचविधानम्।।

1 201 20

15.बार्हदुक्थम्- तवाहँसोम।। मन्तवदुक्थे, इति। अत्र उत्तरयोः प्रस्तावादिर्नीचैः। षिबमन्तदुक्थयोर्वे इति। दुहानोबभ्रो इत्यत्र प्रस्तावे नो शब्दात् परस्य स्वरितभूतस्य उदात्ताच्च परमुच्चैर्भवतीति न्यायेन उच्चप्राप्तस्य पिब शब्दस्य पुनर्नीचविधानम्। दुक्थेऽभिगीत क्रमयोरिति अत्र सर्वत्राभिगीत प्रत्युत्क्रामयोः परस्याक्षरस्य वृद्धिविधानम्। आन् कारो वृद्ध इत्यादिनात्र कर्षण भवते व्रतः।।

2 0 0 0 1 2

16.माण्डवम्- तवाहँसोमराराणा[1]।। इव उतद्विषाः। अयोनौ। योनौ तृतीयपादादौ चदक्षसात्र उतद्विषामापद्यते। कर्षणेत्वित्यादिनात्र कर्षणवृद्धे न भवतः।।

2 0 2

17.ईनिधनमार्गीयवम्- परिप्रियादिवःकवाऽ3इर्ई।। मार्गीयवे महीप्र। क्रोशौपगवेत्यादिनात्र सर्वासूद्गीथाद्युच्चम्। योनावेव नीचम्। परिप्रियायां मार्गीयवे चेति। अरण्ये प्त्योशब्दः सङ्कृष्टः। परिप्रियायां

---

2 0 0 1 2

1.ग तवाहँसोमराराणा।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मार्गीयवेति। कविक्रतुरित्यत्र तु शब्दात्परस्य विसर्जनीयस्य औहोवायां प्रत्यये लोपविधानम्। शुचिः परिप्रियायां मार्गीयवेति। शुचिरित्यत्र चिशब्दात्परस्य विसर्जनीयस्य स्तौभिकस्वरे परतः लोपविधानम्। शुचाइवो इति स्तुते प्राप्ते गतिश्चान्तरस्थामापद्यते। इत्यनेन गतिरन्तस्था प्राप्ता शुचाये, इति स्थिते असवर्णयोर्मध्ये इति असवर्णयोस्स्वरयोर्मध्यगताया अन्तस्थाया लोपो भवतीति यकारस्य लोपः। शुचाए। एवं सर्वत्र योज्यम्। ओवौकारयोरित्यादि सर्ववर्णानामाभावे प्राप्ते उवर्णन्त्वित्यादिनात्र तुशब्दस्यानाभावः। कर्षणेत्वित्यादिना अत्र कर्षणवृद्धे न भवतः।।

2 0 0 0 2

18.ऐडं शुद्धाशुद्धीयम्[1]- पुरोजितीवोअन्धाऽ3साः। अत्र योवृद्धाद्दी सर्वत्रेति। अवृद्धादित्यादिनात्र व्यवधान प्राप्तस्य वृद्धात्पर इत्यादिना लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्।।

20

19.वैष्णवाद्यम्-सोमउष्वा।। अस्य साम्नः फुल्लसंग्रहे विशेषो नास्ति।।

10 2 0 1

20.वैष्णवोत्तरम्-सोमः-सोमाः।। एकस्याम् ।[2]अ........वैटतेत्या-दिनात्र उद्गीथाद्युच्चम्। योनावेव नीचम्। दावसुनिधनेत्यादिनात्र तृतीय पादाद्युच्चम्। योनावेवनीचम्।। इति पञ्चमः।। 5।।

==*****==

---

2 0 0 2

1. ग-शुद्धाशुद्धीयम्।। पुरोजितीवोअन्धाऽ3साः।
2. घ- अभ्यस्तो द्व्यक्षरआनूपैटतसौहविषवैष्णवोत्तरपयोन्तस्वराणाम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

।।षष्ठो विंशः।।

10 2 0 1
1.यौक्तस्रुचम्- सोमउष्वाणस्सो।। स्रुचेमन्दी । स्रुचे मन्द्रेति । अत्र मध्यमायां प्रस्तावादिः नीचैः। समीमस्तुचे । अत्र सर्वासु पञ्चमपर्वाद्युच्चम्।योनावेवनीचम्।।

2 0 0 2
2.अध्यर्धेडं सोमसाम- असाव्यँशुर्मदायाऽ3ए।। कौल्मलान्धी-त्यादिनात्र सर्वासूद्गीथाद्युच्चम्। योनावेव नीचम्। असाव्यँशुस्सर्वत्रेति अत्र व्यं शब्दस्सङ्कृष्टः। ओकारोन्तःपदिको ग्रहणादाभवतीति एकार हकारयोः प्रत्यययोः काववाम्रसोमसामास्विति। योनिमासददिति अत्र योशब्दस्य पदमध्यगतस्य एकारे परतः आभावविधानम्।।

1
3.त्रासदस्यवम्- पाऽ234।। क्रौञ्चाभिनिधनेत्यादिना अत्र वृण्यादि भूतस्य ह्रस्वस्यापि दीर्घविधानम्।।

2 1 2
4.वाङ्गिनधनं क्रौञ्चम्- पराइत्याँहाऽ31234।। क्रौञ्चेमदे प्र। कण्वबृहति चेति कण्वबृहति विशेषवचनात् अत्र पूर्वस्तोत्रीययो-र्निधनस्योद्धारः। वृण्यादि निधनेत्यादिनात्र वृण्यादि भूतस्य ह्रस्वस्यापि दीर्घविधानम्। विते चोवसू प्रधन्वाना वर्धनश्चेति योनौ पतिङ्गिरा द्व्यक्षरोच्चा । अत्र वर्धना इत्येतानि सूत्राणि त्रीण्यक्षरा-ण्युचम्। आजावितोत्तरयोरेन्द्रयाहिपूर्वयोः पर्युषु चोपान्त्योच्चा पतिङ्गिरा इति।।

5 30 2 4 0 5
5.गौरीवितम्-परि-ऊषूऽ3-प्रधन्वावा।। न्ववावितदेव्ययोरिति।। न्वशब्दस्य ह्रस्वस्य दीर्घविधानम्। विते चोपसूप्रधन्वानावर्धनश्चेति योनौ पतिङ्गिराद्व्यक्षरोच्चा। अत्र वर्धना इत्येतानि सूत्राणि त्रीण्यक्षराण्युच्चम्। अजागृवीत<u>योयो</u>तरयोरेन्द्रयाहि पूर्वयोः पर्यूषु च उपान्त्योच्चापतिङ्गिरा इति एतदपि पूर्वोक्तस्यानुकारस्सूत्रम्। तरध्याविते ।इत्यत्र ध्यशब्दः सङ्कृष्टः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5 4 · 2 304 5
6.ओकोनिधनम्- अजाऽ3इजनोहिपवमा ।। अत्र तृतीयपादाद्यक्षरस्य नीचविधानम्। कर्षणेत्वित्यादिना कर्षणवृद्धे न भवतः।।

20 10 2 1 2 1
7.कण्वरथन्तरम्-मार्ज्यमानस्सुहस्तिया।। स्तावाद्यं कण्वतरे इति। अत्र प्रस्तावाद्यस्य मृ शब्दस्य दीर्घविधानम्। मृज्यकण्वतरे, इत्यत्र मृशब्दस्यार्भावविधानम्। ण्वतरे तुरीयं नीचं सर्वत्रेति। अत्र प्रस्तावतुरीयस्य नीचविधानम्। अर्षसि कण्वतरे इति। अर्षसीत्यत्र सिशब्दस्य आभावविधानम्।।

2 1 02 1 0
8.अर्कपुष्पोत्तरम्- मृज्यमानस्सुहस्त्या[1]।। सुहस्त्या गोष्ठार्कपुष्पयोरिति। गृढ पर्वान्तत्वात् ? स्त्याशब्दस्य ऋक्स्वरवदुच्चप्राप्ते उच्चविधानम्। सुहस्त्यारन्ध्रोत्तर वरुणगोष्ठार्कपुष्पेष्विति अत्र स्त्याशब्दः सङ्कृष्टः। नवे च रन्ध्रोतरे, इति । अनेन रन्ध्रोत्तरे नी प्राप्तस्य नेशब्दस्योच्चविधानात् अत्र ने शब्दस्य ऋक्स्वरवन्नीचमेव। निधनोपायान्ताः स्तोत्रीयास्सर्वत्रेति अत्र पूर्वयोः स्तोत्रीययोः उपायान्ता भवति।।

1 20 1 2 10
9.गौषूक्तम्- वृषापवस्वधौ[2]।। गौषूक्ते यं आइत्यगतिः। षूक्तेशुभ्रमुच्चैनाया। अत्र तृतीयायां प्रस्तावादिर्नीचैः। आयेभावश्च नेदानीमिति अत्र उभयत्राये भावो न भवति। थेषूक्ते द्वे साव्यामिति। अत्र सर्वासु उद्गीथाद्युच्चम्। ण्योस्तन्वाधर्तायामित्यादिन्पण्यौ शब्दोऽत्र विकृष्टः।।

1 0 0 1
10.शाकलम्-वृषापवाऽ2स्वधारया ।।[3]

---

2 1 0 2 10 · 1 20 1 2 0
1.ग- मृज्यमानस्सुहस्त्या।। 2.ग- वृषापवस्वधौ।। 3.ग- न विद्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

20 0 0 0 0
11.उभयतस्तोभंगौतमम्- हाउपुनानस्सोमधारयाहाउ।। गौतमेऽन्त्यः । इत्यत्र सर्वासु अन्यस्तोभस्यागतिः। क्रौध्यष्टम्भेत्यादि नात्र सर्वासु तृतीयपादाद्यस्याक्षरस्य ऋक्स्वरवदुच्चनीच प्राप्ते अश्रुष्ट आरत्नधा नहीति आरत्नधा इत्यत्र आकारस्य ऋक्स्वरे उदात्तस्य नीचविधानम्। पेमगौतमे,इति। पर्वान्तगतस्य पर्वान्तनीचस्य नीचमेव। दिव्यं ज्यर्षसीत्यत्र विकृष्टः। नृभिः प्रत्नँ सधस्थेत्यादिनात्र नृशब्दस्यानार्भावः।।

5 3 2
12.द्विरभ्यासं त्वाष्ट्रीसाम- पुरः-जिताऽ3इ।। त्वाष्ट्रीसाम्नोश्च सर्वे। इत्यत्र सर्वस्तोभानामगति प्राप्ते न हरिं वत्सेत्यादिनात्र पुरः सखाय शब्दयोर्गतिरेव।।

2 10 20 0 1 2
13.आनिधनं त्वाष्ट्रीसाम- पुरोजितीवोअन्धसः ।। आनिधनेभिपूर्वं प्र। आनिधने तु प्रत्यये पूर्वयोश्चाभि गीते प्रत्यये इत्यगतिः। त्रेयानिधनयोरिति। दीर्घाक्षरस्याप्यभिगीतविधानम्। भीशब्दस्य दीर्घस्य पूर्वसूत्रेणाभिगीते प्राप्ते पुनः प्रत्युत्क्रामविधानम्। जिह्व्यं न कृत्व्यश्च ज्ञीयसोद्गीथे, इति विकृष्टौ यज्ञायसन्तु सर्वत्रेति तु शब्दात्परमवृद्धादित्यादिना व्यवधान लोपप्राप्तस्य वृद्धात्परौ इत्यादिना पुनरलोपविधानम्।।

2 0 1 2
14.मार्गीयवम्- उच्चौहोवा।। मार्गीयवेतेजा प्र। यवेमह्यामिति अत्र महित्रीणा द्वितीयस्य वृद्धिः। वरिवस्सनइन्द्रायां मार्गीयवे इति । वरिवो इत्यत्रावृद्धरि शब्दस्य हादौ स्तोभे परतः आभावविधानम्। विश्वानित्यत्र निशब्दात्परं व्यवधानप्राप्तस्य द्व्यन्तस्थ परेतु लोप इति वकारस्या लोपविधानम्। वरिवस् सनन्द्रायामिति। वरिव इत्यत्र रिशब्दस्य हादौ स्तोभे परतः दीर्घविधानम्। वोवित् सर्वत्रेति।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

15.द्विर्हिंकारवामदेव्यम्- पुनानाऽ23स्सोमधारया [1]।। दिव्यं ज्यर्षसीत्यत्र विकृष्टौ। आपृच्छ्यमवृद्धं सर्वत्रेति। च्छ्यं शब्दः सङ्कृष्टः। ऋगन्तीय स्पर्श इत्यादिनात्र मध्यमायां ऋगन्तभूतस्य स्पर्शस्य ओवौकारयोरित्यादिना लोपप्राप्तस्यालोपविधानम्।।

16.द्वैगतम्- पुनानाऽ3सोमधारया ।। द्वैगते सीदव प्र। द्वैगतेऽभिगीतादिति। अत्र अभिगीतात् परस्य वृद्धिः। प्रत्युत्क्रामात् परस्यावृद्धिरेव। दीर्घवृद्धोपहित इत्यादिनात्रर्षसीति सीशब्दादाङ्-भूतात्परं विरामेऽपि विरामात्पूर्वलुप्यतविरामादन्तरस्वरो एकीभाव-विधानम्। षारा इति गतिर्विरतेत्यस्य अयमर्थः। सन्धौ विषयेऽपि गतिश्च यकारश्चोभयमपि भवति। विरामविषयेऽपि यकार प्रतिषेधः। दर्शनाद्वैगते पुनानायो असो इति भक्त्यन्तः पदगीतस्सर्वत्रेति अनेन उत्सो शब्दस्य प्रतिहारान्तस्य पदगानप्राप्ते सन्धिगानविधानम्। प्रतिस्तोत्रीयमार्चिकानि निधनानीति आर्चिकनिधनत्वादत्र प्रति-स्तोत्रीयं भवति। दिव्यं ज्यर्षसीत्यादिनात्र विकृष्टौ। आपृच्छ्यमवृद्धँ सर्वत्रेति अत्र सङ्कृष्टः।।

17.अर्कपुष्पाद्यम्[2]- पुनानस्सोमधारया[3]।। पूर्वार्कपुष्परयिष्ठयोः स्तौभिकं पर्वानुपादमिति। सामान्ते सर्वाणीति। आर्चिकमकृष्टं सर्वत्रायोनौ इति। सूत्रचतुष्टयस्य पूर्वमेवोक्तम्। गोष्ठप्रतोदेत्यादिनात्र पादादिभूतस्य यथर्चमुच्चनीचम्। नीचात्परषष्ठेधेत्यादिनात्र अपो वसानो अर्षसीत्यत्र नीचात् परस्य पृश्निदैर्घश्रवसमद्रदेवस्थानादिषु ऋक्स्वरगीतिषु पर्वमुच्चनीचविधानात् अत्र ऋक्स्वरवन्नीचमेव। कीर्त्ययशस्सँसर्पपुष्पेष्विति अत्रोद्गीथोपद्रवप्रतिहारादिषु निगदवर्तिषु पर्वसु अन्तस्थ अक्षरस्य अयथर्चविधानात् अत्र निगदवर्तिषु पर्वसु

1.ख- पुनानाऽ23स्सोमधारया , 2.ग- अर्कपुष्पम्, 3.ख- पुनानस्सोम धार या ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्त्यगतानां अन्तस्थाक्षराणां यथा ऋक्स्वरमेव । दिव्यं ज्यर्षसीति यशसँ सर्पपुष्पेष्विति अत्र सङ्क्रुष्टः।।

18.मधुश्चुन्निधनम्- अयम्पूषारयिर्भगाऽ3ए।। मधुश्चुन्निधनेऽन्त्य वर्जम्। अत्र सर्वास्वन्त्यस्य स्तोभस्य गतिः। कर्षणेत्वित्यादिनात्र पादादि कर्षणवृद्धे न भवतः।।

19.अर्कपुष्पोत्तरम्- यओजिष्ठस्तमाभरा।। सर्वमार्चिकम-वृद्धम्।उत्तरे पुष्पे इति योनिवत् कर्षणवृद्धे न भवतः।एकस्याम्।।

20.आश्वसूक्तम्- आओहोवाहाइ।।इति षष्ठः।।6।।

।। सत्रं समाप्तम्।।

==******==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रायश्चित्तः प्रारभ्यते

।।प्रथमो विंशः।।

2 1 2 1 2 10
1.उद्धत्प्राजापत्यम्- प्रत्नंसधस्थमा ।। उद्धत्प्राजापत्ये सर्वे इत्यगति प्राप्ते न नृभिः, नृभिरित्यत्र गतिः।।

2 1 2 40 5
2.सफम्- उपशीऽ3क्षाप।। सफेशिक्षाहिषविदाः प्र। सफपौष्कल योर्वेहीष्यामिति। उपतस्थुष इत्यत्र तशब्दस्य ह्रस्वत्वादवृद्धिः।।

5 2 40 5 40 5
3.कालेयम्- इँन्द्रँवाऽ3इश्वाअवीवृधान्।। सत्पतिमिन्द्रं विश्वायां लेये, इति। सत्पतिमित्यत्रसशब्दात्परस्य ओवौकारयोरित्यादिना लोपप्राप्तस्य पदान्तस्यातिहारविधानम्। कनीयस्यादितोलोप इति लोपः। त्रिकार सन्वित्यादिनात्र तृशब्दस्य अनार्भावः।।

5 4 2 4 5 0 4 5
4.सौभरम्- तँवोऽ3दाऽ3स्मामृतीषहोवा ।। सौभराभीवर्तेत्यादिनात्र दीर्घतुरीयस्य वृद्धिप्राप्ते अतिमधुदस्ममितिग्रहणात् अत्राद्यायां प्रस्तावतुरीयस्य ह्रस्वस्य स्मशब्दस्यापि वृद्धिविधानम्। अन्धस स्तंवोदस्माद्यायां आथर्वणसौभरयोरिति। अन्धसो इत्यत्र सोशब्दात्परस्य पादादिभूतस्य एङः पदान्तादित्यादिना प्रश्लेषप्राप्तस्य पादान्तादित्यादिना विश्लेषप्राप्तस्य पुनः प्रश्लेषविधानम्।। तंवोदस्माद्यायां चेति। अत्राद्यायां पूर्वस्तोभे गतिमान् भवति। उत्तरस्त्वगत इत्यत्र सर्वासु स्तोभो गतिर्भवति। भरेस्थूरमेवासर्वः। योनौ प्ररे च। अत्र सर्वासु उद्गीथप्रतिहारयोराद्यस्याक्षरस्य उच्चम्।।

2 2
5. त्रैककुभम्- त्वमङ्गप्रशँसाऽ3इषाः।। ककुभे ब्रवीमिगीथे प्र। ककुभे चयोनाविति। अत्रोद्गीथाद्यस्य अक्षरस्यावृद्धिः। योनावेववृद्धिः।ककुभे त्वमं सर्व इति। अत्र सर्वासूद्गीथाद्यस्याक्षरस्य नीचविधानम्। कौत्सदँष्ट्रेत्यादिनात्र तृतीयपादाद्यस्यावृद्धिः। योनावेव वृद्धिः। उग्रंकदानत्वद् ग्रहणात्। अत्र प्रथमायां तृतीयपादाद्यस्या क्षरस्य नीचविधानम्। उत्तर-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीचविधानम्। उत्तरयोरुच्चम्। ऋतावसोस्माँ त्रैककुभे इति। मर्ङ्ता इत्यत्र ताशब्दात्परस्य वसोस्मानित्यत्र सोशब्दात्परस्य पादादि भूतस्य इवर्णस्यावर्णस्य च उभयोराद्गुणः। एङःपदान्तादित्येताभ्यां प्रश्लेष प्राप्तयोः पादान्त्यात्परस्वरो विकृष्यत इत्यनेन विश्लेषप्राप्तयोः प्रश्लेषविधानम्। त्वमङ्गककुभे इत्यत्र त्वंशब्दस्सङ्क्रुष्टः। त्सिबास्वरं सर्वमाभवति। यास्तोभे प्रत्यये वचश्च नादभन्नित्येवं जातीयानि। अत्राद्ययोः स्तोत्रीययोः यदा त्सिबायां प्रत्यये च शब्द भान् शब्दस्य च आभावविधानम्।।

6.सत्रासाहीयम्-वरा(3 2)ऽ34इ।। साहीये शताद्धितीयमित्यादिनात्र पूर्ववत् न भेदो भवति।।

7.अभिनिधनंकाण्वम् - औहोहोहाइ (20 1 2) - आइही (1 2) - ऊत्सा (1 2)।। क्रौञ्चाभिनिधनेत्यादिनात्र वृण्यादि भूतस्य दीर्घविधानम्।।

8.कालेयम्- एषा(50 2)ऽ3ब्राह्मा (4 5) ।। लेये द्विपदासु। अत्र सर्वासु प्रस्तावोपान्त्यस्य वृद्धिः। वैच्छन्दसेषुगीतं प्रास्ताविकमेवस्यादिति अत्र गीतमेव प्रस्तावः । विच्छन्दस्त्वात् कनीयस्यादितो लोपः। पर्वणां सङ्घातानां चेति अत्र सर्वासु द्वितीयषष्ठयोः पर्वणोर्लोपः। प्रस्तावात्परं त्रिषु पर्वसु पर्वादौ लोपः।।

9.आष्कारणिधनंकाण्वम्- तँवोदा(5 0 2)ऽ3स्ममृतीषहाम्(4 50 4 5)।। काण्वेरिन्न प्र।।

10.कालेयम्- वयमू(5 2)ऽ3त्वामपूर्विया(40 5 40 5)।। कनीयस्यादितोलोप इति उद्गीथे पर्वणामादौ लोपः। अत्र पर्वलोपो नास्ति। भरन्तस्सौभर-लेययोरिति। अत्रास्तोभे पदगानविधानम्।।

11.यज्ञायज्ञीयम्- उपा(4 3)ऽ5स्मै (0) ।। उपज्ञीये । ज्ञीयेदान्त्ये इति। प्रस्तावोपान्तस्य वृद्धिः। पर्वणां सङ्घातानां चेति अत्रोद्गीथ प्रथम

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयपर्वणोर्लोपः। सर्वत्रादितो लोपः। ओषधीभ्योज्ञीये, इति। अत्रोत्तमायां भ्योशब्दः सङ्कृष्टः। ते सर्वत्र विवृतमकार प्रत्ययमिति अत्र ते शब्दस्य प्रकृतिः।।

12.यज्ञायज्ञीयम्- द^{4}वा^{3}ऽ5इद्यु।। दविज्ञीये तीय हेतृ मीत प्र। ज्ञीयेदान्तमिति। प्रस्तावोपान्तस्य वृद्धिः। यकारः परिष्टोभन्तीत्यत्र तस्मिन् शब्दे दविज्ञीये, इति। परिष्टोभन्तीत्यत्र तिशब्दात्परस्य लोपविधानम्। त्रिकांस्त्वित्यादिनात्र तृशब्दस्यानार्भावः। ऋधक्सोम-दविज्ञीय इति। ऋधगित्यत्र ऋवर्णस्यानार्भावविधानम्। स्वस्तये दविज्ञीय इति। स्वस्तये इत्यत्र सुशब्दात्परस्य अवृद्धादिपदान्तादि त्यादिनात् व्यवधानप्राप्तस्य वृद्धात्परावित्यादिनात्र लोपप्राप्तस्य वकारस्य पुनर्लोपविधानम्। तीये तृतीयेत्यनेनापि यकारस्य लोपः। गणगीतीनामन्ते निधनमिति अन्ते निधनप्राप्तिः।।

13.यज्ञायज्ञीयम्- प^{4}वा^{3}ऽ5मा^{0}।। यज्ञीयेवारे नधे प्र। ज्ञीयेदान्त इति।पूर्ववत्।।

14.सफम्- स^{2}सु^{1}न्वे^{2}ऽ3य^{5}ः। सफेसुन्वेसुक्षि प्र। ऊने इत्यत्र प्रस्तावे हीषी स्वरे परतः पूर्वस्य ह्रस्वस्य वशब्दस्यापि वृद्धिविधानम्। ससु सफे मादा त्र्यक्षरां इन्धानं इति। सफे सर्वत्र पञ्चम पर्व.......[1]क्षरगानम्। अत्र त्र्यक्षरगानमित्यर्थः।।

15.पौष्कलम्- उ^{2}पा^{1}शी^{2}ऽ3क्षा^{40}प^{5} ।। ष्कले शिक्षाहिशरयिं प्र। उपशिपरि प्रधन्वसखाप्राणातृचयोरिति अत्रोद्गीथाद्धितीयस्य वृद्धि-विधानम्। ष्कले जा स्वर उप शिक्षायां प्राक् प्रहूयसाया इति। योनौ प्रहूयसायाः प्राक् अविद्यमान जास्वरमस्तीत्यर्थः। याइ इति। अवकया। भिस्सुशत्रवेधृष्णुसोम,इति। प्रहूयसाया इत्यादिना असंयोगे परतः

1. क-त्रुटितम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रहूयसा द्वितीयस्य वृद्धि प्राप्ते असंयोगापवादे पाठात् हि शत्रवे इत्यत्र शशब्दस्य प्रहूयसाया द्वितीयस्य संयोगे प्रत्ययेऽपि वृद्धिविधानम्। विदारयिमित्यत्र इशब्दस्योदात्तस्य आर्चिकं निधन-मित्यादिना वृधे स्वरे प्राप्ते रयिं प्रियमित्यादिना न्यायादपेत प्रकरणे ग्रहणात् अत्र यिशब्दस्य सम्प्रसारणमेव।। सर्वसन्निधनानामादि-मध्यान्तेषु ऋक्स्वरापवाददर्शनात् सर्वाणि निधनभूतानि, सर्वाणि ऋक्स्वरापवाद सूत्राणि विमृश्य ऋक्स्वरादयो गेयानि।।

5 2 40 5 40 5
16.कालेयम्- मत्सियाऽ3पायितेमहाः।। लेये नस्ते हिशू प्र। मत्स्यबृहतीति मत्स्यशब्दोऽत्र विकृष्टः। थादेश्च परमिति। सर्वासूद्गीथद्वितीयस्य वृद्धिः। कनीयस्यादितो लोपः सर्ववर्णानां सङ्घातानां चेति अत्राक्षरपर्वणो लोपः । लेयेयस्याच्छोत्तरयोः परिप्रत्नयोश्चेति। अत्र सर्वासु उद्गीथे पञ्चमपर्व चतुर्थारम्भः।।

1
17.ककुबुत्तरानौधसम्- ताऽ234म्।। प्रकृति भावः पूर्वमेवोक्तम् (धसेऽभिषुधेरिन्न) धसेवे कृष्टादित्यादिना विशेषविधानात् अन्यत्र प्रस्तावे द्वितीयपर्वणि योनिवत्स्वरा इति योनिवदुच्चमेव। न <u>भेदोस्ति।</u> विच्छन्दसि च पूर्वाच्छेति। उत्तरयोः स्तोत्रीययोः पूर्वदाइन्द्रत्वात् परस्याक्षरस्य वृद्धिर्नभवति। ककुभिचेति। अत्र उत्तरयोर्वाइश्पता अत्र तयामापद्यते। विषाइ, इति। नित्वानक्षायां वाइश्पता। अग्न आयाहीद्वितीये तयाइ। पर्वणां सङ्घातानां चेति अत्र पर्वणां लोपः।।

50 0 2 4 5 40 5
18.कालेयम्- आत्वाराऽ3थयथोतयाइ।। लेये स्यते प्र। कनीयस्यादित इत्यादिनात्राक्षर पर्वणो लोपः।।

2 1 2 5
19.पौष्कलम्- परिप्राऽ3धं। ष्कले इन्द्रा। अवकया। भिस्सु शत्रवे धृष्णुसोम, इति। कनीयस्याद्यलुप्तायां प्रहूयसायां द्वितीयस्त्वोमिति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अत्र मकारस्य संयोगे प्रत्यये वृद्धिविधानं द्विपदायामित्यत्र प्रस्तावे हीषी स्वरे परतः पूर्वं न्वशब्दस्य वृद्धिः।।

30 ꣳ 2 1
20. ऐडंकौत्सम्- स्वादीहिष्ठाऽ23 ।। स्वादि प्रथमायां चेत्यत्राद्यायां उभौस्तोभावगतौ। तँ सखायः परित्यँरक्षमिति। अत्र मध्यमायां उत्तरस्त्वगतिः। कौत्सदँष्ट्रेत्यादिनात्र सर्वासु प्रस्तावाद्यस्याक्षरस्यावृद्धिः। योनावेववृद्धिः। कौत्से हि शब्दोवृद्धः प्रकृतौ। योनौ हि शब्दस्य वृद्धिः। ऊहे सर्वत्र दीर्घे प्राप्ते संयोगे ह्रस्व इति। अत्राद्यायां संयोगाक्षरे परतः ह्रस्वमेव। कौत्से चेकारोकाराविति। हादौ स्तोभे परतः पदगान प्राप्ते सन्धिगानविधानम् ।। इति प्रथमः।।1।।

==*==

।। द्वितीयो विंशः।।

2 0 0
1.द्वितीयं क्रौञ्चम्- सखायोदाइ। अगतिस्तोभस्य स्वरे प्रत्यये सन्धाविति अत्रोत्तरस्तोभस्यागतिः।।

50 4 2 4 50 4 5
2.सौभरम्-एवाऽ3होऽ3असिवीरयोवा।। भरे ब्रह्मे प्र। अत्र पूर्वस्तोभस्यागतिः। उत्तरस्तोभो गतिमान् विशेष वचनाभावात्। एवा सर्व इति। अत्र सर्वासूद्गीथाद्यस्य नीचविधानम्। वाचिसर्वमोभवतीति ओभाव प्राप्ते अन्तस्थमिति वीरयु शब्दस्य ओभावो न भवति। सौभराभीवर्तेत्यादिना तृतीयायां प्रस्ताव तुरीयस्य दीर्घत्वाद्वृद्धिः। आद्ययोरदीर्घत्वात् अवृद्धिः। हिशब्द एवाहिसौभरामहीयवयोरिति अत्र हि शब्दस्य ओभाव विधानम्। तृकारस्तु न सर्वेष्वाभर्वतीति अत्र तृकारस्य अनाभर्वः। योनौ प्रेरेचेति। अत्र सर्वासु प्रतिहारस्योच्चम्। योनावेवनीचम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

3.नार्मेधम्- इन्द्रँविश्वाअवीवृधाऽ3नै।। नार्मेधे पतिं चतुर्थे स्वरे अभिं। इन्द्रं विश्वायां चेति। योनावन्त्यपादे रायां अवृद्धिरित्यर्थः। त्वामभिदँष्ट्रोत्तर इति। त्वां शब्दस्यात्र विकृष्टः। रथी नार्मेधे प्रायश्चित्तेष्विति ओवौकारयोरनन्तर इत्यादिनाभावे प्राप्ते नार्मेधे ह्राद्ययोरत्र सर्वासु न विकारः। जेतानार्मेधे, इति। जेतारमित्यत्र शब्दस्यात्वविधानम्।।

4.कालेयम्- इन्द्रायाऽ3हिधियेषिताः ।। लेयेण्वी । प्र। इन्द्रायाह्युत्तरयोर्वयमुत्वावत्। अत्रोत्तरयोः स्तोत्रीययोः प्रस्तावः वयमुत्वा तदिदर्थावदित्यर्थः। दान्ते यहोध्रिगोस्तावेमिन्दो इति। परिसङ्ख्यान रूपेण प्रकृतिभाव ग्रहणाच्चात्र भानुरित्यत्र नोशब्दस्य उस्थसंज्ञकस्याउभावः। कनीयस्यादितो लोप इति लोपः।।

5.कालेयम्- गायन्ताऽ3इत्वागायत्रिणाः[1]।। परेलेये यूथे ष्णिरे प्र। गायन्ताद्यायांमाष्कारणिधनवदिति लेय प्रस्तावसदृशेष्वविकार इत्यनेन योनिवत्प्रस्तावे प्राप्ते आष्कारणिधनवत् प्रस्तावस्वरविधानम्। आष्कारणिधनस्य प्रस्तावे पञ्चमस्य अक्षरस्य चतुर्थस्वरेवस्थानः । कालेयप्रस्तावस्य उपान्तस्याक्षरस्य मन्द्रस्वरो अनयोरेतावान्विशेषः। सान्वारुहोद्धँशीये । इति न्वाशब्दोऽत्र विकृष्टः । भूर्यवँशीय लेय वितेषु अत्र भूर्यशब्दस्सङ्कृष्टः। शतक्रतोरित्यत्र तोशब्दस्य पदान्तस्य दान्ते यहो ध्रिगोस्तावे। मिन्दो इति परिसंख्यानरूपेण प्रकृतिभावग्रहणादत्राउभावः।।

6.साकमश्वम्- आयःपूऽ3रन्नार्मिणीऽ6मा[2]।। कमश्वेर्मिणींमात्री प्र। वैच्छन्दसे साकमश्वेर्वानहोजितस्मैहृशं थीः स्यग्नेभिः कृष्टानीति। योनिवद्गीथे सप्तमनवमाक्षरयोः कर्षणे प्राप्ते अत्र विच्छसि साकमश्वे

1.ग- गायन्ताऽ3इत्वागायत्रिणाः ।। 2.ख-आयःपूऽ3रन्नार्मिणाऽ6तं।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूत्र गृहीतेषु द्वादशाक्षरे कर्षणविधानम्। आयःपुममग्ने मध्यमायान्तु मरामिति। अत्र मध्यमायां एभिर्वर्धामारामापद्यते। तवाहँसो प्रथमेमारा। उच्चनीचप्रकरणेश्चेति षिशब्दस्य नीचविधानम्। इदमपि सूत्रोक्तानुवादसूत्रम्। मर्तो योऽयं सहोतायां कमश्वे। इति भक्तिमध्यः पादमध्यश्चास्तोभे प्रत्यये सन्धिगानप्राप्ते पदगानविधानम्।।

5 Q 2 4 0 5 5
7.साकमश्वम्- अग्नेताऽ3मद्याश्वाऽ6न्ना ।। अग्नेतमद्येकमश्वे इति। दीर्घवृद्धोपहित इत्यादिना अधहा अग्ने इति प्राप्ते यकारस्य लोपविधानम्। अधाहा अग्ने इति । स्वर्णज्योतिरुत्तरे कमश्वे, इति। अत्र स्वशब्दः सङ्कृष्टः।।

20 0 Q 0 0 1 2
8.वारवन्तीयम्- एनावोआऔहोहाइ।। वन्तीय इन्द्रे सन्तु इत्यादिनात्र सयोजत इत्यगतिः। चरेवारे हत्यां सर्वत्रेत्यत्र चतुर्षु वारवन्तीयेषु प्रथमायां चरसङ्घातो भवति। त्रैशोके चराजासोऽ234 हाइ (2 0 1 ... 5), इति। तद्वदित्यर्थः। उत्तरयोर्योनिवत्। सर्वं वृद्धमाभवति औहोस्तोभेप्रत्यये इति औहोस्तोभेपरतः अवृद्धानां सर्ववर्णानामाभावे प्राप्ते नेन्द्रस्तेसो, इत्यादिना विश्वस्यदूषू इत्यत्र दू शब्दस्यानाभावः। तृतीयादिन्यामित्यादिना पदान्तस्याक्षरस्य सर्वत्राभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अत्र भुशब्दसुशब्दयोरनाभावः। स्वाहुतस्सदुद्रवायां वारदेव्ययोर्बृहति चेति अत्र तृतीयायां बृद्धभूतसुशब्दात् परमवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परावित्यादिना लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्। देवँराधो जनानास्मित्यत्र भक्त्यन्तः पदगीतस्सर्वत्रेति पदगाने प्राप्ते सन्धिगानविधानम्। शुर्मदायास्तुत्र्यक्षराया उपाद्यञ्च लोपो वारे। अस्य सूत्रस्य अयन्तात् यान्धो जना इति ? योनिवच्चतुरक्षराभावात् कनीयस्यादितो लोप इत्यनेन योनिवच्चतुरक्षरे प्राप्ते प्रतिहारान्तस्य यशब्दस्य लोपो न प्राप्त

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अतवद्रावादि स्नुतस्याभिगीताक्षरस्य लोपो भवतीत्यर्थः। स्वशब्द एना श्रुध्ये इति शब्दोऽत्र विकृष्टः।।

9.वारवन्तीयम्- प्रत्युवदाऔहोहाइ। (2 0 0 0 1 2) वारेशिस्त्रितवेत् प्र। वन्तीय इत्यत्र प्रसुधा इत्यगतिः। लान्दवन्तीय यौक्तेष्वौकारे इति। अत्राद्ययोरौकारे परतः ह्रस्वस्य दीर्घविधानम्। ज्योतींषि वृषन्नदर्शिवारे इति। अनुस्वारस्पर्शेत्यादिना दर्शीत्यत्र पदमध्यगतरस्य रेफस्यातिहार प्राप्ते लोपविधानम्। चरेवारे इत्यादिनात्र द्वितीयपादान्तस्य प्रथमायामोभावविधानम्। सर्वमवृद्धमित्यादिना सर्ववर्णानामाभावे प्राप्ते नेन्द्रस्तेसो इत्यादिना ज्योतिष्कृणो इत्यत्र णोशब्दस्यानाभावः। व्रन्नेति औहोवायां प्रत्यये आर्चिकवदित्यत्र द्विशब्दस्य अनाभावः।।

10.वारवन्तीयम्- इमाउवाऔहोहाइ।। (2 0 0 0 1 2) अर्वाग्रथमित्यगतिः। चरेवारे इत्यादिनात्र प्रथमायाद्वितीयान्त पादान्तस्य ओभावः। मह्वेवस इमाउवायामित्यादिनात्र ह्वेशब्दात्परस्य ऋचि प्रश्लेष्टस्याकारस्य विश्लेषविधानम्। पदान्तश्चाभवतीति चिमित्यत्र चिशब्दस्य पदमध्यगतस्य तालव्यस्य हादौ स्तोभे परत आभावविधानम्। सर्वमवृद्धमित्यादिनाभावे प्राप्ते नेन्द्रस्तेसो इत्यादिनात्र सूशब्दस्यानाभावः। सोम्यं मध्व इति अत्र सुशब्दस्य मकार प्रत्यये आउभावः। अत्र एकार प्रत्ययात् प्रकृतिरेव।।

11.वामदेव्यम्- आऽ5इना।। (3 0) स्तावोपान्त्यं देव्ये दा खी सो इति अत्र सर्वासूपान्त्यस्यावृद्धिः। विच्छन्दस्सु च देव्यो इति अत्र सर्वासु चतुर्थपर्वणि अन्त्यस्याक्षरं विना सर्वाण्यक्षराण्युच्चैर्भवन्ति। देव्येत्वनृंगन्तीय इत्यादिनाध्वरमित्यत्र वसूनामित्यत्र च मकारस्य ओवौकारयोरनन्तरस्य लोपविधानम्। देव्याकाराकार यकाराभ्यास एनातंवोऽग्निमिति। अत्र तृतीयायां जनानामित्यत्राकाराभ्यासः। अभ्यासाभावे,नोहाइ इति प्राप्तः ।अभ्यासे कृते ना मोहाइ, इति।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

12.वामदेव्यम्- प्रा॒ऽ5त्यु।। देव्येदर्शी । प्र। विच्छन्दस्सु देव्ये,इति। अत्रापि पूर्ववत् प्रक्रिया। स्तावोपान्त्यमित्यादिनात्रा-प्युपान्तस्यावृद्धिः।।

13.वामदेव्यम्- आऽ5इमाः।। परेदेव्ये चोदे प्र। विच्छन्दस्सु च देव्ये,इति। अत्र पूर्ववदुक्तार्थमेव। मह्वेवस इत्यादिनात्र प्रकृत्यान्तः पादमप्यपर इत्यत्र अनेन पाणिनोक्तसूत्रेण प्रश्लेषप्राप्तस्याकारस्य विश्लेष विधानम्। ओवौकारयोरित्यादिना सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति शचीवसू इत्यत्र सूशब्दस्यानाभावः। देव्येत्वनृगन्तीय इत्यादिना नियच्छतमित्यत्र मकारस्यानाभावः।।

14.श्रुध्यम्- एनावोआऽ2ग्निम्।। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादादिः यथर्चमुच्चनीचम्। ते सर्वत्र विवृत मकार प्रत्ययमिति तेशब्दस्य प्रकृतिः। श्रुधियान्तः श्रुध्ये, इति निधन नियमः। श्रुध्ये स्तावे तुरीयं ष्यते सर्वत्रेति सुशब्दात्परं अकारव्यवधानो भवति।।

15.श्रुध्यम्- प्रत्युवदाऽ2र्शि।। अदर्शिश्रुध्ये, इति। अवृद्धादि-पदान्तादित्यादिना व्यवधानप्राप्तस्य यकारस्य लोपविधानम्। क्रौध्यष्टम्भेत्यादिनात्र सर्वासु तृतीयपादादिः यथर्चम्।।

16.श्रुध्यम्- इमाउवाऽ2न्दि।। क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादादिः यथर्चमुच्चनीचम्। अह्वे अवसे इति पदपाठ एवं स्थिते प्रकृत्यान्तपादमव्यपर इत्यनेन पाणिनिसूत्रेण ऋचिप्रश्लिष्टप्राप्तस्य ऋचि प्रश्लिष्टा स्वरसन्धयः पादमध्ये ये साम्नि विवृत्तास्तान् वक्ष्यामः। मह्वेवस्विमाउवायां वारदेव्यरथबृहत्सु। इति एतेषु सामसु विश्लेष उक्तः। श्रुध्ये तु प्रश्लिष्ट इत्यत्र ह्वे शब्दात्परस्य वकारस्य प्रश्लेषः।

17.वारवन्तीयम्- अग्नेविवाऔहोहाइ।। लान्दवन्तीय यौक्तेष्वौकारे प्रत्यये। इति ओकारे प्रत्यये ह्रस्वस्य दीर्घविधानम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वमवृद्धमित्यादिनात्राभावे प्राप्ते नेन्द्रस्तेसो इत्यादिनात्र रङ्गस्यानाभावः। चरेवारे हत्यां सर्वत्रेति ।अत्राद्यायां द्वितीयपादान्तस्य ओभावविधानम्। अनातृतीयकृष्टं प्रत्युत्क्रान्तमा चतुर्थकृष्टन्तु पादान्ते सर्वत्र श्रुधीहवायां च वारवन्तीये सर्वास्विति। इदमपि पूर्वोक्तार्थस्यानुवादसूत्रम्। नार्थान्तरम्। वन्तीय इन्द्रे सन्त्वित्यादिनात्र सजूरश्वभ्यामित्यत्रागतिः। तृतीयादिन्यामित्यादिनात्र सर्वपादान्ताना-माभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति वहात्वमित्यत्र तुशब्दस्य उषर्बुध इत्यत्र सुशब्दस्य चानाभावः। तृतीयादिन्यामित्यादिना पदान्तानामाभावे प्राप्ते व्यञ्जेति पदमध्यगतस्य सुवीर्यमित्यत्र रिशब्दस्य तालव्यस्याप्याभावः। मकारे हकारे इति। विशेषेण ग्रहणात् अत्र बृहतीत्यत्र बृशब्दस्यमार्भावः।।

18.वामदेव्यम्- आ^3^ऽ5ग्ने^0^।। स्तावोपान्तमित्यादिनात्र स्तावोपान्त्यस्य वृद्धिः। विच्छन्दस्सुचदेव्य इति। अत्र सर्वासु चतुर्थपर्वणि अन्त्याक्षरेषु प्रथमस्वरे भवन्तीति। उषर्बुधोऽग्ने विवस्वदेव्ये इति, उष इत्यत्र ष शब्दात्परस्य पादान्तस्य ओवौकारयोरेकीभावे लोप इति लोपप्राप्तस्य विसर्जनीयस्यातिहारः। अत्र वहात्वमिति मकारस्य वीर्यमिति मकारस्य च ओवौकारयोरनन्तर इत्यादिना लोपे प्राप्ते देव्येत्वनृगन्तीय इत्यादिना अलोपविधानम्। आन् कार इति देवां इत्यत्रानुनासिकमेव।।

19.श्रुध्यम्- अ^1^ग्ने^0^विवाऽ2स्वत्।। श्रुध्ये श्विभ्यां प्र। वहात्वं श्रुध्ये इति। अत्र त्वं शब्दस्सङ्कृष्टः। क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादादिः यथर्चम्। वहानोग्ने विवस्वद्वितीयायां श्रुध्ये इति व्यवधानोग्ने रथीत्यत्र नोशब्दात्परस्य पादादिभूतस्य एङः पदान्तादित्यनेन प्रश्लेषप्राप्तस्य पदान्तादित्यादिना विश्लेषप्राप्ते पुनः प्रश्लेष-विधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

20.महावैश्वामित्रम्- हयाइ-हयाऽ3-ओहाओहा-यज्ञायज्ञा।। स्तोभश्चसामाद्यस्सामान्ते यथान्यायमिति। अत्र सामाद्ये सामान्ते च स्तोभनियमः, न साम मध्ये इत्यर्थः। गिरागिरा प्रप्र नशँसिषं तस्थुषश्चेति अनुब्राह्मणं स्वाध्याये इति। ऊहे सर्वत्रानुब्राह्मणं इराप्रप्रीमिति भवति। यज्ञामहामित्रे चतुरक्षरायां विधायां वाजीवाजा पूर्वपिबासोमामिति। द्वितीयारम्भविधानम्। महावृद्धं विश्वामित्रे, इति। त्रातातनूनामित्यत्र विकल्पपक्षे तुरीयस्य ताशब्दस्य वृद्धि-विधानम्। जाराग्निन्दूतोपक्रमाणां ते एवा विभाग्यानाम्। विशेष-वचनात् अत्र योनौ ऊहे च प्रतिपादं प्रथमपर्व मन्द्रस्वर एव न द्वितीयः। यथैतच्चतुर्थेत्यादिना सामान्यसूत्रेण उदूहप्राप्ते नचेत्समान-पुरुषेत्यादिना ऊदूहो न भवति। प्रकृतौ विकृतौ मन्द्रस्वर एव। ष्वितादाशेमहायां ज्ञीयविशीय वारमहामित्रतरेषु इत्यत्र ष्वशब्दस्सङ्कृष्टः।। इति द्वितीयः।।2।।

*

।।तृतीयो विंशः।।

1.दैर्घश्रवसम्- यज्ञायज्ञावीअग्नयओहाओहाऽ3ए।। यज्ञा सर्वे,इति। अत्र सर्वासूद्गीथादिर्नीचैः। दैर्घे व्रात्याग्निष्टुतोद्गीथ इत्यादिना कर्षणविधानात् अत्र योनिवत् कर्षणं न भवति। ऋक्स्वरवदुच्चनीचमेव। पाजेथे भे दैर्घे, इति। अत्र उत्तरयोः स्तोत्रीययोः पूर्वस्तोभेपरत पाजे शब्दयोः वृद्धिविधानम्। परे सर्वत्रेति परे स्तोभे परतः यूथे इत्येतयोरवृद्धिः। ज्ञीये पप्रीं सर्वत्रेति प्रकृतिः।।

2.सँहितम्- अचिक्रदद्वृ।। सँहितेरियेयाभिः कृत्नुमीप्र। दक्षसंहितयोरित्यादिनात्र सर्वासु प्रस्तावाद्युच्चम्। गिरस्त इन्दायाञ्च संहिते इति मर्मृज्यन्त इत्यत्र मृशब्दस्यानाभावः। मन्त्वामदायां च संहिते, इति। ककृ इत्यत्र कृशब्दस्यानाभावः। शस्तये तन्त्वामदाया

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मिति प्रशस्तयेमह इत्यत्र येशब्दस्य पदान्तस्य च हादौ स्तोभे परत आभावविधानम्।।

3 4 0 30 4 50
3.वषट्कारणिधनम् - पवस्ववाजसातये ।। षडन्ते तृचयोर्द्वे। पुना चेति अत्र प्रस्तावाद्युच्चम्।।

4 3
4.यज्ञायज्ञीयम्- पुरोऽ5जि।। ज्ञीयेत्नवे प्र। ज्ञीयेस्यतेत्यादिना तेशब्दस्य पदान्तस्य च हादौस्तोभे परतः आभावविधानम्। तृचेष्वक्षरसंयोगेन प्रथमायां उत्तममक्षरम्मध्यमायाश्च प्रथमम्। एवमेवापरे द्वितीयोत्तमयोरिति तृचेषु गानविधानादक्षरसङ्गः।।

4 3 40 3 4 50
5.वषट्कारणिधनम्- विधुन्दद्राणंसमने ।। षडन्ते तृचयोर्द्वे, इति। अत्राद्ययोः प्रस्तावाद्यस्य नीचविधानम्। प्सुषडन्ते च रक्षाष्कारणिधनवत्, इति। योनौ द्वितीयं पर्व रक्षं स रवत् ष्टुप्सु वषट्कारणिधने रक्षाष्कारणिधनवद्भवति। अग्ने रक्षायाश्चतुर्थाक्षरस्य चतुर्थस्वरेऽवस्थानम्। आष्कारणिधन प्रस्तावे पञ्चमस्य च। एतावान्विशेषः। उपान्त्ये भिरायवा प्रतिस्तोत्रीयमिति। अस्यार्थः। योनावुत्तरेषु त्रिषु पादेषु अन्ते चतुरभ्यासोऽस्ति। अत्र सर्वासूत्तरेषु पादेषु मध्यमपाद एव योनिवदभ्यास इत्यर्थः। अन्यत्र सुताद्यलुप्ताविति, अस्यार्थः। द्वितीयचतुर्थयोः पादयोः आद्यलुप्तासुता भवति। अन्त्याक्षरस्याभ्यास एवेत्यर्थः। पञ्चाक्षराभ्यासस्तृतीये इति। अत्र सर्वासु तृतीयपादे योनिवच्चतुरक्षराभ्यासे प्राप्ते पञ्चाक्षराभ्यासविधानम्। वृष्ण्या वषट्कारणिधने। अत्रैव काम्यं नाभ्यासे स्पष्टानि। दद्राणतृतीयायां चेति। अस्यार्थः। ऋक्स्वरवत्सामिक इति न्यायात् ऋक्स्वरवदुदात्तेप्राप्ते अभिवर्ते पञ्चमपर्ववत् इत्यर्थः। रक्षाशतासूष्वे अस्यार्थः। अत्र तृतीयायां द्वितीयपर्वणि किञ्चिद्विशेषोऽस्ति। अत्र सर्वासु आक्षार आद्यस्याक्षरस्य तृतीयस्वरे आरम्भः। उपान्तस्य वृद्धिः। एतावान्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विशेष इत्यर्थः। पतिःकवीषूपान्त्यस्याक्षरस्याभ्यासः सर्वास्विति। अत्र सर्वासु स्तोत्रीयासु उत्तरेषु पादेषु अभ्यासाक्षरस्याभ्यास इत्यर्थः। अत्र तृतीये दे इति। अत्र सर्वासु तृतीये अन्त्याक्षरस्याभ्यासो न भवति। पञ्चाक्षराभ्यास इत्यर्थः। वृद्धकृष्टयोर्मध्येऽभिगीतं लुप्यत इति, अस्यार्थः। योनावुत्तरेषु पादेषु प्रथम पर्वणि षष्ठस्य अक्षरस्य वृद्धिः। सप्तमस्याभिगीतिः। अष्टमस्य कर्षणम्। अत्र स्तोत्रीयासु उत्तरेषु त्रिषु पादेषु वृद्धकृष्टयोर्मध्यगतस्याभिगीताक्षरस्य लोपविधानम्।।

6.गौरीवितम्- बंण्म - हाँऔऽ3 ।। बण्महाँ असीत्यत्र सूर्यशब्दस्सर्वत्रेति। अत्र सूर्यशब्दस्सङ्कृष्टस्त्वेव प्राप्ते वित नैपयोस्त्वाद्योविकृष्टः इति। अत्राद्ययोर्विकृष्टः।।

7.गौरीवितम्- किंमित्-तँवाऽ3इ।।

8.श्रायन्तीयम्- पंवस्ववाँजसाऽ1तायाँइ।। श्रायन्तीये देवे प्र। श्रारेभद्रा देवे पुरु दाना इत्यत्र देशब्दस्य प्रतिहाराद्यस्य नीचविधानम्।।

8.आन्धीगवम्- पाँऽ1वास्वाँ।। द्विपदास्वाद्यमिति। अत्र प्रस्तावाद्यस्य प्रत्युत्क्रामविधानम् । आइन्द्रा सोमाभिधा अत्र सोमाभिधौ शब्दौ आइन्द्रादि भवतः। आदिशब्दाः प्रकारवचनाः। आइन्द्रावदित्यर्थः।।

9.द्यौतानम्- हाऽ3-औऽ3हाऽ3-(2)- हाइ-उंत्सोदेंवाऽ2 आज्य दोहद्यौतानयोः जुहूसङ्घातमिति अत्र जुहूसङ्घातविधानम्। जुंहूंमसाऽ2 द्यविंद्याऽ234वाँ इति द्वितीयात्कृष्टं तालव्यं हाइशब्दश्चाभवति ओस्तोभे प्रथमस्वरादौ ओकारेप्रत्यये पूर्वयोर्द्वितीयात् कृष्टयोः हाइ शब्द...शब्दयोराभावः। उत्तरयोर्हाइशब्दयोरनाभावः। एकर्चेचोत्तरयो इति। अत्रोत्तरयोः पादयोर्महित्रीणाद्वितीयस्य वृद्धिविधानम्।।

।।प्रायश्चित्तं समाप्तम्।।

* *

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षुद्रं प्रारम्भम्

।।प्रथमो विंशः।।

20 10 20 10 2 1
1.कण्वरथन्तरम्- आभित्वाशूरनोनुमः।। शानामिन्द्रास्तावाद्यं कण्वतरे इति। अत्र प्रस्तावाद्यस्य दीर्घविधानम्। ण्वतरेतुरीयं नीचं सर्वत्रेति। अत्र प्रस्तावतुरीयस्य नीचप्राप्ते चमं न जातोदब्धस्सु देवोवः इति । अत्र तृतीयायां प्रस्तावपञ्चमस्यैवनीचः न चतुर्थस्य। आउवाव्यवहितेत्यादिना सर्व वर्णानामाभावे प्राप्ते ओष्ठ्यश्चेत्यादिनात्र सुस्थुष इत्यत्र सु शब्दस्यानाभावः। ईशानं कण्वतरे स्तावे ,इति। अवृद्धमप्याइ भवतीति प्रस्तावे अवृद्धस्य ईकारस्याइभावविधानम्। अश्वायन्तो ककुबुत्तरायां कण्वतर इति। तंशब्दस्यानाभावः। अस्तोभे सन्धिगाने प्राप्ते यन्न इति पदगानविधानम्।।

1
2.नौधसम्- आऽ234इ।। धसेवे कृष्टादित्यादिनात्र सप्तसु स्तोत्रीयासु विशेषविधानात् दुरश्वोनकृत्व्य इति कृष्टात्परस्य पर्वणः योनिवत्स्वरा इति अनेन योनिवदुच्चनीचमेव । विच्छन्दसि पूर्वाच्चेति अस्येमामिपर्वणः परस्तात् द्विशतस्तस्य अवृद्धिविधानम्। अनुष्टुप्सु वाइश्पतातयामिति। अस्यार्थः। यौनौ वात्सन्न-स्वसराइ इति पर्वत्रयमस्ति। अत्र तत्स्थानगतस्य वर्णद्वयस्य एकपर्वविधानम्।।
1 2 1 2 1

3 4 3 4 0 5
3.श्यैतम्- इन्दुरश्वोनकृ ।। श्यैतेद्धे इत्यादिनात्र प्रस्तावाद्यस्य तृतीयारम्भः। ऊनत्वात् सोशब्दस्य उदात्तस्य गिरेरिवप्रेति अत्र प्रशब्दवन्नीचस्वरमेव ऋक्स्वरः। ग्रहणानि श्यैते योनौ प्ररे, इति । योनावेव प्रतिहारादिर्नीचैः।अत्र न।।

3 0 2 0 1
4.ऐडंकौत्सम्- सनाहीन्द्राऽ23।। नश्चेति न शब्दस्य हादौस्तोभे परतः दीर्घविधानम्। ऊहे दीर्घस्सर्वत्रेति ऊहे शब्दस्सर्वत्र दीर्घः। इन्द्राइतीकारे परतः अत्र दीर्घः। इकारस्य प्रश्लेषविधानात् हि, ऐडं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कौत्से चेति द्वितीयपर्वणि सर्ववर्णानां चतुर्थस्वरे प्राप्ते कौत्से वे सूष्वा चतुर्थमेकोना इति अन्त्याक्षरस्य पुनर्नीचविधानम्। त्से रयिमिन्द्रेत्यादिनात्र उद्गीथाद्युच्चम्। कौत्सेऽभिनवतृतीयायामित्यादिनात्र स्तोभद्वयस्य गतिः। वरिवस्सनइन्द्रायां कौत्से इति वरीत्यत्र रिशब्दस्यान्तःपदिकस्य तालव्यस्य वृद्धमन्तः पद इत्यादिनाभावे प्राप्ते आभावविधानम्। वोवित्सर्वत्रेति प्र।।

5.नौधसम्- ऊ(1)ऽ234त्।। अत्रापिकृष्टात् परस्य पर्वणोर्योनिवदुच्चनीचमेव।।

6.अभ्यस्तमाकूपारम्- पुरो(4 3o)जिती(4o)वो(o)अन्धसः(5)।। पुरोयज्ञ इत्येतौ नीचारम्भौ क्रौञ्चयोः परित्याकूपारे चागतास्तोभाः। पुरोजितीत्यस्मिन् शब्दे गतिर्भवति। स्पष्टः। विश्वाच्याश्विनोर्व्रत परित्याकूपारपुष्पमरायेष्विति। अत्र च्याशब्दस्सङ्कृष्टः। नाभ्यास इति। अभ्यासे विकृष्टः। त्वद्रयश्चैतेषु त्वशब्दश्चात्र सङ्कृष्टः। जिह्म्यवन्न कृत्व्यश्चज्ञीयस्योद्गीथे। अत्र विकृष्टौ।।

7.श्यैतम्- पुरो(4 3o)जि(4 o)ती(5o)वोअ ।। श्यैते द्वे योनावित्यादिनात्र तृतीयपादाद्यवादिर्नीचैः। क्रौध्यष्टम्भेत्यादिना यथर्च स्वरप्राप्तस्य पुनरुच्चविधानादत्र नीचमेवेति निर्णयः।।

8.श्यैतम्- उ(3)त्सो(4o)दे(o 3o)वो(4)हि(5)र।। श्यैते द्वे इत्यादिनात्र प्रस्तावाद्युच्चम्। क्रौध्यष्टम्भेत्यादिना तृतीयपादाद्यथर्चम्।।

9.नौधसम्- पू(1)ऽ234। रो(o)जिती(5o)वो(o)अ।। धसेत्नवे प्र। धसेवेकृष्टात् भिस्तोमुद्र इत्यादिना कृष्टात्परं रोजिवर्णद्वयस्य चतुर्थस्वरविधानम्। अनुष्टुप्सुवाइश्पतातयामिति अत्र पूर्ववत्। आइन्द्रान्तात् परं वाइश्पताततयामापद्यते। श्वानामिति नौधस आइन्द्रान्तादित्यनेन श्वशब्दस्य वृद्धिप्राप्ते विच्छन्दसि पूर्वाचेति श्वाशब्दस्यावृद्धिविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

10.नौधसश्यैतम्- ता[1]ऽ234म् ।। क्रौध्यष्टम्भेत्यादिना तृतीयपादादिर्यथर्चम्। धसे, कृष्टादित्यनेनात्र तृतीयायां योनिवदित्यनेन श्यैते हिम्माज्ञीयवदिति। कर्षणे वृद्धे निवृत्तिः।।

11.श्यैतनौधसम्- अ[4]भि[3]प्र[4]व[5]स्सु[0]रा।। श्यैतधसेरितृ स्रेणेनीकेरेः प्र। श्यैते द्वे योनावित्यादिना आद्ययो नीचारम्भः।। प्रहूयसायामित्यादिनात्र संयोगे प्रत्यये प्रहूयसाया द्वितीयस्य सर्वत्र वृद्धि प्राप्ते अवकयाभिस्सु शत्रवे धृष्णुसोम, अपवादे सहपाठात् धृष्णो इत्यत्र धाशब्दस्य संयोगे प्रत्ययेऽपि वृद्धिविधानम्। श्यैतनौधस तृतीयायां चेति अस्यार्थः। योनौ तृतीयपादे तृतीयं पर्वमागायतात्र तृतीयायां अन्धा भवति। प्रहूयसायाः प्राक् तौ योनौ विद्यमान जास्वरोत्पत्तिश्चात्रास्तीत्यर्थः।।

12.वारवन्तीयम्- आ[2]भित्वा[0]शा[0]औ[0]हो[1]हा[2]इ।। चरेवारेहत्यामित्यादिनात्र प्रथमायां द्वितीयपादान्तस्य ओभावविधानम्। वन्तीयइन्द्रेसन्त्वित्यादिनात्राश्वायन्त इत्यगतिः। सर्वमवृद्धमित्यादिना सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वात्राभवतीति। सुस्थुष इत्यत्र सुशब्दस्य नाभावः। व्यञ्जेति,पार्थिव इत्यत्र थिशब्दस्य वाजिन इत्यत्र जिशब्दस्य च पदमध्यगतस्य आभावः। लान्दवन्तीय यौक्तेष्वित्यादिनात्र औकारे परतः ह्रस्वस्य दीर्घविधानम्। नासाद्दधीन्, मुद्रन्तद्रस्वब्दी चर्कृत्या निष्यतेणि मृढ्वं इति वारानिहोतयाश्चेति अनेन संयोगे प्रत्यये सर्वत्र वृद्धिप्राप्ते तदपवादे सहपाठे जनिष्यत इत्यत्र निशब्दस्य संयोगे प्रत्ययेऽपि वृद्धिविधानम्।।

13.वारवन्तीयम्-तु[20]वामि[0]द्धा[0]औ[1]हो[2]हाइ।। त्वां वृष्विन्द्रगामश्वमित्येते शब्दास्त्रयो वारे, ति सङ्क्रुष्टः।। चरे वारे हत्यां सर्वत्रेति प्रथमायामोभावः। अवृद्धादि पदान्तादित्यादिना व्यवधाने द्व्यन्तस्थ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परेतु लोप इति स्वर्विद इत्यत्र सुशब्दात्परं व्यवधानप्राप्तस्य वकारस्य लोपः। महस्तवानो इत्यत्र नोशब्दस्य दीर्घस्य प्रत्युत्क्रामप्राप्ते हितपौष्कलेत्यादिना अभिगीतविधानम्। तृतीयादिन्यामित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति ष्णु भ्यु इत्येतयोरनाभावः। व्यञ्जेति किशब्दस्याप्याभावः।।

14.वाङ्निधनं क्रौञ्चम्- तँवोदास्माऽ31234म्।। क्रौञ्चेऽभि प्र। बृहत्यां वाङ्निधने तृतीयेपादे तृतीयोच्चवतंवदिति। दसासक्रौञ्चेस्त्रभान हिवामिति। सूत्रद्वयस्यायमर्थः। योनौ तृतीयपादे स्त्रभास्थाने अत्र तंवो अभि प्रवयोर्नहिवामापद्यत इत्यर्थः। नहिवश्चरमिति। प्रतिस्तोत्रीयं बोधीय धुरांकमश्वोः कण्वबृहति च इति विशेषविधानात्। अत्र प्रतिस्तोत्रीयं निधनं भवति। गणगीतीनामिति अत्र गणान्ते निधनं भवति।।

15.वाङ्निधनं क्रौञ्चम्- अँभाइप्रावाऽ31234 ।। परेक्रौञ्चे जरिहस्त्रेतानिगिरेः। प्र। तृकारस्तु न सर्वेषु स्पर्शेष्वार्भवतीति तृशब्दस्यानार्भावः।।

16.कण्वरथन्तरम्- आभित्वापूर्वपीतयाइ।। ण्वतरेभिरस्येत्, प्र। प्रस्तावाद्यं कण्वतरे इति। अत्र प्रस्तावाद्यस्य ह्रस्वस्य दीर्घविधानम्। ओष्ठ्यश्चान्तःपदिको नाउ भवति सर्वत्रेति पूर्वं पूर्वथा इत्यत्र च पू शब्दस्यानाभावः। अस्येदिन्द्रश्चाभित्वापूर्वायामिति। अत्र द्वितीयादृ-शब्दस्य सन्धिगाने प्राप्ते पदगानविधानम्। पूर्वथा कण्वरथन्तर इत्यत्र थाशब्दस्य आकारस्यात्वविधानम्।।

17.कण्वबृहत्- औहोतुवामिद्धाऽ3एँ।। कण्वबृहत्याद्यान्तावगतौ इत्यत्र कण्वबृहति च प्रतिस्तोत्रीयं पञ्चस्तोभास्सन्ति। तेषामाद्यन्तौ स्तोभावगतावित्यर्थः। पूर्वकल्पश्चोदिन्द्रत्यन्तत्वात् अत्र इकाराभ्या-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सस्य विकल्पः। नगतागतस्येति, अस्यार्थः। उदिन्द्रा अश्वमिष्टय इत्यत्रान्त्य पादत्वात् पूर्वपक्षे विकल्पपक्षेऽपि उभयत्राप्यगतिः। इकाराभ्यासस्य विकल्पः। न गतागतस्येत्यर्थः। मध्यमश्वागतस्सत्वन्न उद्वावृषस्वेत्यादिना पञ्चमस्तोभानां मध्यमस्तोभस्यागतिः। अत्र सत्वन्न इत्यगतिः। अत्र त्वांवृत्रेष्विन्द्रगामश्वमित्यत्र विकृष्टः। कण्वबृहत्युपोत्तमं चावृद्धाद्यपादाद्यमिति। अस्यार्थः। अत्रोद्गीथे सर्वत्राद्यस्योपान्त्यस्य च मध्ये अवृद्धादित्वं पादादित्वं च यस्य पर्वणोऽस्ति तस्य पर्वाद्यस्याक्षरस्य नीचविधानम्। अवृद्धादि पदान्तादित्यादिनात्र स्वर्वत इत्यत्र सुशब्दात्परं वकारस्य व्यवधाने प्राप्ते द्व्यन्तस्थ परे तु लोप इति वकारस्य लोपः। स्य आ इति। न रथ्यं महस्तवानायां कण्वबृहतीति। यकारे च प्रत्यये इत्यादिना न रथ्यमित्यत्र थिशब्दस्याभावे प्राप्ते आइभावविधानम्। कण्वबृहति चेति सामान्तिकानि सामान्ते सर्वत्रेति सामान्ते प्राप्ते प्रतिस्तोत्रीयं निधनविधानम्।।

18.कण्वबृहत्- औ२होर्तुवँहियाऽ३ए२।। कण्वबृहत्याद्यान्त्ववगतौ पूर्वमुक्तम्। मध्यमश्वागत इत्यादिनात्र उद्ववृषस्वागतिः। कण्वबृहत्युद आ इतिगतिरिति। विकल्प पक्षे आ इति। इकाराभ्यासः। त्वँह्येहिजम्भे। त्वं पुरु कौल्मजम्भयोरिति। अत्र विकृष्टः। उदिन्द्र त्वँह्येहीत्यत्र कण्वबृहति पूर्वकल्पे स्तावे चेति उदिन्द्रा अश्वमिष्टय इत्यत्राकस्सवर्णे दीर्घ इत्यनेन प्रश्लेषप्राप्तस्याकारस्य विश्लेषविधानम्। पूर्वकल्पस्तावयोर्गायन्तायूथादानायां कण्वबृहति जम्भे चेति। गायन्तो वसे। इत्यत्र एङः पदान्तादित्यनेन पूर्वरूपप्राप्ते प्रकृत्यान्तःपदमित्यनेन पादमध्यत्वात् प्रकृतिभावः प्राप्तः। अव्यपर इत्यनेन वकारत्वादेवं प्रश्लेषप्राप्तस्याकारस्य पुनर्विश्लेषविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

19.महावैष्टम्भम्- यद्यावओहाइ।। ष्टम्भेतासी ।प्र। ष्टम्भे वयं प्रत्नंराय आसुतमिति अत्र प्रस्तावाद्युच्चम्। वैष्टम्भे वयमित्यादिनात्र नजातमविश्वाशवि स्तोत्रीयान्ते इत्यगतिः। क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादादिर्यथर्चम्। ष्टम्भे महादशरूप इति दशसु इत्येतेषु उदात्तानां वर्णानां पुनरुच्चविधानात् अत्रोत्तरयोः स्तोत्रीययोर्यथर्चं पर्वान्त्ययोरुदात्तयोः प्र शब्दगोशब्दयोरनुदात्तमेव। वृष्ण्यावैरूपे इति ष्ण्या शब्दोऽत्र विकृष्टः। कर्षणेत्वित्यादिनात्र कर्षणवृद्धे न भवतः। गणगीतीनामिति निधनं न भवति।।

20.महावैष्टम्भम्- यदिन्द्रयोहा ।। वैष्टम्भे वयमित्यादिनात्र यदिन्द्रया नपापत्वेत्यगतिः। ष्टम्भे वयं प्रत्नं राय आसुतेति अत्र तृतीयायां प्रस्तावादिर्नीचैः। क्रौध्यष्टम्भेत्यादिनात्र तृतीयपादाद्यस्याक्षरस्य ऋक् स्वरवदुच्चनीचप्राप्ते अश्रुष्ट आरत्नधा नहीत्वदन्येत्य नकारस्यानुदात्तविधानम्। अत्र कर्षणवृद्धे न भवतः।। इति प्रथमः।1।

==*==

।। द्वितीयो विंशः।।

1.सहोदैर्घतमसम्- हाउपिबा।। सहोदैर्घेश्चाद्रिः।। घमृगाद्यं तमसे इति अत्र तृतीयायां ऋगादिभूतस्य दीर्घाक्षरस्य बोशब्दस्य वृद्धिविधानम्। एवं सर्वत्र दीर्घाक्षरस्यैव वृद्धिप्राप्ते यश्चेति यस्तेमदो इत्यत्र ह्रस्वस्यापि यकारस्य ग्रहणाद्वृद्धिः। परात्सर्वत्रेति अत्र सर्वासु स्तोत्रीयासु तृतीयाक्षरस्य ह्रस्वस्य दीर्घस्य च वृद्धिविधानम्। तमसे योनौ द्वौ द्वे अक्षरे इति। अत्र सर्वासु स्तोत्रीयासु उत्तरौ पादौ नीचारम्भौ। तमसे स्वासूत्तरयोर्वृणीतरुदिति।चतुरक्षर इति। अस्यार्थः- प्रथमायां तृतीयपादे सोतुर्बाहुभ्यामिति पञ्चाक्षरम् । सुयतामिति त्र्यक्षरम्। उत्तरयोः तृतीयपादे उभे चतुरक्षर इत्यर्थः। नाभ्यासे इति । उत्तरयोः स्तोत्रीययोः त्र्यक्षरमेवेत्यर्थः। श्वादिर्नार्वाच पिबासोमायां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋषभ इति अत्र प्रश्लेषः। हर्यश्वपिबासोमद्धितीयायां सहोदैर्घतमसे इति। अत्र द्धितीयायां र्यश्शब्दस्सङ्क्रुष्टः। द्धितीयायामिति वचनात् प्रथमायां र्यशब्दो सङ्कृष्टः।।

2.सहोदैर्घतमसम्- हा[1]उश्रूधा[2]इ।। सहोदैर्घ्येनिषी सचे वक प्र। घमृगाद्यमित्यादिनात्र तृतीयायामाद्यस्य वृद्धिः। ह्रस्वत्वात् पूर्वयोरवृद्धिः। परात्सर्वत्रेति सर्वासु तृतीयाक्षरस्य वृद्धिः। स्यार्चतो वैराज ऋषभे इति अत्र प्रश्लेषः। स्यन्तमा सहोदैर्घ ऋषभयोरिति दीर्घवृद्धोपहित इत्यादिनात्र विरामात् पूर्वं लुप्त्वागतेः पश्चात् प्राप्त यकारस्य लोपविधानम्। अत्र सूर्यस्य नतेगिर इत्यत्र र्यशब्दस्सङ्क्रुष्टः। त्वामिद्धूरिहितायां मराये, सहोदैर्घेत्वभ्यास इति अत्र तृतीयायां अभ्यासे त्वाशब्दस्सङ्कृष्टः। तमसे योनावित्यादिनात्र सर्वासु उत्तरौ पादौ प्रथमस्वरारम्भौ। मनीषां क्षौद्रेषु सहोदैर्घ मराय वैराज ऋषभेष्विति मनीषां इत्यत्र षशब्दात्परस्य मकारस्य लोपविधानम्।।

3.मरायम्- हा[20]उहा[0]उहा[0]उ- पा[1]इबा[2]।। चतुर्थोदात्ततमान् स्वरान् द्व्यन्तरानुदूहन्ति तमुदूह इत्याचक्षत इति ब्राह्मणे अपवादवचनात् चतुर्थमन्द्रातिस्वार्याणां द्व्यन्तरमुच्चमुदूहः। अत्र न भवति। सस्तोभ पदविभाग्यत्वात्। एकस्यां भक्तौ तृतीयप्रभृतीनां स्वराणां विद्यमानत्वात् मराये। आन्धानन्दे अनुपादमिति अस्यार्थः। पिबासोमां श्रुधीहवां तवाहं पुरोज्यग्निन्नर इत्येतेषु पञ्चसु मरायेषु योनिवत् त्रिपादरूपेषु दाने क्रियमाणे पञ्चचत्वारिंशत् पादास्सन्ति। तेषां पादानामादौ चतुरक्षराणि। आन्धानन्दे अनुपादं भवतः। एवं सर्वत्र प्राप्ते नन्दाया स्थाने मागायता परिदुह शकुपुरस्सखातन्दुदक्षादिषु च। परिधीं रतिदुहानो बभ्र शकुना इव, पुरोजिती सखायः तन्दुरोष दक्षाय्य प्रेद्धः पुरोनस्तुवां एतेषु दशसु पादेषु नन्दामयोह्यमागायता भवतीत्यर्थः। शेषेषु पादेषु किं कर्तव्यमित्यत आह नन्दापरमेकोच्च-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मिति। नन्दायाः परं पादशेषं एकोच्चं भवतीत्यर्थः। द्व्युच्चमिन्द्रा नन्दायाः परमेकाक्षरस्योच्चे प्राप्ते पिबासोममिन्द्रेत्यत्र (नन्दायाः परमिन्द्रेति। न नन्दायाः परं एकाक्षरस्योच्चत्वे प्राप्ते पिबासोम-मिन्द्रेत्यत्र) नन्दायाः परमिन्द्रेति द्व्यक्षरस्योच्चविधानम्। नावेक नीचमिति। अग्निन्नर इत्यत्र मराये प्रथमायां त्रिषु पादेषु नन्दायाः परं पादशेषमेकं नीचं पर्वभवतीत्यर्थः। मासु सक्षं चेति बोधासुमे मघवन्सुष्टुतिमसु इमाब्रघ्नसध भूरिहिते सवना सुप्रतिचक्षं इत्येतेषु पञ्चसु पादेषु म,असु,स,स,क्षि एतान्यक्षराणि नन्दायाः परं नीचैर्भवन्ति। शिष्टान्यक्षराणि पादशेषाणि सर्वाण्युच्चैर्भवन्तीत्यर्थः। अयं विचार उच्चनीचप्रकरणे सूत्रप्रकारेण प्रकारान्तरेण चिन्तितः। कथम् च्यावसधमासुर्यसवनाजनग्रहक्षमं आश्वाइकारात्। अवृद्धं जानोनाजायोरोषमग्निमित्युत्तमाश्चत्वारः। सूत्रत्रयस्य पूर्वोक्तार्थमेवा-नार्थान्तरमस्ति। मरायेऽभ्यास एकाक्षरस्त्रिरुक्तः पादान्ते सर्वत्रेति। मराये सर्वत्र पादान्त्यस्याक्षरस्य त्रिरभ्यासो भवतीत्यर्थः। अपुरोनः इति पुरोन इत्यत्र पादान्त्यस्य नकारस्य त्रिरभ्यासो न भवति। अत्र किं कर्तव्यमित्यत आह। पादमध्ये च हिशब्दाभ्यास इति । प्रेद्धो अग्ने दीदिहि पुरोन इत्यत्र पादमध्यगतस्य हिशब्दस्याभ्यास एवेत्यर्थः। दान्त्याविधास्सर्वत्र स्वासूत्तमायामिति इदमपिसूत्रं पूर्वोक्तार्थस्या-नुवादं, रान्तं हितान्तं स्थितमिति अस्यार्थः। केवलं स्वरमात्रमेवान्तं स्वरान्तं व्यञ्जनविसर्जनीयोपेतं यत्पर्वाण्याक्षरं सहितं तत्पर्वस्वरान्तं संहिताञ्च यत्पर्व तत्पर्वस्थितं भवति। अनाकारान्तमिति। केवलं स्वरान्तानामभ्यासाक्षराणां पर्वभेदत्वं न भवति। स्तं व्युं चैके, इति। स्तं व्युं शब्दौ संहितान्तौ । तयोश्च पर्वभेदे प्राप्ते एके आचार्याः एकपर्वत्वमिच्छन्ति। स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति अत्र सामादौ सामान्ते च स्तोभः। न प्रतिपादं न प्रतिस्तोत्रीयमिति । प्रकृतमनुसरामः। मरायेत्वाद्ययोरिति। अत्राद्ययोः स्तोत्रीययोः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वशब्दस्सङ्कृष्टः। श्वाद्रिर्नार्वा च पिबासोमायां ऋषभे इति। अत्र प्रश्लेषः।।

20 0 0 1 2
4. मरायम्- हाउहाउहाउ-श्रूधाइ।। अत्र सामान्यलक्षणम्। मराय आन्धानन्देत्यादि सूत्रदशकेन पिबासोमायां मराये उक्तः। अत्र विशेषलक्षणमुच्यते। स्यार्चतो वैराजऋषभे इति । मनीषां क्षौद्रेत्यादिनामकारलोपः। असुर्यस्य नते गिर इत्यत्र र्यशब्दस्सङ्कृष्टः। उत्तरे मराये नीषी मारे प्र। त्वामिद्धूरिहिताया मराये इति। अत्र त्वा शब्दस्सङ्कृष्टः। ज्योक्कः शब्दस्त्वोत्वं हे प्रत्यये इति। चतुर्थोदात्त तमान् [1].....स्वराद्व्यन्तरं उदूहन्ति प्रागुपायादित्यनेन उपद्रवभक्तेरुदूह्र प्रतिषेधः। अस्मादुपद्रव भक्तिभूतस्य योनौ मन्द्रस्वरस्थस्य हाउकारस्य द्वितीयस्वरविधानम्। वाशब्दस्य द्वितीयस्वरादारभ्य सकृत् कर्षणम्।।

20 0 0 0 1 2
5. वारवन्तीयम्- रे वाँ इद्राऔहोहाइ।। वारेभिः प्र। वन्तीय इन्द्रे सन्त्वित्यादिनात्र नागोरयिम्माशर्धावित्यगतौ। सर्वमवृद्धमित्यादिनात्र आभावः। ओकारोन्तःपदिकोग्रहणादाभवति। नमोघो इति। तृतीयादिन्यामित्यादिना सर्वत्र पादान्तानामाभावे प्राप्ते मघोन इत्यत्र पदमध्यगतस्य घो इत्योकारस्य ग्रहणादाभावविधानम्। व्यञ्चेति आचिकेतेत्यत्र केशब्दस्य शचीभिरित्यत्र चिशब्दस्य च पदमध्यगतस्य तालव्यस्य तृतीयादिन्यामौहोवायां प्राप्तायां प्रत्यये आभावविधानम्। आदिद्वोदात्तस्येत्यादिना दीर्घाक्षरस्य प्रत्युत्क्रामप्राप्ते हितपौष्कले-त्यादिना गीयमानमित्यत्र गीशब्दस्याभिगानविधानम्। पीयत्नवे मानइन्द्रायां वारे इति यकारे च प्रत्यय इत्यादिना पदमध्यगतस्य तालव्यस्याभावे प्राप्ते पीयत्नवे इत्यत्र पीशब्दस्याइभावविधानम्।।

20 0 120 10 2 1
6. कण्वरथन्तरम्- प्रासोमदेववीतयाइ।। ण्वतरे प्ये प्र। स्तावाद्यं कण्वतरे इति प्रस्तावाद्यस्य ह्रस्वस्यापि दीर्घविधानम्। ण्वतरे तुरीयं

1. क-त्रुटितः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीचं सर्वत्रेति अत्र सर्वत्र प्रस्तावतुरीयस्य नीचविधानम्। प्रसोतयेश्चेति गृविः सर्वत्रेति विशब्दस्य सर्वत्र प्रकृतिभावे प्राप्ते अत्र विशब्दस्य प्रकृतिभावप्रतिषेधः। अवृद्धमप्याइ भवति। प्रियस्सूनुर्ण्वतरे इति अत्रावृद्धस्य प्रियशब्दस्यापि यकारे प्रत्यये आभावविधानम्। ण्वतरे च पूर्वकल्पे इति हिन्वन्त्यपस इत्यत्र त्यशब्दः पूर्वकल्पे सङ्कृष्टः। प्रसोण्वतरे इति अत्रोत्तरयोः ककुभोर्विकल्पः। नदीषु प्रियस्सूनायां यौधाजयद्वैगतण्वतरेष्विति अत्र नदीष्वित्यत्र षु शब्दात्परं अवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परावित्यादिना लोप-प्राप्तस्य वकारस्य पुनरलोपविधानम्।।

20 10 20 1 2 1
7.कण्वरथन्तरम्- प्रासुन्वानायअन्धसाः ।। स्तावाद्यं कण्वतरे तुरीयमित्यादि पूर्वमुक्तम्। भृप्रसुन्वानायामित्यादिनात्र भृशब्दस्या-नार्भावः। अनाउभावो भृकण्वतरे इति आउवाव्यवहितमित्यादिना सर्ववर्णानामाभावे प्राप्ते भृशब्दस्यानार्भावविधानम्।।

20 Q 0 2
8.कण्वबृहत्- औहोपुनानस्सोऽ3एँ।। कण्वबृहत्याद्यान्त्याव-गतौ। अत्राद्यन्तयोः स्तोभयोरगतिः। पुनान द्वितीयायां धर्दि प्रत्यय इति मध्यमस्तोभस्यागतिः। कण्वबृहत्युपोत्तमं चावृद्धाद्यमपादाद्यमिति। अत्र सर्वासु उद्गीथाद्यं पर्व उद्गीथ एव। यस्य पर्वणः अवृद्धाद्यमपादादित्वं चास्ति तच्छैतेषां पर्वणामाद्याक्षरस्य नीचविधानम्। आपृच्छ्यमवृद्धँ सर्वत्रेति छ्यशब्दः सङ्कृष्टः। पुनाकण्वबृहतीति अत्रोत्तरयोः ककुभोर्विकल्पः।

20 Q 0 2
9.कण्वबृहत्- औहोअयम्पूषाऽ3एँ।। कण्वबृहत्याद्यान्त्यावगता-विति अत्राद्यन्तयोस्तोभावगतौ। अयम्पूषायां सर्वास्विति । अत्र संर्वासु मध्यमस्तोभस्याप्यगतिः। कण्वबृहत्युपोत्तममित्यादि पूर्ववत् । पूषायां चेति इत्यत्र दसी शब्दस्य प्रकृतिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

10.महावैष्टम्भम्- अ[1]भिसो[20]मो[1]हाइ।। ष्टम्भे वयं प्रत्नं राय आसुता इति अत्र प्रस्तावाद्युच्चं। वैष्टम्भे वयमित्यादिनात्र सर्वासु स्तोभानां गतिः। ष्टम्भे महा ओश सूपे इति स्वरितभूतस्य पेशब्दस्य चोच्चविधानम्। ष्टम्भे चेति अनेनापि पेशब्दस्य उच्चविधानम्। क्रौन्ध्यष्टम्भेत्यादिनात्र तृतीयपादादिर्यथर्च्चम्।।

11.महावैष्टम्भम्- सु[2]ता[10]सो[20]मो[1]हाइ।। ष्टम्भेस्येशा सखे प्र। ष्टम्भे वयं प्रत्नं राय आसुतेति अत्र प्रथमायां प्रस्तावादिर्नीचैः। वैष्टम्भे वयमित्यादिनात्र देवान्गच्छेन्दुरिन्द्रा विश्वस्येशा सहस्रधा इत्यगतिः। क्रौन्ध्यष्टम्भेत्यादि नात्र सर्वासु तृतीयपादादिर्यथर्चं। कर्षणेत्वित्यादिना कर्षणवृद्धे न भवतः।।

12.सहोदैर्घतमसम्- हा[1]उतवा[2]।। घमृगाद्यं तमस इत्यत्र सर्वासु प्रस्तावाद्यस्य वृद्धिः। परात्सर्वत्रेत्यत्र सर्वत्र प्रस्तावतृतीयस्य वृद्धिप्राप्ते नाहं पादतुरीयमिति अत्र प्रथमायां तृतीयस्याकारस्यावृद्धिः। तुरीयस्य ह शब्दस्य उभयमप्यनेन सूत्रेण विधीयते। तवाद्यायां सहोदैर्घ-मराययोरिति। तवाहमित्यत्राकःसवर्णे दीर्घ इत्यनेन प्रश्लिष्टस्या-कारस्य विश्लेषविधानम्। तमसे योनौ द्वौ द्वावुत्तराविति अत्र सर्वासूत्तरयोराद्याक्षरस्योच्चमेव। आन् कारो वृद्ध इत्यादिनानुनासिक-मेव। अतिसूर्यं पुष्पमराय कीर्त्येषु सूर्यशब्दोऽत्र विकृष्टः। अहं चेति अत्र प्रथमायां प्रस्तावतृतीयस्याकारस्य नीचविधानम्। बभ्रोरे इति अत्र तृतीयायां वृद्धस्य भ्रोशब्दस्य स्वरे परतः आङ्भावविधानम्।।

13.सहोदैर्घतमसम्- हा[1]उपुराः[2]।। घमृगाद्यं तमस इत्यत्र सर्वासु प्रस्तावाद्यस्यावृद्धिरेव। परात्सर्वत्रेति अत्र सर्वासु प्रस्तावतृतीयस्य वृद्धिः। तमसे योनौ द्वौ द्वावुत्तराविति अत्र सर्वासु उत्तरयोः पादयोराद्याक्षरस्योच्चम्। न कृ श्वोनप्रत्यये इति अत्र कृशब्दस्य श्वोन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रत्यये आर्भावविधानम्। षकारस्पर्शयोरेव प्रत्यययोरार्भाव-विधानात् षकारस्पर्शव्यतिरिक्तत्वात् श्वशब्दस्यात्रार्भावो विधीयते। द्वितीयस्यभ्यासस्य कृशब्दस्य स्पर्शप्रत्ययत्वात् आर्भावः प्राप्त एव। उक्तस्त्वभ्यासादौ व्यञ्जनलोप इति अभ्यासादौ व्यञ्जनलोपः। व्यञ्जनमपराङ्गं विरामे लुप्यत इत्यनेनोक्तम् । विश्वाच्येत्यादिना च्या शब्दोऽत्र विकृष्टः।।

14.मरायम्- हाउ(त्रिः)[20]। तावा[1 2]।। तवमराये । प्र। मराय आन्धानन्देत्यादिभिस्सूत्रैः पञ्चानां मरायानां सामान्यलक्षणं पिबासोम मराये उक्तम्। अत्र विशेषलक्षणं वक्ष्यते। तवाद्यायां सहोदैर्घ-मराययोरिति तवाहँसो इत्यत्र वकारात्परस्य प्रश्लिष्टस्याकारस्य विश्लेषविधानम्। अतिसूर्यं पुष्पमरायकीर्त्येषु इत्यत्र सूर्यशब्द-स्सङ्कृष्टः।।

15.मरायम्- हाउ(त्रिः)[20]। पूराः[1 2]।। जिह्व्यं न कृत्व्यश्च ज्ञीयसोद्गीथे इति पुरोजिति इत्येतौ शब्दौ मराय इति पुर इत्यत्र इत्य(द)-कारस्यास्तोभे सन्धिगाने प्राप्ते पदगानविधानम्। विश्वाच्याश्विनोर्व्रत परित्याकूपार पुष्पमरायेष्विति अत्र च्याशब्दः सङ्कृष्टः।।

16.वारवन्तीयम्- इन्द्रायेन्दाओहोहाइ[2 0 0 0 0 1 2]।। वारेर्णसिप्र। वन्तीय इत्यादिनात्र परिष्कृण्वन्नित्यगतिः। सर्वमवृद्धमाभवतीत्याभावः। लान्दवन्तीय इत्यादिना औकारे प्रत्यये ह्रस्वस्यापि दीर्घविधानम्। (चो) वोवित्सर्वत्रेति अत्र विशब्दस्य प्रकृतिः। मृजन्त्यायव इत्यत्र तिशब्दात् परं अवृद्धादित्यादिना व्यवधानप्राप्तस्य यकारस्य द्व्यन्तस्थ परेतु लोप इति लोपः। तृतीयादिन्यामित्यादिनात्र पदान्तानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति मरुत इत्यत्र मकारस्याभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

17.आसिताद्यम्- इमर्मिन्द्रसुताम्।। पिबाहिष्ठीयासितयोरयम्, इति अत्र सर्वासु प्रस्तावाद्युच्चम्। सिते स्वयातमा पुरु सुतं इति। अत्र प्रथमायां प्रथमपर्वणि उपान्त्यस्य सुशब्दस्योच्चविधानम्। नकिष्ट्वासिते इति ष्ट्वत्सङ्क्रुष्टः। रथीतरो नकिष्ट्वद्रथीतमाया-मासिते इति। अःकारो वृद्ध इत्यादिना पदगाने प्राप्ते रथीतर इत्यत्र सन्धिकस्याःकारस्य सन्धिगानविधानम्। हिष्ठीय गवसितेषु सचपवृत् सर्वत्रान्त्यम् अयोनाविति। अस्यार्थः। योनौ पञ्चमपर्वान्त्यस्याक्षरस्यावृद्धिः। ऊहे सर्वत्रपञ्चमपर्वान्त्यस्य वृद्धिरित्यर्थः। नकिष्ट्वद्रथायां स्वशब्दये प्रत्यये गौरीवितासितयोरिति। नकिरित्यत्र किशब्दात्परस्य विसर्जनीयस्य च स्वशब्दे प्रत्यये लोपविधानम्।।

18.स्वारंत्वाष्ट्रीसाम- असाविसोऽ3हा।। त्वाष्ट्रीगहिहरिप्र। त्वाष्ट्रीसाम्नोश्च सर्वे। इत्यत्र सर्वस्तोभानामगति प्राप्ते न हरिं वत्समित्यादिनात्रार्वाचीनं यज्ञं चेत्येतावगतौ भवतः। पृणक्तु महामित्र त्वाष्ट्रीवितेष्विति। .अवृद्धादिपदान्तादित्यादिना अत्र पृणक्त्वित्यत्र तुशब्दात्परं व्यवधानप्राप्तस्य वकारस्य लोपः। रजस्सूर्यस्य पूर्वे इति स्तोभे परतः पदगाने प्राप्ते र्यशब्दसन्धिगानविधानम्।।

19.वसिष्ठप्रियम्- यदिन्द्राऽ23-चित्रमइह[1]।। प्रिये नास्ति तेदि प्र। इह न यदिन्द्रचित्रायां वसिष्ठपियातीषङ्ग्योरिति। इह न इत्यत्र नकारात्परस्य पदादिभूतस्याकारस्य अकःसवर्णेदीर्घ इत्यनेन प्राप्तस्य पदान्तादित्यादिना विश्लेषप्राप्तस्य पुनः प्रश्लेषविधानम्। तमद्रिवो यदिन्द्रचित्रायां वसिष्ठस्यप्रिय इति । अःकारोवृद्ध इत्यादिना पादान्तस्य पदगानेप्राप्ते सन्धिगानविधानम्। आकूवसिष्ठस्यप्रिये यदिन्द्रचित्रायामिति ओवौकारयोरित्यादिनाभावे उवर्णन्तु न सर्वत्राभवतीति अनाभावप्राप्तस्य कुशब्दस्य पुनराभावविधानम्।।

1.ख- यदिन्द्राऽ23-चित्रमइह।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

20.महावैश्वामित्रम्- 2 हँयाइ-हयाऽ3-4 5 4 5 2 0 ओहाओहा-पुराम्भिन्दूः। महामित्रे कवि वज्री स्तोमैर्यसीः प्र। जाराग्निन्दूतोपक्रमणामित्यनेन प्रकृतौ विकृतौ च सर्वत्र प्रतिपादमग्निन्दूतास्वरमेव न द्वितीयस्वरः। शाब्दादिषु विभाग्यत्वात् ऊहे प्रतिपादं जारास्वरमेव। स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति योनावाद्यन्तस्तुध्वास्तुस्थानं च साम्नामत्र ऊहगाने सामादौ सामान्ते च स्तोभानां प्रवृत्तिः। न प्रतिपादं न प्रतिस्तोत्रीयमित्यर्थः।। इति द्वितीयः।। 2।।

==**==

।। तृतीयो विंशः।।

1.द्विरभ्यासं त्वाष्ट्रीसाम- 50 गाय-3 2 तित्वाऽ3-2 हाऽ3 2 हा।। त्वाष्ट्रीसाम्नोश्च सर्वं इति। अत्र सर्वस्तोभानामगति प्राप्ते न हरिं वत्समित्यादिनात्र ब्रह्मोद्धँशयुंक्ष्वायानगिरामिति एतेषु पञ्चसुगतिः। गायन्तित्वायां च त्वाष्ट्रीसाम्नीति उद्धँशमिवेत्यत्रेकारस्य पदमध्यगतस्य तालव्यस्य हादौस्तोभेपरतः आभावेप्राप्ते आइभावविधानम्।।

2.क्रौञ्चाद्यम्- 20 10 0 एन्द्रयाहौहो।। क्रौञ्चे घोषे प्र। क्रौञ्चयाहिशब्दोऽभ्यासादिति। एन्द्रयाहीत्यत्र हिशब्दात्परं हिशब्दाभ्यासः। क्रौञ्चयोः परित्याकूपारे चागतस्तोभा इति अत्र सर्वस्तोभानामगतिः। क्रौञ्चाऽभिनिधनेत्यादिनात्र वृण्यादिभूतानां ह्रस्वाक्षराणामपि दीर्घप्राप्तेनात्र विनेमिरिति अत्र वृण्यादिभूतस्य मिशब्दस्य ह्रस्वस्य दीर्घत्वं न भवति। समानोदर्केष्वित्यादिनात्र पूर्वयोरुद्धारः।।

3.गौरीवितम्- 5 इम - 3 2 इन्द्राऽ3 - 4 5 सुतम्पिबा ।। वितेत्सुरि प्र। नकिष्ट्वद्रथायां स्वशब्दे प्रत्यये गौरीवितासितयोरिति नकिस्वश्चेत्यत्र किशब्दात्परस्य विसर्जनीयस्य स्वशब्दे प्रत्यये लोपविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5 0 3 2

4.गौरीवितम्- असा-विसोऽ3।। असावितइन्द्रसुतेष्टुतीः प्र। पृ(वृ)णक्तु महावैश्वामित्र त्वाष्ट्रीवितेष्विवृणक्त्वित्यत्र तु शब्दात्पर-मवृद्धादित्यादिना व्यवधानप्राप्तस्य लोपः। रजस्सूर्योविते, इति भक्त्यन्तः पदगीतः सर्वत्रेति पदगानप्राप्तेऽत्र प्रतिहारान्तस्य र्यशब्दस्य सन्धिगानविधानम्। वाचिसर्वमोभवतीत्योभावप्राप्ते अनुस्थमिति मानुषाणामित्यत्र नुशब्दस्य ओभावो न भवति।।

20 3 2

5.गौरीवितम्- गाय-तित्वाऽ3।। गायविते चेति। सान्वारुहो उद्वँशीये इति। न्वाशब्दोऽत्र विकृष्टः। भूर्यवँशीय लेयवितेष्विति अत्र र्यशब्दः सङ्क्रुष्टः। अर्चन्त्युद्वँशीयवितयोरिति अत्र त्यशब्दः सङ्क्रुष्टः। वितेष्वितियुंक्ष्वाहिकेशिनायामिति उपश्रुतिमित्यत्र तिशब्दात्परस्य मकारस्य वाचि सर्वमोभवतीत्यनेन लोपप्राप्तस्यातिहारः।।

50 30 2

6.गौरीवितम्- एन्द्र-याहाऽ3इ।। आजागृवीतोत्तरयोरेन्द्रयाहि-पूर्वयोः पर्यूषु चोपान्त्योच्चापतिङ्गिरेति। अस्यार्थः। सूत्रेणोक्तासु पञ्चसु स्तोत्रीयासु पतिङ्गिराया उपान्त्यस्य उच्चविधानम्। अन्यत्र योनावहेवा पतिङ्गिरैव । चतुर्थस्वरे द्वे मन्द्रस्वरे द्वे इत्यर्थः । समानोदर्क इत्यादिना पूर्वयोरुद्धारः।।

20 0 10 2 0 1

7.कण्वरथन्तरम्- देवोवोद्रविणोदाः।। ण्वतरे च देवे । प्र। स्तावाद्यं कण्वतरे इति। अत्र प्रस्तावादिभूतस्य ह्रस्वस्य दीर्घविधानम्। ण्वतरे तुरीयं नीचं सर्वत्रेति प्रस्तावतुरीयस्य सर्वत्र नीचप्राप्ते चमं न जाते। दब्धस्सु देवोव इति अत्र प्रथमायां प्रस्तावपञ्चमस्य नीचविधानम्। पृणुध्वं कण्वतरे इति अत्र ध्वं शब्दः सङ्क्रुष्टः। आउवाव्यवहितमित्यादिना आभावेप्राप्ते ओष्ठ्यश्चेत्यादिना ओहत इत्यत्र पदमध्यगतस्य ओकारस्यानाभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

8.कण्वबृहत्- औहोयज्ञायज्ञाऽ3ए।। कण्वबृहत्याद्यान्त्याव-गतौ। अत्र सर्वासु आद्यान्त्यौ स्तोभावगतौ मध्यगतानां स्तोभानां अत्र गतिरेव। मध्यमश्चेत्यस्मिन् सूत्रे अत्राहरणात् गिरागिरा प्रप्र नशँसिषमिति अनुब्राह्मणमेव। इराइरा पप्रीं सुशँसिषमिति। कण्वबृहत्युपोत्तमं चावृद्धाद्यमपादाद्यमित्यस्य सूत्रस्य पूर्वमेवस्पष्ट-मुक्तम्। सुपबृहतीशताम्माहयोरिति एकपर्वत्वविधानम्। विशोविशीय वत् घे स्वरे विराममेके इति। अत्रापि चतुर्थस्वरे विराममेके आचार्या मन्यन्ते।।

9.महावात्सप्रम्- हाउ(त्रिः)-औ-होहोवा-पुरोजिताइ।। इदं सङ्घात इत्यादिना त्रैष्टुभस्य वात्सप्रस्य योनिवत् स्वरं विहाय इदं सङ्घातं विधीयते। अत्र तु अनुष्टुभत्वात् षष्ठप्रभृतीनां त्रयाणां वर्णानां प्रतिपादं लोपः। पुरोजिपाद्य इति पुरोजितीत्यत्र पुशब्दस्य नीचविधानम्। क्षौद्रे तु वृणी प्रथममिति अत्र सर्वासु सर्वेषु पादेषु ऊत एकायाः उत्तरं त्र्यक्षरं प्रथमस्वरमापद्यते। क्षौद्रे अति चतुर्थमिति अत्र सर्वासु स्तोत्रीयासु पादपञ्चमस्य पादादिभूतस्य वृद्धिविधानम्। तीचेति। अत्र प्रथमायां प्रथमपर्वान्त्यस्य तिशब्दस्य वृद्धिविधानम्। जिह्व्यं न कृत्वियं इत्यत्र विकृष्टौ। ययोद्रयो इत्यत्र पादान्त्यात्परस्य अभ्यासभूतस्य एङः पदान्तादित्यनेन प्रश्लेषप्राप्तस्य पादन्त्यादित्यनेन विश्लेषप्राप्तस्य अकारस्य पुनः प्रश्लेषविधानम्। बृहद्वात्सप्र शुद्धाशुद्धीयपदनिधनवैराजवर्जमिति। त्वद्रय इत्यत्र तु शब्दात्परमवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परावित्यादिना लोपः। यज्ञायसन्तु सर्वत्रेति पुनरलोपप्राप्तस्य वकारस्य पुनर्लोपविधानम्।।

10.यज्ञायज्ञीयम्- सोमाःसोमाऽ5प।। ज्ञीयसूरि प्र। ज्ञीये दान्त्ये इति प्रस्तावोपान्त्यस्य वृद्धिः। अत्र न भवति। पादमध्ये

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रस्तावोपान्त्यत्वात्। आद्यायामन्यत्रेति अत्र प्रथमायामुद्गीथस्य वृद्धिः। त्रिष्टुभिज्ञीये तृतीयेन्त्यमाइन्द्रादिः त्रिष्टुभियज्ञायज्ञीये सर्वत्र तृतीयपादान्त्यमक्षर आइन्द्रादिस्वरादिर्भवति। सोमःप्राष्टममिति अत्र प्रथमायां तृतीयपादे अष्टममक्षरमाइन्द्रास्वरस्यादिर्भवति। दासे ज्ञीये हाराद्योनिवदिति वैच्छन्दसेषु यज्ञायज्ञीये सर्वत्र प्रतिहारात्परं योनिवदष्टाक्षरं भवति। अभविशोत्तमायां सोमोन्त्यस्य योश्चेति। अत्राद्ययोः प्रतिहारात्परमेकादशाक्षरं सप्तमाक्षरं भवतीत्यर्थः। परमभ्येज्ञीये इत्यत्र त्येशब्दः सङ्कृष्टः। वराणि ज्ञीय श्यावाश्वयोरिति। वृजनेमावराणीति अत्र दीर्घ वृद्ध इत्यादिना णि शब्दात्परं व्यवधानप्राप्तस्य लोपः।।

11.मरायम्- हाउ[20](त्रिः) - आग्नीम्[1 2]।। मरायेग्निन्नरदीधिप्रेद्धः प्र। मराय आन्धानन्दे इत्यादिभिः सूत्रैः सामान्यलक्षणं पिबासोमायामुक्तम्। अत्र विशेषलक्षणं वक्ष्यामः। पुरोजिन्नर इत्येतौ शब्दौ मराय इति नर इत्यत्र रशब्दस्यास्तोभे सन्धिगाने प्राप्ते पदगानविधानम्। नृण्वन् दक्षाय्य इत्येतौशब्दौ मराय इति। नृ,य्य, इत्येतौ शब्दौ अत्र सङ्कृष्टौ। सनित्यः सर्वत्रेति अत्र त्य शब्दः सङ्कृष्टः। पुरोनः प्रेद्ध इत्यत्र मराय इति अःकारोवृद्धइत्यादिना पुरो न इत्यत्र नः शब्दस्य वृद्धस्य पदगाने प्राप्ते सन्धिगानविधानम्। अत्र सामादि भूतस्य स्तोभस्य नचेत्समानपुरुषवचन इत्यादिना उदूहो न भवति । मराये हाउवा द्वितीया (सकृत्) संकृष्टा इति चतुर्थोदात्ततमान् स्वरान् द्व्यन्तरानुदूहन्ति प्रागुपायादित्यनेन वचनेन उपद्रवभक्तौ उदूहप्रतिषेधादत्र योनिवन्मन्द्रस्वरे प्राप्ते द्वितीयस्वरविधानम्। वकारस्य च द्वितीयस्वरादारभ्य तृतीयान्तं कर्षणम्। अत्र प्रथमायां दीधितिरित्यत्र दीशब्दस्य दीधिति प्रेद्ध इति प्रकृतिभावग्रहणात् पादादौ च दीर्घे इत्यनेन कर्षणमेव।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

12.पदनिधनशुद्धाशुद्धीयम्- त्वन्द्याञ्चमहिव्रता।। त्वन्द्यांच शुद्धीय इति अत्र त्वंशब्दः सङ्कृष्टः। शुद्धीयेभि द्वे इत्यादिनात्र प्रस्तावाद्युच्चम्। क्रोशौपगवेत्यादिनात्र उद्गीथाद्युच्चम्। योनौ नीचम्। दावसुनिधनेत्यादिनात्र तृतीयपादाद्युच्चम्। योनावेव नीचम्। ज ......सर्वत्रेति प्र।।

13.आकूपारम्- सुष्वाणाऽ23सोवि।। व्यद्रिभिर्ज्ञीये इत्यत्र विकृष्टः।।

14.यज्ञायज्ञीयम्-सोमाःऽ5प-वाऽ3न्ताऽ3इन्दावाः।। दीयेदान्त इति प्रस्तावोपान्त्यस्य वृद्धिः। रे सर्वत्रेति प्र। स्वाध्यः सोमाः पवन्तायां मधुनान्धीगवषेधज्ञीयेष्विति। स्वाध्य इत्यत्र सुशब्दात्परमवृद्धा-दित्यादिना दध्यशइर इत्यत्र वृद्धादाइभूताधिशब्दात्परं व्यवधान-प्राप्तस्य वकारस्य लोपविधानम्। व्यद्रिभिर्ज्ञीय इति व्यशब्दः सङ्कृष्टः। मित्रास्वानास्सवत्रेति स्वशब्दोऽत्र सङ्कृष्टः। बृहद्रथन्तर यज्ञायज्ञीय तृचेषु गीयमानान्यक्षर संसर्गेण गेयानि। अक्षरसंसर्गस्वरूपः कथमित्यत आह। तृचेष्वक्षरसंसर्गेण प्रथमायामुत्तममक्षरं मध्यमायाश्च प्रथममेवमापरे द्वितीयोत्तमयोरिति सूत्रकारेणोक्तम्।।

15.पूर्ववारवन्तीयम्- आश्वा। वान्तः प्रस्तावः। कावश्रौत-कक्षेत्यादिना वारे पूर्वाया प्राग्ग्रहणाध्ययनौ। वारे प्रथम इति । वन्दध्यै इत्यत्र ध्यैशब्दस्य तालव्यमाइयद्वृद्धमित्यनेन आइभावे प्राप्ते आभावविधानम्। अत्र न प्रत्यय विशेषोऽस्ति। नस्सुवारे प्रथम इति। सूनुरित्यत्र सुशब्दस्य ओवौकारयोरित्यादिना सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अनाभावप्राप्तस्य पुनराभावविधानम्। दूराद्वन्तीये प्रथम इति सनो दूराच्चेत्यत्र आकारात्परस्य पदान्तस्य वकारस्य सर्वमवृद्धमित्यादिनाभाव प्राप्तस्यातिहारविधानम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वारेचाघा इति अत्र तृतीयायां पञ्चमाष्टमपर्वणो चादिभूतस्य चाशब्दस्य घाशब्दस्य नीचविधानम्। चासाद्वन्तीयोत्तमतृतीयाया-मिति अत्र चासादिति प्रश्लेष एव। चासाद्वन्तीयोत्तम इति आसादित्यत्राकारस्यात्वं न भवति। आकारस्य दीर्घत्वमेव। ओवौकारयोरित्यादिना ऋगन्तभूतयोस्स्पर्शनामिविसर्जनीययोरना-भावः। तत्र चौहोवाशब्दः प्रथमात्कृष्यते। अघायोर्वारि प्रथमे इति निमर्त्यादघायोरित्यत्र दशब्दे अकारलोपः।।

16.जागतं श्यावाश्वम्[1]- सोमःपवा (1Q 2 1) ।। वाश्वेताग्ने प्र। चतुरक्षरं प्रस्तावः। सोमसामेत्यादिना पवित्रमत्येज्ञीय इति त्यशब्दोऽत्र विकृष्टः। वराणि ज्ञीयश्यावाश्वयोरिति मावराणीत्यत्र वृद्धस्य णीशब्दस्य गतिर्विरते इत्यनेन विरामत्वादाइभावप्राप्तायाः गतेः परमाकारेपरतः व्यवधानप्राप्तस्य यकारस्य लोपविधानम्। वाचिसर्वमित्योभावे प्राप्ते अनुस्थमिति षुजान्नित्यत्र त्रिषु शब्दस्य ओभावो न भवति।।

17.शैखण्डिनम्- प्रताऽ3होइ (3 2 1)।। शैखण्डिन आश्वीयदी प्र। शैखण्डिने सर्व इति सर्वास्वगति प्राप्ते न येत्वा यदी पविनशी पतिरिति पञ्चानां स्तोभानां गतिरेव। प्रते शैखण्डिने इति प्रते इत्यत्र तेशब्दस्य पदान्तस्य हादौस्तोभेपरतः आभावविधानम्। दिव्याहोइ इत्यत्र स्वरे तु गतिर्भवतीति गतिः। येत्वामृजन्तिलौशशैखण्डिनयोरिति। मृजन्त्यर्षि-षाणेत्यत्र तिशब्दात्परमवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्त-यकारस्य लोपविधानम्। सिने चतुर्थोच्चानि यथायोनिवदिति। शैखण्डिने योनौ चतुर्षु पादेषु योनिवत् स्वरे प्राप्ते अत्र द्वितीयायां स्तोत्रीयायां प्रथमे पादे तृतीयं पर्व चतुर्थस्वरे द्वे अक्षरे, मन्द्रे चत्वार्यक्षराणीत्यर्थः । तृतीयाश्च तृतीययोरिति अत्र तृतीयायां

1.ग- त्रिष्टुप् श्यावाश्वम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तोत्रीयायां प्रथमतृतीययोः पादयोश्च तृतीयं पर्व चतुर्थं स्वरे द्वे अक्षरे, मन्द्रे चत्वार्यक्षराणि। उभयत इत्यत्र तशब्दात्परस्य पदान्तस्य विसर्जनीयस्य पूर्वाङ्गप्राप्तस्य उभयत्रातिहारः। अश्विनीद्वितियायां शैखण्डिने इति। पवित्र इत्यत्र विशब्दस्य पदमध्यगतस्य तालव्यस्य वृद्धमन्तःपद इत्यादिनाभावे प्राप्ते आइभावविधानम्। डिन उत्तरयोरास्तोभेप्रत्यय इति अत्र उत्तरयोः स्तोत्रीययोः स्तौभिके आकारे परतः सीदतीत्यत्र दकारात्परस्य राजसीत्यत्र सकारात्परस्य चेकारस्यात्वविधानम्। नोर्मयोर्णसार्जुन ऋभ्वस एवामृताचार्के इति अस्यार्थः। ऋभ्वस इत्यत्र ऋशब्दात्परयोर्भकारयोः पूर्वस्य भकारस्य व्यञ्जनमपराङ्गं विरामे लुप्यते। अभ्यासे चेति। अनेनातिहारविध्यङ्गभूतस्य चरेणचासंहितमित्यनेन पूर्वस्वराङ्गभूतस्याभ्यासे प्रत्यये लोपप्राप्ते अलोपविधानम् । डिनतृतीयायां स्तावेऽभ्यास आर्भावमेके, इति। ऋभ्वस इत्यत्र वृद्धात् सशब्दात्परस्य विसर्जनीयस्य घोषाक्षरे परतः लोपः । केचिदार्भावमिच्छन्ति।।

18.श्यैनम्- गोवित्पवस्ववसुवाइत्।। श्येन इया प्र। आर्षभश्येनयोः प्रान्त्ययोरिति। अत्र प्रान्त्ययोः प्रस्तावादिः नीचैः । रेतश्येन इति रेतोधा इत्यत्र त शब्दस्य आउवाव्यवहितमित्यादिनाभाव प्राप्तस्यानाभावविधानम्। ष्वर्पितो लौश इति अत्र विकृष्टः। त्वं सुवीरश्येन इति त्वशब्दोऽत्र सङ्कृष्टः। श्येनेन दीर्घत्वमिति युजान इन्दो इत्यत्र नकारस्य ह्रस्वस्यापि दीर्घविधानम्।।

19.इहवद्वामदेव्यम्- तन्त्वाविप्रावचोविदः । एतमिहवद्देव्ये इति अत्र प्रस्तावाद्युच्चम्। अकारस्तन्त्वा विप्रायामिहवद्वामे इति। मृजन्त्यायव इत्यत्राकारस्य लोपः। क्रोशौपगवेत्यादिना अत्र उद्गीथाद्युच्चम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

20.मार्गीयवम्- रसौहोवा।। यवेतेमि प्र। रसं मार्गीयव इति रसमित्यत्र सकारात्परस्य पदान्तस्य मकारस्य ओवौकारयोरेकीभावे लोप इत्यनेन लोपप्राप्तस्यातिहारविधानम्। अपरसं दोषं पेति यवे मह्यामिति अनेन मार्गीयवे महित्रीणा द्वितीयस्य वृद्धिप्राप्ते त्रोर्यमा इत्यत्राकारस्य वृद्धिप्रतिषेधः। क्रौन्दे चेति पवमानस्येत्यत्र वशब्दस्य ह्रस्वस्य दीर्घविधानम् ।। इति तृतीयः।।3।।

*

।।चतुर्थो विंशः।।

1.वार्त्रतुरम्- अयापवोवा।। तुरे ह्रस्वे प्र। श्नौष्टे यानि तानि च । वान्तः प्रस्तावः कावश्नौतकक्षेत्यादिना वार्त्रतुरे गीथाद्यं प्रथमोच्चम्। मागायतामिति। योनौ उद्गीथाद्यस्याक्षरस्योच्चम्। अत्र सर्वासु उद्गीथ द्वितीयस्याप्युच्चम्। द्वितीये च पादे सान्त्वातन्त्वामिति। योनौ द्वितीयपादे हरीणां रथ्यं विव्रतानामिति पर्वद्वयमस्ति। अत्र सर्वासु तयोः पर्वणोः स्थाने तन्त्वसङ्घातो हि भवति। तन्त्वागिरस्सुष्टुतयो वाजयन्ति इति। ब्रध्नष्षष्ठिं पयन्नितुरे इति अत्र ब्रध्नश्चिद्यस्य षष्टिं सहस्रानौ इत्येतौ नीचारम्भौ। अस्वापयन्निगुत इत्यत्र गुशब्दस्य ऋक्स्वरे उदात्तस्य पर्वान्तगतस्य नीचविधानादन्यत्र पञ्चभक्तिषु भेदवर्तिनी पर्वणी आदिमध्यान्तेषु ऋक्स्वरापवादसूत्राणि विचिन्त्य ऋक्स्वराबाधेन गेयानि। तुरे ध्माखादिः अयोनौ। योनौ वार्त्रतुरे चतुर्थपादे तृतीयपर्वण्याद्याक्षरस्य वृद्धिविधानम्।।

2.जागतं वरुणसाम- ज्योतिर्ये ।। ध्यमायां स्तावे द्वितीयं घातं रुणसाम्नीति, अस्यार्थः। योनौ प्रस्तावाद्यं पर्व चतुर्थस्वरे इत्येतावान्विशेषः। ज्योतिर्वरुणसाम्नि आद्यन्तयोस्तृतीयोच्चात्परं तमु ,तृतीयांतु त्रिभाक् चतुर्थमिति सूत्रद्वयस्य अयमर्थः। योनौ द्वितीयं पर्व

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रीण्यक्षराणि चतुर्थस्वरे भवन्ति इत्यर्थः। क्रोशौपगवेत्यादिनात्र सर्वासु स्तोत्रीयासु उद्गीथाद्युच्चम्। योनावेवनीचम्। वरुणसाम्नि च घृतवत्यमिति द्वितीयपाद अष्टमस्याक्षरस्य योनावेव वृद्धिः। अत्र सर्वासु वृद्धिर्न भवति। रुणसाम्नि चेति पूर्वमुक्तार्थमेव। नार्थान्तरमस्ति। अभिक्रन्दायां धेनुवरुणयोरिति मर्मृज्यमान इत्यत्र मृज्यशब्दस्यानार्भावः। आयेभावश्च नेदानीमिति अत्र सिन्धुभिरिति भिशब्दस्य आयेभावो न भवति।।

3.प्रवद्भार्गवम्- प्रकाँवियाम्।। [1]प्रवद्भार्गवे तिरे तिसा जूतिं मते प्र। प्रवति पादादौ द्वे इति सर्वासु स्तोत्रीयासु पादादौ द्वे द्वे अक्षरे नीचैर्भवतः। [2]प्रवद्भार्गवे कृष्टादस्थाद्धकार इति पावक इत्यत्र पाशब्दात्परस्य ह्रस्वस्य वकारस्य दीर्घविधानम्। वर्णसदस्यव प्रवदुद्धत्सामराजेषु स्पर्शानामलोप इति अत्राद्ययोः स्तोत्रीययोः ऋगन्तभूतयो आउवाव्यवहितमित्यादिना आभावप्राप्तयोरनाभाव-विधानम्। अगत्यन्ताः प्रवदुद्धत्सामराजेष्विति। अत्र पूर्वयो स्तोत्रीययोरुगत्यन्ता भवति।।

4.उद्धद्भार्गवम्- शिशुञ्जाज्ञाऽ23।। [3]उद्धद्भार्गवे येना येति कृत् प्र। क्रौञ्चाभिनिधन सप्तह पयोत्तर धर्तो द्धत्रासदस्यवेषु वृण्यादिरिति। विशेषग्रहणादत्र वृण्यादिभूतस्य ह्रस्वस्य दीर्घत्वं न भवति। एकारे द्धयकारं यामोद्धतोर्गतिमाँश्चपदान्तसन्धाविति। अत्र रमराइये इति गतिश्च यकारश्च भवति। एकारे परतः सन्धौ विषये वर्णसदस्यव प्रवदुद्धत्सामराजेषु स्पर्शानामलोप इति तिरेभन्नित्यत्र भ शब्दात्परस्य आउवाव्यवहितमित्यादिना लोपप्राप्तस्य नकारस्यालोपविधानम्। न त्रिष्टुप् शिशुमद्धतीति अनुराजतिष्टुबित्यत्र अलोपप्राप्ते लोपविधानम्

1.प्रवद्भार्गवे तिरेन्दुतिंमहे।2.प्रवद्भार्गवे कृष्टादत्वाद्धकार।3.उद्धद्भार्गवे नावेतिकृत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋषिकृच्छिशुं देव्योद्वज्ज्योतिषेषु इति अत्र ऋषिकृदिति कृच्छब्दस्यानाभविः। उगत्यन्ता इत्यादिना पूर्वयोरुगत्यन्तैव।।

20 0 2 0 1
5.सामराजम्- हाउहोवाऽ3हाइ-अक्रान्त्समुद्रःऽ3प्रा।। [1]सामराजे थमे विधर्मन् मत्सि देव वृणी त्सुरि ज्योतिः प्र।। अक्रान् सामराजे च मध्यमायां पाष्टेवृत्। अचोदसायामत्रेवं न्यायां चान्यसेति। अत्र मध्यमायां चतुर्षु पादेषु आद्यायामन्त्यपादे योनावन्त्यपादे च एतेषु षट्सु पादेषु पञ्चमाष्टमे अक्षरे वृद्धौ भवतः। इतरेषु पादेष्वत्र षष्टाष्टमेऽक्षरे इत्यर्थः। सानौशब्दश्च सर्वत्राकारे नौ इति नौशब्दस्याकारे परतः ओभावविधानम्। गर्भोमहत्तत्सोमायां सर्वत्रेति गर्भोवृणीतेत्यत्राकारस्य विश्लेषः। सूर्योमहत्तत्सोमायां वैश्वज्योतिष-वात्सयोरिति सूर्यशब्दोऽत्र विकृष्टः। उगत्यन्ता इत्यादिना पूर्वयोरुगत्यन्तैव।।

3 5 3 2 4 5 2 1 2 1
6.कुत्सस्याधिरथीयम्- होऽ4वा-उहुवाऽ3-होवा-प्रकार्वियाम्[2]।। [3]कुत्सस्याधिरथीये वक्ति एति रेभन् जूतिं मते प्र। इदँ सङ्घातस्त्रिष्टुप्सु पार्थ वाराह वासिष्ठ कुत्सस्याधिरथीयादिष्विति। योनिवत्स्वरे प्राप्ते अत्रेदं सङ्घातविधानम्। पाशब्दः प्रकाव्यायां पार्थवाराहकुत्सस्याधिरथीयेष्विति पावक इत्यत्र पाशब्दस्यात्वविधानम्। स्तोभश्च सामाद्यस्सामान्ते यथान्यायमिति अत्र न प्रतिस्तोत्रीयं भवति।।

20 0 2 0
7.वैश्वज्योतिषम्- हाउहोवाऽ3हाइ। अक्रान्त्समुद्रःप्रथमेऽ343
2 3 5
विधर्मन्।। अक्रान्ज्योतिषेथमेदेववृणी प्र। अद्रिरभ्यासे प्रत्ययेऽक्रायां वैश्वज्योतिषवात्सप्रार्तन्देष्विति। अद्रिभिरित्यत्र दिशब्दात्परस्य विसर्जनीयस्याभ्यासे प्रत्यये लोपविधानम्। संक्षारवैश्वज्योतिष-गोराङ्गिरसेषु नियान्त इति अत्र सर्वासु पादान्त्यस्याक्षरस्यावृद्धिः।

1...सिदेववृणीज्योतिः। 2. ग- प्रकार्वियाम् (2 10 2 1) ।। 3.कुत्सस्याधिरथीये इति रेफन् जूतिंमते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अददेव्येव्यद्रिभिरिति तत्र सर्वत्रावृद्धिप्राप्ते ब्ये, द्रिरित्येतयोः पादान्तभूतयोः वृद्धिविधानम्। नासौशब्दस्य सर्वत्राकारे इति अत्र नौशब्दस्याकारे परतः ओभावविधानम्। गर्भोमहत्तत्सोमायां सर्वत्रेति अकारस्य विश्लेषः। सूर्योमहत्तत्सोमायां वैश्वज्योतिषवात्सप्रयोः इति र्येशब्दः सङ्कृष्टः। स्तोभश्च सामाद्यस्सामान्त इति पूर्ववत्। प्रतिस्तोत्रीयं बोधीयेत्यादिना अत्र प्रतिस्तोत्रीयं निधनविधानादत्र सामान्त एव।।

20 0 2 0 1 अ
8.वैश्वज्योतिषम्- हाउहोवाऽ3हाइ । शिशुञ्जज्ञानँहर्यऽ3ताम्मृ
1 1 1
जन्ताऽ345इ।। वैश्वज्योतिषाद्ये अकारे गोचनाविति। योनौ वैश्वज्योतिषेष्विति द्वितीयतृतीययोः पादयोरुपान्त्यस्याकारस्य गो शब्दस्य च वृद्धिः। अत्र वृद्धिर्नभवतीत्यर्थः। ऋषिकृच्छिशुं देव्येत्यादिना कृशब्दस्यानार्भावः। स्तोमश्चसामाद्यस्सामान्ते इति पूर्ववत्।।

1 1 0 2 1 2
9.तृतीयं वात्सप्रम्- होईऽ2-(त्रिः)। अक्रान्त्समुद्रःप्रथ।। त्सप्रे सेनोदेवान् पूर्व प्र । गोष्ठप्रतोदेत्यादिनात्र सर्वासु पादादिर्यथर्चम्। त्सप्रे द्वितीयार्थे प्र। उत्तमायामाद्ये इति। अनेनापि पादादिभूतस्य यथर्चविधानम्। सानौ शब्दश्च पूर्ववदोभावः। अद्रिभिरभ्यास इत्यादिना द्रिशब्दात्परस्य विसर्जनीयस्य लोपविधानम्। गर्भोर्महत्तदित्यादिनात्र विश्लेषः। सूर्योमहत्तेत्यादिनार्येशब्दः सङ्कृष्टः। स्तोभश्च सामाद्यस्सामान्त इति पूर्ववत्।।

30 40 3 4 5
10.गौशृङ्गम्- आजागृर्विर्विप्रः।। पर्वचतुष्टयं प्रस्तावः। द्विपात्सञ्जय इत्यादिना सूत्रकारः। षोडशाक्षरो नानदस्य तथा गौशृङ्गसञ्जययोरिति। शृङ्गे इत्यत्र सर्वासु प्रस्तावोपान्त्यस्य वृद्धिः। शविशृङ्गे इत्यत्र सर्वासु स्तोत्रीयासु प्रस्तावाद्युच्चम्। योनौ नीचम्। वाहेशृङ्गे वत्सायामित्यत्र सर्वासु प्रतिहाराद्युच्चम्। योनावेवनीचम्। निकामावितशृङ्गयोरिति निकामाध्वर्यवो इत्यत्र माच्छब्दात्परयोरिति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विसर्जनीयाकारयोर्लोपः। गौशृङ्गेऽष्टादश विंशे इति। योनौ षोडशाष्टादशाक्षरयोः कर्षणम्। अत्राष्टादशविंशयोरित्यर्थः। वाचि सर्वमोभवतीति ओभावे प्राप्ते अनुस्थमिति सुशब्दस्य प्रकृतिभाव प्राप्ते ओवापरायां त्वोपरायां त्वोभवतीति रथिरासस्सुहस्त्येत्यत्र सुशब्दस्य ओवापरायाः वाचिप्रत्यये ओभावो भवति। अद्रिसंवर्धितायां वितशृङ्ग्योरिति अद्रिमित्यत्र द्रिशब्दात्परस्य वाचिसर्वमोभवतीति अनेन लोपप्राप्तस्य पदान्तस्य मकारस्यातिहारः।।

11.पूर्वयामम्-पुनानोआऽ2-क्रमीदाऽ234भी।। यामे क्रमीं दभि प्र। घं यामे इत्यत्र महित्रीणा द्वितीयस्य दीर्घाक्षरस्यावृद्धिः। हितपौष्कलेत्यादिना पुनानो इत्यत्र नोशब्दस्य प्रत्युत्क्रामप्राप्ते अभिगानविधानम्।।

12.उत्तरंयामम्[1]- पुनानोअक्रमीदभि ।। पुनायाम इत्यत्र प्रथमायां प्रस्तावादिर्नीचैः। यामे चेति महामिन्दो इत्यत्र ओस्तोभेपरतः ओकारस्यात्वविधानम्।।

13.गोराङ्गिरसस्यसाम-ओहोइहुऽ3वाऽ23इ-हुवए-पुनानोआऽ3 क्राऽ3मीदभि[2]।। गोराङ्गिरसोविच प्र। संक्षारवैश्वज्योतिषगोराङ्गिरसेषु निधनान्त इति। अत्र सर्वासु निधनान्तस्याक्षरस्यावृद्धिः। स्तोभश्चसामाद्यस्सामान्ते इत्यादि सामान्यमेव। न रवे विकल्पे प्रियावसु सिसीदतु भूरिते वसु न सन्तनिनि निधनत्वादिति। सीदत्वित्यत्र तुशब्दस्य प्रकृतिभावे प्राप्ते आइभावविधानम्।।

14.अयासोमीयम्- एताऽ3मूऽ3त्यन्दशक्षिपाः।। अयासोमीयेन्द्रेण प्र। आयेभावश्चेत्यादिनात्र आयेभावो न भवति।।

---

1. ग- यामोत्तरम्।। 2.ग- पुनानोआऽ3क्राऽ3मी दभि ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

20 0 1 20 10
15.वाराहम्- हाउहाउ-हुप्-प्रोअयासाइत्[1]।। जगतीषु च वाराह इति। पदान्ते काम्पेत्यादिनात्र पदान्ताक्षरस्य पदादौ च दीर्घाक्षरस्य च कर्षणे प्राप्ते अकर्षणविधानम्। त्रिष्टुभिचोतायामिति विशेषणात् ऊतास्वरस्य द्वितीयचतुर्थस्थयोर्दीर्घाक्षरयोरत्र वृद्धिर्न भवति। प्रोवाराह ऊता कयास्थिरामिति अत्र सर्वासु स्तोत्रीयासु चतुर्थ पादे योनौ तिरेभन्नित्यत्र तत्स्थाने कयास्थिरस्वरो भवति। उपत्वाजा प्रथमे कयास्थिरा। अन्येष्वेव च पादेषु द्वितीयमकर्षणमिति ।।

3 2 3 2 5 0 0
16.पूर्ववासिष्ठम्- उहुवाइ-धर्ताऽ234औहोवा।। पूर्वेष्ठ उहुवा इति उहुवाइशब्दोऽत्र नीचारम्भः। परयोश्चान्येष्विति। धर्ता असाविसोमतृचयोस्सर्वासु चतुर्थपादे पदान्ते काम्पापदादौ च दीर्घे इत्यनेन पदान्तस्य पदादौ च दीर्घेऽक्षरस्य काम्पायां प्राप्तायां अत्र वृधान्ताविधानम्। सिष्ठत्रैशोकयोश्चेति, अस्यार्थः। स्वस्सिषासन्नित्यत्र स्वशब्दात्परस्य विसर्जनीयस्य तृतीयादिन्यामित्यादिना अलोप-प्राप्तस्य स्वस्सर्वत्रेति अतिहारप्राप्तस्यात्र पुनरतिहारविधानम्। इन्दुर्धर्तायां वासिष्ठ इति इन्दुर्हिन्वान इति अत्र दुशब्दात्परस्य विसर्जनीयस्य औहोवायां प्रत्यये लोपविधानम्। तृतीयादिन्यामि-त्यादिनात्र पदान्तानामाभावे प्राप्ते व्यञ्जेति अत्र तविष्यमाण इत्यत्र पदमध्यगतस्याभावविधानम्। जठरेषूद्धत्काव वासिष्ठाभिक्रन्दार्के ष्विति। जठरेष्वित्यत्र षुशब्दात्परमवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य वकारस्य लोपविधानम्। त्रिष्टुभिचोतायामित्यादि विशेषणात् अत्र धर्ताऽसावि तृचयोरइताया द्वितीयस्य चतुर्थयो-दीर्घाक्षरयोरवृद्धिः। धर्तासावितृचयोश्च वासिष्ठ इति । धर्ताऽसावि तृचयोस्सर्वासु तुरीयपादे अन्त्यं पर्व कयास्थिरामापद्यते। तृतीयारम्भ इत्यर्थः। उपत्वाजा प्रथमे कयास्थिरा ।अन्येष्वेव च पादेषु

20 1 0
1.ग- प्रोअयासाइत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयमकर्षणमिति अस्यार्थः। धर्ताऽसावि तृचयोस्सर्वासु स्तोत्रीयासु उपान्त्यपर्वणः कर्षणवृद्धे न भवतः। योनावेव कर्षणवृद्धिः।।

17.उत्तरवासिष्ठम्[1]- हाइ-उहुवाइ-असाऽ234औहोवा।। हाइउहु वाइसिष्ठे राजे । पूर्वेष्ठ उहुवाइ इति विशेषवचनात् अत्र उहुवाशब्दो द्वितीयस्वरः। अत्येष्यव्यमित्यत्र षिशब्दात्परमवृद्धादित्यादिना व्यवधानस्य यकारस्य द्व्यन्तस्थ परेतु लोप इति लोपः। श्येनो अत्यस्सिष्ठे इति तृतीयादिन्या सर्वपदान्तानामाभावे प्राप्ते श्येन इत्यत्र नश्शब्दस्य अत्योन इत्यत्र त्यशब्दस्य ओभावविधानम्। उभयत्र सामान्यलक्षणं पूर्वस्मिन्नुक्तम्। स्तोभश्च सामाद्यस्सामान्ते यथान्याय-मिति पूर्ववत्।।

18.इन्द्रस्यापामीवम्- प्रोआ।। इन्द्रस्यापामीवेनाति प्र। संवरणेषु प्रवोधियायां प्रवल्लौश सारथ्यपामीवास्विति। संवरणेष्वित्यत्र षुशब्दात्परमवृद्धादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परादित्यादिना लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्।।

19.वायोरभिक्रन्दः- धर्तादिवःपवर्तेकृत्वियौ ।। क्रन्देशूर इन्द्रस्य इत्यगतिः। वायोर्धर्तेति । अत्र प्रथमायां प्रस्तावादिर्नीचैः। स्वःकावाभिक्रन्दयोरिति। स्वस्सिषासन्नित्यत्र स्वः शब्दोऽत्र सङ्कृष्टः। धर्तायां ज्ञीय कावाभिक्रन्देष्विति । अनुमाद्योनृभिरित्यत्र नृशब्दस्या-नार्भावः। धर्तायां कावावासिष्ठाभिक्रन्दार्केष्विति अत्र षुशब्दात्परम-वृद्धादित्यादिना व्यवधानप्राप्तस्य वकारस्य लोपविधानम्।।

20.सिमानां निषेधः- असो-वाहाइ।। सिमासामराजे चतुर्थ तृतीये देवसिते दुरिता इति। अस्यायमर्थः। योनौ तृतीयचतुर्थयोः

---

1. ग- वासिष्ठम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पादयोः तृतीयं पर्व ऋक्स्वरवदुच्चनीचम्। अत्र सर्वासु स्तोत्रीयासु तृतीयपादे तृतीयपर्वणि पञ्चमस्य अक्षरस्य तृतीयस्वरनीचविधानम्। पूर्वेषां चतुर्णां तृतीयस्वरे इत्यर्थः। तच्चतुर्थपादे तृतीयपर्वणि चतुर्थस्य अक्षरस्य मन्द्रस्वरविधानम्। पूर्वेषां त्रयाणां चतुर्थस्वरे इत्यर्थः।। इति चतुर्थः।।4।।

==****==

।। पञ्चमो विंशः।।

1.जराबोधीयम्- प्रवाजियोवा।। (2 0 1 2) बोधीये प्रवाज्याद्ययोरुद्गीथे तृतीये द्विः कृष्टम्। चतुर्थमन्त्यायां इति अत्राद्ययोः स्तोत्रीययोरुद्गीथे तृतीयाक्षरस्य द्विः कर्षणविधानम्। अन्त्यायां चतुर्थस्य अक्षरस्य द्विः कर्षणविधानम्। अन्यत्र सप्तमस्याक्षरस्य एककर्षणमिति। फुल्लभाष्य-कारेणोक्तम्। प्रवाज्याद्यायां चेत्यत्र प्रथमायामुद्गीथोपान्त्यस्य वृद्धिः। ये च तृतीयाद्वेष्णात्तृतीयमिति। अस्यार्थः जराबोधीये सर्वत्रेति अत्र सर्वासु प्रतिहारतृतीयस्य ह्रस्वस्यापि चतुर्थपर्वणि तृतीयस्याक्षरस्योच्च-विधानम्। न प्रसो इति । अत्र चतुर्थमित्यत्र नश्शब्दस्यास्तोभे सन्धिगाने प्राप्ते पदगानविधानम्।।

2.अभिनिधनं काण्वम्- औहोहोहाइ-आइही-आदा।। (2 0 1 2 1 2 1 2) [1]अभ्यन्ते शिगा रीय रेज धीभिः प्रदै थिवीम्। प्र। क्रौञ्चाभिनिधनेत्यादिनात्र वृण्यादिभूतस्य ह्रस्वस्य दीर्घविधानम्। नासाद्दधीन् मुद्रन्न स्वब्दी चर्कृत्या निष्यतेणिमृढ्वमिति । वारानिहोतयोश्चेति असंयोगे परतः वारानिहोतयोर्द्वितीयाक्षरस्य वृद्धिप्राप्ते नासाद्दधींरित्यत्र च शब्दः संयोगे प्रत्यये वृद्धिविधानम्। गणगीतीनामन्ते निधनमिति निधननियम उक्त एव।।

---

1. ख-अभ्यन्तेशिशिनानियारेजसभिः प्रदैथीवीम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

3.अभिनिधनंकाण्वम्- औहोहोहाइ - आइही - आत्वा ।। आत्वाभ्यन्त इन्द्रहरीरसी प्र। पिबात्वस्याभि निधनयोरिति पिबात्वस्येत्यत्र तुशब्दात्परमवृद्धादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परावित्यादिना लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्। सुतिः पिबात्वस्याभिनिधने काण्वे आसू इत्यत्र आइभूत इति तिशब्दात्परस्य विसर्जनीयस्य स्तौभिके परतो लोपविधानम्। शेप्या भारद्वाज इति प्या शब्दोऽत्रविकृष्टः। क्रौञ्चाभिनिधनेत्यादिनात्र वृण्यादिभूतस्य ह्रस्वस्यापि दीर्घविधानम्।।

4.नैपातिथम्-अग्नआयाह्यग्निभाऽ3इर्रे।। ह्यग्निभिश्चरन्त्यस्तावे नैपे इति सङ्कृतौ नैपोर्जो महस्ते मह्नाचान्त्य इति । अत्र तृतीयायां ऊर्ज इत्यत्र ऊकारस्य नीचविधानम्। पयघृतवनीति। अस्यार्थः- अत्र प्रथमायामात्वामनक्तुप्रयतेत्यत्र ऋक्स्वरे उदात्तस्य पर्वमध्यगतस्य प्रयशब्दस्य तृतीयायां घृतकेशमित्यत्र ऋक्स्वरे उदात्तस्य पर्वमध्यगतस्य घृतशब्दस्य नीचविधानम्। पञ्चभक्तिषु सर्वनिगदवर्तिन्यार्चिकानि पर्वाण्यादिमध्यान्तेषु पिबमन्तवदुक्थ्ययोर्विन्या सङ्कृति यशसोः। ऊ सदो विशीयाष्टेडरुपेष्विति अत्र दँष्ट्रेसन्तन्यवाजंभे, हरिं हिष्ठीये, पेम गौतमे, सुहस्त्या गोष्ठार्कपुष्पयोरिति एवमादिन्यपवादसूत्राणि विमृश्य ऋक्स्वराबाधेन गेयानि। नैपे गीथतृतीयमिति। सर्वत्र नैपातिथे उद्गीथे तृतीयस्य नीचप्राप्ते चतुर्थं चेति अत्र मध्यमायां यजिष्ठं बर्हिरित्यत्र तुरीयस्य बशब्दस्य नीचविधानम्। इन्द्रायच्छन्ति स्रुचश्चरन्ति नैपे । दीर्घवृद्धोपहित इत्यादिना स्रुचश्चरन्तीत्यत्र आइभूतादीशब्दात्परं व्यवधानप्राप्तस्याकारस्य लोपविधानम्। ओवौकारयोरित्यादिना सर्ववर्णानामाभावे प्राप्ते पूर्वमित्यत्र पूशब्दस्य उवर्णन्तु न सर्वत्राभवतीति अनाभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5.नैपातिथम्- इन्द्रमिद्देवतातयाऽ3ए।। नैपेन्द्रे स्वा प्र। नैपे गीथतृतीयमिति। अत्र सर्वासूद्गीथतृतीयस्य नीचम्। पयघृतवनीति। समीके वनिन इत्यत्र ऋक्स्वरउदात्तस्य निशब्दस्य नीचविधानम्। नैपोज इत्यादिनात्र सर्वासु तृतीयपादाद्युच्चम्। इन्द्रस्सूर्य स्रुचनैपकीर्त्येष्विति। अत्र प्रस्तावोद्गीथ उपद्रवेषु र्यशब्दः सङ्कृष्टः। सूर्यमरो नैपइति। ओवौकारयोरित्यादिना सर्ववर्णानामाभावे प्राप्ते अरोचयदित्यत्र पदमध्यगतस्य रोशब्दस्यानाभावः।।

6.नैपातिथम्- बण्महाँ असिसूरियाऽ3ए ।। नैपेगीथतृतीयमिति पूर्ववत्। नैपोर्जो महस्ते मह्नाचान्त्य इति। अत्र प्रथमान्त्ययोः स्तोत्रीययोः महस्ते सतो मह्नादेवानामसुर्य इति एतयोराद्यस्याक्षरस्य नीचविधानम्। रङ्गः स्वःपृष्ठ नैपातिथरश्मेष्विति। ओवौकारयो-रित्यादिना सर्ववर्णानामाभावे प्राप्ते महाँ असीत्यत्र हाँ शब्दस्य उपद्रवभक्तौ अनाभावविधानम्। आन् कारो वृद्ध इति महाँ इत्यत्रानुनासिकमेव। बण्महाँ असीत्यत्र सूर्यशब्दः सङ्कृष्टः।।

7.श्रायन्तीयम्- अच्छानश्शीरशोऽ1चाइषाम्।। श्रायन्तीये वारि प्र। नमसालेयवच्छ्रायन्तीय इति, अस्यार्थः- लेये यस्याच्छोत्तरयोः परिप्रत्नयोश्चेति अनेन कालेये नमसेत्यत्र ऋक्स्वरे उदात्तस्य नकारस्य नीचत्वं विधीयते। अत्र प्रथमायां निगदवर्तिनिपर्वणि ऋक्स्वरवदुच्च-नीचप्राप्ते लेयवन्नीचमेवेत्यर्थः। श्रारेभद्रादेवे पुरुदाना अमृतोग्रहणमिति। अत्राद्ययोः स्तोत्रीययोः प्रतिहारे आद्यस्याक्षरस्य नीचविधानम्। पुरुप्रशस्तदानायवार्याणामिति अमृतोग्रहणमिति। द्वितीयोभूदमृतेष्वित्यत्र निगदवर्तीनि पर्वणि ऋक्स्वरे उदात्तस्य मृशब्दस्योदात्तत्वे प्राप्ते नीचविधानम्। द्वितीयात्कृष्टं तालव्यं हाइशब्दश्चाभवति ओस्तोभे ध्मादौ प्रत्यय इति। अत्राद्यन्तयोः स्तोत्रीययोः प्रथमस्वरादौ स्तौभिके ओकारेपरतः उतये इत्यत्र

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

येशब्दस्य विशीत्यत्र शिशब्दस्य च द्वितीयात्कृष्टं तालव्यस्याभाव विधानम्। स्वासुनकारः श्रायन्तीये इति। वार्याणामित्यत्र णां शब्दस्यानाभावः । मर्त्येषुदानायवार्याणां लेयश्रायन्तीययोरिति । अवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य वृद्धात्पराविति लोपप्राप्तस्य पुनरलोपविधानम्।।

।।क्षुद्रं समाप्तम्।।

इत्यूहगानम्

==*****==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दशरात्रः

।।प्रथमा दशतिः।।

1.रथन्तरम्- आभित्वाशूरनोनुमोवा[1] ।। अष्टाक्षरः द्व्यक्षरयोः प्रस्तावः। पशवो वै बृहद्रथन्तरेऽष्टाक्षरेण प्रथमाया ऋचः प्रस्तौति अष्टाशफँस्तत्पशूनवरुन्धे। द्व्यक्षरेणोत्तरयोर्ऋचोः प्रस्तौति द्विपाद्यजमानो यजमानमेव पशुषु यज्ञे प्रतिष्ठापयति इति ब्राह्मणवचनात् सूत्रकारश्चाह ककुभावुत्तरोद्व्यक्षरतः प्रस्तावः सर्वत्रेति अत्र सर्वत्र प्रथमायां प्रस्तावाद्यस्याक्षरस्य वृद्धिविधानम्। तरे हारादिति सर्वत्र रथन्तरेषु प्रतिहाराद्यस्य अक्षरस्य वृद्धिप्राप्ते अनुत्तरयोस्वास्विति अत्रोत्तरयोः स्तोत्रीययोः प्रतिहाराद्यस्याक्षरस्या-वृद्धिविधानम्। रथन्तरे सर्वमाभवति स्पर्शगभस्त्योर्वर्जमोस्तोभे प्रत्यये इति। रथन्तरे सर्वत्र उपद्रवभक्तौ ओस्तोभेपरतः स्पर्शान्त्यं स्त्योशब्दं विना सर्ववर्णानामाभावविधानम्। रथन्तरे वृषा अश्विनोर्व्रते ओस्तोभे प्रत्यये इति । रथन्तरे सर्वत्र ओस्तोभेपरतः पूर्वस्याक्षरस्य ह्रस्वस्यापि दीर्घविधानम्। गिरागिरा प्रप्रनशँसिषँ तस्थुषश्चेत्यनुब्राह्मणं स्वाध्याय इति। योनौ तस्थुष इत्यत्र सुस्थुष इति वक्तव्यं पादान्त्यात्परस्वरो विकृष्यत इत्यनेन जनिष्यते श्वायन्त इति प्रश्लेष प्राप्ते विश्लेषविधानम्।।

2.रथन्तरम्- आइनावोअग्निन्नमसोवा[2]।। रथन्तरे स्तावाद्य-मित्यादि प्रथमायां प्रस्तावाद्यस्य वृद्धिः। रथन्तरे सर्वमाभवतीत्यादिना ह्रस्वस्यापि दीर्घविधानम्। अवृद्धादीनृक् हा इति सुशब्दात्परं व्यवधानप्राप्तस्य वकारस्य वृद्धात्परौ य्वौ लुप्ताविति अत्र मध्यमायां

1.ख- आभित्वाशूरनोनुमोवा।। 2.ख-आइनवोअग्निन्नमसोवा।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपद्रवादौ वकारस्य लोपः। वाचि सर्वमोभवतीति ओभावप्राप्ते अनुस्थमिति सदुद्रव इत्यत्र दुशब्दस्य ओभावो न भवति।।

3.रथन्तरम्- प्रात्युवदर्श्यायतोवा।। द्वितीये सन्धितरेणोति प्र। रथन्तरे स्तावाद्यमित्यादिना वृद्धिः। दर्श्या बृहद्रथन्तरयोरिति अत्र दर्श्य शब्दः सङ्कृष्टः। रथन्तरे सर्वत्राभवतीत्यादिनार्छिवदित्यत्र स्पर्शान्त्यस्य तकारस्य नाभावः। रथन्तरे वृषेत्यादिना स्तोभेपरतः पूर्वस्य ह्रस्वस्य दीर्घविधानम्। पादान्त्यात्पर इत्यादिनात्र प्रथमायां स्तोत्रीयायां पादान्त्यात्स्वरस्य विश्लेषः।।

4.रथन्तरम्- आइमाउवान्दिविष्टयोवा[1]।। तृतीये शँहिसोमि प्र। मह्वेवस इमाउवायां वारदेव्य रथ बृहत्स्विति। मह्वे इत्यत्र ह्वेशब्दात्परस्याकारस्य विश्लेषः। पादन्त्यादित्यादिना इत्यत्र नाशब्दात्परस्याकारस्य विश्लषः। सूनृतावत इत्यत्र च विश्लेषः। रथन्तरे सर्वमित्यादिना आभावः सर्वत्र । रथन्तरवृषेत्यादिना ह्रस्वस्यापि दीर्घविधानम्। गणगीतीनामन्ते निधनम्।।

5.बृहत्[2]- औहोइत्वामिद्धिहवामहाऽ3ए।। बृहति सर्वत्र प्रथमायामष्टाक्षरेण प्रस्तावः। उत्तरयोद्व्यक्षरः। पशवोवै बृहद्रथन्तर-मिति पूर्वं व्याख्यातम्। त्वामिति त्वांकाष्ठासु प्रति प्रतिहारे बृहतीति अत्र सङ्कृष्टौ। प्रस्तावे प्रतिहारे बृहति चेत्यत्र सर्वत्र प्रतिहारादिः नीचैः। अयोनौ। अत्र प्रतिहाराद्युच्चम्। प्रथमायां रहस्ये बृहतीति अस्यार्थः। रथ्यमित्यत्र थ्यशब्दस्य पदमध्यगतस्य तालव्यस्य यकारे च प्रत्यये इत्यादिना आभावे प्राप्ते आइभावविधानं इति कृष्टादिति उपद्रवभक्तौ कृष्टात्परस्सर्वत्र वृद्धिप्राप्ते प्रत्यवरोहे चेति अत्रोत्तमायां उपद्रवे विकल्पपक्षे कृष्टात्परस्य वृद्धिविधानम्।।

1.ख- आइमाउवान्दिविष्टयोवा ।। 2.ग- बृहत्साम।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

6.अन्तरिक्षम्- हा^20^वभिसो^0^मा।। पर्वप्रस्तावः। अग्निन्दूता-स्वरत्वात्। रिक्षस्थानयोश्चेति अत्र सर्वासु पादादि भूतानां यथर्चमुच्चनीचविधानम्। नहारे मत्सराय आकूदेवानग्निमित्यत्र प्रथमायां प्रतिहारे मत्सरा इत्यत्र मकारस्य ऋचि नीचभूतस्य उच्चविधानम्। ऊसदो विशीयाष्टेडरुपेष्विति ऊर्मिणेत्यत्र ऊकारस्य ऋक्स्वरवन्नीचमेव। ओवौकारयोरनन्तरस्वर इत्यादिना सर्ववर्णाना-माभावे प्राप्ते रहस्य नृगन्तीयश्चानृगन्तीयश्च स्पर्शः प्रथमस्वरे नामिविसर्जनीयश्चनाभवतीति अत्र मदमिति मदं शब्दस्य बृहदित्यत्र च ह च्छब्दस्य प्रथमस्वरप्राप्तस्यानाभावविधानम् । मद्यं द्विर्हिंकारेत्यादिना मद्यशब्दोऽत्र विकृष्टः।।

7.पञ्चनिधनं वैरुपम्- य^1^द्या^0^व^2^इन्द्र^0^ते^1^शतम्-ए^2^।। वान्तः प्रस्तावः। वैरुपे तु देवतानामनुद्धारः प्रयोगसिध्यर्थम् । देवतानामनुद्धारः। इतरेषां स्तोभानामुद्धार एव। देवतापदं देवतापदमिति वैरुपे निधनानीति सूत्रकारवचनात्। अत्र पददैवतयोः व्यत्यासः योनिवन्न भवति। वैरुपे देवता व्यत्ययस्य अश्वायैव पुरस्तादिति कात्यायनेना-प्युक्तम्। गोष्ठप्रतोदेत्यादिनात्र पादादीनां यथर्चमुच्चनीचं ह्रस्ववैरुपयो श्चेत्यत्र उत्तरयोः स्तोत्रीययोः तृतीयपर्वणि योनिवत्सर्ववर्णानां ऋक्स्वरवदुच्चनीचप्राप्ते अनुस्थमिति सुशब्दस्यात्र ओभावो न भवति। वृष्ण्यावैरुप इति। अत्र वृष्यशब्दः सङ्कृष्टः। सूर्यावैरुपान्तरिक्षयो रितिर्याशब्दः सङ्कृष्टः। वैरुपे तु देवतापदनिधने इति फुल्लकारेणापि पददैवतयोः व्यत्यास उक्तः। वैरुप शक्वरऋषभ पूर्वयोरर्धेडा इत्यत्र पूर्वयोरिडिति सामान्तेद्ध्येद्धेति। अत्र सामान्ते इट् इडेत्यर्थः।।

8.अरिष्टम्- हा^30^ह-हो^20^इ^3^या^0^-पा^4^वी^5^।। त्रिरुक्तस्य सामादावाद्यं वचनम्। यथभद्रश्रेयोरिष्टशाक्वर ऋषभ स्वाशिरामर्क सप्तहैक-वृषाणामिति। अत्र स्तोभानामाद्यं वचनम्। अरिष्टे पवित्राणि तिभु प्र।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सस्तोभ पदविभाग्यम्। अरिष्टे च येवि। इत्येतौ शब्दाविति अत्र प्रथमायां द्वितीयपादे तृतीयपर्वणि अन्त्याक्षरस्य येशब्दस्य चतुर्थपर्वणि द्वितीयस्य विशब्दस्य वृद्धिविधानम्। अत्र सर्वेषु पादेषु तृतीय पादादौ पदान्ते काम्पा पदादौ च दीर्घे इति अस्य सूत्रस्यार्थो वर्तते । त्रिरुक्तानामन्त्यं वचनमिति अत्र त्रिरुक्तभूतस्य निधनस्यान्त्यं वचनमेव। होइडेति।।

2 0 0 0 0 0 0
9.आथर्वणम्-उहुवाओहा-औहोवा-पवस्वदा।। पर्वत्रयं प्रस्तावः। अग्निन्दूतास्वरत्वात्। अविधाद्य इत्यनेनोत्तरस्तोभोऽत्र प्रस्तावाङ्गं न भवति। आथर्वणदेवस्थानस्वरान्तरिक्षपादान्तस्य वृद्धस्य उस्थ संज्ञकस्य मधौ मतौ तस्थौ योनौ चेति परिसंख्यानुरूपेण प्रकृतिभावे प्राप्ते ओस्तोभपरत्वादत्राइभावो न भवति।।

20 0 0 0 0 2 3
10.महावैराजम्-हाइयाहोइयाहोइयाऽ343पिब।। वैराजे त्रीणि प्र। द्व्यक्षरः प्रस्तावः यौक्ताश्वेत्यादिना। वैराजे योनावन्त्ययोर्विनतमिति। अत्र प्रथमायामुत्तरयोः पादयोः विनतस्वरमेव। नोत्तरयोरित्यर्थः। वैराजे योनौ विनतप्रतिषेधः। अनेनापि यो वर्जं सर्वत्र विनतप्रतिषेधः। वैराजे प्रसशब्दावृदिति। अत्रोत्तरयोः स्तोत्रीययोः अन्त्ययोः पादयोः प्रसशब्दयोरवृद्धिविधानम्। वैराज इत्यादि स्तोत्रीयान्ते सर्वास्विति। अत्र सर्वासु स्तोत्रीयासु अन्ते इयदि स्तोभो अन्ते भवति। स्तोत्रीयाद्ये चाक्षरे मत्स्व संयुक्त इति। अत्र सर्वासु स्तोत्रीयासु आद्ये द्वे अक्षरे तस्या स्तोत्रीययो नौच मत्स्व संयुक्ते भवतः। नौ च सर्वास्विति । अत्र सर्वासु स्तोत्रीयासु पादानामनुच्चविधानम्।। इति प्रथमा।।1।।

==*==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ द्वितीया दशतिः ॥

1 0 20 1 2
1.यण्वम्- अर्षासोमद्युमत्तमः॥ यण्वापत्ययोः यथा ग्रामेगेय इति। यथावेदसामाभि आद्यन्तयोः स्तोभावित्यर्थः। क्रोशौपगवे-त्यादिनात्र प्रस्तावाद्युच्चम्। वान्तः प्रस्तावः। विष्णवे सहस्त्रिणमिति। यण्वापत्ययोरिति अस्यार्थः। आउवाव्यवहितमित्यादिना सर्ववर्णानामाभावे प्राप्ते रहस्ये च न सर्वमाभवति व्यञ्जनं च न लुप्यते यथा वाजीय नित्यवत्सातीषङ्गसिमासु चेति रहस्ये सर्वत्र सर्ववर्णानामाभावे प्राप्ते यत्राउभावो व्यञ्जनलोपश्च तद्वक्ष्याम इति अत्र रहस्ये विष्णवे इत्यत्र वेशब्दस्य सहस्त्रिणमित्यत्र णं शब्दस्य च पुनराभावविधानम्॥

2 0
2.बार्हद्गिरम्- इन्द्रोमदा। पर्वप्रस्तावः॥ अग्निन्दूतास्वरत्वात्। हद्गीरे हिविहरि प्र। नृभिर्दधिरिन्द्रोमदायां बार्हद्गिरपार्थुरश्मयोरित्यत्र स्तौभिरे स्वरेपरतः नृभिर्दधिरित्यत्र भिशब्द दि शब्दयोराङ्भूतयोः परस्य विसर्जनीयस्य लोपविधानम्। सेन्योसि बार्हद्गिरसन्तनिनोरिति। वीरसेन्य इत्यत्र न्यशब्दात्परस्य पाददिभूतस्य एङःपदान्तादित्यनेन प्रश्लेषप्राप्तस्य पादन्त्यात्पर इत्यादिना विश्लेषप्राप्तस्याकारस्य पुनः प्रश्लेषविधानम्। रहस्ये च न सर्वमाभवतीत्यादिना असुर्य इत्येतेषां ऋगन्तभूतानां वर्णानामनाभावः॥

1 2 3 5
3.पार्थुरश्मम्- एईन्द्रा - ओऽ234वा ॥ पर्वद्वयं प्रस्तावः। जारास्वरत्वात्। रश्मेइन्द्रस्तमिन्द्रसेवा-प्र। इन्द्रोमदायामिच्छब्दः पार्थुरश्मे इति तमिन् महदित्यत्र मिशब्दात्परस्य तकारस्य लोपः। पार्थुरश्मे यदुदीरायामिति यदुदीरित्यत्र दुशब्दात् परस्य तकारस्य लोपः। नृभिर्ददिरित्यादि पूर्वस्मिन्सामन्युक्तम्। आन्धादिश्मे। अत्र सर्वासु आन्धास्वरस्यादिभूतस्याक्षरस्य वृद्धिप्राप्ते अधृष्णास्मान् मधोर्वृष्णारस्वीवस्वीश्चेति। अत्र तृतीयायां धृष्णव इति अत्र धृशब्दस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्माँ इत्यत्राकारस्यावृद्धिविधानम्। ओवौकारयोरित्यनेनाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति तृतीयायां दुशब्दस्यानाभावः। रङ्गः स्वःपृष्ठ नैपातिथरश्मेष्विति अस्माँ इत्यत्र रङ्गस्यानाभावः। अपदान्तः समानश्चेति वृद्धानामुस्थाक्षराणां प्रकृतिभावे प्राप्ते नरवे विकल्पे प्रियावसु सिसीदतु भूरिते वसु न सन्तनिनि निधनत्वात् सोम्यं मध्विति। भूरिते वस्वित्यत्र सुशब्दस्याउभावः। इमौ मतौ मधौ तस्थौ योनावाहेति पादमध्यभूतानां पदान्तानां वृद्धानां उस्थसंज्ञकाना-मौकाराणां परिसङ्ख्यानुरूपेण प्रकृतिभावग्रहणादत्र तृतीयायां तृतीय चतुर्थयोः पादयोः वसौ इत्यत्र उस्थसंज्ञिकस्याउभावः।।

4.रायोवाजीयम्-ए^{1}स्वादौ^{2}ः।। पर्वप्रस्तावः। जारास्वरत्वात्। वाजीये वारि प्र। क्रोशौपगवेत्यादिनात्रोत्तरयोः उद्गीथाद्युच्चम्। योनावेवनीचम्। व्रतान्यःस्य श्यैतवाजीययोरिति न्यशब्दः सङ्कृष्टः। अग्निंवो वाजीये उपान्त्यं कृष्टं सर्वास्विति। अत्र सर्वासु तृतीये उपान्त्यात्पूर्वस्याक्षरस्य कर्षणम्। रहस्ये च न सर्वमाभवतीत्यादिना स्वरान्त्यमित्यत्र मकारस्यानाभावः। समानोदर्केष्वित्यादिना पूर्वयोरुद्धारः।।

5.शाक्वरऋषभम्- औ^{2}ऽ31म्- प^{0}वा^{0}एस्व^{0}वा^{0}एज^{0}सा^{0}एत^{2}य^{1}आ।। त्रिरुक्तस्य सामादावाद्यं वचनं इति अत्र सामादौ त्रिरुक्तानां स्तोभानां आद्यं वचनमेव। शाक्वरऋषभेत्वोष्ठ्यस्पर्शवर्जमोस्तोभे प्रत्यये इति। अत्र स्तौभिके एकारे प्रत्यये ओष्ठ्यस्पर्शं च वर्जयित्वा अन्येषां सर्ववर्णानामाभावविधानम्। ऋषभे शाक्वरे इत्यत्र सर्वास्वेकारे प्रत्यये पूर्वस्य ह्रस्वस्य दीर्घविधानम्। ऋषभे आकारान्तः क्रान्तमयोनाविति धारया इत्यत्र धाशब्दस्य चाभूषइत्यत्र चाशब्दस्य महित्वना इत्यत्र नाशब्दस्य पर्वान्तभूतस्य अकारस्य प्रत्युत्क्रामविधानम्। योनौ शोभथा इत्यत्र थाशब्दस्य प्रत्युत्क्रामो न भवति। दीर्घमेव। भे च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आकारान्तः क्रान्तमयोनावित्यत्र पूर्वसूत्रेणोक्तार्थमेव। नार्थान्तरमस्ति। हरिवींचशाक्वरऋषभे इति हरिमित्यत्र रिशब्दात्परस्य पृथिवी मित्यत्र वीशब्दात्परस्य पदान्त भूतस्य पूर्वाङ्गं प्राप्तस्य मकारस्यातिहारविधानम्। अनुष्टुप् द्वितीये ऋषभे च प्राक् चतुर्षु वर्णेष्विति योनिवत्। पाङ्क्तत्वलाभायात्र सर्वासु द्वितीयपादस्य द्वेधाकरणम्। सूत्रकारश्चाहः- पाङ्क त्वस्यानुष्टुप्सु द्वितीयं पादं द्वेधं व्यूहे चतुरक्षरशो ऋषभस्य शाक्वरस्येति। त्वाँ हरि त्वन्द्याङ्गेति गवाष्टेडसिमास्विति। त्वां त्वां शब्दौ विकृष्टौ। अवृद्धमप्याभवति ऋषभे पृथिवीमिति। अत्रावृद्धस्यापि वृशब्दस्यार्भावः। शाक्वरऋषभे चेति सर्वोद्धारोतोन्यत्रेति। अत्र सर्वस्तोभानामुद्धारे प्राप्ते अत्र देवतानामनुद्धारविधानम्। वैरूपशाक्वरऋषभपूर्वयोरर्धेडेति अत्र पूर्वयोः स्तोत्रीययोः अर्धेडा भवति। इ डिति। सामान्ते अध्यर्धा इट् इडेति।।

1 0 0 1 2 10 20 0 1 0 0
6.अष्टेडपदस्तोभः - ईडा - पवस्ववाजसातये - ईडा ।। स्तोभविभाग्यम्। अष्टेडेर्मणि प्र। स्तोभानां चेति। अत्र सर्वासु पाददिभूतानां वर्णानां यथर्चविधानम्। आर्चिकं निधनं न्यायेन महित्वनेत्यत्र ऋक्स्वरे उदात्तस्य नाशब्दस्य वृधेस्वरे प्राप्ते त्वनाद्वयुं श्रियेतिर्भा इति न्यायादपेत प्रकरणे ग्रहणादत्र नाशब्दस्य उदात्तस्य सम्प्रसारणमेव। अष्टेडरयिष्ठयोर्महित्वना दीदिहि स्वरा इति। अत्र नाशब्दस्य विकल्पपक्षे वृधे स्वरविधानम्। त्वाँ स्त्विन्द्याङ्गेत्यादिनात्र त्वं त्वां शब्दौ सङ्कृष्टौ।।

1 2 0 1
7.रेवत्यः- हावीन्द्रा-येन्दाउ। पर्वद्वयं प्रस्तावः।। मृजन्त्यायव इत्यत्र तिशब्दात्परं अवृद्धादि पदान्तादित्यादिना व्यवधानप्राप्तस्य यकारस्य द्व्यन्तस्थ परेतु लोप इति लोपः। ओकारः पादमध्येत्यादिनानेन पादमध्यभूतानां पदान्तानां उस्थसंज्ञकानां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ओकाराणां प्रकृतिभावे प्राप्ते अयेन्दो बभ्रोरेत्यादिना इन्दो इति दोशब्दस्याउ भावः।।

8.ऋषभोरैवतम्- सुरुपकृत्नुमूतये ।। षट्त्रिँशदक्षरं प्रस्तावः। षट् त्रिँशदक्षराणि च रैवतऋषभे इति। रैवत ऋषभ इद्रे प्र। रैवते जवृष्ण्यादि भूतानां ह्रस्वाक्षराणामपि दीर्घविधानम्। अञ्चोरैवतयोर्व्यम्। अःकारश्चरैवते इति। सूत्रद्वयस्यायमर्थः। आउवाव्यवहितमित्यादिना सर्ववर्णानामाभावे प्राप्ते रहस्ये च न सर्वमित्यादिना रहस्ये सर्वत्रानाभावप्राप्तः। यत्राउभावो व्यञ्जनलोपश्च तद्वक्ष्यामीत्यादि प्रकरणे ग्रहणात् अत्राद्यन्तयोः स्तोत्रीययोः तालव्यस्य मध्यमायां मकारस्य च पुनराउभावविधानम्। ऋषभे तु त्रिरुक्तानामन्त्यं वचनमिति सामान्यमत्र न भवति। त्रिरुक्तमेवात्र निधनमिति। अत्र सर्वास्वाद्ययोः पादयोः विशेषविधानात् यथर्च गानमेव।।

9.श्येनम्- ऊभाइ।। पर्व प्रस्तावः। श्येने दीर्घं शक्तिं पूर्वे देवी प्र। आपप्राथोभेददिन्द्रायां श्येने इति आपप्राथोषा इत्यत्र आद्गुण इत्यनेन प्रश्लिष्टस्य इकारस्य विश्लेषविधानम्। समानोदर्क इति पूर्वयोरुद्धारः।।

10.भद्रम्- होइहा-इमानुकम्भुवनासीषधेमाऽ3। इहा।। भद्रेरुद्धिः प्र। गोष्ठप्रतोदेत्यादिना सर्वासु पादादिः यथर्चमुच्चनीचम्। त्रिरुक्तस्य सामादावाद्यं वचनम्। यथा भद्रश्रेय इत्यादिना त्रिरुक्तानां स्तोभानां आद्यं वचनमेव।। इति द्वितीया।।2।।

==**==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

।।तृतीया दशतिः।।

2 ᑫ ᑫ 1 2
1.अग्नेरर्कः- यस्तेमदोवाऽ3राइणाऽ1याऽ2।। स्तोभपद विभाग्यम्। त्रिरुक्तस्य सामादावित्यादिनाद्यं वचनम्। स्येमहि द्वितीयमन्वयि कयामिति सर्वासु महित्रीणा द्वितीयस्य दीर्घाक्षरस्य वृद्धिविधानम्। द्वियकारस्संयुक्ते विकृष्टे पूर्वो यकारः प्लुत आकारः सम्पद्य इति । श्रवाय्यमित्यत्र विकृष्टः प्लुतस्याकारस्य विधानम्।।

3 20 1 2
2.स्वाशिरामर्कः- अयामायाम् ।।[1]

20 ᑫ ᑫ
3.देवस्थानम्- हाउपरीतोषाइ।। आथर्वणदेवस्थानेत्यादिनात्र स्तोभानामनुद्धारः । योनिवदित्यर्थः। रिक्षस्थानयोश्चेति। अत्र सर्वासु पादादिभूतानां वर्णानां ऋक्स्वरवदुच्चनीचविधानम्। नर्यः परीताया-मित्यादिनात्र र्यशब्दः सङ्कृष्टः। नोविभिः सुषावसोमायां सर्वत्रेति अत्र विश्लेषः। चित्वानवे इत्यत्र प्रश्लेषः। न्वँसङ्कृति यशसोरिति न्वशब्दस्य ऋक्स्वरोदात्तमेव। देवस्थानपूर्वयोनिधनाद्यं पदमिति पूर्वयोः स्तोत्रीययोः द्यौरित्येतावदेवनिधनम्। अन्त्यायां सर्वम्।।

1 2
4.सङ्कृति- एपारी ।। सङ्कृतिनि परि प्र। द्व्यक्षरः प्रस्तावः। परित्यनादेशे । द्व्यक्षरोवा सङ्कृति दार्ढच्युतयोरिति। रहस्ये कृतौ परीतोत्तरयोश्श्रायन्तस्सर्वास्विति। अत्रोत्तरयोः स्तोत्रीययोः अगतिः। न्वँ सङ्कृतियशसोरिति। दधन्वाँ इत्यत्र ऋक्स्वरे उदात्तस्य पर्वमध्यगतस्य न्वशब्दस्यात्र नीचविधानम्। गोष्ठप्रतोदेत्यादिनात्र सर्वासु स्तोत्रीयासु पादादिभूतस्य ऋक्स्वरवदुच्चनीचविधानम्। नर्यः परीतायामित्यादिनात् र्यः शब्दः सङ्कृष्टः। सङ्कृतिनिस्तोभाद्यं वचनं प्रतिस्तोत्रीयमित्यत्र सर्वासु हाओवेति स्तोभानामाद्यं वचनविधानम्। रहस्ये च सङ्कृतिनीतिरभिन्तर इत्यत्र भिशब्दस्य हादौ स्तोभे परतः आभावे प्राप्ते आइभावविधानम् । आष्टादँष्ट्रार्कपुष्पसङ्कृतियशस्सु

1. ख-एतत्साम एव न विद्यते।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रश्लेषः इति नोविभिरिति प्रश्लेषः । कृतिनि तृतीयेदे सर्वत्र रम्यते इति अष्टाक्षरे विरामविधानम्। तृतीये पादे पञ्चपादाः सन्ति। अत्रापि पञ्चपदप्रदर्शनार्थः। सूत्रकारश्चाह। तृतीयायां बृहतीष्वष्टाक्षरं च यथा सङ्कृतिनि इति चित्वा नव इत्यत्र प्रश्लेषः।।

2   2 2
5.भर्गः- यत्- परीतोषि।। सस्तोभपदविभाग्यम्। भर्गे हविः। प्र। भर्गस्य सामादावाद्यस्तोभान्त्यं पदमिति अत्र स्तोभानामन्त्यं पदमेवायच्छब्दः। अत्र नर्यः सङ्कृष्टः। नोविभिरित्यादिनात्र विश्लेषः। चित्वानव इत्यत्र प्रश्लेषः।।

1 2 2 1 2 2 0 1
6.यशः- परीतोषिञ्चतासुतम्।। स्तोभविभाग्यम्। कीर्त्ययश-स्सँसर्पेष्वन्तस्थोरिति नीचैः। अत्र सर्वासु निधनभूतानां पर्वान्तर्गताना-मृक्स्वरे उदात्तानामन्तस्थाक्षराणां प्रासावान्ता एव नीचविधानम्। अन्यत्रोद्गीथप्रतिहारोपद्रवेषु निधनपर्वसु अन्तर्भूतानां यथर्च्चविधानम्। अत्र निगदवर्तिष्वार्चिकेषु स्तौभिकेषु च पर्वसु आदौ मध्ये अन्ते च आर्चिकस्वरापवादः। अत्र प्रस्तावादिषु पञ्चसु भक्तिषु यान्यार्च्चिकानि स्तौभिकानि निगदवर्तीनि पर्वाणि तेषां पर्वणामार्चिकस्वरापवाद-सूत्राणि विमृश्य ऋक्स्वराबाधेन गेयानि। नोविभिरित्यादिना विश्लेषप्राप्तस्य आष्टादँष्ट्रेत्यादिनात्र प्रश्लेषः। चित्वा नव इत्यत्र प्रश्लेषः। शतमादि यशसीति गुरुषु निधनैकदेश इत्यनेन एकादेशनिधनादत्र शतमादि निधनम्।।

1 2
7.दीर्घतमसोर्कः- सूषा।। तमसेचान्धा द्वितीयेनैकं सर्वत्रेति दीर्घतमसोर्के अनुपादं द्वितीयपर्वण्याद्याक्षरस्य प्रथमस्वरविधानम्। अयोनौ प्रथमेपादे इति धर्तादिव इत्यत्र पादे योनिवत्स्वरमेव। अन्यत्र द्वितीयस्वरे अनेकाक्षरं प्रथमस्वरे एकमित्यर्थः। नोविभिरित्यादिनात्र विश्लेषः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1 2
8.दीर्घतमसोर्कः- आसा।। तमसोर्केराजेकविः प्र। अत्येष्यव्य द्व्यभ्यालौशे। तमसोर्के चेति अत्रैव तृतीयायामन्त्यस्सर्वत्रेति सङ्कृष्टः। गणगीतीनामन्ते निधनमिति निधनम्।।

2 0 0 1
9.रथन्तरम्- कायानश्चित्रआभुवोवा।। तरेभीषुवासी प्र। सर्वरथन्तरे स्तावाद्यमाद्यायामित्यादिनात्र प्रस्तावाद्यस्य वृद्धिः। कावरथन्तरयोस्सर्वत्रेति रथन्तरे सर्वत्र प्रस्तावाद्यस्य नीचप्राप्ते अप्रोस्वो इति। अत्र तृतीयायां प्रस्तावादिभूतस्योच्चविधानम्। स्वोवारथन्तरे इति स्वोशब्दस्य सङ्कृष्टविधानम्। तृचे स्वक्षरस्सँसर्गेण प्रथमायामुत्तममक्षरं मध्यमायाश्च प्रथमम्। एवमेवापरे द्वितीयोत्तरयोरित्यनेन सुवोवा इति प्राप्ते स्वोवा इति सङ्कृष्टविधानम्। रथन्तरे सर्वमित्यादिना ओस्तोभे प्रत्यये आभावः। रथन्तरवृषेत्यादिना ह्रस्वस्यापि दीर्घविधानम्। तृकारस्वित्यादिनात्र तृशब्दस्यानाभावः। गणगीतीनामिति अन्ते निधनम्।।

।।दशरात्रं समाप्तम्।।

==***==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संवत्सरः प्रारम्भः

।।प्रथमा दशतिः।।

1.रथन्तरम्- पूनानस्सोमधारयोवा।। अत्र प्रथमायां प्रस्तावाद्यस्य पूर्ववद्वृद्धिः। दिव्यं ज्यर्षसीत्यादिनात्र विकृष्टः। आपृच्छ्यमवृद्धं सर्वत्रेति अत्र सङ्कृष्टः। रथन्तरेसर्वमित्यादिनाभावः। रथन्तरे वृषेत्यादिनात्र ह्रस्वस्य दीर्घम्। अत्र निधनं अर्षसि यारत्नधा इत्यत्र अवृद्धादित्यादिना व्यवधानमेव। इको यणचीत्यत्र न प्रवर्तते।।

2.अञ्जोवैरूपम्- अभिसोमा।। पर्वप्रस्तावः। मद्यमाउवा व्यवहित मित्यादिनात्र मद्यमिति पदान्तस्य मकारस्य आउवाव्यवहित-मित्यादिना लोपप्राप्तस्यातिहारः। गोष्ठप्रतोदेत्यादिनात्र पादादि-भूतानां वर्णानां ऋक्स्वरवदुच्चनीचविधानम्। प्रथमायां धिविष्टपेत्यत्र पेशब्दस्य ऋक्स्वरे अनुदात्तस्य पेमगौतमेष्टम्भे चेति अत्रैवोच्च विधानात् अत्र ऋक्स्वरवदुच्चमेव। अच्छिद्राञ्जोरूपेत्यादिना आउवायात्र सर्वत्रागति प्राप्ते न तालव्यात्परमतिहारमेके विरत इति प्रथमायां मनीषिण इत्यत्र आइभूतनि शब्दात्परमया उगतिः तस्या इत्यत्र । अञ्जोरैवतयो व्यं रहस्ये च नसर्वमित्यादिना रहस्ये न सर्वत्राइभावे प्राप्ते यत्र आउभावो व्यञ्जनलोपश्च तद्वक्ष्याम इत्यादि प्रकरणे मनीषिण इत्यत्र निशब्दस्य तालव्यसंज्ञिकस्य पुनराभाव विधानम्। अञ्जोरूपमध्यमायामुस्थमाउवायां विराम इति अत्र मध्यमायामूर्मिणेत्यत्र उकारात्परमाउवायां प्रत्यये विरामविधानम्। यौनौ विरामो न भवति। उकारस्य ओष्ठ्यश्चान्तःपदिकोना[1]भवति सर्वत्रेति अनाभावविधानम्। ऋतमाउवाव्यवहितं अच्छिद्रमैधातिथा-ञ्जोवैरूपाग्नेस्त्रिणिधनेष्वपि ऋतमित्यत्र मकारस्य पदान्तस्य रहस्ये च न सर्वमित्यादिना अनाभावप्राप्तस्य अतिहारः सूत्रबलात्

1-ग-.पदिकोनाउ भवति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुनरतिहारविधानम्। उभयत्र जम्भोत्तर सँस्तोभाञ्जोरूपाणां सामान्ते अन्त्यं वचनमिति अत्र सामान्ते स्तोभानामन्त्यस्य स्तोभस्य विधानम्।।

3.आथर्वणम्- उहुवाओहा - औहोवा - परीतोषाइ ।। आथर्वण-देवस्थानेत्यादिना सर्वस्तोभानामनुद्धारः। आथर्वणे सर्वमिति अनुस्वारस्पर्शेत्यादिना पदमध्यगतानां अनुस्वारस्पर्शरेफाणां अतिहारे प्राप्ते आथर्वणे सर्वत्रानुस्वारादीनामतिहारविधानम्। नर्यः परीतायामिति र्यः सङ्कृष्टः। नोविभिरिति विश्लेषः। चित्वानवे इत्यत्र प्रश्लेषः।।

4.अपत्यम्- हाउ(त्रिः)। अर्षासोमद्युमाऽ23त्तमाःऽ3।। विष्णवे सहस्त्रिणं, यण्वापत्ययोरिति, अस्यार्थः। आउवाव्यवहितमित्यादिना अनाभावे प्राप्ते रहस्ये च न सर्वमित्यादिना अनाभावे प्राप्ते यत्राउभावो व्यञ्जनलोपश्चेत्यादिनात्र प्रकरणे विधानात् विष्णवे इत्यत्र वेशब्दस्य सहस्त्रिणमित्यत्र णं शब्दस्य पुनराभावविधानम् । यण्वापत्ययो यथाग्रामे गेय इति वेदसामादिना आद्यन्तयोः स्तोभावित्यर्थः। प्रतिपादं न प्रतिस्तोत्रीयमिति।।

5.शाक्वरवर्णम्-एंआर्षा ।। वर्णेचेति अत्र सर्वासूद्गीथस्य नीचप्राप्ते न सोमेति अत्र प्रथमायामुद्गीथाद्यस्य उच्चत्वम्। तमोर्षायां वर्ण इति पदान्तादिति विश्लेषप्राप्ते प्रश्लेषविधानम्। वनेष्वर्षा-सोमायां शाकलवार्शसन्तनिवर्णहरेष्वितिषु शब्दात्परमवृद्धादि पदन्तादित्यादिना वृद्धात्परावित्यादिना लोपप्राप्तस्य वकारस्य पुनरलोपविधानम् । रहस्ये न सर्वमित्यादिना स्त्रिणमिति मकारस्यानाभावः।।

6.रथन्तरम्- याज्ञायज्ञावोअग्नयोवा ।। रथन्तरे स्तावाद्यमित्या दिना गिरागिरा प्रप्रनशँसिषमिति ब्राह्मणमेव। रहस्ये च न

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वमित्यादिनात्राद्यन्तयोः स्तोत्रीययोः स्पर्शस्यानाभावः। रथन्तर-वृषेत्यादिनात्र स्तोभेप्रत्यये ह्रस्वस्यापि दीर्घविधानम्। ष्ववितादाशे महायामित्यादिनात्र ष्वशब्दः सङ्कृष्टः। गणगीतित्वान्नात्र निधनम्।।

7.रथन्तरम्- याज्यायथाअपूर्वियोवा।। यज्जातरेतेय प्र। रथन्तरे स्तावाद्यमित्यादिनात्र सामान्युक्तानि। तद्यज्जायथा द्वितीयायां बृहद्रथन्तरयोरिति। तत्ते इति अत्र तशब्दात्परस्य पादान्त्यस्य वाचिसर्वमो भवति इति लोपप्राप्तस्य तकारस्यातिहारविधानम्। आद्यायामासूर्यं सर्वत्रेति अतिसूर्यशब्दः सङ्कृष्टः। अत्र निधनम्।।

8.बृहत्[1]- औहोइमत्स्यपायितेमहाऽ3ए।। मत्स्यबृहतिषाते। मत्स्यबृहतित्सर इति तृतीयादिन्यामित्यादिना पदान्तानां सर्वत्राभावे मत्सर इत्यत्र रेफात्परस्यानाभावविधानम्। [2]प्रथमायां तृतीय इदययंयी सूचेति [3]बृहति चन्द्रासात् द्वितीयं सर्वत्रेति। अनेन बृहत्सु सर्वत्राद्रसात्परस्य पर्वण उपान्त्यात्पूर्वस्याक्षरस्य द्वितीयस्वरविधानात् अत्र प्रथमायां द्रासात्परस्य पर्वणः उपान्त्यात्परस्य इकारस्य द्वितीय स्वरविधानम्। नगशूपधा इति अत्रोत्तरयोः स्तोत्रीययोः प्रस्तावात्परस्य पर्वणोरन्त्ययोर्गशू इत्येतयोर्योनिवद्वृद्धि प्राप्ते अवृद्धिविधानम्। मत्स्यबृहतीति त्स्यशब्दः सङ्कृष्टः। प्रत्यवरोहेति अत्रोत्तमायां कृष्टात्परस्य शोशब्दस्य विकल्पपक्षे अवृद्धिविधानम्। मत्स्यबृहति चेति अत्र प्रथमायां मद इत्यत्रावृद्धस्य अः कारस्य पादान्त्यस्य पदगाने प्राप्ते सन्धिगानविधानम्।।

9.रथन्तरम्- प्रात्यस्मैपिपीषतोवा[1]।। प्रत्यतर एनं प्र। प्रत्यशब्दोनानदरथन्तरयोरिति अत्र त्यशब्दस्सङ्कृष्टः। रथन्तरे द्वितीयायामिति आईमित्यत्र ईकारात्परस्य पदान्तस्य ऋचि

1.ग-बृहत्साम।। 2.ख-प्रथमायां तृतीयाइदायायंसूचेति, 3.ग-बृहति चद्रासाद् द्वितीये कं सर्वत्र।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रश्लिष्टाकारस्य पादान्त्यात्पर इत्यनेन विश्लेषप्राप्ते पुनः प्रश्लेषविधानम्। रथन्तरे सर्वमित्यादि पूर्वोक्तमेव। प्रगाथेषु तृचेषु गीयमानानां बृहद्रथन्तरयज्ञायज्ञीयानां प्रस्तावलक्षणं सूत्रकारेण स्पष्टमुक्तम्। तत्कथम् ? बृहद्रथन्तरयोर्यज्ञायज्ञीयस्य चानादेशे ककुभावुत्तरे तयोर्द्व्यक्षरः प्रस्तावस्सर्वत्रेति तृचेष्वक्षरसङ्गेन प्रथमायामुत्तमममक्षरं मध्यमायाश्च प्रथमेवापरे द्वितीयोत्तरयोरिति।।

10.चतुर्थस्वरम्- याज्जायाज्जा (1 2 1 2)।। यज्जास्वरे तत्ते प्र। आथर्वण-देवस्थानेत्यादिनात्र स्तोभानामनुद्धारः। ओवौकारयोरनन्तस्वर इत्यादिना सर्ववर्णानां सर्वत्राभावेप्राप्ते रहस्ये त्वृगन्तीयश्चानृगन्तीयश्च स्पर्शः प्रथमस्वरो नामिविसर्जनीयश्चानाभवतीत्यत्र सर्वासु स्पर्शा नामिविसर्जनीययोरनाभावः। गणगीतत्वान्नात्र निधनम्।। इति प्रथमा ।।1।।

==*==

।। द्वितीया दशतिः।।

1.चतुर्थस्वरम्- प्रासूप्रासू (1 2 1 2) ।। प्रसुस्वरे सावी प्र। प्रसुन्वानायास्सर्वत्रेत्यत्र विश्लेषः। विभाषा प्रसुन्वानद्वितीयायां च रथन्तर इत्यनेन त्रयो शब्दोऽत्र विकृष्टः। अन्यत्सर्वं पूर्ववत्।।

2.द्वितीयस्वरम् - एहाउमत्सियापा (20 0 0)।। मत्स्यबृहतीति त्स्य शब्दो विकृष्टः। आथर्वणेत्यादिनात्र स्तोभानामनुद्धारः। वृषामदस्स्वरे बृहन्निधन इति स्तोभे परतः पदगाने प्राप्ते मदशब्दस्य सन्धिगान विधानम्। जम्भस्वरयोरनाभावस्तालव्यस्यान्तःपदिकस्येति अत्र पदमध्यगतस्य तालव्यस्य हादौस्तोभेपरतः अनाभावे प्राप्ते सर्वत्र स्वरे च आभवति । सहवाँ इन्द्रेत्येष शब्द आनस्तेगन्तु मत्सर इत्यत्र सहवाँ

1.ग- प्रात्यस्मैपिपीषतोवा (2 0 0 1) ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्रेत्यत्र इकारस्य हादौस्तोभेपरतः पुनराभावविधानम्। गणगीतानां नात्र निधनम्।।

20 0 0
3.द्वितीयस्वरम्- एहावयम्पूषा ।। आथर्वणेत्यादिना पूर्ववत्। गणगीतत्वादत्र निधनम्।।

20 0 10 0
4.तृतीयस्वरम्- एहाउ - औहोऽ2 - मत्सियापाऽ3 । आथर्वण इत्यादिना पूर्ववत्। मत्स्यशब्दोऽत्र विकृष्टः।।

20 0 10 0
5.तृतीयस्वरम्- एहाउ - औहोऽ2 - अयम्पूषाऽ3 ।। अत्रापि पूर्ववद्धिकारः गणगीतत्वादत्र निधनम्।।

20
6.प्रथमस्वरम्- एप्रतियम्माइ ।। आथर्वणेत्यादिना पूर्ववत्। प्रत्यशब्दो नानतरयोरित्यादिनात्र त्यशब्दो विकृष्टः। जम्भस्वरयो-रित्यादिना पूर्ववदनाभावः।।

20 0 0
7.प्रथमस्वरम्- एसुतासोमा ।। स्वरप्रथमे चेति सोमस्पतिरित्यत्र आइभूत ति शब्दात्परस्य विसर्जनीयस्य स्तोभे प्रत्यये लोपविधानम्।।

2 1 2 10 2 1
8.भ्राजम्- अस्यप्रत्नामनुद्युतम् ।। अस्य प्रत्नायामयँ सूर्यस्सर्वत्रेति अत्र अयँसूर्यशब्दस्सङ्कृष्टः। गोष्ठप्रतोदेत्यादिनात्र सर्वासु पादादिर्यथर्च्चमुच्चनीचम्। त्रिरुक्तानां निधनानामन्त्यं वचनम्।।

2 10 2 1 2 0 1
9.महादिवाकीर्त्यम्- विभ्राड्बृहत्पिबतुसोम्यम्मधु ।। गोष्ठ-प्रतोदेत्यादिनात्र महादिवाकीर्त्येषु पञ्चसु सामसु पादादि भूतस्याक्षरस्य ऋक्स्वरवदुच्चनीचविधानम्। महिसूर्यः कीर्त्येत्यत्र शब्दस्सङ्कृष्टः।।

1 20 1 20 0
10.महादिवाकीर्त्यम्- तवाहँसोमरारण ।। कीर्त्ययशस्संसर्प-पुष्पेषु निधनभूतपर्वान्तर्गतानामनुदात्ताना मन्तस्थाक्षराणां प्रस्तावान्त एव नीचविधानात् अन्यत्र प्रस्तावोद्गीथप्रतिहारेषु निधनभूत

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पर्वान्तर्गतानामनुदात्तानां अन्तस्थाक्षराणां उच्च एव। अति सूर्यं पुष्पमरायकीर्त्येष्विति र्यशब्दः सङ्कृष्टः। अत्र पादादिर्यथर्चमुच्चनीच विधानं पूर्वस्मिन्नुक्तम्।।इति द्वितीया।।2।।

==**==

।।तृतीया दशतिः।।

1.महादिवाकीर्त्यम्- बण्महाँअसिसूर्य।। (1 2 10 20) बण्महाँ असीत्यत्र सूर्यशब्दस्सर्वत्रेति अत्र र्यशब्दस्सङ्कृष्टः। भ्यं कीर्त्ये इत्यत्र भ्यंशब्दः सङ्कृष्टः ।पादाद्युच्चनीच विधानं प्रथमसाम्नीत्युक्तम्।।

2.महादिवाकीर्त्यम्- इन्द्रमिद्देवतातये ।। (1 2 1 2 0 1 0 2 0) प्रयत्यकीर्त्ये इत्यत्र त्यशब्दस्सङ्कृष्टः। पयघृतवनीति। नैप इति। नैपातिथे प्रस्तावान्त एव नीचविधानात् अरोचयत्सर्वत्रेति अत्रोपद्रवोद्गीथे च यच्छब्दस्य नीचविधानम्। इन्द्रस्सूर्यं स्रुचनैपकीर्त्येष्विति अत्र र्यशब्दः सङ्कृष्टः। अत्रापि पादाद्युच्चनीचविधानम्।प्रथमसाम्न्युक्तम्।।

3.महादिवाकीर्त्यम्-श्रायन्तइवसूर्यम्।। (10 2 10) अर्यमिति। अस्यायं अर्थः। कीर्त्यंयश इत्यादिना त्रिषु सामसु सर्वत्र प्रस्तावान्तभूतस्यानुच्चस्यान्तस्थाक्षरस्य नीचविधानात् अत्र प्रथमायां प्रस्तावान्तभूतस्यानुच्चस्य यं शब्दस्यानुच्चप्राप्ते उच्चविधानम्। इवसूर्य कीर्त्ये इत्यत्र र्य शब्दः सङ्कृष्टः। न्योजसा कीर्त्ये इति न्यो विकृष्टः। दिवाकीर्त्ये वैराजमित्यत्र वैराजस्य निधनवर्ति ईनिधनमित्यर्थः। पादाद्युच्चनीचं प्रथमसाम्न्युक्तम्।।

4.विकर्णम्- इन्द्रक्रतुन्नआऽ2भाराऽ2 ।। (1 1) पुत्रेभ्यो भारद्वाजे इतिभ्यो शब्दोऽत्र विकृष्टः। ष्टम्भेमनिसर्वत्रेति माशिवास-स्सर्वत्रेति विश्लेषः।गणगीतत्वान्नात्र निधनम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5.विकर्णम्- 1 0 0 0 पुरोजितीवोआ52 1 न्धासाः52।। विश्वाच्या इत्यादिना च्या शब्दोऽत्र विकृष्टः। भ्राड्विकरणे इति निधने प्राप्ते गणगीतत्वान्नात्र निधनम्।।

6.विकर्णम्- 10 श्रायन्तइवसू52 1 रायाऽ2म्।। न्योजसा कीर्त्ये इति न्योशब्दोऽत्र विकृष्टः। भ्राडितिकर्णे इत्यत्र भ्राडिति निधनम्।।

7.आभ्राजम्- 2 परिसु 0 0 वानो53 1 गाइ 2 राऽ1इष्ठाऽ2।। स्वानः परिस्वानायामित्यादिनात्र स्वा विकृष्टः। त्वं कविर्द्धितीये दन्वते इत्यत्र त्वं विकृष्टः। त्रिरुक्तानामन्त्यं वचनमिति अत्रान्त्यं वचनमेव निधनम्। समानोदर्केष्वित्यादिना पूर्वयोरुद्धारः।।

8.अग्नेर्व्रतम्- 2 0 0 0 उच्चार्तजातऽ3 1 मा 2 न्धाऽ1साः52।। न्यर्य इत्यत्र निशब्दात्परमवृद्धादित्यादिना व्यवधानप्राप्ते द्व्यन्तस्थ परेतु लोप इति यकारलोपः। निधनं तु सामान्ते सर्वत्र यल्लघीय इति लघीयत्वादत्र सर्वनिधनम्।।

9.भासम्- 20 10 मूर्धानन्दि 0 वोअरतिं 2 पृ 1 थाऽ23इ 2 व्याः।। भासे चेत्यत्र पादादिभूतानां वर्णानामृक् स्वरवदुच्चनीचे प्राप्ते आसन्न इत्यत्र आकारस्य यथर्च्चविधानम्।।

10.भासम्- 1 0 0 20 1 पुरोजितीवोअन्धाऽ23 2 साः।। भासे चेत्यत्रापि पादादिभूतानां वर्णानामृक्स्वरवदुच्चनीचे प्राप्ते अनासं पुरः सन्तापरियज्ञेति पुरस्सन्ताया परिप्रस्य यज्ञाया इत्येतेषु चतुर्षु पादेषु पादादि भूतस्याक्षरस्य यथर्च्चविधानम्। ष्ठास्वरं भासे इति निधनं ष्ठास्वरं भवति। असाव्यँशु प्रथमे तद्वदित्यर्थः।। इति तृतीया।।3।।

==***==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

।। चतुर्थी दशतिः ।।

1.रथन्तरम्- तावाहँसोमरारणोवा ।। रथन्तरे स्तावाद्यमिति वृद्धिः। रथन्तरे सर्वमित्यादिना आभावानाभावौ । रथन्तरे वृषेत्यादिना ह्रस्वस्यापि दीर्घविधानम्। बभ्रोरे इति भ्रो शब्दस्य वृद्धस्य स्वरे प्रत्यये सर्वत्राइभावे प्राप्ते अतरे इत्यत्र भ्रोशब्दस्य स्वरे प्रत्यये प्रकृतिभाव एव।।

2.बृहत्साम- औहोपुरोजितीवोअन्धसाऽ3एँ।। अगति स्तोभस्य स्वरे प्रत्यये सन्धाविति अत्र तृतीयायां प्रस्तावे स्वरप्रयत्वादगतिः। बृहत्यौहोवायाः परं षष्ठमक्षरं कृष्यते। बृहत्यौहोवायाः परं षष्ठस्याक्षरस्य कर्षणे प्राप्ते अनुष्टुप् प्रथमायां चेति अत्र प्रथमायां औहोवायाः परं चतुर्थस्य कर्षणविधानम्। तृतीयादिन्यामित्यादिना सर्वपदान्तानामाभावे प्राप्ते व्यञ्चेति पदमध्यगतस्य दीशब्दस्याप्यत्र आभावविधानम्। बृहद्वात्सप्रशुद्धीय पदनिधन वैराजवर्जम्। त्वद्रय इत्यत्र तुशब्दात्परमवृद्धादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परा-वित्यादिना लोपप्राप्तस्य वकारस्य यज्ञायसन्तु सर्वत्रेति पुनरलोपविधानप्राप्तस्यात्र अलोपविधानम्।।

3.रथन्तरम्- परीतोषिञ्चतासुतोवा।। नर्यः परीतायामित्या-दिनात्र र्यशब्दः सङ्कृष्टः। नोविभिःसुषा वसोमायामित्यादिनात्र विश्लेषः। अन्यत्सर्वं पूर्वमेवोक्तम्।।

4.रेवत्यः-हाउरेवा।। वतीषुरेवा प्र। नौस्वरेवतीष्विति। सधमाद इत्यत्र ध शब्दस्य नीचविधानम्। मादेनौरेवती ष्विति मादे इत्यत्र देशब्दस्य आभावविधानम्। आन् कारेत्यादिनात्र त्वावनित्यत्र आन् कारस्य अनुनासिकत्वे प्राप्ते अरेववैखानससन्तनिष्विति आन्कारमेव। तृकारस्तु न सर्वेषु इत्यादिनात्र तृशब्दस्यानाभावः। दान्ते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यहो ध्रिगो स्तावे मिन्दो इति परिसङ्ख्यानुरूपेण प्रकृतिभाव ग्रहणात् शतक्रतो इत्यत्र तोशब्दस्य पादान्त्यस्याउभावः।।

5.बृहत्- औहोइत्वमग्नेयज्ञानाँहोऽ3एँ।। बृहति हिवे। प्र। अष्टाक्षरे प्रथमाया ऋचः प्रस्तावे वैच्छन्दसेषु गीतं प्रास्ताविकमेवं स्यादिति अत्र गीतमेवप्रस्तावः। बृहत्यौहोवायाः परमित्यादिना षष्ठाक्षरस्य कर्षणे प्राप्ते त्वमग्न आद्यायामाद्यमिति मध्यमायां तृतीय उत्तमायां चतुर्थमित्यत्र कर्षण विशेषविधानम्। कनीयस्य आदितोलोप इति न्यायेन लोपः। देवां जसा बृहतीति अञ्जसा इत्यत्र ऋचि प्रश्लिष्टस्याकारस्य विश्लेषविधानम्। व्यञ्चेति। जेशब्दस्य औहोवायां प्रत्यये आभावविधानम्। हति कृष्टादित्यनेन सर्वत्र कृष्टात्परस्य वृद्धिप्राप्ते प्रत्यवरोहे चेति अत्रोत्तमायामभ्यासे अवृद्धिः।।

6.बृहन्निधनं वार्कजम्भम्[1]- हावभिसोमासआयावाः।। दावसु-निधनेत्यादिनात्र सर्वासु तृतीयपादाद्युच्चम्। योनावेवनीचम्। देवो धौतो मत्सरासोश्वश्वजम्भे इति मत्सरास इत्यत्र सोशब्दस्य स्तोभेप्रत्यये पदगाने प्राप्ते सन्धिगानविधानम्। मद्यं द्विर्हिंकारेत्यादिनात्र द्यशब्दो विकृष्टः।त्वन्नोवारे इत्यादिनात्रोत्तरयोः स्तोत्रीययोः ककुभोर्विकल्पः।।

7.ईनिधनंवार्कजम्भम्[2]-परीतोषिञ्चतासूताम्।। परि जम्भे हविः। प्र। नर्यः परीतायामित्यादिनात्र र्यशब्दः सङ्कृष्टः। गोविभिरित्यादिनात्र विश्लेषः। जम्भोत्तरसँस्तोभाञ्जोवैरूपाणां सामान्तेऽन्त्यं वचनमिति अत्र स्तोभानामन्त्यं वचनमेव।।

8.राजनम्- तदिदासा।। राजने स्वादीयोधीः । प्र। रहस्ये तूद्धार इत्यत्र सर्वस्तोभानामुद्धारः। जने च भुव इति भुवशब्दस्योच्चविधानम्। स्ये चेति आउवायां द्वितीयचतुर्थयोः दीर्घाक्षरयोर्वृद्धिः। राजने चेति अत्र सर्वासु स्तोत्रीयासु पदान्ते काम्पेत्यादिना वृधन्ताविधानम्।

1. ग- वार्कजम्भाद्यम्।। 2. ग-वार्कजम्भोत्तरम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आद्ययोरतृतीये इति अत्राद्ययोः स्तोत्रीययोः तृतीयपादे काम्पे च अन्यत्र वृधन्तेत्यर्थः। त्यूमाः पूर्वं व्यनद्धेत्वे क्रतुमित्येते शब्दाः श्यैते इति । अत्र विकृष्टः।।

9.पञ्चनिधनं वामदेव्यम्- त्रिकद्रुकेषुमहिषीयवाँशिराम्।। त्रिकद्रुकबृहद्देव्ययोर्वृणीप्रथममिति अत्र सर्वासु स्तोत्रीयासु योनिवद्वृणी प्राप्ते प्रथमस्वरविधानम्। देव्ये प्रहूयस्येति त्रिकद्रुद्वितीये अमन्धतामिति। त्रिकद्रुकायां वामदेव्ये द्वितीयेपादे योनिदृष्टाप्रहूयसा इति अमन्धतापद्यत इत्यर्थः। त्वामग्नेपुष्करादधीत्यत्र अमन्धता । वीयैं देव्यबृहतोः। अत्रैव काव्यं देव्ये इति अवीर्यकाम्य शब्दौ सङ्क्रुष्टौ। समानोदर्केष्वित्यादिना पूर्वयोरुद्धारः।।

10.स्वाशिरामर्कः - अयामायाम् - परिसुवाऽ2 ।। स्वाशिरामर्के कविर्विश्वे प्र। त्रिरुक्तस्य सामादावित्यादिना अत्र स्तोभानामाद्यं वचनम्। स्वानः परिस्वानायामित्यादिनात्र स्वाशब्दोऽत्र विकृष्टः। त्वं कविर्द्वितीये दन्वते इति त्वं शब्दोऽत्र विकृष्टः। ह्रंगीर्यं मिमदिमघोपारिष्टेरयिभृतीति गिरिष्ठा इत्यत्र महित्रीणां द्वितीयस्य गिरिशब्दस्य ह्रस्वस्यापि वृद्धिविधानम्। समानोदर्केष्विति पूर्वयोरुद्धारः।।इति चतुर्थः।।4।।

1.इलान्दम्- अग्नेतवश्र।। इलान्दप्रथमायाक्षिबान्नाक्षि द्वितीयायामग्नेर्नाक्षि तृतीयायामभिमग्निं रैपुदेवा प्र। द्वितीये लान्दे प्रथमोच्चम्। अ ऊ इति । अस्यायमर्थः। द्वितीयेऽनुगाने द्वादश-पदास्सन्ति। तेषामग्नेतश्र ऊर्जोनपाज्जा तिभिर्मन्दस्व एतेषु त्रिपादेषु आदिभूतस्य अक्षरस्योच्चविधानम्। इतरेषु नीचारम्भः। चतुर्थेषु वृणी जास्वरं सर्वत्रेति चतुर्थेऽनुगाने योनिदृष्टावृणी अत्र जास्वरमेवेत्यर्थः। काम्पा च लुप्यते इत्यत्र सर्वासु चतुर्थानुगाने योनिदृष्टा काम्पा न भवति इत्यर्थः। नयतविग्निरे इति चतुर्थेऽनुगाने द्वादशेसु पादेषु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्वसूत्रेण काम्पायाः लोपप्राप्ते इयर्षोभानुना ऋतवानमित्यादि पञ्चपादेषु काम्पायाः पुनः अलोपविधानम्। देदे पराविधास्सर्वत्रेति अनुगानेषु सर्वत्र पञ्चाक्षरशः पादविधानम्। अयोनाविति योनौ न भवति। इलान्दे हीषी प्रभृत्युद्धारः। तृतीयेऽनुगाने पूर्वासु विधासु सर्वत्र योनिदृष्टा हीषीस्वरप्रभृतीनां पर्वणामुद्धारः। स्ये च सद्रे चोतयां द्वितीयस्थमिति। अस्यायमर्थः। अत्र चतुर्थेऽनुगाने सर्वासु स्तोत्रीयासु योनिदृष्टा ऊता गीतिरस्ति। तस्या आदिभूतस्याक्षरस्य वृद्धिविधानम्। अयोनाविति। एवं सर्वत्र प्राप्ते इरज्यन्नित्यत्र रेफस्य वृद्धिर्नभवति। लान्दे वन्त्या उपान्त्या इति । अस्यार्थः। तृतीयेनुगानेप्रथमे पादे सर्वासु स्तोत्रीयासु उपान्त्यस्य वृद्धिविधानम्। अयोनाविति। योनौ प्रथमे पादे पदंवेरित्यत्र दंशब्दस्यावृद्धिविधानम्। वर्प्पसोदर्शतेलान्द इति । वर्प्प इत्यत्र दर्शतेत्यत्र च उभयत्र रेफस्य चानुस्वार स्पर्शेत्यादिना अतिहारे प्राप्ते लोपविधानम्। पुशब्दश्चेनान्दे इति सर्वं वृद्धमाभवतीत्यादिना आभावे प्राप्ते नेन्द्रस्तेसो इत्यादि प्रकरणे ग्रहणात् वपुष इत्यत्र पुशब्दस्यानाभावः। ऋगन्तेत्वेव प्रथमकृष्टस्तोभ इलान्द-द्वितीयायामिति। अस्यायमर्थः। ओवौकारयोरित्यादिना लोपप्राप्तस्य रहस्ये त्वृगन्तीयश्चानृगन्तीयश्चस्पर्श इत्यादिना रहस्ये सर्वत्रानाभाव-प्राप्तिः। अत्र द्वितीयायां क्रतुमित्यत्र तुशब्दात्परस्य ओकारस्य द्वितीयस्वरारम्भप्राप्ते प्रथमस्वरारम्भविधानम्। इलान्दे च वर्चे प्रत्यये इति उदिय इत्यत्र उकारात्परस्य तकारस्य वर्चः प्रत्यये लोपविधानम्। सुशस्तिभिरिलान्दद्वितीयायामिति सुशस्तिभिरित्यत्र शशब्दात्परस्य सकारस्य लोपविधानम्। इलान्दवन्तीययौक्तेष्वकार इत्यत्र औकारे परतः ह्रस्वस्य दीर्घविधानम्। इलान्दाद्ये त्रिरुक्ताभ्यां स यथोक्तमितरेष्विति अन्ते वाद्व्यक्षरः प्रस्ताव नियमः। त्सआ।।

।।संवत्सरं समाप्तम्।।

==*****==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकाहः प्रारम्भः

॥प्रथमा दशतिः॥

2 0 0 0 0 0 0 0 0
1.आथर्वणम्- उहुवाओहा-ओहोवा-पुरोजिताइ॥ आथर्वणदेव-स्थानेत्यादिना सर्वस्तोभानामनुद्धारः। आथर्वणे सर्वमित्यत्रानुस्वार स्पर्शरिफाणामतिहारप्राप्तानां लोपविधानम्। स्तौभिकानि सामान्तिकानि सामान्ते निधनम्॥

3 20 1 2 10
2.स्वाशिरामर्कः- अयामायाम्-स्वादिष्ठयाऽ2॥ ह्रं गीर्यमित्यादिना मदिष्ठयेत्यत्र दिशब्दस्य महित्रीणा द्वितीयस्य ह्रस्वस्य दीर्घविधानम्। महोनामित्यत्र मकारस्य च ॥

20 0 0
3.वार्षाहरम्- हावर्षासोमा॥ हरे द्वितीये द्वितीयोदादिभूतस्य सर्वासु नीचप्राप्तौ । अवरुणेति अत्र मध्यमायां द्वितीयपादाद्यस्योच्चम् । इन्द्रातोकावार्षाहरगीथेऽभ्यासे प्रत्यये इति अत्रोत्तरयोरुद्गीथाभ्यास्ते प्रत्यये इन्द्रातो इत्येतयोरत्वविधानम्। वनेष्वर्षासोमायामित्यादिना व्यवधानप्राप्तस्य वृद्धात्परावित्यादिना लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्॥

2 0 0 1 2
4.वार्षाहरम्- यस्तेमदोहोहाइ॥ यस्तेहरे वरे वेपूर्वं नधे प्र। यस्तेहरेसंयोगे प्रत्यये इत्यगतिः। अगृरमिस्निर्द्दत्वन्नपोक्षाश्चेति। आदिद्वोदात्तस्येत्यादिना ह्रस्वाक्षरस्य अभिगाने प्राप्ते स्निर्द्द इत्येतेषां त्रयाणां प्रत्युत्क्रामविधानम्। यस्ते हरेचेति अस्यार्थः। योनौ पञ्चमसप्तमयोः पर्वणोरुपान्त्यस्याक्षरस्यावृद्धिः। अत्र सर्वासु वृद्धिरित्यर्थः॥

2 0 0 0 1
5.पराचीषुरथन्तरम् - आभित्वाशूरनोनुमोवा[1]॥ अत्र विशेषो नास्ति परात्वमेवविशेषः॥

---

2 0 1
1.ग- आभित्वाशूरनोनुमोवा॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

6.पराचीषुबृहत्- औहोइत्वामिद्धिहवामहाऽ3ए ॥ श्येनोत्तरयोर्द्धितीयमिति बृहत्यौहोवायाः परं षष्ठमित्यादिना औहोवायाः परं षष्ठस्याक्षरस्य कर्षणे प्राप्ते अत्रोत्तरयोः औहोवायाः परं द्धितीयं कर्षणविधानम्। तृतीयादिन्यामित्यादिना सर्वपदान्ताना-माभावे प्राप्ते व्यञ्जेति पदमध्यगतस्य रथ्यमित्यत्र थिशब्दस्याभावः। हतिकृष्टादिति बृहति सर्वत्र कृष्टात्परस्याक्षरस्य वृद्धिप्राप्ते श्येने न जिग्यु इत्यत्र कृष्टात्परस्य जिशब्दस्यावृद्धिविधानम्॥

7.मरुताँ सँस्तोभः पर्यूषुप्रधन्वावा॥ परे सँस्तोभे अभि । प्र। पर्यूष्वान्धीगवसँस्तोभयोरित्यत्र र्यशब्दस्सङ्कृष्टः। तरध्यैविते इत्यत्र विकृष्टः॥

8.मरुताँ सँस्तोभः नदँवोअदतीनाम्॥ परेसँस्तोभेतीनाम् । ओकारोत्वम्। नदंव ओसँस्तोभे इति ओदतीनामित्यत्र ओकारस्यात्वविधानम्। स्तोभे चोत्तरे वकारम्। वत्यन्वे इन् दंव इत्यत्र वः शब्दस्य ओभावविधानम्। नदंव ओदतीनामित्यत्र प्राप्ते तिघ्न्यानां श्रुध्येति घ्न्या शब्दोऽत्र विकृष्टः। जम्भोत्तरसँस्तोभाञ्जोवैरूपाणां सामान्तेऽन्त्यं वचनं इति अत्र वाइश्वस्माइत्यन्त्यं वचनम्॥

9.सप्तहम्- अयँवायाउ। पुनानस्सो॥ पुनानस्सो सप्तहे त्वसंयुक्तपादादौ द्वे इति अत्र पादादौ द्वे इत्यत्र पादादौ द्वे द्वे अक्षरे नीचे भवतः। मध्ये योनिं त्रवरथ्यमिति एते नीचे भवतः। एकमन्यत्रेति अन्यत्र पादमध्ये एकमेव नीचमित्यर्थः। त्रिरुक्तस्य सामादौ आद्यं वचनमिति अत्र सामादौ त्रिरुक्तस्य आद्यं वचनम्। सप्तहेत्वाद्य इति त्रिरुक्तानामन्त्यं वचनमिति अनेन त्रिरुक्तानां निधनानां अन्त्यं वचने प्राप्ते अत्राद्यं वचनं विधानम्। क्रोञ्चाभिनिधनेत्यादिना वृण्यादिभूतस्य ह्रस्वस्यापि दीर्घविधानम्॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

10.दीर्घतमसोर्कः- धार्ता। तमसोत्वेकनृभिहरिस्वभिः प्र। अत्योर्क इति त्योशब्दः सङ्कृष्टः। तमसे चान्धा द्वितीये नैकं सर्वत्रेति दीर्घतमसोर्के सर्वत्रानुपादमान्धायाः परस्य पर्वणः अनेकमक्षरं द्वितीयस्वरे एकमक्षरं प्रथमस्वरे इत्यर्थः। अयोनौ प्रथमे दे इति योनिप्रथमपादवर्जम्। दक्षशूरा वर्के इति अत्र दक्षशूरशब्दौ अस्तोभे परतः सन्धिगाने प्राप्ते पदगानविधानम्। जठरेषूद्धत्कावरवासिष्ठा-भिक्रन्दार्केष्विति। जठरेष्वाविशेत्यत्र षुशब्दात्परवृद्धादित्यादिना व्यवधानप्राप्तस्य वकारस्य लोपविधानम्। रसः स्वासुतमसोर्के इति अःकारो वृद्ध इत्यादिना रशब्दस्य पदगाने प्राप्ते अत्र सन्धिगान-विधानम्। रहस्ये तूद्धार इति सर्वस्तोभानामुद्धारः।। इति प्रथमा।।1।।

==*****==

।। द्वितीया दशतिः।।

1.भर्गः- यत्- अयम्पूषा।। भर्गस्य सामादौ स्तोभान्त्यपर-मित्यनुद्धारः इति अत्र स्तोभानामन्त्यभूतस्य यच्छब्दस्यानुद्धारः। इतरेषां स्तोभानामुद्धार इत्यर्थः। पूषायां चेति सिशब्दस्य प्रकृति-विकार इत्यादिना श्रवाय्यमित्यत्र पूर्वयकारप्लुत आकारस्संपद्यते।।

2.नित्यवत्सम्- एआया।। वत्सायां ग्वभिः परोहरिः क्वभिः प्राचीम् ।प्र। विच्छन्दस्सु च वत्सास्विति। योनौ प्ररे चेति अत्र प्रथमायां उद्गीथाद्यस्य नीचविधानम्। उत्तरयोरुच्चमित्यर्थः। वाहे श्रृङ्गे वत्सायामिति। अत्र प्रथमायां प्रतिहारादिर्नीचैः। उत्तरयोर्नभवति। वयस्स्वासुवत्सास्विति भक्तिमध्य इत्यादिना अस्तोभेप्रत्यये पदगाने प्राप्ते वयश्शब्दस्य सन्धिगानविधानम्। वत्सासु सप्तास्ये भिर्ज्याका इत्यत्र सप्तास्येभिरित्यगतिः। आउवाव्यवहितमित्यादिना सर्वत्राभावे प्राप्ते रहस्ये च न सर्वमाभवतीति व्यञ्जनलुप्यत इति अत्रानाभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2Q Q 0 Q 0 2
3.बृहत्[1]- औहोइमाभेममांश्रमिष्माऽ3ए।। बृहति सखी प्र। रहस्ये च माभेम बृहति इति। महत्ते इत्यत्र हकारात्परस्य पदान्तस्य तकारस्य तृतीयादिन्यामित्यादिनात्राभावे प्राप्ते फिग्यमित्यत्र गिशब्दस्याइभावविधानम्। प्रत्यवरोहे चेति द्रावापिबेत्यत्र वाशब्दस्य प्रत्यवरोहे अवृद्धिविधानम्।।

3 20 1 2 1 Q
4.स्वाशिरामर्कः- अयामायाम् - यस्तेमदोऽ2।। स्वाशिरामर्के दिवेपूर्वं प्र। पवस्वयस्तेमदायां सर्वत्रेति अस्येत्यत्राकारस्य विश्लेषः। त्रिरुक्तस्य सामादावाद्यं वचनम्। हं गिर्यं मिमदि मघो पारिष्टे रयिभृथीति। स्येमहि द्वितीयमन्वयिक्यां इत्यादिना महित्रीणा-द्वितीयस्य दीर्घाक्षरस्य वृद्धिप्राप्ते अत्र मित्रमित्यत्र मिशब्दस्य ह्रस्वस्यापि वृद्धिविधानम्।।

2Q Q 0 0 2
5.बृहत्साम- औहोइकिमित्त्वेविष्णोपरिचाऽ3ए।। बृहत्यस्मि प्र। किमिद्बृहद्देव्ययोर्वृणीप्रथममिति योनौ सातौवाजा। अत्र सर्वासु तद्विविद्धा इत्यर्थः। सप्तमं किमित्पूर्वयोरिति बृहत्योहोवायाः परमिति षष्ठाक्षरस्य कर्षणे प्राप्ते अत्र पूर्वयोः सप्तमस्य कर्षणविधानम्। प्रथमात्[2]तृतीय इदयं दीसूचेति। बृहति चन्द्रासाद्वितीयैकं सर्वत्रेत्यनेन बृहति सर्वत्र द्रासात्परस्य पर्वणः प्रथमस्वरानन्तरद्वितीय स्वरविधानम्। तृतीयादिन्यामित्यादिना सर्ववर्णानामाभावे प्राप्ते व्यञ्जेति अत्र पदमध्यगतस्य समीथे इत्यत्र मीशब्दस्य स्तिशब्दस्य च तालव्यस्य चाभावविधानम्। प्रत्यवरोहे चेत्यत्र भिस्सदान इत्यत्र सशब्दस्य प्रत्यवरोहे अवृद्धिः।।

20 0 20 2 0 4 20 3 5
6.उद्भित्- होवाइ(द्भिः)। होवाऽ3हाइ-पवतेहाऽ3र्योऽ3तोहरिः।। उद्भिदिराँसि प्र।।

---

1. ग-बृहत्साम।। 1- ख-प्रथमाद्वितृतीय...।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2 0 0 4 20 3 5
7.बलभित्- यस्तोमदोऽ3वाऽ3रे णियः।। उद्भिद्बलभिदोः पूर्वस्यादौ परस्यान्ते स्तोभनियमः । पवस्व यस्तेमदायां सर्वत्रेति विश्लेषः।।

1 2 10 2
8.यशः- त्वामिन्द्रयशाअर्सि।। त्वं स्यन्ये यशसि इति सङ्कृष्टः। गोष्ठप्रतोदेत्यादिनात्र सर्वासु पादादि भूतस्य अक्षरस्य ऋक्स्वरवदुच्च नीचविधानम्। कीर्त्यर्यशः संसर्पेषु वान्तेऽन्तस्थो नीचैः । एतेषु सामसु निधनभूतानां यथर्च पर्व सामान्ते यान्यन्तस्थाक्षराणि स्वरितभूतानि तेषामन्तस्थाक्षराणां प्रस्तावान्तं एव नीचत्वं विधीयते। नोद्गीथोपद्रव प्रतिहारेषु धृतिः शब्दो नीचविधिरिति धृतिशब्दस्य स्वरितभूतस्य प्रस्तावान्त एव नीचविधानम्। नोद्गीथोपद्रवयोरित्यर्थः । शतमादि यशसीति गुरुषु निधनैकदेश इत्यनेनात्र गुरुनिधनत्वात् शतमादि निधनविधानम्। सर्वोद्धारोऽतोऽन्यत्रेति अत्र सर्वस्तोभानामुद्धारः।।

2 0 0
9.भर्गः- यत्- पुरोजिती ।। भर्गस्य सामादौ स्तोभान्त्यं पदमित्यत्र स्तोभानामन्त्यं पदं यच्छब्द एव।।

20 0
10.देवस्थानम्- हाउपुनानस्सो।। आथर्वणदेवस्थानेत्यादिनात्र सर्वस्तोभानामनुद्धारः। रिक्षस्थानयोश्चेति अत्र सर्वासु पादादि भूतस्याक्षरस्य ऋक्स्वरवदुच्चनीचविधानम्। नीचात्परः षष्षेध मैधेत्यादिनात्र वसानो अर्षसीत्यत्र ऋक्स्वरे नीचपूर्वस्य षकारस्योच्च विधानम्। दिव्यंज्यर्षसीत्यादिनात्र विकृष्टः। देवस्थानपूर्वयोर्निधानाद्यं पदमित्यत्र पूर्वयोः स्तोत्रीययोः निधनभूतपदानां आद्यं पदं द्यौरित्यान्त्यायां द्यौरादिस्सर्वनिधनम् ।।इति द्वितीया।।2।।

==**==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

।।तृतीया दशतिः।।

1.सप्तहम्- अयँवायाउ।। त्वामिद्धाइ।। त्रिरुक्तस्य सामादावाद्यं वचनम्। त्रिरुक्तानां स्तोभानामाद्यं वचनम्। त्वाँ सप्तहेत्यत्र त्वाशब्दतृतीयस्य सङ्कृष्टविधानम्। सप्तहेत्वसंयुक्तपादादौ द्वे इत्यत्र संयुक्त पादादौ द्वे द्वे अक्षरे नीचे न भवतः। संयोगे सत्येकमेव। मध्ये योनिं त्रवरथ्यं इत्यत्रोत्तरयोः पादमध्ये त्रवरथि एतयोर्नीचविधानम्। क्रौञ्चाभिनिधनेत्यादिनात्र सर्वासु वृण्यादिभूतस्य ह्रस्वस्याक्षरस्य दीर्घविधानम्। वृत्रेषु सप्तहे इति। वृत्रेष्विन्द्र इत्यत्र षुशब्दात्परं अवृद्धादित्यादिना व्यवधानप्राप्तस्य लोपविधानम्। काष्ठास्वर्वत इत्यत्र सुशब्दात्परमवृद्धादित्यादिना व्यवधानप्राप्तस्य वकारस्य द्व्यन्तस्थ परेतु लोप इति द्व्यन्तस्थ परत्वाल्लोपः। सप्तहे त्वाद्य इति त्रिरुक्तानामन्त्यं वचनमित्यनेन त्रिरुक्तस्य निधनभूतस्य स्तोभस्यान्त्य वचने प्राप्ते आद्यं वचनम्।।

2.महासाम[1]- पुरो।। सम्मील्ये लघुविनते। इति। सम्मील्यमित्यस्य साम्नोनाम विकल्पेन विनतप्रत्यये लघ्वक्षरस्य दीर्घविधानम्। ह्रस्वं लघु ,संयोगे गुरु, दीर्घं चेति। पर्वाणिनोक्तम्।इन्दूऽ2:- तन्दूऽ2:। विश्वाऽ2। यज्ञाऽ2।। एतेषां पर्वणामादि भूतस्य संयोगे गुरु इत्यनेन गुरुसंज्ञकत्वात् दीर्घं न भवति। सम्मील्ये जिह्व्यं न कृत्यश्चाधिया इति यकारे च प्रत्यये इत्यादिना यकारे परतः पदमध्यगतस्य वृद्धस्य ताल्यस्याभाव उक्तः। अत्र वृद्धस्याप्याभावविधानम्। ए अस्य इति।।

3.महासामोत्तरम्[2]- इन्दूऽ2:।। ह्रस्वस्य दीर्घविधानं पूर्वस्मिन् सामान्युक्तम्। न विशेषोऽस्ति।।

।।एकाहस्समाप्तः।।

1.ग-सम्मील्ये।। 2.ग- सम्मील्यः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अहीनः प्रारम्भः

।।प्रथमा दशतिः।।

1.ऋतनिधनमाज्यदोहम्[1]- च्योहम्। प्रसुन्वानाऽ2।। आज्यदोहानि प्रतिलोमानि। तेषामाद्यस्य सामादावाद्यं वचनम्। आज्यदोहानामनुलोमक्रममुत्सृज्य प्रतिलोमक्रमं भवति। ऋतनिधनमीनिधन त्रीणिदोहानि प्रतिलोमानि। तेषां प्रतिलोमानामाद्यस्य सामादौ त्रिरुक्तस्याद्यं वचनं भवति। आज्यदोह द्यौतानयोः जुहूसङ्घातमिति। अत्र योनिवदिदं सङ्घाते प्राप्ते जुहूसङ्घातविधानम्। सुरुपकृत्नुमूतये इत्यत्र तृतीये साम्नि जुहूमसाइद्यविद्यवि। ह्वंगिर्यमिमदीत्यादिनात्र महित्रीणाद्धितीयस्याक्षरस्य ह्रस्वस्य भृशब्दस्य वृद्धिविधानम्। प्रसुन्वानायां सर्वत्रेति भृ प्रसुन्वानायां गौतमसध्रश्यवाश्येत्यादिना भृशब्दस्यानाभावः।।

2.ईनिधनमाज्यदोहम्- अयँसोमाः।। यानिपार्थे तानि द्वितीये दोहे इति। पार्थे पाहियोजिरुणि सूनिथावित् इत्यत्रापि प्रकृतिरित्यर्थः। त्रिष्टुभिचोतायामित्यादिना ऊतास्वरस्य द्वितीय चतुर्थयोरवृद्धि प्राप्ते अतये इत्यत्र ये शब्दस्य पुनर्ह्रस्वविधानम्।।

3.त्रिणिधनमाज्यदोहम्- तिस्रोवाचाः।। यानि संक्रोशे तानि तृतीये दोह इति संक्रोशे च ईवह्निस्तीम्ब्र मनीधेन चम्वेति। तीव्रममीधेनवस्तिमदे अत्रापि प्रकृतिरित्यर्थः। स्ये चेति । ऊताद्वितीय चतुर्थयोरवृद्धिः। अपुरन्धिं प्रशस्तिम् इति सर्वत्रान्त्यमित्यनेन ऊताया अन्त्याक्षरस्य सर्वत्र वृद्धिप्राप्ते धिशब्दस्य अवृद्धिविधानम्। त्रिरुक्तानामन्त्यं वचनमिति निधननियमः।।

4.सङ्कृति-एंश्राया।। श्रायन्तस्सर्वास्वित्यत्र सर्वासु स्तोत्रीयास्वगतिः। गोष्ठप्रतोदेत्यादिनात्र सर्वासु स्तोत्रीयासु पादादिभूतस्या-

1.ग- आज्यदोहानि।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षरस्य ऋक्स्वरवदुच्चनीचविधानम्। कृतिनि तृतीये दे रम्यते इत्यत्र सर्वासु स्तोत्रीयासु तृतीयपादे विरामविधानम्। किमत्र विराम इत्यत्राह, सूत्रकारश्चाह। पाङ्क्तस्यानुष्टुप्सु द्वितीयं पादं द्वैधं व्यूहे चतुरक्षरशो यथा ऋषभस्य शाक्वरस्य तृतीयबृहतीष्वष्टाक्षरं चतुरक्षरं च यथा सङ्कृतिर्न इति स्तोभाद्यं वचनं प्रतिस्तोत्रीयमित्यत्र त्रिरुक्तानामाद्यं वचनं प्रतिस्तोत्रीयं इति स्तोभनियमः।।

5.पार्थुरश्मम्- ए[1]स्वादो[2]ः ।। रश्मेयाइ वस्वीः प्र। पार्थुरश्मे स्वा स्वाः कार वर्जमिति। ओवौकारयोरनन्तर इत्यादिना सर्ववर्णाना-माभावेप्राप्ते अत्र प्रिया इत्याःकारं विना सर्ववर्णानामाभावविधानम्। आन्धादिः श्मे इति अत्र आन्धास्वरादि भूतानां वर्णानां वृद्धिप्राप्ते अधृष्टास्मान् मधोर्वृष्णा वस्वीश्चेति अत्र मधोर्वृष्णावस्वीः इत्येतेषु आदिभूतानां वृद्ध इत्येतेषां वर्णानामवृद्धिविधानम्। वरीस्स्वासुरश्मे इति आइः कारस्य भेस्वरे प्रत्यये ग्रहणैर्विसर्गलोप इति अनेन सयावरी इत्यत्र आइभूतरीशब्दात्परस्य विसर्जनीयस्य लोपविधानम्। व्रतान्यस्य श्यैतवाजीययोरिति न्यशब्दोऽत्र विकृष्टः। ओवौकारयो-रित्यनेन आभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति पुरुणीत्यत्र रुशब्दस्यानाभावविधानम्।।

6.अश्वव्रतम्- हौ[10]-होइ।। योन्यभावादस्य साम्नस्वरूपमन्य-साम्नां पर्वान्तरैः प्रदर्शयितुं फुल्लकार आह। अश्वव्रते श्पतिः प्र। अश्वव्रते हौ ह्वौ ह्यौ हौ एतेषु होइकारान्तेष्वित्यर्थः। चत्वारस्सोमा इति। हौ इत्यादि हो स्तोभेषु चतुर्ष्वक्षरेषु सर्वेषां वर्णानां प्रथमस्वरविधानम् । होशब्दात्परं गतेः प्राप्तिः। होशब्दानां वृद्धिविधानं च। सोमसङ्घातः कुतः प्रपुनानायां प्रथमे साम्नि। होइ-होइ सोमायवचा इति। वा औहोवात्सिबाया इति रा औहोवा त्सिबा भवति। त्सिबायाः प्रथमाक्षरस्य लोपः। ऊनत्वात्सिबा पूर्वत्वाच्च होशब्दश्च वृद्धिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वज्योंतिः प्रथमोच्चमेकारादि कृष्टमिति। उपायपरत्वाच्च प्रथमोच्चस्य स्वज्योंतिः शब्दस्य निधनभावः। अत्र वाशब्द उपायशब्दो नोच्यते। तेह्यष्टाः प्रथमोच्चमिति व्यवधानत्वाच्च स्वरनियान्तः स्वर्यन्ता इति स्वज्योंतिरिति अत्र त्रिशब्दस्य सम्प्रसारणविधानम्। तस्य स्वज्योंतिरित्यस्य निधनभूतस्य एकारः आदौ कृष्टो भवति। एवं पदाय पदायस्तोभा इति। अथ हौ ह्वौ ह्यौ हौ एवमादयः स्तोभाः प्रा प्रथमोच्चत्वात् स्वज्योंतिषः त्सिबान्ताः स्वारान्ता भवन्ति। अभि वाजित्येतस्य आदौ भवति एकारविधा समाप्ता । एवमुत्तरत्रापि। परासु विधासु ज्येतिर्भाः, शिशुर्वाजी, अश्वोमेध्या इति पदगीतिस्तुल्येति यदादौ वान्तात् स्तोभास्तुत्वा स्वज्योंतिषः प्राक् सर्वस्य समानम्। स्वज्योंतिस्थाने परासु विधासु ज्योतिर्भाः। शिशुर्वाज्यश्वो मेध्या इति भवति। परयोरुद्धार इति। परयोः स्तोभस्य प्रथमोच्चस्य उद्धारः। सामान्ते निधनाय स्तोभा इति सर्वत इति निधनमुपग्रहादिति उपग्रहादि स्वर्वत निधनं भवति। उपग्रहशब्देन एकार उच्यते। गोष्ठ प्रतोदेत्यादिनात्र पादादिभूतानां वर्णानां ऋक्स्वरवदुच्चमीचविधानम्। ज्योतिर्भा इत्यत्र भा शब्दस्य निधनान्त भूतस्य उदात्तस्य अन्तोदात्तं वृधे स्वरमिति वृधे स्वरे प्राप्ते श्रियेतिर्भा इति न्यायादपेत प्रकरणे ग्रहणात् भाशब्दस्यात्र सम्प्रसारणमेव।।

7.व्याहृतिसामानि- भूरित्यादि पञ्चव्याहृतिसामानि। तेषां प्रस्तावादिर्नास्ति। परिसामसु विनियोगात्। तथा च सूत्रकारः - पुष्करपलाश उपधीयमाने हिरण्मय पुरुषे स्वयमातृण्णासु च शर्करासु व्याहृति सामानि गायेद्यजमानमिति व्याहृतिसामानि पञ्च। भूर्भुवः स्वः सत्यं पुरुष इति एतासु पृथगिति। व्याहृतिसामानि यथोद्दिष्टं भवति तथैवोच्यते। अग्निन्दूतास्तावोमन्द्रेति भूरादिषु पञ्चसु सामसु अग्निन्दूतास्वरः प्रस्तावो भवति। मन्द्रग्रहणाच्च अग्निन्दूतायाः अत्र प्रस्तावः । सोमस्त्रिरुक्ता इति अपर भक्तय उच्यन्ते। भूरित्यस्मिंस्तावे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमसङ्घातस्वरः त्रिरुक्तो भवति। सोमसङ्घातश्च प्राग्भवति। भूरित्यस्मिन्नित्यादि भाष्य वाक्यस्य अयमर्थः। भूशब्दस्य प्रथमस्वरविधानम्। होशब्दस्य भूशब्दात् पूर्वभवित्वं च । अतः तृतीयभक्तिरुच्यते। आनीकयायां तृतीय इति तृतीयः सोमसङ्घात आनीकयामापद्यते हाउवा इति। स्वज्योतिर्निधनमकृष्ट एकारादि अकृष्टौ एकारान्निधनं भवति। प्रकृतिव्याहृतिषु द्रष्टव्यां पुरुषशब्दः प्रथमस्वरो व्याहृतिषु पुरुष इत्यत्र षशब्दस्य प्रथमस्वरे विसर्जनीय-लोपः। प्रथमोच्चत्वान्निधनमुपायपरत्वाच्च।। इति प्रथमा।।1।।

==*==

॥ द्वितीया दशतिः॥

1.दीर्घतमसोर्कः- आ[1]या[2]म्।। एकस्याम्। अयम्पूतमसोऽर्के पतिः। प्र। तमसेचान्धादित्यादिना सर्वत्र अन्धात्परस्य पर्वणः प्रथमस्वरमेकाक्षरविधानम्।।

2.देवस्थानम्- हा[20]उश्री[0]णन्तो[0]गो।। आथर्वणदेवस्थानेत्यादिना विकारः। रिक्षस्थानयोश्चेत्यत्र पादादि भूतानां वर्णानां ऋक्स्वरवदुच्चनीचविधानम्।।

3.अग्नेरर्कः- ति[2]स्रो[0]वा[0]चउऽ3दा[1]इरा[2]ऽ1ताऽ2इ।। स्पष्टम्।।

4.दीर्घतमसोर्कः -पा[1]री[2] ।। स्वर्णिधने यानी भक्ती तानि परिप्रतमसोऽर्के प्रतेसो चेति। तेसोश्वे चेति प्र। नोर्मयोर्णसार्जुनऋभ्वस एवामृताचार्के इति एवामृतायेत्यत्र वृद्धमृवर्णमित्यादिना आभावप्राप्त मृशब्दात्परात् विद्यमानस्य रेफस्य व्यञ्जनमपराङ्गं विरामे लुप्यत इति अभ्यासे चेत्यनेन लोपप्राप्ते अलोपविधानम्। मा । तायार्ताया। ताया।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5.रथन्तरम्- आभित्वावृषभासुतोवा ।। तरेद्विषं प्र। रथन्तरे चेति। अस्यायमर्थः । तृम्पायामृवर्णं प्राप्तं प्रथमस्वरायां वृद्धायामुपदिश्यत इत्यनेन तृम्पेत्यत्र तृशब्दस्य वृद्धमृवर्णमित्यादिना आर्भावप्राप्तस्य तृकारस्तु न सर्वेष्वित्यादिना पुनरार्भावप्राप्तस्य प्रथमस्वरभूतस्य वृद्धस्य आर्षभे रेफमुद्दिश्यते। त्राम्पा इति। रथन्तरे चेत्यत्र रेफादेशः। त्राम्पाविधास्तु इति रथन्तरेस्तावाद्यमित्यादिना आद्यायां प्रस्तावप्राप्तस्य वृद्धिः। रथन्तरे स्तावाद्यमित्यादिना आद्यायां प्रस्तावप्राप्तस्य वृद्धिः। रथन्तरे सर्वमित्यादिना आभावानाभावौ भवतः। रथन्तरे वृषेत्यादिना ह्रस्वाक्षरस्य दीर्घविधानम्।।

6.बृहत्[1]- औहोइयज्जायथाअपूर्वियाऽ3ए²।। बृहतिथिवीं। प्र। अनुष्टुप् प्रथमायां चेति। बृहत्यौहोवायाः परमित्यादिना सर्वत्र षष्ठाक्षरस्य कर्षणे प्राप्ते अत्र प्रथमायामौहोवायाः परस्य चतुर्थाक्षरस्य कर्षणविधानम्। तद्यज्जायथा द्वितीयायां बृहद्रथन्तरयोरिति तत्ते इत्यत्र पादान्तस्य तकारस्य वाचि सर्वमित्यादिना लोपप्राप्तस्य अतिहारविधानम्। यच्छब्दस्तत्रैव बृहतीति तत्तेयज्ञा इत्यत्र एव यज्जान्तयच्छेत्यत्र यकारात्परस्य पदान्तस्य च अतिहारः। हति स्तावात् स्वरान्त इत्यनेन बृहत्सु सर्वत्र प्रस्तावात्परस्य पर्वणोऽन्त्याक्षरस्य वृद्धि प्राप्ते नगशूपधा इति अत्र तृतीयायां द्वितीयपर्वान्तस्य पशब्दस्य अवृद्धिविधानम्। आमायामासूर्य सर्वत्रेति र्यं शब्दोऽत्र सङ्कृष्टः। दिवियज्जायथोत्तमायां बृहदिति वीत्यत्र वीशब्दग्रहणादाभावः। न प्रत्यय विशेषोऽस्ति। तृतीयादिन्यामित्यादिनामौहोवायामित्यादिनां सर्वपदान्तानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति आसूर्यमित्यत्र सूर्यशब्दस्यानाभावविधानम्। [3]प्रत्यवरोहे चेति गिर्वणसे बृहदित्यत्र सेशब्दस्य प्रत्यवरोहे अवृद्धिविधानम्। अभ्यासे अवृद्धिरित्यर्थः।।

---

1. ग-बृहत्साम। 2-ख-औहोइमाभेममाश्रमिष्माऽ3ए। 3-प्रत्यवरेहे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2 1 2

7.द्विरिडपदस्तोभः- अभिप्रि। पदस्तोभः।। सर्वोद्धारोऽतोऽन्यत्रेति अत्र सर्वस्तोभानामुद्धारः। स्तोभानां चेत्यत्र प्रतिस्तोत्रीयं द्वादशनिधनानि तेषां द्वादशनिधनानां अत्र द्वे इति इडानिधने शिष्टानामाद्यस्याक्षरस्य ऋक्स्वरवदुच्चनीचे प्राप्ते वक्तापतिरित्यत्र पशब्दस्य ऋक्स्वरे निधनभूतस्य उच्चविधानम्। अभिप्रीत्यक्षराणि सर्वाणि द्वितीये चतुर्थे पादे इत्यत्र प्रथमतृतीययोस्त्रीण्यक्षराणि निधनानि भवन्ति। द्वितीयचतुर्थौ पादौ सर्वमेवोच्यते। असूर्यस्याभिप्रियाणीत्यादिना र्यशब्दो विकृष्टः।।

1 20 0 10

8.चतुरिडपदस्तोभः-वृषामतीनाम्प। पदस्तोभः। पदस्तोभानां चेत्यत्रापि प्रतिस्तोत्रीयं द्वादशनिधनानि। इडानिधनानि चत्वारि। शिष्टानामष्टानां निधनानां आदिभूतस्याक्षरस्य ऋक् स्वरवदुच्च नीचविधानम्। आर्चिकं निधनं न्यायेत्यादिना निधनभूतानां निगदवर्तीनां पर्वणामन्त्यभूतस्य सम्प्रसारणे प्राप्ते जसावसं तमं धर्मन्निति न्यायादपेत प्रकरणे ग्रहणादत्र पाशब्दस्य वृधे स्वरमेव न सम्प्रसारणमिति। व्यस्थिरन् षडिडेत्यत्र व्यशब्दस्सङ्कृष्टः।।

2 1 20 1 2

9.षडिडपदस्तोभः-पवित्रन्तेवित।।इति द्वितीया ।।2।।

==**==

।।तृतीया दशतिः।।

10 0 2 10 2 1 2 0 1 20 1 2

1. अष्टेडपदस्तोभः-[1]ईडा-धर्तादिवःपवतेकृत्व्योरसः।। स्तोभानां चेत्यत्रापि सर्वासु द्वादशनिधनानि। पदनिधनानि चत्वारि इडानिधनान्यष्टौ। तेषां पदनिधनभूतानां आदि भूतस्याक्षरस्य यथर्च्चविधानम्। अवक्तातविष्यमायाविन इत्यत्र तृतीयायां तविष्यमाण इत्यत्र ऋक्स्वरवन्नीचस्य तशब्दस्या यथर्च्चविधानम्। मनीषिभिरित्यत्र

1-ख-ईडा नास्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भिशब्दस्य स्वरितस्य निधनभूतस्य सम्प्रसारणप्राप्तस्य न्यायादपेत प्रकरणे सुतउद्रष्णिभिर्धयन् इति विशेषग्रहणात् अत्र विशब्दस्य वृधेस्वरमेव न सम्प्रसारणम्। कृत्वोऽनुमाद्योत्यो गभस्त्यो स्वः ष्वाविशेत्येते शब्दाष्डष्टेडे एते षट् शब्दाः सङ्कृष्टाः। ऊसदो विशीयाष्टेडरूपेष्विति। पवमान ऊर्मिणेत्यत्र ऊकारस्य ऋक्स्वरे अनुदात्तस्य निधनभूतपर्वमध्यगतस्यात्रोच्चविधानम्। रूपदोविशीया-ष्टेडेषूर्म्मिणोद्द्राव इति। गतार्थमेतत्। श्वत एके वृधेस्वरमिति श्वत इत्यत्र तः शब्दस्य ऋक्स्वरे प्रचयस्य निधनभूतपर्वान्तस्य सम्प्रसारणे प्राप्ते एके आचार्याः वृधे स्वरं मन्यन्ते।।

2 0 0 0 0 0 0 0
2.आथर्वणम्- उहुवाओहा-औहोवा-पुनानस्सो।। आथर्वणे-त्यादिनात्र विकारः। दिव्यं ज्यर्षसि यशस्सं सर्पपुष्पे ष्विति। व्यञ्ज्य शब्दावत्र विकृष्टौ।आपृच्छ्यमवृद्धं सर्वत्रेतिच्छ्य शब्दोऽत्र सङ्कृष्टः।।

3 20 1 2 1
3.स्वाशिरामर्कः- अ यामायाम्-परिप्रियाऽ2।। तमसोर्के विश्शुतिर्जातेमही।प्र।त्रिरुक्तस्य सामादाविति अत्राद्यं वचनम्।।

20 0 0 0 2
4.बृहत्-औहोइसुतासोमधुमत्तमाऽ3ए।। बृहति दिवे पूर्वं प्र। बृहत्यौहोवायामित्यादिनात्र षष्ठाक्षरस्य कर्षणे प्राप्ते अनुष्टुप् प्रथमायां चेत्यत्र प्रथमायां चतुर्थाक्षरस्य कर्षणविधानम्। आः कारोत्वम्। मदाः सुतासोमायां बृहद्रथन्तरयोस्तावे इत्यत्र द्वितीयायां प्रस्तावे वोनदा इत्यत्र आःकारस्यात्वविधानम्। हतिस्तावात् स्वरान्त इति प्रस्तावात्स्वरस्य पर्वणोऽन्त्याक्षरस्य बृद्धिप्राप्ते नगशूपधा इत्यत्र तृतीयायां प्रस्तावात्परस्य पर्वणोऽन्त्यस्य धाशब्दस्य वृद्धिविधानम्। बृहति च द्रासाद्वितीये कँ सर्वत्रेति बृहति सर्वत्र द्रासात्परस्य पर्वणः द्वितीये स्वरे एकाक्षरावस्थाने प्राप्ते प्रथमायां तृतीयमिदं धयीसूचेति अत्र तृतीयायां स्तोत्रीयायां रयीणामित्यत्र त्रैशब्दस्य द्वितीयस्वरं विहाय तृतीयस्वरविधानम्। तृतीयादिन्यामित्यादिना सर्वपदान्तानां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आभावे प्राप्ते अत्र पवित्र इत्यत्र विशब्दस्येति देवासो अब्रुवन्नित्यत्र तिशब्दस्य च पदमध्यगतस्य तालव्यस्यापि आभावविधानम्। तृतीयादिन्यामित्यादिना सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति समुद्र इत्यत्र मुशब्दस्यनाभावः।।

5.बृहन्निधनं वार्कजम्भम्[1]- 20हाउपुरो0जितीवो0अन्धासाः12।। दावसुनिधनपूर्वजनित्रेत्यादिना तृतीयपादाद्युच्चम्। योनावेवनीचम्। जम्भस्वरयोरनाभावस्तालव्यस्यान्तःपदिकस्येति अत्र पदमध्यगतस्य हादौस्तोभे परतः आभावविधानम्। यज्ञायसन्तु देवो धौतो मत्सरासोऽश्वश्च जम्भे इति इन्दुरश्व इत्यत्र श्वशब्दस्य भक्तिमध्य इत्यादिना स्तोभे परतः पदगाने प्राप्ते अश्वशब्दस्य सन्धिगान विधानम्। यज्ञायसन्तु सर्वेत्रेति तुशब्दात्परमवृद्धादि पदान्तादित्यादिना व्यवधाने प्राप्ते वृद्धात्परावित्यादिना लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्।।

6.अन्तरिक्षम्- 20हावा0सो0मस्वा।। रिक्षस्थानयोश्चेत्यत्र सर्वासु स्तोत्रीयासु पादादिभूतानां पर्वणामृक्स्वरवदुच्चनीचविधानम्। अमीढ्वां नहिरिक्षे इति मीढ्वाँ सप्तिरित्यत्र ऋशब्दस्य ऋक्स्वरे अनुदात्तस्य प्रतिहारोद्गीथयोरुच्चविधानम्। आथर्वणदेवस्थानेत्यादिनात्र सर्वस्तोभानामनुद्धारः। रहस्ये त्वृगन्तीयश्चानृगन्तीयश्चास्पर्शप्रथमस्वरो नामिविसर्जनीयश्चाभवतीति। ओवौकारयोरनन्तर स्वर इत्यादिना सर्ववर्णानामाभावे प्राप्ते अत्र ऋगन्तीयश्चानृगन्तीयश्चानां प्रथमस्वरगतानां स्पर्शविसर्जनीयानामाभाव विधानम्। वाजयुस्सदोऽन्धीगवनायामन्तरिक्षे इति। उःकारस्यौहोवायां प्रत्यये ग्रहणैर्विसर्गलोप इत्यनेन वाजयुरित्यत्र युशब्दात्परस्य विसर्जनीयस्य लोपविधानम्। ओवौकारयोरित्यादिना

1.ग- वार्कजम्भाद्यम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्ववर्णानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति। अत्र युशब्दस्य लुप्तविसर्जनीयस्यानाभावविधानम्। कर्षणं तु निवर्तेते त्साइबायामुपद्रवे इत्यत्र कर्षणवृद्धे न भवतः।।

7.आथर्वणम्-उहुवाओहा-औहोवा-अभिसोमा।। आथर्वणेत्यादिनात्र सर्वस्तोभानामनुद्धारः। मद्यम शब्दोऽत्र विकृष्टः।।

8.रायोवाजीयम्- एआग्नीम्-वोदेवमग्निभिः।। वाजीयेऽग्निं प्र। [1]अग्निंवोदेवाजीयमुपान्त्यं कृष्टं सर्वास्वित्यत्र सर्वासु स्तोत्रीयासु द्वितीयपर्वणः उपान्त्यस्याक्षरस्य कर्षणविधानम् अन्यत्र रायोवाजीये उपान्त्यात्पूर्वस्य अक्षरस्य कर्षणमित्यर्थः। क्रोशौपगवेत्यादिनात्र उद्गीथाद्युच्चं योनावेव नीचम्। [2]वृष्ण उद्यस्यत इत्यत्र वाजीये इति। उद्यस्यते नवजातस्य वृष्ण इत्यत्र पादान्त्यात् ष्णशब्दात् परस्य एङःपदान्तादित्यनेन प्रश्लेषप्राप्तस्याकारस्य पादान्त्यात्परस्वर इत्यनेन विश्लेषप्राप्तस्य प्रश्लेषविधानम्। रुष उद्यस्यत इत्यत्र वाजीये इति। अरुष इत्यत्र रु शब्दस्य भक्तिमध्यः पादमध्यश्चास्तोभे प्रत्यये इति सन्धिगाने प्राप्ते पदगानविधानम्। आउवाव्यवहितमित्यादिना सर्ववर्णानामाभावे प्राप्ते रहस्ये च न सर्वमाभवतीति व्यञ्जनं च न लुप्यत इत्यत्र सर्वासु आउवा व्यवहितस्यापि अनाभावः। [3]अग्निंवोदे वाजीये द्वितीयायां चेत्यत्रास्तुन्यत्राकारस्याभ्यास विधानम्।।

9.अग्नेरर्कः- स्वादिष्ठयामऽ3दाइष्ठाऽ1याऽ2।। सर्वोद्धारोऽतोन्यत्रेति स्तोभानामुद्धारः।।

10.दीर्घतमसोर्कः- द्वाइर्याम्।। तमसे चान्धादित्यादिना चतुर्षु पादेषु आन्धात्परं प्रथमस्वरे एकाक्षरमेव। नोर्मयोर्णसार्जुन ऋभ्वस एवामृताचार्के इति ऊर्मय इत्यत्र ऊकारात्परस्य व्यञ्जनमपराङ्गं विरामे

1.ख-अग्निंवाजीयमुपान्त्यम्। 2-(ख)-वृष्णरद्यस्यत..। 3.ख-अग्निंवोवाजीये..।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लुप्यते। अभ्यासे चेत्यनेन लोपप्राप्तस्य रेफस्यालोपविधानम्।। इति तृतीया।।3।।

==***==

1.पयः- प^{2}रिसुवा^{0}नो^{0}गा33इरि^{2}ष्ठाः।। पयसि विश्वेतिमा प्र। पयसि परिनोगि। अत्र वृण्यादिभूतस्य एकाक्षरस्य दीर्घविधानम्। स्वानः परिस्वानायामित्यादिना स्वाशब्दोऽत्र विकृष्टः। त्वं कविर्द्धितीये-दन्वतेति त्वं विकृष्टः। समानोदर्केष्वित्यादिना पूर्वयोस्तोत्रीययो-रुद्धारः। त्रिरुक्तानामन्त्यं वचनमित्यत्र निधनान्तं वचनमेव।।

।।अहीनं समाप्तम्।।

==*****==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सत्रं प्रारम्भम्

।।प्रथमा दशतिः।।

1.रथन्तरम्- माभेममाश्रमिष्मोवा ।। सख्ये स्फिग्यं च रथन्तरे इति अत्र सङ्कृष्टः। रथन्तरे स्तावाद्यमित्यादिना प्रस्तावाद्यस्य वृद्धिः। रथन्तरे सर्वमाभावतीत्यादिना प्रस्तावाद्यस्य वृद्धिः। रथन्तरे सर्वमाभवतीत्यादिनामावानाभावौ। रथन्तरे वृषेत्यादिना ह्रस्वस्य दीर्घविधानम्।।

2.रायोवाजीयम्- एआग्नीम् ।। वाजीये प्रथमेग्निं ।प्र। क्रोशौपगवेत्यादिनात्रोद्दीथाद्युच्चम्। योनावेव नीचम्। समानोदर्केष्वित्यादिना पूर्वयोरुद्धारः।।

3.रायोवाजीयम्- एमाहे ।। द्वितीये महे प्र। बोधीये महेरायोवाजीय इति। बोधय इत्यत्र यशब्दात्परं पादादिभूतस्य आद्गुण इति प्रश्लिष्टस्य उकारस्य पादान्त्यात्परः स्वरो विकृष्यत इत्यनेन विश्लेषप्राप्तस्य पुनः प्रश्लेषविधानम्। महेनायां श्रेति सत्यश्रवसिवाय्ये इत्यत्र संयुक्तयकारयोर्व्यञ्जनभूतः पर्वयकारः प्लुतयकारस्संपद्यते इति सत्यश्रवसिवायायाइ इति यकारविधानम्। महेनायां चोत्तरायोर्वाजीय इति सही यसीत्यत्र गृहीशब्दस्य पदमध्यगतस्य तालव्यस्य यकारे च प्रत्यये इत्यादिना आभावे प्राप्ते उभयत्राभावविधानम्। महेनायां तूपान्त्यं पदं प्रतिस्तोत्रीयं वाजीये सङ्घातैकत्वादिति। समानोदर्केष्वित्यादिनात्रोपान्त्यस्य पादस्याप्युद्धारे प्राप्ते सङ्घातैकत्वादित्युपान्त्यपादस्य अनुद्धारविधानम्। पूर्वयोः स्तोत्रीययोः अन्त्यपादस्यैवोद्धारः इत्यर्थः। आउवाव्यवहितमित्यादिना सर्वत्राभावे प्राप्ते रहस्ये च न सर्वमित्यादिना सूनृते इत्यत्र ते शब्दस्यानाभावः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

4.रायोवाजीयम्- एप्राती।। तृतीये प्रतिवार्षीस्तनीतनी प्र। क्रोशौपगवेत्यादिनात्र उद्गीथाद्युच्चम्। समानोदर्केषु इत्यादिना पूर्वयोरुद्धारः। रहस्ये च न सर्वमित्यादिनात्र अनाभावः।।

5.दीर्घतमसोऽर्कः- आभी - प्रीयाणिपवतेचनः।। तमसोभिप्रि-नीचरीयर्ये अभि अधि प्र। तमसे चान्धादित्यादिनात्र सर्वासु आन्धात्परस्य पर्वण आदिः एकाक्षरं प्रथमे स्वरे अनेकाक्षरं द्वितीयस्वरे। तृकारस्तषयोः प्रत्यययोरार्भवतीत्यादिनात्र तृतीयमित्यत्र तृशब्दस्यानार्भावः।।

6.भर्गः- यत्- उत्सोदेवाः।। भर्गस्य सामादौ स्तोभान्त्यं पदमिति स्तोभान्त्यं यच्छब्दस्तस्य विधानः। दिव्यं ज्यर्षसीत्यादिनात्र विकृष्टः।।

7.आथर्वणम्- उंहुवांओहा - औहोवा - परिधींरा।। आथर्वणे-त्यादिनात्र विकारः।

8.दीर्घतमसोऽर्कः- श्रीइणा ।। अध्यास्यायां तमसोर्के परि प्र।।

9.सङ्कृति- एपारी ।। सङ्कृतिनि परि प्र। रहस्ये कृतावित्यादिनात्र गतिः। कृतिनि तृतीयेदे इत्यादिना पाङ्क्त्व सिध्यर्थं द्वितीये पादे विभागविधानम्। सङ्कृतिनि स्तोभाद्यं वचनं इति त्रिरुक्तस्याद्यं वचनम्। हा औवाइ इति गोष्ठप्रतोदेत्यादिनात्र पादादिर्यथर्चम्।।

10.यशः-पुनानस्सोमधारया।। दिव्यं ज्यर्षसीत्यादिनात्र पादादि भूतस्याक्षरस्य प्रस्तावान्त एव नीचविधानम्। कीर्त्ययशस्सँसर्पपुष्पेषु वान्तेष्वन्तस्थो नीचैरिति, हिरण्यय इत्यत्र यः शब्दस्य स्वरितस्य प्रस्तावान्त एव नीचविधानम्। नोद्गीथोपद्रवयोरित्यर्थः। गुरुषु निधनैकदेशेत्यनेन गुरुनिधनत्वात् कुत्र आरम्भ इत्यपेक्षायां शतमादि यशसीति शतञ्जीवेमेत्यादि निधनम्।। इति प्रथमा ।। 1।।

==*==

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

।। द्वितीया दशतिः ।।

1.ईनिधनवार्कजम्भम्[1]- पुरोजितीवोअन्धासाः ।। विश्वाच्ये-त्यादिनात्र च्यशब्दोऽत्र विकृष्टः। जम्भोत्तर सँस्तोभाङ्गोवैरूपाणां सामान्तेऽन्त्यं वचनमिति अत्र स्तोभानां औहोवेत्यन्तं वचनमेव।।

2.उत्सर्पः[2]- उत्सोर्दवोहिरण्ययः ।। कीर्त्ययशस्सँसर्पेष्वित्यादिना हिरण्यय इत्यत्र यः शब्दस्य प्रस्तावान्त एव नीचविधानं नोद्गीथान्त इत्यर्थम्। दिव्यं ज्यर्षसीत्यादिना ज्याशब्दः सङ्कृष्टः।। गोष्ठप्रतोदेत्यादिनात्र पादान्तभूतस्य अक्षरस्य यथर्च्चविधानम्। सर्वोद्धारोऽतोऽन्यत्र इति स्तोभानामुद्धारः।।

3.सर्पसाम[3]- अभिप्रवस्सुऽ3राधाऽ1साऽ2म्।। अत्रापि स्तोभानामुद्धारः।।

4.प्रसर्पः[4] - पुरोजितीवोऽ3आन्धाऽ1साऽ2 ।। पूर्ववदत्रापि स्तोभानामुद्धारः।।

।। सत्रं समाप्तम् ।।

==*****==

1. ग-वार्कजम्भोत्तरम्।।2. ग-संसर्पोत्तरम्।।3.ग- संसर्पाद्यम्।। 4.ग- सर्पद्वितीयम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रायश्चित्तं प्रारम्भम्

।।प्रथमा दशतिः।।

2 0 0 0 0 0 0 0

1.आथर्वणम्- उहुवाओहा-औहोवा-तँवोदस्माम्।। आथर्वणे-त्यादिना अविकारः। अन्धसस्तम्वोदस्माद्यायामाथर्वणसौभरयोरिति अन्धस इत्यत्र सशब्दात्परस्य पादादि भूतस्य एङःपदान्तादित्यनेन प्रश्लेषप्राप्तस्याकारस्य पादान्त्यात्परस्वर इत्यादिना विश्लेषप्राप्तस्य पुनः प्रश्लेषविधानम्। आथर्वणे अनुस्वारस्पर्शे सर्वमित्यादिना अनुस्वारस्पर्शरिफाणां सर्वत्रातिहारे प्राप्ते सर्वेष्वाथर्वणेषु अतिहार प्राप्तानां अनुस्वारस्पर्शरिफाणां अलोपविधानम्।।

2 0 0 0 0 0 0

2.आथर्वणम्- उहुवाओहा-औहोवा-अभिप्रवाः।। आथर्वणे-त्यादिनात्रा विकारः।।

3 20 30 0

3.वृषा- अभाओवा।। वृष्णि सर्वमाभवत्योवायामनन्तरस्वर-नीचाद्यायां प्रत्यय इति। अस्यार्थः- नीचस्वरयुक्तओकारे परतः तत् पूर्वेषां वर्णानामाभावविधानम्। रथन्तरवृषाश्विनोर्व्रतेष्वोस्तोभे इत्यत्र स्तौभिकाकारे परतः पूर्वस्य ह्रस्वाक्षरस्य दीर्घविधानम्। द्वितीयात्कृष्टं तालव्यं हाइशब्दश्चाभवति स्तोभेघमादौ प्रत्यये इति एतदप्यनुवर्तते। शुकारमकारौ च वृष्णि इति अस्यार्थः। अत्र द्वितीयस्वरादारभ्य कृष्टान्तानां तालव्यानां शुकारमकारान्तानां प्रथमस्वरे स्तौभिके ओकारे परतः आभावविधानम्। वृष्णि सर्वे इत्यत्र सर्वस्तोभानामगति प्राप्ते न वशि प्रत्यय इति वशिप्रत्यये पूर्वस्य स्तोभस्य गतिर्भवति। वृद्धमृवर्णमित्यादिना आभावे प्राप्ते तृकारस्तु न सर्वेष्वित्यादि-नात्रानार्भावः। वृद्धमृवर्णमित्यादिना आर्भावे प्राप्ते अवृद्धमप्या-र्भवतीति प्रकरणे धृष्णु वृष्णीति अत्र धृष्णु शब्दस्यावृद्धमप्यार्भवतीति विधानम्।अत्र स्वरे परेतु गतिर्भवतीति गतिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

10 0 2 1 2 10 2
4.एकवृषम्-[1]हाहिम्-अभिप्रवस्सुराधसम्।। एकवृषे च देवतानामित्यत्र देवतानामनुद्धारः। इतरेषां स्तौभिकानामुद्धारः। गोष्ठप्रतोदेत्यादिनात्र पादादिभूतानां वर्णानां सर्वासु स्तोत्रीयासु ऋक् स्वरवदुच्चनीचविधानम्। त्रिरुक्तस्य सामादावाद्यं वचनमित्यादिनात्र सामादौ त्रिरुक्तानां स्तोभानां आद्यं वचनविधानम्।।

2 0 0 0 0 1 2
5.अश्विनोर्व्रताद्यम्- पुनानस्सोमधारयाओहाउ।। सर्वोद्धारोऽतोऽन्यत्रेति सर्वस्तोभानामुद्धारः। रथन्तर वृषाश्विनोर्व्रतेत्यादिना सर्वासु ओस्तोभे प्रत्यये पूर्वस्य ह्रस्वस्यापि दीर्घविधानम्। रथन्तरे सर्वमाभवतीत्यादिना ओस्तोभे प्रत्यये सर्ववर्णानामाभावे प्राप्ते अश्विनोर्व्रत पूर्वे च तालव्यमित्यत्र तालव्यस्याप्याभावः। न सर्व वर्णानामश्विनोर्व्रतपूर्व इकारोऽतिक्रान्त इति गुरुषु निधनैकदेश इति प्राप्ते अतिक्रान्त इकार एव निधनं भवति। त्र्यन्तरोश्विनोर्व्रत इति मात्रालक्षणमुक्तम्। इकार एवेत्यर्थः। दिव्यं ज्यर्षसीत्यत्र व्यं ज्य शब्दौ सङ्कृष्टौ।।

2 0 0 0 0 1 2
6.अश्विनोर्व्रतोत्तरम्- पुरोजितीवोअन्धसाहोहाउ।। अश्विनोर्व्रत इत्यत्र हादौ स्तोभे परतः पूर्वस्य ह्रस्वस्य सर्वासु दीर्घविधानम्। यित्नवेऽश्विनोर्व्रतोत्तरे इत्यत्र वेशब्दस्य पदान्तस्य च हादौस्तोभे परतः आभावविधानम्। जिह्व्यं न कृत्व्यश्च विकृष्टौ। विश्वाच्याश्विनोर्व्रत परित्याकूपारेत्यादिना च्याशब्दः सङ्कृष्टः। त्रिरुक्तानामाद्यं वचनमिति अत्र ई शब्दस्यान्त्यं वचनम्।।

1 0 0 2 10 2
7.अपां व्रताद्यम्[2]- पुनानस्सोमधाराऽ23या ।। [3]अपांव्रते च गवां च क्वान्तं प्रथममिति अत्र निधनानामादौ क्व शब्दान्तं यत् प्रथमं पदं

---

1. ग-हाहुम्।2.ग-अपांव्रते।। 3.ख--अपांव्रते च गवां च त्क्रान्तं प्रथमम् ग-अपांव्रते च गवांव्रते च क्वान्तं प्रथमम्, घ- अपांव्रते च गवांव्रते च क्ववान्तं प्रथमम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत् निधनं क्वान्तं निधनमेव। अग्निश्शिशुक्च इति। दिव्यं ज्यर्षसीत्यादिनात्र विकृष्टौ।।

1 0 0 20 1 2
8.अपांव्रतोत्तरम्- पुरोजितीवोअन्धाऽ23साः। सर्वोद्धारोऽतोऽन्यत्रेपि उभयोरपां व्रतयोस्सर्वस्तोभाना- मुद्धारः।।

1 0 0 0 ^ 1
9.गवाँ व्रताद्यम् पुनानस्सोमधाराऽ2या।। दिव्यं ज्यर्षसीत्यादि विकृष्टौ गवां च क्ववान्तं प्रथममित्यत्र निधनानामादौ एव गाव इति प्रथमपादान्त इत्यर्थः।।

10 2 0 1 2 0
10.गवां व्रतोत्तरम्- स्वादिष्ठयामदिष्ठया ।। गवां चोत्तरे इत्यत्र सर्वासु पादादि भूतानां वर्णानामृक् स्वरवदुच्चनीचविधानम्। अत्र त्रिरुक्तानामन्त्यं वचनमिति अन्त्यं वचनविधानम्।। इति प्रथमा।। 1।।

==*==

।। द्वितीया दशतिः।।

20 0 0 0 0 2
1.बृहत्[1]- औहोएनावोअग्निंनमसाऽ3ए।। अगतिस्तोभस्य स्वरे प्रत्यये सन्धावित्यत्र प्रथमायां प्रस्तावे स्तोभस्यागतिः। ते सर्वत्र विवृतमकारप्रत्ययमिति। अत्र ते शब्दस्य प्रकृतिभावः। बृहति च द्रासादित्यादिना सर्वत्र द्वितीयस्वरे एकाक्षरस्यावस्थाने प्राप्ते प्रथमतृतीय इदयंयीसूचेत्यत्र तृतीयायां सूनेत्यत्र सू शब्दस्य प्रथमस्वरादनन्तरं तृतीयस्वरविधानम्। स्वाहुतस्सदुद्रवायां वामदेव्य रथन्तर बृहति चेति स्वाहुत इत्यत्र सुशब्दात्परमवृद्धादित्यादिना व्यवधानप्राप्तस्य वृद्धात्परावित्यादिना लोपप्राप्तस्य वकारस्य पुनरलोपविधानम्।।

---

1. ग-बृहत्सामानि।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2. बृहत्-औहोइप्रत्युवदर्श्यायताऽ3ए।। द्वितीये सन्धि बृहतीति मही तवे प्र। दर्श्या बृहद्रथन्तरयोरितिर्श्या शब्दस्सङ्कृष्टः। व्यूषीत्यत्र व्यूशब्दस्सङ्कृष्टः। सङ्कृष्टप्रकरणे अग्रहणात् अत्र सूर्यशब्दश्च तद्वत् प्रत्युबृहत्यय इत्यत्र तृतीयादिन्यामित्यादिना सर्वपदान्ताना-माभावे प्राप्ते अप इत्यत्र प शब्दस्य पदान्तस्यानाभावविधानम्। तवेत्प्रत्यबृहति इति तवेदुष इत्यत्र वेशब्दात्परस्य तकारस्य लोपविधानम्। तृतीयादिन्यामित्यादिना सर्वपदान्तानामाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति उदुस्रिया इत्यत्र उकारस्याभावविधानम्।।

3. बृहत्-औहोइमाउवान्दिविष्टयाऽ3ए।। अगतिस्तोभस्येत्या-दिनाद्यायामगतिः। तृतीयादिन्यामित्यादिना आभावे प्राप्ते उवर्णन्तु न सर्वत्र आभवतीति सूनृतावत इत्यत्र नृशब्दस्यानाभार्वः। हति कृष्टादित्यनेन बृहति कृष्टात्परस्याक्षरस्य वृद्धिप्राप्ते अवृद्धं श्येने नजिग्यु यंवो इति सोम्यमित्यत्रयं शब्दस्यावृद्धिविधानम्। सोमाम्मध्वित्यत्र उस्थस्य उकारप्रत्यये आउभावविधानम्। वि इति उकारस्य सप्तम्येकवचनम्।।

4. बृहत्-औहोअग्नेविवस्वदुषसाऽ3ए।। अग्ने बृहतिशुषे श्विभ्यां प्र। अगतिस्तोभस्येत्यादिनात्र सर्वासु स्तोत्रीयास्वगतिः। रङ्गो बृहतीति अग्ने बृहति जुष्ट इति तृतीयादिन्यामित्यादिना सर्वपदान्तानामाभावे प्राप्ते अद्यादेवमित्यत्र वं शब्दस्य जुष्ट इत्यत्र ष्ट शब्दस्य चानाभावविधानम्। सजूरग्ने बृहतीति उकारस्य औहोवायां प्रत्यये ग्रहणैर्विसर्गलोप इत्यनेन सजूरित्यत्र जूशब्दात्परस्य विसर्जनीयस्य औहोवायां प्रत्यये लोपविधानम्। आशब्दस्य तृतीयादिन्यामि-त्यादिनाभावे प्राप्ते उवर्णन्तु न सर्वत्राभवतीति अनेनाभावः। हतिकृष्टादिति कृष्टात्परं सर्वत्र वृद्धिप्राप्ते अवृद्धं श्येने नजिग्युयंवो इत्यत्र श्ये शब्दस्यावृद्धिविधानम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

